CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Q/13a

Part I

Ādhikaraṇas 1-2

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

TRIVANDRUM SANSKRIT SERIES

No. LXXIX.

कौटलीयम्

अर्थशास्त्रं

महामहोपाध्यायगणपतिशास्त्रिविरचितश्रीमूलाख्य-
व्याख्योपेतम् ।

प्रथमः सम्पुटः—प्रथमद्वितीयाधिकरणे ।

THE

ARTHASÂSTRA

OF

KAUTALYA

with the commentary Srîmûla of

MAHÂMAHOPÂDHYÂYA

T. GAṆAPATI SASTRI.

HONORARY MEMBER OF THE ROYAL ASIATIC SOCIETY OF GREAT BRITAIN AND IRELAND,

Curator of the Department for the Publication of Sanskrit Manuscripts, Trivandrum.

EDITED BY THE COMMENTATOR

Part I.—1 & 2 Adhikaraṇas.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,

1924.

[The copyright in the text and in the first edition of the Commentary in Sanskrit is reserved with the Government of Travancore. All other rights in the commentary are reserved with the author thereof.]

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

STATE MUSEUM, LUCKNOW
LIBRARY

Acc. No. ______

Book No. ______

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

9/13a

To My August Sovereign,

COLONEL HIS HIGHNESS,

Sri Mula Rama Varma,

G. C. S. I., G. C. I. E.,

KULASEKHARA KIRITAPATI,

Whose Auspicious Rule

Has surpassed

In Beneficence, Wisdom and Prosperity,

The record

Of even the Narendra of Kautalya,

I Dedicate,

By Gracious Permission,

This edition of the renowned Arthasastra

Of the illustrious Sage,

Whose pre-eminence in every Sastra

Was only equalled

By his transcendent Skill

As Administrator, Reformer and Statesman,

Along with my Bhâshya

SriMûlam.

[The copy…
mentary…
Travanco…
served with the…

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

891.29

TRIVANDRUM SANSKRIT SERIES

No. LXXIX.

THE

ARTHASÂSTRA

OF

KAUTALYA

with the commentary Srîmûla of

MAHÂMAHOPÂDHYÂYA

T. GAṆAPATI SÁSTRÍ,

HONORARY MEMBER OF THE ROYAL ASIATIC SOCIETY OF GREAT BRITAIN AND IRELAND,

Curator of the Department for the Publication of Sanskrit Manuscripts, Trivandrum.

EDITED BY THE COMMENTATOR.

Part I—1 & 2 Adhikaranas.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

MOTI LAL BANARSI DAS BOOK-SELLERS LAHORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1924.

[*The copyright in the text and in the first edition of the Commentary in Sanskrit is reserved with the Government of Travancore. All other rights in the commentary are reserved with the author thereof.*]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ७९.

कौटलीयम्

अर्थशास्त्रं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
लण्डनपुरस्थराजकीयैष्याखण्डीयविद्यासेवकसमाजपूज्यसभ्यपदभाजा
महामहोपाध्यायेन
त. गणपतिशास्त्रिणा
विरचितया श्रीमूलाख्यया व्याख्यया
समुपेतं
तेनैव संशोधितम् ।

प्रथमः सम्पुटः — प्रथमद्वितीयाधिकरणे ।

तच्च
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः १०९९, क्रैस्ताब्दाः १९२५.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

INTRODUCTION.

1. Necessity for an improved edition of the Arthasāstra of Kautalya.

It gives me great pleasure to announce that the Trivandrum Sanskrit Series has now been enriched by the addition of the important work, the Arthasāstra of Kauṭalya. An edition of this work based on a single manuscript was first brought out in the year 1909 by Mr. Shāma Sāstrī B. A., PH. D., in the Mysore Government Sanskrit Series. When I read through it with an amount of concentration which the rareness and the merit of the work would demand, I found it abounded with errors, such as, the word of a previous sentence joined to a subsequent sentence and vice versa. The work has apparently a simple style and a choice vocabulary, but the nature of the subjects dealt with is such that even a talented pandit cannot hope to easily understand it. What then will be the condition if it contains errors too? It then struck me that a fresh edition, based on sufficient manuscript materials, was indispensable.

2. Acquisition of new manuscripts.

Accordingly, I made a search for new manuscripts and lighted upon two palm-leaf manuscripts of the work among a large number of other important works, in the library of Swāmiar Maṭham at Thiruppārpu near Kottayam in North Travancore. They are complete and written in Malayalam characters and almost free from errors. One of them, marked क in this edition, appears to be three or four centuries old and many of its leaves are either extremely decayed or missing. The other marked ख is a recent manuscript and is about a century old. The Madras Government Oriental manuscripts Library also contains two manuscripts, one being an almost correct copy of a palm-leaf manuscript in Malayalam characters belonging to the Raja of Edappalli in the Travancore State, while the other in Telugu characters, transcribed from an incorrect Telugu manuscript beginning from the 7th prakarana in the Kanṭakasodhana Adhikarana. These two are marked ग and घ respectively and variants have been taken from them. A fifth manuscript copy also was found to exist in the Government Mss. Library Cochin, but this was even more worn-out than the manuscript क. It bears striking resemblances to the latter in respect of size,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

characters and hand-writing. But in view of its exceedingly decayed condition, I have not made use of it.

3. Necessity for adding a commentary to the text.

When I set about revising the text with the help of these materials, I heard that Mr. Shāma Sāstrī had rendered his edition into English. I obtained a copy of it in order to see whether it would be of any use to my edition. But it seemed to me that many passages were not correctly translated. For example:

"मर्यादां स्थापयेदाचार्यानमात्यान् वा य एनमपायस्थानेभ्यो वारयेयुः, छाया-नालिकाप्रतोदेन वा रहसि प्रमाद्यन्तमभितुदेयुः ॥"

(1-अधि. 7-अध्या.)

After giving general instruction in regard to some of the duties of Kings, Kauṭalya mentions in the above passage the supreme duty of making Āchāryas and ministers a barrier, as it were, of the Kings. The meaning of the passage is, that a King should appoint, as a barrier, either Achāryas or Ministers who would boldly and effectively check him whenever he shows inclination to stray away from the path of righteousness. Here, Kauṭalya gives expression to a noble conception of Government, the summum bonum of the subjects, namely, a King, though he has control over all his subjects, should appoint certain persons who would keep him under control. Mr. Shāma Sāstrī has taken the passage in quite a different sense. He renders it thus: "those teachers and ministers who keep him from falling a prey to dangers, and who, by striking the hours of the day as determined by measuring shadows warn him of his careless proceedings even in secret shall invariably be respected." I do not see how this meaning was made out. If the word मर्यादा is taken as meaning 'respect' in Sanskrit as it does colloquially in Tamil, Telugu and Canarese, those who study the Arthaśāstra will not grasp the real meaning and perceive the noble conception of Āchārya Kauṭalya. Now, it appeared to me that the purification of the text alone will not suffice, that the meaning has also to be preserved from misinterpretations and, to attain this object, a commentary should also be added to the text.

4. Fragments of ancient commentaries secured.

After a persistent search, I obtained manuscripts of two commentaries from the Madras Government Oriental library. One of them was a fragmentary copy of a learned Sanskrit commentary, called Pratipadapanchikā by Bhaṭṭasvāmin,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

containing the portion from the 8th to the last chapter of the second adhikaraṇa only. The other contained a portion of a commentary known as Nayachandrikā by Mādhava-yajvan from the 7th Adhyāya in the 7th adhikaraṇa up to a portion of the 4th adhyāya in the 12th adhikaraṇa. Their source appears to be a palm-leaf manuscript belonging to the Kerala country. But they were so full of errors and gaps that it seemed a hopeless task to make anything out of them without the help of better manuscripts. In these circumstances and as there appeared to be no chance of discovering other manuscripts, I did not think it advisable to send the fragments to the press. But I worked at them strenuously and understood the text-portions handled therein. Besides, a palm-leaf manuscript of an ancient Malayalam version of the Arthasāstra on the line of Bhaṭṭasvāmin's commentary was found to exist in the Palace Library. It runs up to the end of the 7th adhikaraṇa and appears to be about two or three centuries old. An exactly similar copy was also found in the Madras Government Oriental Manuscript Library and I had occasion to make use of it. But the copies of the Malayalam version were defective, containing omissions of many passages, of even five or six chapters consecutively in one place; yet they were of considerable help to me in determining the correct readings and in understanding the text. These were all the materials I had the good fortune to collect.

The work teems with several topics, which, owing to their technical character, can be grasped only with the help of traditional instructions or commentaries. In the absence of these materials, our ignorance in regard to many topics would be perpetual.

5. Preparation of a new commentary.

When the meaning of the text was somewhat grasped after spending many laborious days over the materials, the desire arose in me to place it before the public. Since no ancient commentary in its publishable shape is available, I thought of writing one of my own and wrote it on the method of the ancient commentaries. I have given my commentary the significant name of "Srīmūlam"—literally, the source of prosperity—after the name of His Highness the Mahā Rāja of Travancore Srī Mūlam Tirunāl, whose enlightened patronage has ever been the pole-star in my literary enterprises. The text along with the commentary is now being printed.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

6. Distinguishing features of the new edition.

In the present edition, the text has undergone a scrutinising search in the light of the new materials and consequently, it can be said to have assumed quite a new shape. Variant readings in good numbers and of considerable importance, that are not seen in the Mysore edition, have been inserted while spurious ones are all eliminated and other errors rectified. Such of the variants that have special import to convey are dealt with in the commentary. Improvements of this nature will be obvious from a perusal of the text and the commentary.

7. The book divided into three parts.

The text together with the commentary has grown bulky and it is therefore proposed to issue it in three parts. The first is now issued; the second and the third will follow in due time.

There are 15 adhikaraṇas in this work and the first part contains the first two adhikaraṇas. The next six adhikaraṇas will go to form the second part and the rest the third. The first adhikaraṇa known as वैनयिकाधिकरण consists of 21 chapters and the second अध्यक्षप्रचाराधिकरण is made up of 36 chapters. The contents of these two adhikaraṇas are given in the list attached to this part.

8. Kauṭalya and his other names

The author of this work is the venerable āchārya, known by the three names, Kauṭalya, Chāṇakya and Vishṇugupta. He was called Kauṭalya having been born in Kuṭala Gotra and Chāṇakya after his native land Chaṇaka. The name Vishṇugupta "protected by Vishṇu"—was given him by his father during the nāmakaraṇa ceremony. Kautilya (इकारमध्य) is certainly a misnomer. For, neither the term Kauṭilya nor its root Kuṭila is explained in Nighaṇṭus as Gotrarishi and crooked. On the other hand, the word Kuṭala is mentioned by Kesavasvāmin in his Nānārthārṇavasaṁkshepa as meaning both Gotrarishi and an ornament—

"अथ स्यात् कुटलो गोत्रकृत्यृषौ पुंसि नप् पुनः ।

विद्यादाभरणेऽथ त्रिः कुटिलं कुञ्चिते भवेत् ।

तगरे क्ली तगरपादिकायां स्त्रियामिति ॥"

From this it is clear that Kauṭalya is the correct name having for its root Kuṭala. It is further corroborated by the fact that all the manuscripts of the text and the commentaries noticed before, read throughout as Kauṭalya and not

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Kauṭilya. But the mistake was observed and corrected by me only after the first 40 pages were printed.

History has it that Āchārya Kautalya, having been slighted by the Nandas, overthrew them and placed Chandragupta Maurya on the throne of the Magadha empire. The Archæological researches of India have shown that Chandragupta reigned from 321—298 B. C. and Kāmandaka and other later writers on Indian polity refer to Kautalya and his Arthasastra as authority for their works.

9. Date of Kautalya.

It may be said that Visvarūpāchārya alias Suresvarāchārya, a disciple of the great Sankarāchārya, does not mention Kautalya and his Arthasāstra when dealing with topics relating to Arthasāstra in his commentary, Bālakrīdā, on the Yājnavalkyasmriti (T. S. S. No. 74). But, from this, it must not be hazarded that either Kautalya was not earlier than Visvarūpa or unknown to the latter. For, though Visvarūpa knew the Arthasāstra of Kautalya, there are grounds to justify his omission to make mention of it, as will be seen from the following quotation from my introduction to the Bālakrīdā:—

"It is, however, a special feature of the Bālakrīdā evidencing to its high antiquity as well as its author's regard for ancient works, that among the multitude of works and authors that it cites as authority, there is none that is generally assigned to the Christian era, but all of them, being Vedic works and Smritis of the Vedic type and their authors, belong to the centuries that preceded Christ. Then again, when context required quotations from an authority on the Arthasāstra, our author does not resort to Kautalya but to Brihaspati* and Visālāksha, the predecessors of Kautalya, as is seen from the following:—

* A manuscript of the work called Bārhaspatyasūtra exists in our possession and also in the Government Oriental Mss. Library Madras; and it has recently been published in Devanagari characters, in Lahore. I doubt whether that work is the Arthasāstra of Brihaspati quoted by Kautalya. For, no subject of importance pertaining to Arthasāstra is dealt with in it; its merit as a literary composition is of a poor order and the present quotations from Brihaspati are not also found in it. Besides, while Kautalya says that, according to the school of Brihaspati, the Vidyas are two viz., Vārta and Dandanīti, "वार्ता दण्डनीतिश्चेति बार्हस्पत्याः" (Vainayikadhikārika, Adhyaya 2) the statement "दण्डनीतिरेका विद्या" found in the published Bārhaspatyasūtra is a point not in favour of its authenticity. But probably it is a work of trifling interest having a few maxims gathered mainly from the Arthasāstra of Brihaspati; just like the small work which, with some moral sayings of the Arthasāstra of Kautalya, goes by the name of Chāṇakyanīti or Chāṇakyasutra and is published as a work of Chāṇakya.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

"यदाह बृहस्पतिः—'स्वधर्मविदनुरक्तः शुचिरनुद्धत उद्युक्तो देशकालविधीतिनिगमेतिहासकुशलोऽव्यसनी मृदुरर्थशास्त्रकृतयोग्यो हस्त्यश्वपुरुषाचाराहोरात्रयामनिर्गमाविनिश्चितमातिश्च स्वपरबलबलाबलज्ञो बलाधिकृतः सेनापतिः स्यात्। कुलाढ्य उद्युक्तो मृदुरुदात्तः समरश्चित्तः शूरोऽनुरक्तोऽभेद्यः पत्तिविशेषज्ञ इङ्गिताकारकुशलः प्रतिहारः स्यात् । वनकुलकालजातिसात्म्यगुणवयःशीलायुरादानगमनकल्पनावान्व्यपगतभयो विजयोर्जितमना हस्त्यध्यक्षः स्यात् । क्षेत्रजातिसात्म्यगुणलक्षणवाहनाख्यज्ञोऽत्यर्थसमर्थः शुचिरनुद्धतोऽनुरूपोऽश्वाध्यक्षः स्यात् । सन्धिभेदसन्धानस्थानज्ञोऽनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालज्ञो दर्शनीयो नीतिगतिज्ञः प्राज्ञो वाग्मी दूतः स्यात्। उभयत उत्तमवंशप्रभवः शुद्धो मनुबृहस्पत्युशनःशास्त्रविद् दण्डनीत्यादिकुशलोऽशठोऽजिह्मः सम्मानासम्मानाविकृतो विगतभीः कार्याकार्यविनिश्चितमतिरहार्यः सर्वोपधाशुद्धो गूढमन्त्रो मन्त्री स्यात्। अविकार्योऽविकलेन्द्रियः प्रतापवान् सुभगः सुमुखोऽकृपणोऽप्रमादी दक्षो दाक्षिण्यचारित्ररक्षणार्थमधिकरणसन्दिग्धविवेककृदुपरिकः स्यात्। इति।" (Yājnavalkya Adhyāya I, Sloka 307).

तथाच बृहस्पतिः—'ब्रह्मशङ्खस्तुतिपुण्याहशब्दैर्विबुध्योत्थाय सन्ध्यामुपास्य देवपितृब्राह्मणान् मनसा वा नमस्कृत्य धर्मार्थकामभयोपधाशुद्धावञ्चकगृहीतायुधायातयामविश्वासोत्पन्नासक्षपरिवृतः' इति" (Yājnavalkya Adhyāya I, Sloka 323).

"एवञ्च विशालाक्षः—

वन्यान् वनगतैर्नित्यं मण्डलस्थांस्तथाविधैः।
चारैरालोच्य सत्कुर्याज्जिगीषुर्दूरदीर्घदृक् ॥"

(Yājnavalkya Adhyāya I, Sloka 328).

This, I think, is quite as it should be. For it is the proper practice of a commentator that he should supply deficiencies in the statements of an author, advisedly left out to be learnt from other sources, by having recourse to those writers who are known either as ancient or as contemporary authority to the author himself, but not to those that are posterior to the author. Visvarūpāchārya must have taken the Arthasāstra of Brihaspati and Visālāksha to be Ārsha works known to Yājnavalkya and therefore quoted from them to supplement Yājnavalkya's statements, but not from Kauṭalya who was posterior to Yājnavalkya. And as for the fact that Kauṭalya was later than Yājnavalkya there need be no shadow of doubt. When dealing with Pratilomajaputras i. e. sons begotten by men of lower through women of higher castes, Kauṭalya defines Sūta as a son begotten by a Kshatriya through a Brāhmaṇa woman and Māgadha as a son begotten by a Vaisya through a Kshatriya woman, and hastens to restrict the application of

* Brihaspati mentions his name in his work as does Kauṭalya.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

his definition in the case of Sūta of Puranic celebrity, and Māgadha the Panegyrist, both sprung up from the holy sacrificial ground of the king Prithu, by way of saying 'पौराणिकस्त्वन्यः सूतो मागधश्च ब्रह्मक्षत्राद् विशेषतः'. (Kauṭalya Adhyāya-64). This means that Sūta otherwise known as Romaharshaṇa who narrated the Puranas to Saunaka and Māgadha who is mentioned along with Sūta in the Puranas, are distinct from Sūta and Māgadha born in the inverse order of castes; and that both of them excel the Brāhmaṇas and Kshatriyas in purity of birth. This is quite in keeping with the Puranas which state,

'हस्ते तु दक्षिणे तस्य दृष्ट्वा चक्रं पितामहः ।
विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ ॥
तस्यैव जातमात्रस्य यज्ञे पैतामहे शुभे ।
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामते! ॥
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ॥'

(Vishṇu Purāṇa, Amsa I Chap. 13).

'ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति ।
पृषदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः ॥
वक्ता वेदादिशास्त्राणां त्रिकालामलधर्मवित् ।'

(Agni Purāṇa Chap. I).

'त्वया सूत ! महाबुद्धे! भगवान् ब्रह्मवित्तमः ।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः ॥
त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति ।
सम्भूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः ॥'

(Kaurma Purāṇa Chap. I).

That is Sūta of Puranic celebrity, the pupil of Vyāsa, not being born of the womb of a mother, was far above the Sūta of the Pratilomaja class and he was a Brāhmaṇa and an incarnation of God. Hence it is possible to infer that Kautalya otherwise known as Chāṇakya knew well of Sūta, the Puranas as well as their wide celebrity. It is certain, therefore, that centuries must have intervened between Sūta and Kauṭalya before the latter could have believed in the works of Sūta as Puranas of archaic celebrity. When it is said that Sūta flourished centuries before Kauṭalya, it naturally follows that Yājnavalkya (or a pupil of his), the author of the smriti, who studied his Yājurveda under Vaisampāyana, a contemporary of Sūta, also lived long before Kauṭalya.

And accordingly we see that Kauṭalya reveals his high regard for and acquaintance with the Yājnavalkyasmriti by

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

adopting it *ad verbum*, *ad sensum* as well as by explaining and supplementing it when the latter treats of Sāhasadandas in the second Adhyāya. The following are quoted here as instances. Here is a sloka from the Yājnavalkyasmriti:—

'करपाददतो भङ्गे छेदने कर्णनासयोः ।
मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा ॥'

and a sentence of similar nature from Kauṭalya is this:—

मृतकल्पमशोणितं घ्नतो हस्तपादपाराञ्चिकं वा कुर्वतः पूर्वः साहसदण्डः । पाणिपाददन्तभङ्गे कर्णनासाच्छेदने व्रणविदारणे चान्यत्र दुष्टव्रणेभ्यः ।'

(Dharmasthīya Adhyāya 19).

Here are other slokas from the Yājnavalkyasmriti:—

'स्वच्छन्दविधवागामी विक्रुष्टेऽनभिधावकः ।
अकारणे च विक्रोष्टा चण्डालश्चोत्तमान् स्पृशन् ॥
शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः ।
अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् ॥
वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत् ।
साधारणस्यापलापी दासीगर्भविनाशकृत् ॥
पितापुत्रस्वसृभ्रातृदम्पत्याचार्यशिष्यकाः ।
एषामपतितान्योन्यत्यागी च शतदण्डभाक् ॥'

The following are the parallel sentences from Kauṭalya:—

'विधवां छन्दवासिनीं प्रसह्याधिचरतः, चण्डालस्यार्यान् स्पृशतः, प्रत्यासन्नमापद्यनभिधावतो, निष्कारणमभिधावनं कुर्वतः शत्याः (दण्डाः) ।

शाक्यजीवकादीन् देवपितृकार्येषु भोजयतः शत्यो दण्डः ।

शपथवाक्यानुयोगमनिसृष्टं कुर्वतो, युक्तकर्मणि चायुक्तस्य, क्षुद्रपशुवृषाणां पुंस्त्वोपघातिनो, दास्या गर्भमौषधेन पातयतश्च, पूर्वः साहसदण्डः ।

पितापुत्रयोर्दम्पत्योर्भ्रातृभगिन्योर्मातुलभागिनेययोः शिष्याचार्ययोर्वा परस्परमपतितं त्यजतः स्वार्थाभिप्रयातं ग्राममध्ये वा त्यजतः पूर्वः साहसदण्डः, कान्तारे मध्यमः ।'

(Dharmasthīya Adhyāya 20).

Compare one more instance from the Smriti:—

'अबन्ध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति ।
अप्राप्तव्यवहारं च स दाप्यो दमसुत्तमम् ॥'

with Kauṭalya's,

पुरुषमबन्धनीयं बध्नतो बन्धयतो बद्धं वा मोक्षयतो बालमप्राप्तव्यवहारं बध्नतो बन्धयतो वा सहस्रदण्डाः ।'

(Dharmasthīya Adhyāya 20).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

It can be clearly seen from the above quotations of Kauṭalya that the words in black alone are his own and that the rest are the same as those found in the Smriti. The word स्वच्छन्द in the line स्वच्छन्दविधवागामी is an adverb and means "of one's own accord but not with the consent of Vidhavā", while च्छन्दवासिनीम् in Kauṭalya means छन्देन वसन्तीम् that is, remaining taciturn without feeling lustful. When Kauṭalya says शपथवाक्यानुयोगमनिसृष्टं कुर्वतः, we should not take it to be anything other than his comments on अयुक्तं शपथं कुर्वन् of the Smriti. शपथवाक्यानुयोग means the demand of judges for statements on oath from witnesses and others. It is निसृष्ट i. e., permissible for Judges, they being authorised in it for the conduct of judicial investigations. What is निसृष्ट for one is also युक्त i. e., a right for the same, as it comes within the sphere of one's duties or as it is worthy of being done by the same. While for others it is अनिसृष्ट and अयुक्त as it does not come within the sphere of their duties or as it is not worthy of being done by them. It follows from this that the words निसृष्ट, युक्त, स्वाधिकारविषय and अनुष्ठानार्ह are of the same meaning as also the words अनिसृष्ट, अयुक्त, स्वाधिकाराविषय, and अनुष्ठानानर्ह are, contrarily. And in the opinion of Kauṭalya this unauthorised demand for statements on oath is what is meant by the word शपथ of the Smriti. But the Mitāksharā gives quite a different interpretation of the passage without consulting Kauṭalya on the point.

Similarly, we should explain the sentences अयोग्यो योग्यकर्मकृत् and युक्तकर्मणि चायुक्तस्य to be of the same meaning. योग or नियोग means a privilege and one having योग is युक्त and one deserving of योग is योग्य. Thus the difference between योग्य and युक्त is but nominal and both really mean the same thing."

Again, Yājnavalkya omits to mention the punishment for throwing filth such as urine, dung etc upon others, but his commentator, Visvarūpa, tells us that the word निष्ठ्यूत in 'अमेध्यपार्ष्णिनिष्ठ्यतस्पर्शने द्विगुणः स्मृतः' (याज्ञवल्क्य. अध्या. २. श्लो० २१८.) is indicative of and includes also the urine, dung etc. And, what the word निष्ठ्यूत indicates, Kauṭalya expresses explicitly in 'तैरेवामेध्यैः पादष्ठीविकायां च षट्पणः । छर्दिमूत्रपुरीषादिभिर्द्वादशपणः ।' Thus, it is evident that Kauṭalya was indebted to the Smritis and his position in respect of the Smritis was that of a commentator. It, therefore, follows that the contention, namely Yājnavalkya is posterior to Kauṭalya, is untenable.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

10. Other works of Kauṭalya.

It is clear, from a perusal of the Arthasāstra, that Kauṭalya was a master in the varied fields of knowledge, and that he was the possessor of an intuitive vision. Hence, it is not improbable that he should have tried his hand on other Sastras too. We know that the commentator, Bhattasvāmin, has referred to a work called Dhātu-Kauṭalya in the Ākarakarmāntapravartana and Varāhamihira quotes him in the Brihatsamhitā thus:—

'अप्यर्णवस्य पुरुषः प्रतरन् कदाचि-
दासादयेदनिलवेगवशेन पारम् ।
न त्वस्य कालपुरुषाख्यमहार्णवस्य
गच्छेत् कदाचिदनृषिर्मनसापि पारम् ॥'

(Part I. p. 68).

Besides, the author of the commentary, Jayamangala, on the Vātsyāyanā Kāmasūtra, commenting on म्लेच्छितविकल्प refers to a work of Kautalīya—

"तद् यथा कौटलीयं—
दादेः क्षान्तस्य कादेश्च स्वरयोरुभयोरपि ।
बिन्दूष्मणोर्विपर्यासाद् दुर्बोधमिति संज्ञितम् ॥"

11. Archaic usages.

There are some archaic usages in the work such as पश्चाहः उभयतोरात्रम् and these are reserved for consideration in the last part of the work.

12. Predecessors of Kautalya.

Kautalya often refers to his predecessors in the field whose names are as follow:—

(1) Mānavas (the followers of Manu).
(2) Bārhaspatyas (the followers of Brihaspati).
(3) Ousanasas (the followers of Sukra).
(4) Bhāradvāja (Dronāchārya).
(5) Visālāksha.
(6) Parāsara (प्रसिद्धः).
(7) Pisuna (Nārada).
(8) Kauṇapadanta (Bhīshma).
(9) Vātavyādhi (Uddhava).
(10) Bāhudantīputra (Indra).

Among these ten founders of the school of Arthasāstra, nothing particular is known about Visālāksha, but passages from his Arthasāstra, cited by Visvarūpa, have already been given.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

13. Arthasāstra, a glorious work.

The Arthasāstra describes a method of Government by which a king should rule for the welfare of his millions of subjects, just as a learned householder, treading the path of virtue, alert in the performance of his duties, ever cautious and dexterous in preventing the treachery of his enemies, works so ably for the well-being of his own family. There is no legitimate taxation of the subjects, no fair distribution of wealth, which is not touched upon in this work. Kautalya advocates a system of watching the conduct of the subjects as well as of officers of grades and of meting out punishment to them when found guilty, which will tend to prevent quarrels between subjects, oppressions by officers and courtiers and seditious propaganda. The institution of espionage is mentioned as the life-blood of Government, a means to ascertain the purity or impurity in the conduct of all subjects. To be brief, protection of one's own Kingdom first and when that is ensured, enterprise for the acquisition of enemies' territories—this is the sum-total of the duties of a king and the best methods of achieving it are discussed fully in the work. In all respects, the Arthasāstra of Kauṭalya surpasses all other similar sastraic works and we are led to infer that the Government of the ancient kings in India, based on the principles of Kauṭalya, existed for the ultimate benefit of the governed and excited universal admiration.

The publication of an adequate English rendering of the Arthasāstra, which would be in accord with the correct interpretations proposed in the commentary now presented to the world, and which would illustrate the text by abundance of historical notes, will prove a very real boon to the cause of the study of Indian polity. I have hopes that the task will be undertaken and accomplished in the not distant future, by a scholarly friend, who has given many years to the study of the Arthasāstra.

Trivandrum, 4-6-1923. } T. GAṆAPATI SĀSTRI.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपोद्घातः ।

दिष्ट्या वर्धते अनन्तशयनसंस्कृतग्रन्थावलिरियम् अर्थशास्त्रस्य कौटलीयस्य सम्यक्संशोधनादिप्रत्यग्रसमुचितप्रतिकर्मसम्पद्योगसुखोपयोज्यतां नीतस्य चिरादात्मनि ग्रथनमासादयन्ती ।

१. अर्थशास्त्रस्य संशोधनावश्यकता ।

अर्थशास्त्रं नामेदं हस्तलिखितैकादर्शाश्रये श्रीमति शामशास्त्रिणि शोधके **मैसूर**राजकीयग्रन्थमालायां १९०९ तमे क्रैस्ताब्दे प्रथमं प्रकाशितमासीत् ! अपूर्वं ग्रन्थरत्नमित्यास्थोद्रेकप्रगुणितावधानचेतसा तस्मिन् मया सपदि परिशीलिते बह्व्यः पाठाशुद्धय उपलब्धाः, पूर्ववाक्ययोज्यस्य पदस्योत्तरवाक्येन सह योजनमुत्तरवाक्ययोज्यस्य पूर्ववाक्येन सह योजनमित्येवञ्जातीयं च बहुशो दृष्टम् । ललितोचितपदवाक्यरचनरुचिरोऽप्ययं शास्त्रग्रन्थः प्रमेयमाहात्म्यात् पण्डितेनाप्यभियोगवता दुरवबोधार्थः; सोऽपि चेदशुद्धपाठः का वार्तेति चिन्तयतो मे तदैवाङ्कुरितः कश्चिदभिप्रायः — अर्थशास्त्रस्यानेकादर्शसंवादनेन मूलं सम्यक् शोधयित्वा मुद्रयेयं, कथमन्यथा ग्रन्थस्याविकृतं स्वरूपं कृतरक्षं स्यादिति ।

२. नवादर्शार्जनम् ।

तत आदर्शान् प्रयत्नतो विचिन्वता एतद्राज्यान्तर्गततिरुपार्पुप्रदेशवर्तिनो **यतीन्द्रमठस्य** ग्रन्थालयाज्जराजर्जरमहार्घनानाग्रन्थावतंसिताद् द्वौ **अर्थशास्त्रस्य** कौटलीयस्य समग्रौ तालपत्रादर्शौ केरलीयलिपी शुद्धप्रायौ मया समासादितौ । तयोरेकः जीर्णत्रुटितबहुपत्रः त्रिचतुरशतवर्षवृद्धप्रेक्षणीयः क.संज्ञः, अन्य उपशतवर्षदेशीयो दृढपत्रः ख.संज्ञः । मद्रास्राजकीयहस्तलिपिग्रन्थसंग्रहे च द्वावादर्शौ दृष्टौ, ययोरेक एतद्राज्यान्तर्गतेटप्पळ्ळिराजभवनसम्बन्धिकेरलीयलिपितालपत्रग्रन्थात् प्रतिरूपितः समग्रः शुद्धप्रायः, अपर आन्ध्रलिपिग्रन्थादशुद्धप्रायात् कुतश्चित् प्रतिरूपित आन्ध्रलिपिः कण्टकशोधनाधिकरणीयसप्तमप्रकरणोपक्रमः । आभ्यां ग. घ. संज्ञाभ्यां पाठभेदाः सर्वे पृथगुच्चित्य संगृहीताः । पञ्चमोऽपि कश्चिदादर्शः कोच्चिराजकीयग्रन्थशालायां दृष्टः । किन्तु सोऽस्म-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दीयस्य क-संज्ञादर्शस्य ज्येष्ठो लिप्याकृतिपरिमाणैः समान एकहस्तलिपिकरः प्रतिपत्रत्रुटितभूयिष्ठांशः स्पर्शासह उपयोगाक्षम इत्युपेक्षणीयः संवृत्तः ।

इमामादर्शसम्पदमवष्टभ्यारब्धे कौटलीयस्य मया संशोधने कापि वार्ता समाकर्णिता — कौटलीयस्य नाम मैसूरराजकीयग्रन्थमालायां प्रकाशितस्वरूपस्य शोधकः कमप्याङ्गलभाषानुवादमपि प्रणीय प्रकाशितवानिति । समानीतश्चासौ आङ्गलभाषानुवादः, सोऽस्मद्यत्नस्य किञ्चिदुपकरिष्यतीत्याशया । किन्तु तस्योपोद्घातेऽनुवादकेन स्वयमेवोक्तं — नायं मूलस्याभिरूपोऽनुवाद इति । पुस्तके च बहवो मूलांशाः कृतसन्देहाङ्का एव दृष्टाः । अकृतसन्देहाङ्केष्वपि तेषु बहवोऽसम्यक्प्रकाशितार्था उपलब्धाः । तत्रैकमुदाहरणार्थं दर्शयामः —

१. व्याख्यानयोजनावश्यकता ।

अस्ति हि प्रथमाधिकरणस्य सप्तमाध्यायशेषे वाक्यं — "मर्यादां स्थापयेदाचार्यानमात्यान् वा य एनमपायस्थानेभ्यो वारयेयुः, छायानालिकाप्रतोदेन वा रहसि प्रमाद्यन्तमभितुदेयुः" इति । राजर्षिवृत्तस्य कांश्चित् प्रकारान् प्रथममभिधाय सर्वोत्कृष्टः प्रकारोऽनेन वाक्येनोपदिश्यते आचार्यामात्यमर्यादीकरणं नाम । उत्पथप्रसक्तमात्मानमनिवारिताः सन्तो ये वारयेयुः, तथाविधानाचार्यानमात्यांश्चात्मनो मर्यादामिव मर्यादाम् अलङ्घनस्थानं स्थापयेत् आत्मनो नियामकान् कल्पयेदिति तदर्थः । अर्थविशेषमीदृशमुपदिशताचार्येण राजा सर्वनियामकं सन्तमात्मानमपि नियन्तुं कांश्चिदवश्यमधिकारयेदित्येवंरूपः सर्वजनैकान्तहितः परमोदारः स्वाभिप्राय आविष्कृतो भवति । स एष वाक्यस्यार्थ आङ्गलभाषानुवादकेन नोपात्तः किन्त्वन्यथैवार्थः प्रतिपन्नः । स एवं ह्याह — 'आचार्यानमात्यान् वा पूजयेदि'ति । अयमर्थः केन पदेन कया वृत्त्या समर्पित इति न वयं विद्मः । यदि मर्यादाशब्दस्य कर्णाटद्रमिलान्ध्रादिभाषाव्यवहारगतबहुमानार्थत्वप्रसिद्धिविस्रम्भात् संस्कृतेऽपि बहुमानार्थत्वमुच्येत, हन्त तर्ह्यनुवादप्रमाणका व्युत्पित्सवः पदार्थमग्राहिताः स्युः, अभिप्रायमहिमानं च यथोक्तमाचार्यस्यानुवादभक्ता अग्राहिताः स्युः । अन्यदप्येवञ्जातीयमनुवादे बहु द्रष्टुं शक्यम् । तेनेयं मे बुद्धिरुत्पन्ना — कौटलीयस्य मूलशोधनमात्रेण न किञ्चित् कृतं स्यात्, अर्थोऽपि तस्या निदर्शितगुणाङ्गलभाषानुवादादिसुलभाभ्योऽन्यथाप्रतिपत्तिभ्यो रक्षणीय इति, अर्थाद् अर्थशास्त्रं व्याख्यानोपेतं कृत्वा प्रकाशयेयमिति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४. प्राचीनव्याख्यांशलाभः।

अथ कृते व्याख्याविचये प्रतिपदपञ्चिका नाम श्रीभट्टस्वामिप्रणीता प्रौढस्वभावा काचिद् व्याख्या द्वितीयाधिकरणाष्टमाध्यायादिस्तदधिकरणसमाप्त्यन्ता मद्रास्राजकीयग्रन्थशालातो लब्धा, अन्या च श्रीमाधवयज्वप्रणीता नयचन्द्रिकाख्या सप्तमाधिकरणीयसप्तमाध्यायादिर्द्वादशाधिकरणचतुर्थाध्यायैकदेशावसाना। उभे अप्येते केरलदेशलब्धजीर्णतालपत्रमातृकातः प्रतिरूपिते। अशुद्धयश्च तयोस्तथाविधाः, यथा मातृकान्तराण्यनुपजीव्य शोधयितुं न शक्याः, बहुलाश्च ताः। ग्रन्थपङ्क्तयश्च तयोर्बहुत्र परिलुप्ताः। अस्यामवस्थायां मातृकान्तरोपलम्भे च सम्भावनापदवीदवीयसि तयोः शिरःपादहृदयविकलयोर्व्याख्याखण्डयोर्मुद्रणं समीचीनं न भवेदिति नाद्दतम्। किन्तु मया तयोस्तीव्रमभियुञ्जानेन तत्तन्मूलार्था अवगन्तुं पारिताः। किञ्च, प्राचीनकेरलभाषात्मकः कश्चित् तालपत्रग्रन्थो द्वित्रशतवर्षवृद्धः कौटलीयार्थशास्त्रार्थप्रतिपादनपरो भट्टस्वाम्यनुयायी अत्रत्यराजकीयग्रन्थशालायां सप्तमाधिकरणावधिरुपलब्धः। यस्य सर्वात्मना सधर्मा मद्रास्राजकीयग्रन्थशालायामप्यादर्शोऽस्ति। यद्यप्ययमशुद्धोऽन्तरान्तरा गलितबहुवाक्यः पञ्चषाध्यायविकलश्च, तथापि तन्मूलार्थपरिज्ञानं प्रति मूलपाठनिश्चयं प्रति च स मे महान् सहायोऽभवत्। सेयमियती प्रमेयज्ञानसामग्री भाग्यवशात् समवहिता सम्पन्ना। अर्था नाम साम्प्रदायिकोपदेशैकसमधिगम्याः शास्त्रेऽस्मिन् बहुतराः। न चेदियती यथोक्ता सामग्री लब्धाभविष्यत्, तेष्वस्माकमान्ध्यं कतिपयेषु शाश्वतिकमेवाभविष्यत्।

५. नवव्याख्यानरचना।

तदेवम् उपलब्धेषु मूलकोशेषु व्याख्यांशेषु च चिराभियोगात् कथञ्चिदवगतोऽर्थशास्त्रस्य मूलार्थः। ततस्तस्मिन् व्युत्पित्सून् प्रति प्रकाशयितव्ये तं पुरातनव्याख्यावाक्यानामलाभादात्मगुम्फितैरेवोपलब्धप्राग्व्याख्यानच्छायानुजीविभिर्वाक्यैर्यथाप्रमाणं प्रकाशयेयमित्यभिसन्धिमान् अभूवम्। व्यरचयं च महता यत्नेन यथाभिसन्धि व्याख्यानम्।

मदीयस्य व्याख्यानप्रणयनसमुद्यमस्यारम्भे सफलत्वसम्पत्तौ च मद्रक्षकस्य महामहिम्नो वञ्चिमण्डलकिरीटपतेः श्रीमूलरामवर्ममहाराजस्य कृपैवैका श्रीपद्मनाभकृपानुकारिणी कारणमभवदिति कृत्वा व्याख्यानस्यास्य तन्नामधेय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्बन्धयुक्तं व्यपदेशं समुचितं मन्यमानः श्रीमूलमिति संज्ञां श्रियः सम्पदो मूलं व्याख्येयग्रन्थद्वारेणेत्यनुगतार्थामकार्षम् । अस्मन्महाराजो हि मूलनक्षत्रयुक्तकालजातत्वात् श्रीमूलाख्यया लोके प्रख्यायते । तेनानेन व्याख्यानेन समुपेतं कृत्वार्थशास्त्रमिदमिदानीं मुद्रयितुमुपक्रान्तम् ।

६. नवगतविशेषः ।

अस्य तु संशोधितस्य स्वरूपं संस्कारविशेषपरिग्रहात् प्रत्यग्रतामिव प्रतिपन्नम् । अत्र हि उपलब्धान् मूलादर्शान् व्याख्यांशान् भाषाटीकां चानुरुध्य पाठाः परीक्षिताः; मैसूरपुस्तकानुपलब्धा बहवः साधुपाठाः संयोजिताः, तद्दृष्टा अपपाठा निरस्ताः, अन्यच्च तद्दृष्टमसौष्ठवं परिहृतम् । अर्थवन्त आदर्शोपलब्धाः पाठभेदा व्याख्यायामुपादाय प्रदर्शिताः । एवञ्जातीयं सौष्ठवं मूलव्याख्ययोः परिशीलने सुबोधमिति न विविच्यते ।

७. सम्पुटविभागः ।

अस्य विपुलत्वात् त्रिभिः सम्पुटैः प्रकाशनमुचितमिति प्रथमोऽयं संपुट आदौ प्रकाश्यते । द्वितीयतृतीयौ च सम्पुटौ क्रमेण प्राकाश्यमचिराद् गमिष्यतः ।

पञ्चदशाधिकरण्यात्मकस्यार्थशास्त्रस्याद्यमधिकरणद्वयं प्रथमसम्पुटेऽस्मिन् निवेशितम् । ततः षडधिकरणी द्वितीयसम्पुटे, ततः सप्ताधिकरणी तृतीयसम्पुटे च निवेशयिष्यते । तत्र प्रथमं **वैनयिकाधिकरणम्** एकविंशत्यध्यायात्मकं, **द्वितीयमध्यक्षप्रचाराधिकरणं** षट्त्रिंशदध्यायात्मकम् । तद्गताश्च विषयाः प्रमेयानुक्रमण्यां समुद्दिष्टाः ।

८. कौटल्यादिसंज्ञाः ।

अस्य शास्त्रस्य प्रणेता तत्रभवान् आचार्यः **कौटल्यश्चाणक्यो विष्णुगुप्त** इति त्रिधा संज्ञायते । **कुटलो** नाम गोत्रप्रवर्तकर्षिः तस्य गोत्रापत्यं **कौटल्य** इति संज्ञा गोत्रनिबन्धना, **चणको** देशविशेषस्तत्सम्बन्धाच्चाणक्य इति देशनिबन्धना, विष्णुना गुप्तो रक्षित इत्यर्थिका विष्णुभक्तेन पित्रा नामकरणसंस्कारकाले कृता **विष्णुगुप्त** इत्येषा सांस्कारिकी संज्ञा । अत एवाह कामन्दकीयनीतिसारजयमङ्गला—"विष्णुगुप्तायेति सांस्कारिकी संज्ञा, चाणक्यः कौटल्य इति द्वे जन्मभूमिगोत्रनिबन्धने" इति । कौटिल्य इतीकारमध्योऽपपाठः, तस्य वा व्युत्पत्तिः कुटिलशब्दस्य वा गोत्रर्षिवक्रोभयार्थतायां अभिधानग्रन्थे क्वचिदप्यदर्शनात्, निरिकारस्य तु कुटलशब्दस्य गोत्रप्रवर्तकऋषिवाचकत्वस्य दर्शनात् । तथाच **नानार्थार्णवसंक्षेपे केशवस्वाम्याह**—

CC-0. Agamnigam Digital Presevation Foundation,, Chandigarh

"अथ स्यात् कुटलो गोत्रकृत्यृषौ पुंसि नपू पुनः ।
विद्यादाभरणेऽथ त्रिः कुटिलं कुञ्चिते भवेत् ॥
तगरे तु क्लीं तगरपादिकायां स्त्रियामिति ।" इति ।

अतः कुटलशब्दप्रकृतिकयञ्प्रत्ययान्त एवायं कौटल्यशब्द इति निर्णयः । अत एव सर्वेषु मूलादर्शेषु उपलब्धव्याख्यानांशेषु भाषाटीकायां च कौटल्य इत्येव निरिकाराः पाठा ऐकरूप्येण दृश्यन्ते, न तु कौटिल्य इतीकारमध्यः पाठः क्वचिदपि । स पुनरपपाठोऽन्धपरम्पराप्राप्तोऽस्यापि ग्रन्थसम्पुटस्य चत्वारिंशत्तमान्तेषु पत्रपृष्ठेष्वनवधानादापतितः । तत उपरिष्टात् तु साधुपाठ एव निवेशितः ।

९. कौटल्यस्य कालः ।

आचार्यचाणक्यो मगधेषु कुसुमपुरे स्वपरिभवामर्षी तदीश्वरान् नन्दानुन्मूल्य तदीये सिंहासने चन्द्रगुप्तमभिषिषेचेति हि प्रतीतमैतिह्यम् । तस्य चन्द्रगुप्तसमकालिकस्य जीवितसमयश्च क्रैस्तप्राचीना चतुर्थशताब्दी पुरावृत्तचिन्तकैरभ्यूहितः सुप्रसिद्धः । स्मरन्ति च ततोऽर्वाचीनाः कामन्दकादयस्तं च तदीयमर्थशास्त्रं च । किन्तु **विश्वरूपाचार्यः** श्रीशङ्करभगवत्पादशिष्यात् सुरेश्वराचार्यादनतिरिक्तः स्वप्रणीतायां याज्ञवल्क्यस्मृतिव्याख्यायां **बालक्रीडायाम्** (अनन्तशयनसंस्कृतग्रन्थावलिप्रकाशितायाम्) अर्थशास्त्रस्मरणप्रसङ्गे **कौटल्यं कौटलीयं** वा न स्मृतवान् । तावता **कौटलीयं** तत्पूर्वकालिकं न भवतीति वा तस्याविदितमिति वा न शक्यं शङ्कितुं, यस्माद् विदितस्यापि तस्यास्मरणे न्यायोऽस्माभिस्तदुपोद्घाते प्रदर्शितः । यथा—

"'अयं विशेष एको **बालक्रीडायाम**भिलक्ष्यते तज्जरत्तमत्वप्रत्यायकः तदीयजरत्तमग्रन्थैकभक्तत्वप्रत्यायकश्च, यत् क्रैस्तोत्तरकालभवः कश्चिद् ग्रन्थो ग्रन्थकारो वा नात्र स्मृतः, किन्तु क्रैस्तपूर्वकालभवा आम्नायाः स्मृतयः स्मर्तारस्तत्कल्पाश्चेत्येत एव नियमेन स्मृताः । तत्राप्यर्थशास्त्रस्मरणप्रसङ्गे **कौटलीयार्थशास्त्रं** नोदाहृतम्, अपितु कौटलयस्याप्युपजीव्यं **बार्हस्पत्यं वैशालाक्षं** चार्थशास्त्रमिहोदाहृतम् —

"यथाह बृहस्पतिः — 'स्वधर्मविदनुरक्तः शुचिरनुद्धत उद्युक्तो देशकालविन्नीतिनिगमेतिहासकुशलोऽव्यसनी मृदुरर्थशास्त्रकृतयोग्यो हस्त्यश्वपुरुषाचाराहोरात्रयामनिर्गमविनिश्चितमतिश्च स्वपरबलबलाबलज्ञो बलाधिकृतः सेनापतिः स्यात् । कुलाढ्य उद्युक्तो मृदुरुदात्तः समरचित्तः शूरोऽनुरक्तोऽभेद्यः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पात्तिविशेषज्ञ इङ्गिताकारकुशलः प्रतिहारः स्यात् । वनकुलकालजातिसात्म्यगुणवयःशीलायुरादानगमनकल्पनावान् व्यपगतभयो विजयोर्जितमना हस्त्यध्यक्षः स्यात् । क्षेत्रजातिसात्म्यगुणलक्षणवाहनास्त्रज्ञोऽत्यर्थसमर्थः शुचिरनुद्धतोऽनुरूपोऽश्वाध्यक्षः स्यात् । सन्धिभेदसन्धानस्थानज्ञोऽनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालज्ञो दर्शनीयो नीतिगतिज्ञः प्राज्ञो वाग्मी दूतः स्यात् । उभयत उत्तमवशप्रभवः शुद्धो मनुबृहस्पत्युशनःशास्त्रविद् दण्डनीत्यादिकुशलोऽशठोऽजिह्मः सम्मानासम्मानाविकृतो विगतभीः कार्याकार्यविनिश्चितमतिरहार्यः सर्वोपधाशुद्धो गूढमन्त्रो मन्त्री स्यात् । अविकार्योऽविकलेन्द्रियः प्रतापवान् सुभगः सुमुखोऽकृपणोऽप्रमादी दक्षो दाक्षिण्यचारित्ररक्षणार्थमधिकरणसन्दिग्धविवेककृदुपरिकः स्याद्' इति ।" (आचाराध्याये ३०७ तमश्लोकव्याख्यायाम्)

"तथाच बृहस्पतिः—'ब्रह्मशङ्खस्तुतिपुण्याहशब्दैर्विबुध्योत्थाय सन्ध्यामुपास्य देवपितृब्राह्मणान् मनसा वा नमस्कृत्य धर्मार्थकामभयोपधाशुद्धावञ्चकगृहीतायुधायातयामविश्वासोत्पन्नासन्नपरिवृतः' इति" । (आचाराध्याये ३२३ तमश्लोकव्याख्यायाम्)

"एवञ्च विशालाक्षः —

'वन्यान् वनगतैर्नित्यं मण्डलस्थांस्तथाविधैः ।
चारैरालोच्य सत्कुर्याज्जिगीषुर्दूरदीर्घदृक् ॥'

(आचाराध्याये ३२८ तमश्लोकव्याख्यायाम्)

इति च । युक्तं चैतत्—ग्रन्थे हि ग्रन्थान्तरसुग्रहत्वधियानुक्तमाकाङ्क्ष्यमाणमर्थं ग्रन्थकारप्रज्ञाततमाद् वयःप्रकृष्टात् समानवयसो वा ग्रन्थान्तरादुद्धृत्य व्याख्याता दर्शयितुमर्हति न तु तदर्वाचीनादिति सामुदाचारिको न्यायः । विश्वरूपाचार्यश्च बार्हस्पत्यं वैशालाक्षं चार्थशास्त्रं भगवता याज्ञवल्क्येन प्रज्ञातमार्षं ग्रन्थममन्यत; अतस्तदीयेनार्थेनार्थाकाङ्क्षां पूरितवान् । कौटलीयं तु तदर्वाक्कालभवं याज्ञवल्क्येनाप्रज्ञातमिति बुद्ध्या नोदाहृतवान् ।

न च कौटल्यस्य याज्ञवल्क्यादर्वाचीनत्वे कश्चित् सन्देहोऽस्ति । तथाहि—कौटल्यस्तावद् अर्थशास्त्रस्य चतुःषष्टितमाध्याये प्रतिलोमजपुत्रप्रस्तावे 'वैश्यात् क्षत्रियायां जातो मागधः, क्षत्रियाद् ब्राह्मण्यां जातः सूत' इत्युक्त्वा पृथुयज्ञभूम्युत्पन्नस्य पौराणिकस्य सूताख्यस्य मागधाख्यस्य च पृथुस्तुतिविधायिनः प्रतिलोमजत्वशङ्काप्राप्तिं मनसि कुर्वंस्तां परिहरति—पौराणिकस्त्वन्यः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सूतो मागधश्च ब्रह्मक्षत्राद्विशेषतः' इति । अस्यार्थः — पुराणप्रवक्ता **रोमहर्षणा**परनामा यः सूतः, सः अन्यः उक्तात् प्रतिलोमजसूताद् भिन्नः, यस्तत्सहपठितः पुराणेषु मागधो नाम स च प्रतिलोमजमागधाद् भिन्नः । ब्रह्मक्षत्राद् विशेषतः विशेषेण युक्तः सूतो ब्राह्मणाद् विशिष्टः मागधः क्षत्रियाद् विशिष्ट इति । तथ्यं चैतत् — यतः,

"हस्ते तु दक्षिणे तस्य दृष्ट्वा चक्रं पितामहः ।
विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ ॥
तस्यैव जातमात्रस्य यज्ञे पैतामहे शुभे ।
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामते ! ।
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ॥"

इति विष्णुपुराणप्रथमांशत्रयोदशाध्याये,

"ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति ।
पृषदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः ॥
वक्ता वेदादिशास्त्राणां त्रिकालामलधर्मवित् ।"

इत्यग्निपुराणप्रथमाध्याये,

"त्वया सूत ! महाबुद्धे ! भगवान् ब्रह्मवित्तमः ।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः ॥
त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति ।
सम्भूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः ॥"

इति कौर्मपुराणप्रथमाध्याये च व्यासशिष्यपौराणिकसूतस्यायोनित एवोत्पत्तिः प्रतिलोमसूतविलक्षणा कथ्यते; तथा तस्य द्विजत्वं च विष्ण्वंशसम्भूतत्वं च वर्ण्यते । तेन **कौटल्य**श्चाणक्यशब्दितः पुराणानि तत्प्रवक्तृसूतोत्पत्तिकथां, पुराणतत्प्रवक्त्रोः प्रामाण्यप्रसिद्धिं च जानातीत्यवसातुं शक्यम् । तथाभूतश्चासौ सूतादतिदूरविप्रकृष्टार्वाक्कालजन्मैव भवितुं युक्तः, अन्यथा सूतप्रोक्तेषु ग्रन्थेषु पुरातनत्वार्षत्वनिश्चयनिबन्धनः पुराणत्वसम्प्रत्यय एव नाभविष्यत् । एवञ्च यथा **सूत**श्चाणक्यादतिप्राचीनः, तथा सूतसतीर्थ्यस्वयजुर्वेदाचार्य**वैशम्पायन**शिष्यतया सूतसमकालिको भवितुमर्हन् प्रकृतस्मृतिप्रवक्ता **याज्ञवल्क्ययोगीश्वरो** (याज्ञवल्क्यशिष्य एव वा) चाणक्यादतिपुरातन इति किमु वक्तव्यम् । अत एव **कौटल्यः** कतिपयसाहसदण्डविधानपराणां केषाञ्चिद्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

याज्ञवल्क्यस्मृतिद्वितीयाध्यायगतानां छायामर्थतः शब्दतो व्याख्यानतोऽधिकार्थपूरणतश्च स्ववाक्यैरनुविदधान आत्मनो याज्ञवल्क्यस्मृतावस्यां भक्तिबहुमानपूतं परिचयमाविष्करोति। तेषु कानिचिदधस्तादुदाहरामः। तत्रैष एकः स्मृतिश्लोकः—

"करपाददन्तभङ्गे छेदने कर्णनासयोः।
मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा॥"

(याज्ञ० अ० २. श्लो० २२४)

इति। इदं तत्प्रतिच्छन्दप्रायं कौटलीयवाक्यम्—

"मृतकल्पमशोणितं घ्नतो हस्तपादपाराञ्चिकं वा कुर्वतः पूर्वः साहसदण्डः। पाणिपाददन्तभङ्गे कर्णनासाच्छेदने व्रणविदारणे चान्यत्र दुष्टव्रणेभ्यः"। (कौट० धर्मस्थी० अध्या० १९) इति। एतेऽपरे स्मृतिश्लोकाः—

"स्वच्छन्दविधवागामी विक्रुष्टेऽनभिधावकः।
अकारणे च विक्रोष्टा चण्डालश्चोत्तमान् स्पृशन्॥ २४०॥
शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः।
अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत्॥ २४१॥
वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकः।
साधारणस्यापलापी दासीगर्भविनाशकृत्॥ २४२॥
पितापुत्रस्वसृभ्रातृदम्पत्याचार्यशिष्यकाः।
एषामपतितान्योन्यत्यागी च शतदण्डभाक्॥ २४३॥"

(याज्ञ० अध्या० २)

इति। इमान्येतदनुविधायीनि कौटलीयवाक्यानि—

"विधवां छन्दवासिनीं प्रसह्याधिचरतः, चण्डालस्यार्यान् स्पृशतः, प्रत्यासन्नमापद्यनभिधावतो, निष्कारणमभिधावनं कुर्वतः शत्याः (दण्डाः)।

जीवकादीन् वृषलप्रव्रजितान् देवपितृकार्येषु भोजयतः शत्यो दण्डः।

शपथवाक्यानुयोगमनिसृष्टं कुर्वतो, युक्तकर्मणि चायुक्तस्य, क्षुद्रपशुवृषाणां पुंस्त्वोपघातिनो, दास्या गर्भमौषधेन पातयतश्च पूर्वः साहसदण्डः।

पितापुत्रयोर्दम्पत्योर्भ्रातृभगिन्योर्मातुलभागिनेययोः शिष्याचार्ययोर्वा परस्परमपतितं त्यजतः स्वार्थाभिप्रयातं ग्राममध्ये वा त्यजतः पूर्वः साहसदण्डः कान्तारे मध्यमः।" (कौटली० धर्मस्थी० अध्या० २०)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति । एष स्मृतिश्लोकोऽन्यः —

"अबन्ध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति ।
अप्राप्तव्यवहारं च स दाप्यो दममुत्तमम् ॥"
(याज्ञ० अध्या० २. श्लो० २४९)

इति । इदं चैतदनुगामि कौटलीयवाक्यं —

"पुरुषमबन्धनीयं बध्नतो **बन्धयतो** बद्धं वा मोक्षयतो बालमप्राप्तव्यवहारं बध्नतो **बन्धयतो** वा सहस्रदण्डः" (कौटली० धर्मस्थी० अध्या० २०)

सर्वेष्वेषु कौटलीयवाक्येषु स्थूलाक्षरपदार्थाः परमधिकाः, अन्ये तु याज्ञवल्क्यस्मृत्युक्ता एवेति स्पष्टम् । तत्र हि 'स्वच्छन्दविधवागामी' इति स्मृतिवाक्ये स्वच्छन्दामिति क्रियाविशेषणम् । स्वेच्छया, न तु विधवेच्छयापीत्यर्थः । कौटलीये छन्दवासिनीमिति छन्देन वसन्तीं तूष्णीं स्थितामकामयमानामिति यावत् ।

"अयुक्तं शपथं कुर्वन्" इत्येतदेव व्याचष्टे कौटल्यः "शपथवाक्यानुयोगमनिसृष्टं कुर्वत" इति, न पुनरन्यदेतदिति शङ्कनीयम् । तद्यथा—आधिकरणिकाः साक्ष्याद्यनुयोगं व्यवहारनिर्णयार्थं शपथवाचनपूर्वं यमनुतिष्ठन्ति, सोऽयं शपथवाक्यानुयोगः । स आधिकरणिकानां निसृष्टो 'भवत्स्वयमायत्त' इति व्यवहारनिर्णयस्य तेभ्यो राज्ञार्पितत्वात् । निसृष्टश्च तेषां युक्तो भवति स्वाधिकारविषय इति कृत्वा, अनुष्ठानोचित इति कृत्वा वा । अन्येषां तु सोऽनिसृष्टोऽयुक्तः, अधिकाराविषयत्वादनुष्ठानानर्हत्वाद्वा । एवञ्च निसृष्टः, युक्तः, स्वाधिकारविषयः अनुष्ठानार्ह इत्येकार्थगोचरा भवन्ति । अनिसृष्टः, अयुक्तः, स्वाधिकाराविषयः, अनुष्ठानानर्ह इति च वैपरीत्येन तथा । स एषोऽयुक्तः शपथवाक्यानुयोगः स्मृतौ शपथशब्देन विवक्षित इति कौटल्याभिप्रायः । मिताक्षरायां तु व्याख्यान्तरं सम्भवमात्रेण वर्णितं द्रष्टव्यम् ।

तथा 'अयोग्यो योग्यकर्मकृत्', 'युक्तकर्मणि चायुक्तस्य' इत्यपि वाक्ये एकार्थे एव । योगो हि नियोगोऽधिकारः, तद्वति युक्तशब्दो वर्तते, तदर्हे च योग्यशब्द इति युक्तयोग्यशब्दाभ्यामाश्रयत्वार्हत्वलक्षणरूपभेदेऽपि वस्तुतो योगाश्रयस्यैव प्रतिपादनात् ।''' इति । किञ्च याज्ञवल्क्यस्मृतौ मूत्रपुरीषादिस्पर्शने दण्डो नोक्तः । तथापि तस्य सिद्धिस्तदाधिक्यसिद्धिश्च समर्थिता

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

"अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणः स्मृतः"

(याज्ञ० अध्या० २. श्लो० २१८)

इति निष्ठ्यूतग्रहणस्य मूत्राद्युपलक्षकत्वं वदता व्याख्यात्रा। स एव स्मृतिवचनसूचितो मूत्रपुरीषादिदण्डः कौटल्येन 'तैरेवामेध्यैः पादष्ठीविकाभ्यां च द्विगुणः छर्दिमूत्रपुरीषादिभिर्द्वादशपणः' इति स्वशब्देनोक्त इति असंशयं स्मृत्युपजीवी तद्व्याख्यातृसधर्मा कौटल्यः। एतेन याज्ञवल्क्यस्मृतेः कौटलीयोपजीवित्ववादो दूरनिरस्तो द्रष्टव्यः।

१०. कौटल्यस्य कृतयः।

यथायं कौटल्यः कौटलीयात्नानाप्रकारप्रमेयनिधानात् सर्वतन्त्रवेदी आर्षचक्षुष्मान् विज्ञायते, तथा मन्ये तन्त्रान्तरेष्वपि तस्य कृतिभिरवश्यं वर्तितव्यम्। तथाच **भट्टस्वामी** स्वव्याख्यायाम् अध्यक्षप्रचाराधिकरणस्य द्वादशाध्याये 'शुल्बधातुशास्त्ररसे'त्यादिपदं व्याकुर्वन् धातुकौटलीयं नाम ग्रन्थं नाम्नोपादत्ते। वराहमिहिरः 'उक्तं चाचार्यविष्णुगुप्तेने'ति वदन् बृहत्संहितायां ज्योतिस्तन्त्रविषयं श्लोकमुदाहरति —

"अप्यर्णवस्य पुरुषः प्रतरन् कदाचि-
दासादयेदनिलवेगवशेन पारम्।
न त्वस्य कालपुरुषाख्यमहार्णवस्य
गच्छेत् कदाचिदनृषिर्मनसापि पारम्॥"

(Part I. pp. 68)

इति। कामसूत्रजयमङ्गला च म्लेच्छितविकल्पविवरणप्रसङ्गे कौटलीयमन्यत् स्मरति —

"तद् यथा कौटलीयं —
दादेः क्षान्तस्य कादेश्च स्वरयोरुभयोरपि।
बिन्दूष्मणोर्विपर्यासाद् दुर्बोधमिति संज्ञितम्॥" इति।

११. आर्षप्रयोगाः।

पश्चाह्नः उभयतोरात्रमित्यादयः परिमिता आर्षप्रयोगाः कौटलीये वर्तन्ते। तान् पश्चिमे सम्पुटे निर्देक्ष्यामः।

१२. पूर्वाचार्यस्मरणम्।

आचार्यकौटल्येन स्मृताः पूर्वाचार्यास्तावदेते—

१. मानवाः = मनुशिष्याः, अर्थान्मनुः।
२. बार्हस्पत्याः = बृहस्पतिशिष्याः, अर्थाद् बृहस्पतिः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. औशनसाः = शुक्रशिष्याः, अर्थात् शुक्रः ।
४. भारद्वाजः = द्रोणाचार्यः ।
५. विशालाक्षः ।
६. पराशरः = (प्रसिद्धः) ।
७. पिशुनः = नारदः ।
८. कौणपदन्तः = भीष्मः ।
९. वातव्याधिः = उद्धवः ।
१०. बाहुदन्तीपुत्रः = इन्द्रः ।

एतेषु दशसु अर्थशास्त्रप्रवर्तकेषु विशालाक्षः परं विशेषतो न विदितः । किन्तु तस्य वचनं विश्वरूपाचार्यप्रमाणितं पूर्वमुपदर्शितम् ।

१३. ग्रन्थमहिमा ।

धर्मप्रधानः कर्मकुशलोऽप्रमादी परप्रयुक्तकपटप्रतिविधानक्षमः विद्वानेकः कुटुम्बी स्वकीयमेकं कुटुम्बमिव, योगतः क्षेमतस्तदुभयसाधनगवेषणतश्च राजा स्वराष्ट्रगतानि कुटुम्बानां लक्षाणि चिन्तयितुं यथा प्रगल्भेत, तथा शासनसरणयः सामान्यतो विशेषतश्चात्रोपदिष्टाः । प्रजाभ्यो धनसमुत्थापनस्य द्वारं नाम न तत् किञ्चिदवशिष्यते, यदत्र न प्रदर्शितम् । उत्थापितस्य धनस्य न्याय्यं विनियोगस्थानमप्यत्रानुपदिष्टं न किञ्चिदस्ति । प्रजानां परस्परस्माद् युक्तोपयुक्ताध्यक्षामात्येभ्यः, राजवल्लभादिभ्यश्च पीडा यथा नोत्पद्येत, यथा च ते राजकार्यहानिकरं न कदापि चेष्टेरन् , तथा तच्चरितपरीक्षणमार्गा दुष्टदोषदण्डप्रणयनरीतयश्च प्रस्थापिताः । गूढपुरुषप्रणिधानं नाम सर्वसाध्वसाधुवृत्तसाक्षात्कारसाधनं नानाप्रकारं मन्त्रवद् राज्यतन्त्रस्य जीवितस्थाने परिकल्पितम् । किं बहुना, स्वराज्यपरिरक्षणं, सिद्धे तस्मिन् परराज्यपराक्रमणमितीदं राज्ञः कार्यसर्वस्वं यथा सम्यङ् निष्पन्नं स्यात् , तथा तदनुष्ठानविधयो लोकोत्तराः स्थूलमध्यसूक्ष्माः शास्त्रेऽस्मिन् न्यक्षेण प्रतिपादिताः । सर्वथा सजातीयसर्वशास्त्रग्रन्थातिशाय्यत्यद्भुतप्रस्थानमिदं कौटलीयम् । एतदनुसारिणी पूर्वेषां राज्यतन्त्रसरणिरेकान्तलोकहिता श्लाघायाः परां कोटिमधिरूढाभवदिति चास्माद् ग्रन्थाद् वयमनुमिमीमहे ॥

अनन्तशयनम्
४–६–१९२३

त. गणपतिशास्त्री.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयानुक्रमणी ।

विनयाधिकारिकं प्रथममधिकरणम् ।

आदितः अध्यायः.	अधिकरणाध्यायः.	प्रकरणम्.	विषयः.	पृष्ठम्.
१	१		राजवृत्तिर्नाम प्रकरणाधिकरणसमुद्देशः	१-२५
२-४	२-४	१	विद्यासमुद्देशः—	२६-३३
२	२	,,	आन्वीक्षिकीस्थापना	२६-२८
३	३	,,	त्रयीस्थापना	२९-३१
४	४	,,	वार्त्तादण्डनीतिस्थापना	३२, ३३
५	५	२	वृद्धसंयोगः	३४-३६
६, ७	६, ७	३	इन्द्रियजयः—	३७-४०
६	६	,,	अरिषड्वर्गत्यागः	३७, ३८
७	७	,,	राजर्षिवृत्तम्	३९, ४०
८	८	४	अमात्योत्पत्तिः	४१-४४
९	९	५	मन्त्रिपुरोहितोत्पत्तिः	४५-४७
१०	१०	६	उपधाभिः शौचाशौचज्ञानममात्यानाम्	४८-५१
११	११	७	गूढपुरुषोत्पत्तिः	५२-५५
१२	१२	८	गूढपुरुषप्रणिधिः	५६-६२
१३	१३	९	स्वविषये कृत्याकृत्यपक्षरक्षणम्	६३-६६
१४	१४	१०	परविषये कृत्याकृत्यपक्षोपग्रहः	६७-७०
१५	१५	११	मन्त्राधिकारः	७१-७७
१६	१६	१२	दूतप्रणिधिः	७८-८३
१७	१७	१३	राजपुत्ररक्षणम्	८४-८९
१८	१८	१४, १५	अवरुद्धवृत्तम्, अवरुद्धे च वृत्तिः	९०-९३
१९	१९	१६	राजप्रणिधिः	९४-९७

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आदितः अध्यायः.	अधिकरणाध्यायः.	प्रकरणम्.	विषयः.	पृष्ठम्.
२०	२०	१७	निशान्तप्रणिधिः	९८-१०२
२१	२१	१८	आत्मरक्षितकम्	१०३-१०८

अध्यक्षप्रचारः द्वितीयमधिकरणम् ।

२२	१	१९	जनपदनिवेशः	१०९-११५
२३	२	२०	भूमिच्छिद्रविधानम्	११६-११८
२४	३	२१	दुर्गविधानम्	११९-१२६
२५	४	२२	दुर्गनिवेशः	१२७-१३१
२६	५	२३	सन्निधातृनिचयकर्म	१३२-१३५
२७	६	२४	समाहर्तृसमुदयप्रस्थापनम्	१३६-१४२
२८	७	२५	अक्षपटले गाणनिक्याधिकारः	१४३-१५१
२९	८	२६	समुदयस्य युक्तापहृतस्य प्रत्यानयनम्	१५२-१५९
३०	९	२७	उपयुक्तपरीक्षा	१६०-१६६
३१	१०	२८	शासनाधिकारः	१६७-१७८
३२	११	२९	कोशप्रवेश्यरत्नपरीक्षा	१७९-१९७
३३	१२	३०	आकरकर्मान्तप्रवर्तनम्	१९८-२०९
३४	१३	३१	अक्षशालायां सुवर्णाध्यक्षः	२१०-२१९
३५	१४	३२	विशिखायां सौवर्णिकप्रचारः	२२०-२२९
३६	१५	३३	कोष्ठागाराध्यक्षः	२३०-२४०
३७	१६	३४	पण्याध्यक्षः	२४१-२४५
३८	१७	३५	कुप्याध्यक्षः	२४६-२४९
३९	१८	३६	आयुधागाराध्यक्षः	२५०-२५५
४०	१९	३७	तुलामानपौतवम्	२५६-२६२
४१	२०	३८	देशकालमानम्	२६३-२६९
४२	२१	३९	शुल्काध्यक्षः	२७०-२७५
४३	२२	,,	शुल्काध्यक्षे शुल्कव्यवहारः	२७६-२७८
४४	२३	४०	सूत्राध्यक्षः	२७९-२८२
४५	२४	४१	सीताध्यक्षः	२८३-२९०
४६	२५	४२	सुराध्यक्षः	२९१-२९७
४७	२६	४३	सूनाध्यक्षः	२९८-३००
४८	२७	४४	गणिकाध्यक्षः	३०१-३०६
४९	२८	४५	नावध्यक्षः	३०७-३११

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आदितः अध्यायः.	अधिकरणाध्यायः.	प्रकरणम्.	विषयः.	पृष्ठम्.
५०	२९	४६	गोध्यक्षः	३१२-३१९
५१	३०	४७	अश्वाध्यक्षः	३२०-३२८
५२	३१	४८	हस्त्यध्यक्षः	३२९-३३२
५३	३२	,,	हस्त्यध्यक्षे हस्तिप्रचारः	३३३-३३६
५४	३३	४९-५१	रथाध्यक्षः, पत्त्यध्यक्षः सेनापतिप्रचारश्च	३३७-३४०
५५	३४	५२, ५३	मुद्राध्यक्षः विवीताध्यक्षश्च	३४१-३४३
५६	३५	५४, ५५	समाहर्तृप्रचारः, गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयश्च	३४४-३४९
५७	३६	५६	नागरिकप्रणिधिः	३५०-३५८

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

॥ श्रीः ॥

श्रीगणेशाय नमः ।

कौटिलीयम्

अर्थशास्त्रं

महामहोपाध्यायगणपतिशास्त्रिरचितव्याख्योपेतम् ।

विनयाधिकारिकं–प्रथममधिकरणम् ।

ॐ नमः शुक्रबृहस्पतिभ्याम् ।

पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः

विघ्नेशं देवतां वाचं प्रणिपत्य गुरूनपि ।
व्याख्यानमर्थशास्त्रस्य कौटिलीयस्य कुर्महे ॥

अथ निखिलविद्याविचक्षणः स्वबुद्धिसामर्थ्यापहृतनन्दराज्यसिंहासनारोपणानुगृहीत**चन्द्रगुप्तः कौटिल्यचाणक्यादिपर्यायपदवाच्यस्तत्रभवान् विष्णुगुप्ता**चार्यस्त्रिवर्गसम्पत्तिहेतुभूतार्थार्जनोपायोपदेशप्रधानमर्थशास्त्रमारिप्सुः पूर्वाचार्यप्रणामलक्षणं मङ्गलमाचरति —

ॐ नमः शुक्रबृहस्पतिभ्याम् ।

इति । ओमिति माङ्गलिकः शब्दः । नम इति प्रणामः । अस्त्वित्यध्याहारः । शुक्रबृहस्पतिभ्यां शुक्रोऽसुरगुरुः बृहस्पतिर्देवगुरुः ताभ्याम् । 'नमस्स्वस्ती'- (२. ३. १६)त्यादिना चतुर्थी । तौ ह्यर्थशास्त्रप्रवर्तकेष्वाचार्येषु कूटस्थाविति तत्प्रणामोऽत्यन्तमुचितः । तत्र शुक्रप्रणीतमौशनसं नाम, यत्सङ्ग्रहात्मा शुक्रनीतिः । बृहस्पतिप्रणीतं तु बार्हस्पत्याख्यमिति द्रष्टव्यम् । अत एव शास्त्रकर्तृत्वादाचार्यत्वविवक्षया तयोर्देवतात्वाविवक्षणाद् 'देवताद्वन्द्वे च' (६. ३.२६) इत्यानङिह द्वन्द्वे न कृतः ।

स्वग्रन्थस्य निर्मूलत्वादिशङ्कानिराकरणपूर्वं प्रकरणाधिकरणसमुद्देशं प्रतिज्ञातुं भूमिकां रचयति — **पृथिव्या** इत्यादिना । पृथिव्या भूमेः, लाभे अप्राप्तायाः प्राप्तौ, पालने लब्धायाः परिरक्षणे च विषये । अर्थशास्त्राणि अर्थो नाम

G. P. T. 126. 1000. 25-3 1098. B

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रस्थापितानि प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम् ।

तस्यायं प्रकरणाधिकरणसमुद्देशः —

१. विद्यासमुद्देशः । २. वृद्धसंयोगः । ३. इन्द्रियजयः ।

वृत्तिः वर्तनं स्थितिः, सैव हि मनुष्याणां मुख्योऽर्थः । तया च मनुष्यसम्बन्धिन्या तदाधारभूता भूमिरुपलक्ष्यते । एवञ्च मनुष्यवती भूमिरित्यर्थः । तस्याः लाभपालनोपायोपदेशकानि शास्त्राणि अर्थशास्त्राणि । यावन्ति, पूर्वाचार्यैः शुक्रबृहस्पतिविशालाक्षादिभिः, प्रस्थापितानि प्रवर्तितानि , तानि , प्रायश इति बाहुल्योक्त्या क्वचित् क्वचिदात्मीयदर्शनानां प्रतिपादनं दर्शयति । संहृत्य सङ्गृह्य, एकमिदमर्थशास्त्रं कृतम् एकं नानाशास्त्रविप्रकीर्णसमस्तविषयैकनिधानम्, इदं बुद्धिस्थम् अर्थशास्त्रं, कृतं मया प्रणीतम् । एतेन, मदीयस्यास्यैकस्य ग्रन्थस्य परिशीलनात् कृत्स्नपूर्वाचार्यदर्शनविज्ञानं सुखलभ्यमिति सूचयन् स्वशास्त्रस्य समूलत्वं पूर्वाचार्यग्रन्थैरगतार्थत्वं च द्योतयति ।

तदिदमर्थशास्त्रं साशीतिशतसङ्ख्यैः प्रकरणैः तत्परिच्छिन्नैश्च पञ्चदशसङ्ख्यैरधिकरणैर्विभज्य प्रस्थापितम् । तेषु यथास्थानं वितत्य विशेषतो व्युत्पादयिष्यमाणेषु प्रथमं विषयतः समाख्यातः क्रमत इयत्तया च किमपि सामान्यज्ञानं विशेषजिज्ञासानिमित्तं शिष्याणां जनयितुं तत्समुद्देशं प्रतिजानीते — **तस्यायमिति** । तस्य अर्थशास्त्रस्य, अयम् आरब्धाध्यायगोचरः प्रदर्श्यमानप्रकारः, प्रकरणाधिकरणसमुद्देशः प्रकरणानामधिकरणानां च सर्वेषां समुद्देशः संक्षेपेण निर्देशः संक्षिप्तस्वरूपक्रमेयत्ताख्यानमित्यर्थः, क्रियत इति शेषः । प्रक्रियन्ते प्रकर्षेण व्युत्पाद्यन्ते एष्वर्था इति प्रकरणानि । अधिक्रियन्ते विषयीक्रियन्ते एषु प्रकरणानीत्यधिकरणानि ।

तत्र विनयाधिकारिकस्य प्रथमाधिकरणस्य प्रथमं प्रकरणं समुद्दिशति — **विद्यासमुद्देश इति** । विद्यानाम् आन्वीक्षिकी त्रयी वार्ता दण्डनीतिरित्येतासां चतसृणां समुद्देशः विद्यासमुद्देशः । तदाख्यं प्रकरणमित्यार्थम् । विद्यासमुद्देश इत्येतच्च सूत्रमिति व्यवहर्तव्यं, विस्तारार्हबहुलार्थगर्भत्वात् । सूत्रमेव चेदं तत्प्रकरणे 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्याः' इत्युपक्रम्य 'स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु' इत्यन्तैस्त्रिभिरध्यायैर्महता प्रयत्नेन प्रपञ्च्यत इति सूत्रस्य तथाविधं व्याख्यानं भाष्यं भवितुमर्हति ।

---

१. 'गृहीक' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४. अमात्योत्पत्तिः । ५. मन्त्रिपुरोहितोत्पत्तिः । ६. उपधाभिः शौचाशौचज्ञानममात्यानाम् । ७. गूढपुरुषोत्पत्तिः । ८. गूढपुरुषप्रणिधिः । ९. स्वविषये कृत्याकृत्यपक्षरक्षणम् । १०. परविषये

एवं 'प्रकरणाधिकरणसमुद्देश'इत्युक्तचरमुत्तराण्यपि 'वृद्धसंयोग' इत्यादीनि सूत्राणि भवन्ति, तत्तत्प्रकरणगतानि प्रपञ्चनवाक्यानि च भाष्याणि । एवमधिकरणेषु सर्वेषु । एवञ्च 'स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च' इति ग्रन्थान्तोक्तिरुपपन्ना भवतीति वेदितव्यम् ।

तत्र विनयविहीनो लोकशास्त्रव्यवहारेष्वशिक्षितो राजा राज्यरक्षणानर्हत्वाद् वैनयिकीषु विद्यास्ववश्यं विनेतव्य इत्यतो **विद्यासमुद्देश** इत्येतत् प्रकरणमादौ सूत्रितम् ॥ १ ॥

विद्याश्च वृद्धसंयोगाभावे लब्धुं न शक्या इति **वृद्धसंयोग** इति सूत्रम् ॥ २ ॥

वृद्धसंयोगश्च इन्द्रियजयमन्तरेण न लभ्य इति **इन्द्रियजय** इति सूत्रम् ॥ ३ ॥

वृद्धैर्विद्यासु शिक्षितो जितेन्द्रियोऽपि सहायाभावे कार्यं साधयितुं न क्षम इति तदनन्तरम् **अमात्योत्पत्तिरिति** सूत्रम् ॥ ४ ॥

अमात्याश्च केचिद् बुद्धिसाचिव्याय नित्यनैमित्तिककर्मसाचिव्याय चापेक्षिताः, शान्तिकपौष्टिककर्मानुष्ठानाय चान्ये । तदर्थं मन्त्रिपुरोहिताः कर्तव्या इति **मन्त्रिपुरोहितोत्पत्तिरिति** सूत्रम् ॥ ५ ॥

तैश्च सर्वप्रकारविशुद्धैर्भाव्यमिति **उपधाभिः शौचाशौचज्ञानममात्यानाम्** इति सूत्रम् ॥ ६ ॥

उपधाशुद्धिर्गूढपुरुषानन्तरेण ज्ञातुमशक्येति ततो **गूढपुरुषोत्पत्तिः** इति सूत्रम् ॥ ७ ॥

तेषां च स्वामिनियोगमन्तरेणाव्यापाराद् **गूढपुरुषप्रणिधिः** इति सूत्रम् । गूढपुरुषाणां प्रणिधिः प्रणिधानं तत्तत्कार्येषु स्वामिना नियोजनमिति तदर्थः ॥ ८ ॥

तैश्च नियुक्तैः स्वराज्यगतान् क्रुद्धलुब्धादीन् विज्ञाय तद्दोषप्रतिविधानं, परराष्ट्रगतान् विज्ञाय तेषां भेदनेन स्वपक्षे प्रवेशनं चावश्यकमिति **स्व-**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृत्याकृत्यपक्षोपग्रहः । ११. मन्त्राधिकारः । १२. दूतप्रणिधिः । १३. राजपुत्ररक्षणम् । १४. अवरुद्धवृत्तम् । १५. अवरुद्धे च वृत्तिः । १६. राजप्रणिधिः । १७. निशान्तप्रणिधिः । १८. आत्मरक्षितकम् । इति विनयाधिकारिकं प्रथमाधिकरणम् ॥

विषये **कृत्याकृत्यपक्षरक्षणम्** इति परविषये **कृत्याकृत्यपक्षोपग्रहः** इति च सूत्रे । स्वदेशे कृत्याः शत्रुभेद्याः क्रुद्धादयः अकृत्याः अभेद्याः सुहृदः, कृत्याकृत्यानां पक्षाणां सङ्घानां शत्रूपजापाद् रक्षणमिति प्रथमसूत्रस्यार्थः । परराष्ट्रे ये कृत्याकृत्याः पक्षाः तेषामुपजापादिना स्वपक्षे संग्रहणमिति द्वितीयसूत्रस्यार्थः ॥ ९, १० ॥

स्वराष्ट्ररक्षणं परराष्ट्रहरणमित्येतावद् राज्ञः कर्मसर्वस्वम् । तस्य मन्त्रायत्तत्वाद् **मन्त्राधिकारः** इति सूत्रम् । कर्मणामारम्भोपायादिसम्प्रधारणं मन्त्रः, तस्याधिकारो मन्त्राधिकार इति ॥ ११ ॥

परराष्ट्रकरणीयानां स्वकर्मणां स्वयं कर्तुमशक्यतया दूतसापेक्षत्वाद् **दूतप्रणिधिः** इति सूत्रम् ॥ १२ ॥

यथा राजपुत्राः स्वपितरि न द्रोहमाचरेयुः, तथा ते प्रयत्नेन परोपजापादिभ्यो रक्षणीया इति **राजपुत्ररक्षणम्** इति सूत्रम् ॥ १३ ॥

पित्रा कचिदवरुध्य तथा रक्ष्यमाणः कुमारः पितरि कथं व्यवहरेत्, पिता च तस्मिन् कथमित्येतद् वक्तुं सूत्रे **अवरुद्धवृत्तम्** इति **अवरुद्धे च वृत्तिः** इति च ॥ १४, १५ ॥

इत्थमात्मानं रक्षतो राज्ञो नियतकालां व्यापारपरिपाटीं वक्तुं सूत्रं **राजप्रणिधिः** इति । राज्ञः प्रणिधिः प्रणिधानं व्यापारपरिचिन्तनमित्यर्थः ॥ १६ ॥

निशान्तप्रणिधिः इति सूत्रम् । निशान्तं राजभवनं, तस्य प्रणिधिः प्रणिधानं देशसन्निवेशादिचिन्तनम् ॥ १७ ॥

आत्मरक्षितकम् इति सूत्रम् । रक्षितमिति भावे क्तः, स्वार्थे च कः । राज्ञ आत्मरक्षणौपयिकं प्रकरणेऽस्मिन्नुपदिश्यत इत्यर्थः ॥ १८ ॥

इति विनयाधिकारिकमित्यादि । विनयः विद्यादिशिक्षणं तस्याधिकारः प्रस्तावो विनयाधिकारः, सोऽस्मिन्नस्तीति विनयाधिकारिकं नाम प्रथममधिकरणं समुद्दिष्टमित्यर्थः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१. जनपदविनिवेशः । २. भूमिच्छिद्रविधानम् । ३. दुर्गविधानम् । ४. दुर्गविनिवेशः । ५. सन्निधातृनिचयकर्म । ६. स-

---

इत्थं प्रथमाधिकरणसूत्रिताष्टादशप्रकरणोपदिष्टवर्त्मना समासादितविनयसम्पत्को राजा तन्त्रावापयोरधिकारी भवति । **तन्त्रं** नाम स्वराज्यक्षेमसाधनानुकूलः पञ्चस्वाद्येष्वधिकरणेषु पञ्चनवत्या सूत्रैः प्रतिपाद्यमानोऽर्थः । **आवापः** शत्रुराष्ट्रहरणानुकूलः षष्ठादिषु त्रयोदशान्तेषु अष्टस्वधिकरणेषु सूत्राणामेकाशीत्या प्रतिपाद्यमानोऽर्थः, अर्थं ह्येनं विज्ञाय प्रवर्तमानो विजिगीषुः परराष्ट्रं स्ववशे करोतीति । तत्र येऽर्थाः **द्वितीये**ऽधिकरणे अध्यक्षप्रचाराख्ये अष्टात्रिंशता सूत्रैः प्रतिपाद्यन्ते, ये **तृतीये** धर्मस्थीये एकोनविंशत्या सूत्रैः, ये **चतुर्थे** दुर्गराष्ट्रसम्बन्धिकण्टकशोधनाख्ये त्रयोदशभिः सूत्रैः, ये च **पञ्चमे** राजराज्यकण्टकशोधनपरे योगवृत्तनाम्नि सप्तभिः सूत्रैः, तेष्वेव सर्वेष्वधीनं राज्यकुटुम्बभरणकर्मेति तमेतं चतुरधिकरण्यर्थं तन्त्रमाहुः, तन्त्रिधातोः कुटुम्बधारणार्थत्वात् । द्विसूत्रं प्रकरणद्वयात्मकं मण्डलयोनिसंज्ञमधिकरणं **षष्ठम्**, एकोनत्रिंशत्सूत्रयुक्तं षाड्गुण्यं **सप्तमम्**, अष्टसूत्रीरूपं व्यसनाधिकारिक**मष्टमं**, द्वादशसूत्रमभियास्यत्कर्माख्यं **नवमं**, त्रयोदशसूत्रं साङ्ग्रामिकं **दशमं**, द्विसूत्रं सङ्घवृत्तमे**कादशं**, नवसूत्रमाबलीयसं **द्वादशं**, षट्सूत्रं दुर्गलम्भोपायाख्यं **त्रयोदश**मित्येकाशीतिसूत्रामष्टाधिकरणीं शत्रुराज्यहरणोपायोपदेशिनीमावापं व्यवहरन्ति ।

त्रिसूत्रमौपनिषदं नाम **चतुर्दश**मधिकरणं तन्त्रावापयोरत्यन्तमनुगुणम् ।

एकसूत्रात्मकं तन्त्रयुक्तिसंज्ञं **पञ्चदश**मधिकरणं कौटिल्यशास्त्राहृतास्तन्त्रयुक्तीर्द्वात्रिंशतं व्युत्पादयतीति स्थितिः ।

तत्र स्वराज्यं रक्षतो राजधान्याद्यपेक्षणादध्यक्षप्रचाराधिकरणे **जनपदविनिवेश** इति प्रथमं प्रकरणं सूत्रितम् ॥ १ ॥

स्वराज्यगतानां कृषिनिवासानर्हाणां गिरिवनश्वभ्रप्रायाणां भूभागानामुपयोगप्रकारोपदेशार्थं सूत्रं **भूमिच्छिद्रविधानम्** इति । भूमिच्छिद्राणां कृष्याद्यनर्हभूभागानां विधानम् उपयोगप्रकार इत्यर्थः । 'भूमिच्छिद्रं कृष्ययोग्ये'ति यादवः ॥ २ ॥

देशस्य शत्र्वनाक्रमणीयत्वसम्पत्तये दुर्गापेक्षणाद् **दुर्गविधानम्** इति सूत्रं, **दुर्गविनिवेश** इति च ॥ ३ , ४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

माहर्तृसमुदयप्रस्थापनम् । ७. अक्षपटले गाणनिक्याधिकारः । ८. समुदयस्य युक्तापहृतस्य प्रत्यानयनम् । ९. उपयुक्तपरीक्षा १०. शासनाधिकारः । ११. कोशप्रवेश्यरत्नपरीक्षा । १२. आकर कर्मान्तप्रवर्तनम् । १३. अक्षशालायां सुवर्णाध्यक्षः । १४. विशि-

---

सन्निधातृनिचयकर्म इति सूत्रम् । सन्निधाता नाम धनादिकं सञ्चित्य निधाता । तस्य निचयकर्म धनादिरक्षणव्यापार उच्यत इति सूत्रार्थः ॥ ५ ॥

समाहर्तृसमुदयप्रस्थापनम् इति सूत्रम् । सर्वायस्थानेभ्यो राजार्थानां सम्यक् समन्ताद्वा आहर्ता समाहर्ता विषयबल्यध्यक्षः । समुदयो धनोत्थानं तस्य प्रस्थापनं मार्गपरिकल्पनं समुदयप्रस्थापनं समाहर्तुः समुदयप्रस्थापनं समाहर्तृसमुदयप्रस्थापनम् । समाहर्ता कया कया विधया समुदयं प्रस्थापयेदित्येतदस्मिन् प्रकरणे उपदिश्यत इत्यर्थः ॥ ६ ॥

अक्षपटले गाणनिक्याधिकारः इति सूत्रम् । अक्षा गणनयोग्यानि रूप्यकादीनि तेषां पटलं स्थानम् अक्षपटलं तस्मिन्, गणनायां नियुक्तो गाणनिकः तस्य कर्म गाणनिक्यं तस्य प्रस्तावो गाणनिक्याधिकारः ॥ ७ ॥

समुदयस्य युक्तापहृतस्य प्रत्यानयनम् इति सूत्रम् । उत्पन्नस्यार्थस्य नियुक्तैः पुरुषैरपहृतस्य पुनःप्रापणमित्यर्थः ॥ ८ ॥

उपयुक्तपरीक्षा इति सूत्रम् । युक्तानाम् उपरि नियुक्ताः प्रत्ययितपुरुषा उपयुक्ताः तेषां परीक्षा दोषगवेषणेति सूत्रार्थः ॥ ९ ॥

शासनाधिकारः इति सूत्रम् । तालपत्रादिषु लिख्यमानोऽर्थः शासनं तस्याधिकारो विधिरुच्यत इत्यर्थः ॥ १० ॥

कोशप्रवेश्यरत्नपरीक्षा इति सूत्रम् । कोशो भाण्डागारं तस्मिन् प्रवेशयितुं योग्यानां मणिमुक्तादीनां परीक्षणमत्रोपदिश्यत इत्यर्थः ॥ ११ ॥

आकरकर्मान्तप्रवर्तनम् इति सूत्रम् । सुवर्णरजतरत्नाद्युत्पत्तिस्थानमाकरः, तस्य कर्मान्तः तत्क्रियानिश्चयः, तस्य प्रवर्तनं व्यापारणमित्यर्थः ॥

अक्षशालायां सुवर्णाध्यक्षः इति सूत्रम् । अक्षशाला अक्षः गण्यं धनं सुवर्णरूप्यादि तस्य शाला तद्घटनशाला तस्यां सुवर्णाध्यक्षः सुवर्णादिघटनगणनाद्यधिकृतः लक्षणया तद्व्यापार इत्यर्थः ॥ १३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

खायां सौवर्णिकप्रचारः । १५. कोष्ठागाराध्यक्षः । १६. पण्याध्यक्षः । १७. कुप्याध्यक्षः । १८. आयुधागाराध्यक्षः । १९. तुलामानपौतवम् । २०. देशकालमानम् । २१. शुल्काध्यक्षः । २२. सूत्राध्यक्षः । २३. सीताध्यक्षः । २४. सुराध्यक्षः ।

विशिखायां सौवर्णिकप्रचारः इति सूत्रम् । विशिखायाम् आपणवीथ्यां, सौवर्णिकप्रचारः सुवर्णनियुक्तस्य व्यापारः ॥ १४ ॥

कोष्ठागाराध्यक्षः इति सूत्रम् । कोष्ठमुदरं लक्षणया तत्पोषणार्थं व्रीहिगोधूमादिकमाहारद्रव्यं तस्य अगारं सङ्ग्रहस्थानं तस्याध्यक्षः, अर्थात् तद्व्यापारः ॥ १५ ॥

पण्याध्यक्षः इति सूत्रम् । विक्रेयद्रव्याध्यक्ष इत्यर्थः ॥ १६ ॥

कुप्याध्यक्षः इति सूत्रम् । कुप्यं सारदारुवेणुवल्लिवल्कादि तस्मिन् नियुक्तः कुप्याध्यक्षः ॥ १७ ॥

आयुधागाराध्यक्षः इति सूत्रम् । स्पष्टार्थम् ॥ १८ ॥

तुलामानपौतवम् इति सूत्रम् । तुला उन्मानसाधनं मानं कुडुबादि ताभ्यां पौतवं परिच्छेदनं तुलामानपौतवं, लक्षणया तत्संशोधनमित्यर्थः । तच्च वाणिजकाः कूटतुलामानव्यवहारिणो मा भूवन्नित्येतदर्थम् ॥ १९ ॥

देशकालमानम् इति सूत्रम् । देशो योजनगव्यूतिक्रोशादिः कालस्तुटिलवादिः तयोर्मानं परिच्छेद इति सूत्रार्थः ॥ २० ॥

शुल्काध्यक्षः इति सूत्रम् । शुल्कं पञ्चदशभागादिकं शुल्कव्यवहारे वक्ष्यमाणं राज्ञो देयं तस्याध्यक्षः, तद्व्यापार इत्यर्थः ॥ २१ ॥

सूत्राध्यक्षः इति सूत्रम् । सूत्रं कार्पासादिजस्तन्तुः तस्य अध्यक्षः तद्वानादिकारयिता ॥ २२ ॥

सीताध्यक्षः इति सूत्रम् । सीता कृषिः तस्या अध्यक्षः कृषितन्त्र-वृक्षायुर्वेदौ विज्ञाय प्रवर्तकः ॥ २३ ॥

सुराध्यक्षः इति सूत्रम । सुरा मधुमैरेयादि तस्या अध्यक्षः सन्धानविक्रयाद्यधिकृतः सुराध्यक्षः ॥ २४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२५. सूनाध्यक्षः । २६. गणिकाध्यक्षः । २७. नावध्यक्षः । २८. गोध्यक्षः । २९. अश्वाध्यक्षः । ३०. हस्त्यध्यक्षः । ३१. रथाध्यक्षः । ३२. पत्त्यध्यक्षः । ३३. सेनापतिप्रचारः । ३४. मुद्राध्यक्षः । ३५. विवीताध्यक्षः । ३६. समाहर्तृप्रचारः ।

सूनाध्यक्षः इति सूत्रम् । सूना भक्ष्यप्राणिवधस्थानं तस्या अध्यक्षः वध्यावध्यनियमनाद्यधिकृतः ॥ २५ ॥

गणिकाध्यक्षः इति सूत्रम् । धनमेव गणयन्तीति गणिका वेश्याः तासामध्यक्षः गणिकाध्यक्षः ॥ २६ ॥

नावध्यक्षः इति सूत्रम् । नावां यानपात्राणाम् अध्यक्षः आदेयराजभागग्रहणाधिकर्ता ॥ २७ ॥

गोध्यक्षः इति सूत्रम् । गवाम् उपलक्षणेन गोमहिषाजादीनां तदाजीवानां गोपालादीनां च अध्यक्षः नियामक इत्यर्थः ॥ २८ ॥

अश्वाध्यक्षः इति सूत्रम् । अश्वानां लक्षणकुलादिकं विज्ञाय तद्रक्षणादिकर्मानुष्ठाता अश्वाध्यक्षः ॥ २९ ॥

हस्त्यध्यक्षः इति सूत्रम् । अश्वाध्यक्षवद् हस्त्यध्यक्षो व्याख्येयः ॥३०॥

रथाध्यक्षः इति सूत्रम् । रथानां देवरथादीनां घटनाद्यधिकर्ता रथाध्यक्षः ॥ ३१ ॥

पत्त्यध्यक्षः इति सूत्रम् । पत्तयः पदातयः ये पादचारेण युध्यन्ते, तेष्वधिकृतः पत्त्यध्यक्षः ॥ ३२ ॥

सेनापतिप्रचारः इति सूत्रम् । सेनापतिः चतुरङ्गबलनेता तस्य प्रचारः सेनाविषयो व्यापारः प्रतिपाद्यत इत्यर्थः ॥ ३३ ॥

मुद्राध्यक्षः इति सूत्रम् । मुद्रा नाम राजचिह्नं राजनामधेयप्रतिमादिलक्षणं यच्छासनपत्रादौ दीयते, तस्या अध्यक्षः प्रवर्तयिता ॥ ३४ ॥

विवीताध्यक्षः इति सूत्रम् । विवीतं तृणजलवान् अकृष्यः प्रदेशः पश्वर्थः तस्याध्यक्षः तद्व्यापार इत्यर्थः ॥ ३५ ॥

समाहर्तृप्रचारः इति सूत्रम् । समाहर्ता आयस्थानेभ्यो राजार्थसंग्राहको जनपदाध्यक्षः तस्य प्रचारो व्यापारः जनपदचिन्तनमित्यर्थः ॥ ३६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३७. गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयः । ३८. नागरिकप्रणिधिः । इत्यध्यक्षप्रचारो द्वितीयमधिकरणम् ॥

१. व्यवहारस्थापना । २. विवादपदनिबन्धः । ३. विवाहसंयुक्तम् । ४. दायविभागः । ५. वास्तुकम् । ६. समयस्यानपाकर्म ।

गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयः इति सूत्रम् । गृहस्थ-वणिक्-तपस्विवेषाः प्रणिधयः गूढपुरुषाः । अर्थात् तेषां जनपदेषु नियोजनम् । तच्च समाहर्तृकार्योपयोगिने जनपदवृत्तान्तज्ञानाय ॥ ३७ ॥

नागरिकप्रणिधिः इति सूत्रम् । नगरे नियुक्तो नागरिकः, तस्य प्रणिधिः प्रणिधानं व्यापारचिन्तनमित्यर्थः ॥ ३८ ॥

इतीत्यादि । अध्यक्षप्रचारोऽध्यक्षाणां व्यापारः ॥

अथ धर्मस्थीयं तृतीयमधिकरणम् । धर्मस्था नाम धर्मशास्त्रज्ञाः धर्मशास्त्रानुसारेण व्यवहारनिर्णयकर्मण्यधिकृताः । तेषामिदं धर्मस्थीयं तन्निर्णयव्यवहारपदप्रतिपादकमित्यर्थः । तत्र प्रथमं सूत्रं — **व्यवहारस्थापना** इति । कीदृशो व्यवहारः सिध्यति कीदृशो न सिध्यतीति व्यवस्थापनमिति सूत्रार्थः ॥ १ ॥

विवादपदनिबन्धः इति सूत्रम् । विवादपदस्य निबन्धः पूर्वोत्तरपक्षात्मना पत्र आरोपणं, तत्पूर्वकं चिन्तनमित्यर्थः ॥ २ ॥

विवाहसंयुक्तम् इति सूत्रम् । विवाहा अष्टविधाः ब्राह्मादयः, तत्सम्बद्धो व्यवहार इत्यर्थः । एतच्च प्रकरणं त्रिभिरध्यायैर्वितन्यते ॥ ३ ॥

दायविभागः इति सूत्रम् । दायः पितृपितृव्यादिधनं तस्य विभागः । अयमपि त्रिभिरध्यायैर्वितन्यते ॥ ४ ॥

वास्तुकम् इति सूत्रम् । वस्तु गृहारामक्षेत्रादि तत्सम्बद्धं वास्तुकम् । इदमध्यायत्रयेण वितन्यते । तत्र तृतीयाध्याये उत्तरमपि प्रकरणं प्रवेशितम् ॥ ५ ॥

समयस्यानपाकर्म इति सूत्रम् । इदमहं करिष्यामीत्यभ्युपगमात्मा सङ्केतः, इदमनेन कर्तव्यमिति बहुभिः सम्भूय कृतो वा सङ्केतः समयः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

७. ऋणादानम् । ८. औपनिधिकम् । ९. दासकर्मकरकल्पः । १०. सम्भूयसमुत्थानम् । ११. विक्रीतक्रीतानुशयः । १२. दत्तस्यानपाकर्म । १३. अस्वामिविक्रयः । १४. स्वस्वामिसम्बन्धः । १५. साहसम् । १६. वाक्पारुष्यम् । १७. दण्डपारुष्यम् । १८. द्यूतसमाह्वयम् ।

तस्य अनपाकर्म त्यागाभावः इति सूत्रार्थः । इदं प्रकरणं वास्तुकप्रकरणीयविवीतक्षेत्रपथहिंसाव्युत्पादनाध्याये व्युत्पादितम् ॥ ६ ॥

ऋणादानम् इति सूत्रम् । ऋणग्रहणनिर्यातनसम्बद्धो व्यवहार इत्यर्थः ॥ ७ ॥

औपनिधिकम् इति सूत्रम् । उपनिधिर्निक्षेपः, तत्सम्बद्धमनुष्ठानमौपनिधिकम् ॥ ८ ॥

दासकर्मकरकल्पः इति सूत्रम् । अत्यन्तपाराार्थ्यमासाद्य शुश्रूषका दासाः, भृत्यर्थं शुश्रूषकाः कर्मकराः तेषां कल्पः तत्सम्बन्धी विधिः ॥ ९ ॥

सम्भूयसमुत्थानम् इति सूत्रम् । वाणिजकैरन्यैर्वा समुदेत्यारभ्यमाणं कार्यं सम्भूयसमुत्थानम् ॥ १० ॥

विक्रीतक्रीतानुशयः इति सूत्रम् । विक्रीतं मूल्यमादाय दत्तं पण्यं क्रीतं मूल्यं दत्त्वा गृहीतं, तयोर्विषये अनुशयः विक्रयविषयः क्रयविषयश्च पश्चात्ताप इत्यर्थः ॥ ११ ॥

दत्तस्यानपाकर्म इति सूत्रम् । दत्तस्य धर्माद्यर्थे वाचा दत्तस्य अनपाकर्म अप्रदानम् । एतच्च विषयविशेषे पुनर्हरणस्याप्युपलक्षणम् ॥ १२ ॥

अस्वामिविक्रयः इति सूत्रम् । अस्वामी परद्रव्यव्यवहर्ता तेन कृतो विक्रयः अस्वामिविक्रयः ॥ १३ ॥

स्वस्वामिसम्बन्धः इति सूत्रम् । स्पष्टार्थम् ॥ १४ ॥

साहसम् इति सूत्रम् । सहसा कृतं कर्म साहसं प्रसभकर्म ॥ १५ ॥

वाक्पारुष्यम् इति सूत्रम् । वाचा कुत्सनभर्त्सनादिकमित्यर्थः ॥ १६ ॥

दण्डपारुष्यमिति सूत्रम् । दण्डेन करणेन पारुष्यं परुषकर्म द्रोहो दण्डपारुष्यम् ॥ १७ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१९. प्रकीर्णकानि । इति धर्मस्थीयं तृतीयमधिकरणम् ॥

१. कारुकरक्षणम् । २. वैदेहकरक्षणम् । ३. उपनिपातप्रतीकारः । ४. गूढाजीविनां रक्षा । ५. सिद्धव्यञ्जनैर्माणवप्रकाशनम् । ६. शङ्कारूपकर्माभिग्रहः । ७. आशुमृतकपरीक्षा । ८. वाक्यकर्मा-

---

द्यूतसमाह्वयम् इति सूत्रम् । द्यूतम् अक्षक्रीडा समाह्वयः अजकुक्कुटादिप्राणिदेवनं तयोः समाहारः द्यूतसमाह्वयं, तत्सम्बद्धो व्यवहारः प्रकरणेऽस्मिन्नभिधीयत इत्यर्थः ॥ १८ ॥

प्रकीर्णकानि इति सूत्रम् । उक्तविवादपदानन्तर्गतानि याचितकाद्यदानादीनिमित्तानि विवादपदानि प्रकीर्णकानि, तान्यत्राभिधीयन्ते इत्यर्थः ॥ १९ ॥

इति धर्मस्थीयमित्यादि । एवमेकोनविंशतिप्रकरणं धर्मस्थीयमधिकरणं तृतीयं समुद्दिष्टमित्यर्थः ॥

अथ कण्टकशोधनाख्यं चतुर्थमधिकरणम् । तत्रेदं प्रथमं सूत्रं—**कारुकरक्षणम्** इति । कारुकाः तक्षायस्कारस्वर्णकारादयः तेभ्यः कूटकर्मकारिभ्यो देशस्य रक्षणमिहाभिधीयत इत्यर्थः ॥ १ ॥

वैदेहकरक्षणम् इति सूत्रम् । वाणिजकेभ्यः पौतवापचारिभ्यो रक्षणमित्यर्थः ॥ २ ॥

उपनिपातप्रतीकारः इति सूत्रम् । उपनिपाताः दैविकानि महाभयानि तेषां प्रतीकारः ॥ ३ ॥

गूढाजीविनां रक्षा इति सूत्रम् । ये गूढं लञ्चग्रहणेन स्वामिनं प्रजाश्च वञ्चयन्त आजीवन्ति ते गूढाजीविनः तेषां रक्षा तेभ्यो देशस्य रक्षणमित्यर्थः ॥ ४ ॥

सिद्धव्यञ्जनैर्माणवप्रकाशनम् इति सूत्रम् । सिद्धव्यञ्जनाः मुण्डजटिलतापसवेषा धूर्ताः तैः करणैः माणवप्रकाशनं माणवस्य प्रलोभनविद्यायाः प्रकाशनम् । तच्च चोरादिग्रहणार्थम् ॥ ५ ॥

शङ्कारूपकर्माभिग्रहः इति सूत्रम् । आत्मनः परान् प्रति परेषामा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नुयोगः । ९. सर्वाधिकरणरक्षणम् । १०. एकाङ्गवधनिष्क्रयः । ११. शुद्धश्चित्रश्च दण्डकल्पः । १२. कन्याप्रकर्म । १३. अतिचारदण्डः । इति कण्टकशोधनं चतुर्थमधिकरणम् ॥

त्मानं प्रति च शङ्का द्विरूपा, रूपं सलोप्त्रदर्शनं, कर्म सन्धिच्छेदादि, एतैः अभिग्रहः चोराणां ग्रहणमिति सूत्रार्थः ॥ ६ ॥

आशुमृतकपरीक्षा इति सूत्रम् । आशु मृतकस्य परीक्षा किमयं स्वयं मृतः उत परेण मारित इति परीक्षणम् ॥ ७ ॥

वाक्यकर्मानुयोगः इति सूत्रम् । वाक्यानुयोगः कर्मानुयोगश्चेति सूत्रार्थः । तत्र वाक्यानुयोगः उपपत्तियुक्तैः सामवादैश्चोरपृच्छा, कर्मानुयोगः कशाप्रहारादिना चोरविचारणा ॥ ८ ॥

सर्वाधिकरणरक्षणम् इति सूत्रम् । अधिकरणशब्देन लक्षणया अध्यक्षप्रचाराधिकरणोक्ता अध्यक्षास्तन्नियम्याः पुरुषाश्च गृह्यन्ते । तेभ्यः सर्वेभ्यः प्रजानां धनस्य च रक्षणमिति सूत्रार्थः ॥ ९ ॥

एकाङ्गवधनिष्क्रयः इति सूत्रम् । एकाङ्गं हस्तः पादः कर्ण इत्येवञ्जातीयं तस्य वधश्छेदनम् एकाङ्गवधः तद्युक्तो निष्क्रयः वधस्थानीयो धनदण्डश्चतुष्पञ्चाशत्पणादिः ॥ १० ॥

शुद्धश्चित्रश्च दण्डकल्पः इति सूत्रम् । शुद्धः चित्र इति द्विविधो दण्डविधिः । तत्र शुद्धः अक्लेशमारणं, चित्रः क्लेशमारणम् ॥ ११ ॥

कन्याप्रकर्म इति सूत्रम् । कन्यायाः अपुष्पितायाः स्त्रियाः प्रकर्म दूषणम् । तत्सम्बद्धो दण्डविधिरत्रोच्यत इत्यर्थः ॥ १२ ॥

अतिचारदण्डः इति सूत्रम् । अतिचारः अभक्ष्यभक्षणम् अगम्यागमनम् इत्येवमादिः तन्निमित्तो दण्ड उच्यत इत्यर्थः ॥ १३ ॥

इति कण्टकशोधनमित्यादि । एवं त्रयोदशप्रकरणं दुर्गराष्ट्रकण्टकशोधनप्रतिपादकं चतुर्थमधिकरणं समुद्दिष्टमित्यर्थः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१. दाण्डकर्मिकम् । २. कोशाभिसंहरणम् । ३. भृत्यभरणीयम् । ४. अनुजीविवृत्तम् । ५. सामयाचारिकम् । ६. राज्यप्रतिसन्धानम् । ७. एकैश्वर्यम् । इति योगवृत्तं पञ्चममधिकरणम् ॥

अथ योगवृत्तं नाम पञ्चममाधिकरणम् । योगो विस्रब्धघाती तद्वृत्तं तच्चोपांशुदण्डादिकम् । राजराज्यकण्टकविषय उपांशुदण्डादिप्रयोगोऽस्मिन्नधिकरणेऽभिधास्यते । तत्रेदं प्रथमं सूत्रं— **दाण्डकर्मिकम्** इति । दण्ड उपांशुवधः तस्य कर्म प्रयोगः दण्डकर्म तत्सम्बद्धमिहोच्यत इत्यर्थः ॥ १ ॥

कोशाभिसंहरणम् इति सूत्रम् । कोशस्य सुवर्णादेः अभिसंहरणं पूर्वत आधिक्येन सङ्ग्रहणमर्थकृच्छ्रप्राप्तावित्यर्थः ॥ २ ॥

भृत्यभरणीयम् इति सूत्रम् । भृत्याः बुद्धौ शास्त्रे कर्मणि च साहाय्यदायिनः तेषां भरणं पोषणं तत्सम्बद्धं भृत्यभरणीयम् ॥ ३ ॥

अनुजीविवृत्तम् इति सूत्रम् । अनुजीविनो मन्त्रिप्रभृतयः तैः स्वामिनि कथं वर्तितव्यमित्येतदत्रोपदिश्यत इत्यर्थः ॥ ४ ॥

सामयाचारिकम् इति सूत्रम् । समयः व्यवस्था आचारः अनुष्ठानं समयाचारमधिकृत्य प्रवृत्तं सामयाचारिकम् ॥ ५ ॥

राज्यप्रतिसन्धानम् इति सूत्रम् । राज्यस्य प्रतिसन्धानं राजव्यसने सति तत्पुत्रानभिषिच्य यत् परिचिन्तनममात्यैः क्रियते तदिहोच्यत इत्यर्थः । इदमुत्तरं च प्रकरणमेकस्मिन्नध्याये समावेशितम् ॥ ६ ॥

एकैश्वर्यम् इति सूत्रम् । एकस्यैव राजपुत्रस्यैकातपत्रमैश्वर्यं कर्तव्यम् इत्येतदुच्यत इत्यर्थः । एकग्रहणं बहूनामैश्वर्यकरणे अराजकत्वप्रसङ्ग इति द्योतनार्थम् ॥ ७ ॥

इति योगवृत्तमित्यादि । एवं सप्तप्रकरणं योगवृत्ताख्यं पञ्चममधिकरणं समुद्दिष्टमित्यर्थः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१. प्रकृतिसम्पदः । २. शमव्यायामिकम्[१] । इति मण्डलयोनिः षष्ठमधिकरणम् ॥

१. षाड्गुण्यसमुद्देशः । २. क्षयस्थानवृद्धिनिश्चयः । ३. संश्रयवृत्तिः । ४. समहीनज्यायसां गुणाभिनिवेशः । ५. हीनसन्धयः ।

अथावापो यावत् त्रयोदशमधिकरणम् । तत्र षष्ठं मण्डलयोनिर्नाम । विजिगीष्वरिमध्यमोदासीनाख्यचतुरवयवं मण्डलं, योनिः उत्तराधिकरणार्थस्य षाड्गुण्यस्य विषयः । मण्डलं च तद् योनिश्च मण्डलयोनिः मण्डलात्मा षाड्गुण्यप्रकृतिरित्यर्थः । तत्र प्रथमं सूत्रं—**प्रकृतिसम्पद** इति । प्रकृतयः स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि तासां सम्पदः अपेक्षितगुणपुष्कलता इहोच्यन्त इत्यर्थः ॥ १ ॥

शमव्यायामिकम् इति सूत्रम् । कर्मफलोपभोगानां क्षेमसाधनं शमः, व्यायामस्तु कर्मारम्भोपकरणानां कर्मयोगघटकः, तदुभयमस्मिन् प्रकरणे प्रतिपाद्यत इत्यर्थः ॥ २ ॥

इति मण्डलयोनिरित्यादि । एवं द्विप्रकरणं मण्डलयोन्यधिकरणं षष्ठं समुद्दिष्टमित्यर्थः ॥

अथ षाड्गुण्याधिकरणे प्रथमं सूत्रं—**षाड्गुण्यसमुद्देश** इति । सन्ध्यादीनां षड्गुणानां संक्षिप्य प्रतिपादनमिति सूत्रार्थः ॥ १ ॥

तत् किमर्थमित्यपेक्षायां **क्षयस्थानवृद्धिनिश्चय** इति सूत्रम् । क्षयो ह्रासः, स्थानं तादवस्थ्यं, वृद्धिः उपचयः, तेषां निश्चयः स्वरूपावधारणम् । तदिहोच्यत इत्यर्थः । प्रकरणमिदं पूर्वं चैकस्मिन्नध्याये समावेशितम् ॥ २ ॥

क्षीणकार्यं वक्तुं सूत्रं—**संश्रयवृत्तिः** इति । प्रबलमाश्रित्य वर्तनमिति सूत्रार्थः ॥ ३ ॥

समहीनज्यायसां गुणाभिनिवेशः इति सूत्रम् । समः शत्रुणा सदृशशक्तिः, हीनः निकृष्टः, ज्यायान् उत्कृष्टः । आसु तिसृष्ववस्थासु गुणस्थापनात्रोच्यत इत्यर्थः ॥ ४ ॥

हीनसन्धय इति सूत्रम् । हीनेन कोशदण्डभूमीः प्रदाय करणीयाः सन्धय इह वर्ण्यन्त इत्यर्थः ॥ ५ ॥

---

१. 'गनि' क. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६. विगृह्यासनम् । ७. सन्धायासनम् । ८. विगृह्ययानम् । ९. सन्धाययानम् । १०. सम्भूयप्रयाणम् । ११. यातव्यामित्रयोरभिग्रहचिन्ता । १२. क्षयलोभविरागहेतवः प्रकृतीनाम् । १३. सामवायिकविपरिमर्शः । १४. संहितप्रयाणिकम् । १५. परिपणिता-

---

विगृह्यासनम् इति सूत्रम् । शत्रुणा सह विगृह्य शत्रोर्धान्यादिप्राप्तिप्रतिघातं कृत्वा स्वविषये स्थितिरिति सूत्रार्थः ॥ ६ ॥

सन्धायासनम् इति सूत्रम् । अभियानाशक्तौ परेण सन्धिं कृत्वावस्थानमित्यर्थः ॥ ७ ॥

विगृह्ययानम् इति सूत्रम् । पार्ष्णिग्राहादिभिः सह विग्रहं कृत्वा परं प्रति अभियानमित्यर्थः ॥ ८ ॥

सन्धाययानम् इति सूत्रम् । पार्ष्णिग्राहादिभिः सह सन्धिं कृत्वा शत्रुमुद्दिश्य यानमित्यर्थः ॥ ९ ॥

सम्भूयप्रयाणम् इति सूत्रम् । समहीनज्यायसां शत्रुं प्रति समुदेत्य प्रयाणमित्यर्थः ॥ १० ॥

यातव्यामित्रयोरभिग्रहचिन्ता इति सूत्रम् । अरिसम्पद्युक्तो व्यसनी च यातव्यः, अमित्रो नित्यापकारी शत्रुः, अभिग्रहो यानम् । यातव्यामित्रयोः कतरं प्रति यानमनुष्ठेयमिति सम्प्रधारणमिहोच्यत इत्यर्थः ॥ ११ ॥

क्षयलोभविरागहेतवः प्रकृतीनाम् इति सूत्रम् । क्षयः गजवाजिपुरुषधनादीनामपचयः, लोभः अतितृष्णा, विरागः प्रद्वेषः, तदुत्पत्तिहेतवोऽमात्यादीनामिहाभिधीयन्त इत्यर्थः ॥ १२ ॥

सामवायिकविपरिमर्शः इति सूत्रम् । समवायेन चरन्ति सामवायिकाः विजिगीष्वनुयायिनो राजानः तेषां विपरिमर्शः गुरुलघुभावचिन्तनमित्यर्थः ॥ १३ ॥

संहितप्रयाणिकम् इति सूत्रम् । संहितयोः अन्योन्यकृतसन्धिकयोः शत्रुविजिगीष्वोः प्रयाणं भिन्नदिक्कं यानं, तदिह प्रतिपाद्यत इत्यर्थः ॥ १४ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिपणितापसृताश्च सन्धयः । १६. द्वैधीभाविकाः सन्धिविक्रमाः । १७. यातव्यवृत्तिः । १८. अनुग्राह्यमित्रविशेषाः । १९. मित्रहिरण्यभूमिकर्मसन्धयः । २०. पार्ष्णिग्राहचिन्ता । २१. हीनशक्तिपूरणम् । २२. बलवता विगृह्योपरोधहेतवः । २३. दण्डोपनत-

---

परिपणितापरिपणितापसृताश्च सन्धयः इति सूत्रम् । देशकालकार्यव्यवस्थया कृतः सन्धिः परिपणितसन्धिः, तद्विपरीतोऽपरिपणितसन्धिः, कुतोऽपि निमित्तात् स्वपक्षादपसृतेन पुनः सन्धिः अपसृतसन्धिः, त इमे सन्धय इह व्युत्पाद्यन्त इत्यर्थः ॥ १९ ॥

द्वैधीभाविकाः सन्धिविक्रमाः इति सूत्रम् । सन्धिविग्रहोपादानं द्वैधीभावः तत्सम्बद्धाः सन्धिविक्रमाः कथ्यन्त इत्यर्थः ॥ १६ ॥

यातव्यवृत्तिः इति सूत्रम् । यातव्यो विजिगीषुः तस्य सामवायिकेषु वृत्तिः यातव्ये सामवायिकानां वृत्तिश्चोच्यत इत्यर्थः ॥ १७ ॥

अनुग्राह्यमित्रविशेषाः इति सूत्रम् । भूम्येकान्तरा राजानो मित्राणि। तत्र कानि मित्राणि साहाय्यदानेनानुग्राह्याणि कानि नेति विचारोऽत्र क्रियत इत्यर्थः ॥ १८ ॥

मित्रहिरण्यभूमिकर्मसन्धयः इति सूत्रम् । मित्रेण हिरण्येन भूम्या कर्मणा च ये सन्धयः पणबन्धाः त इहाभिधीयन्त इत्यर्थः । इदं प्रकरणं चतुरध्यायीरूपम् ॥ १९ ॥

पार्ष्णिग्राहचिन्ता इति सूत्रम् । पार्ष्णिग्राहावस्थापन्नस्य विजिगीषोः चिन्ता अनुष्ठानविचार इत्यर्थः ॥ २० ॥

हीनशक्तिपूरणम् इति सूत्रम् । अपचितानां प्रभुमन्त्रोत्साहशक्तीनां वर्धनमिहोच्यत इत्यर्थः ॥ २१ ॥

बलवता विगृह्योपरोधहेतव इति सूत्रम् । प्रबलेन शत्रुणा सह विगृह्य दुर्गप्रवेशस्य कारणान्यभिधीयन्त इत्यर्थः ॥ २२ ॥

दण्डोपनतवृत्तम् इति सूत्रम् । दण्डेन बलेन उपनतः अधःकृतः तदवस्थापन्नस्य विजिगीषोर्बलवन्तं प्रत्यनुष्ठानमुच्यत इत्यर्थः ॥ २३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वृत्तम् । २४. दण्डोपनायिवृत्तम् । २५. सन्धिकर्म । २६. सन्धिमोक्षः । २७. मध्यमचरितम् । २८. उदासीनचरितम् । २९. मण्डलचरितम् । इति षाड्गुण्यं सप्तममधिकरणम् ॥

१. प्रकृतिव्यसनवर्गः । २. राजराज्ययोर्व्यसनचिन्ता ।

दण्डोपनायिवृत्तम् इति सूत्रम् । दण्डेन बलेन शत्रुमात्मनः समीपमुपनयति उपनमयतीति दण्डोपनायी तदवस्थस्य विजिगीषोर्वृत्तमुच्यत इत्यर्थः ॥ २४ ॥

सन्धिकर्म इति सूत्रम् । सन्धेः शपथादिना दृढीकरणमुच्यत इत्यर्थः ॥ २५ ॥

सन्धिमोक्षः इति सूत्रम् । सन्धिनिमित्तं ग्रहीकृतः सन्धिरित्युपचर्यते तस्य मोक्षो मोचनमुच्यत इत्यर्थः ॥ २६ ॥

मध्यमचरितम् इति सूत्रम् । मध्यमेषु विजिगीषोर्वृत्तिरुच्यत इत्यर्थः । एतदादिप्रकरणत्रयमेकस्मिन्नध्याये सन्निवेशितम् ॥ २७ ॥

उदासीनचरितम् इति सूत्रम् । उदासीनं प्रति विजिगीषोरनुष्ठानमभिधीयत इति सूत्रार्थः ॥ २८ ॥

मण्डलचरितम् इति सूत्रम् । मण्डलम् अरिमित्रलक्षणम् । तत् प्रति विजिगीषोरनुष्ठानमुच्यत इति सूत्रार्थः ॥ २९ ॥

इति षाड्गुण्यं सप्तममधिकरणमिति । एवमेकोनत्रिंशत्प्रकरणं षाड्गुण्याधिकरणं सप्तमं समुद्दिष्टमित्यर्थः ॥

अथ व्यसनाधिकारिकेऽधिकरणे प्रथमं सूत्रं — **प्रकृतिव्यसनवर्गः** इति । प्रकृतयः स्वाम्यमात्यादयः, व्यसनानि गुणप्रातिलोम्यादीनि, तेषां वर्गः समूहोऽभिधीयत इत्यर्थः ॥ १ ॥

राजराज्ययोर्व्यसनचिन्ता इति सूत्रम् । राजा स्वामी, राज्यम् अमात्यादिप्रकृतिपञ्चकं द्रव्यप्रकृतिपञ्चकं च, तयोर्व्यसनचिन्ता व्यसनगुरुलघुभावसम्प्रधारणमुच्यत इत्यर्थः ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. पुरुषव्यसनवर्गः। ४. पीडनवर्गः। ५. स्तम्भनवर्गः। ६. कोशसङ्गवर्गः। ७. बलव्यसनवर्गः। ८. मित्रव्यसनवर्गः। इति व्यसनाधिकारिकमष्टममधिकरणम् ॥

१. शक्तिदेशकालबलाबलज्ञानम्। २. यात्राकालाः।

पुरुषव्यसनवर्गः इति सूत्रम्। पुरुषस्य व्यसनानि व्यसनप्रभवा दोषाः तेषां वर्गोऽभिधीयत इत्यर्थः ॥ ३ ॥

पीडनवर्गः इति सूत्रम्। अग्न्युदकादिनिमित्ताः शक्त्यपचयाः पीडनानि, तेषां वर्गः संख्यास्वरूपगौरवलाघवतोऽभिधीयत इत्यर्थः। एतदादिप्रकरणत्रयमेकस्मिन्नध्याये समावेशितम् ॥ ४ ॥

स्तम्भनवर्गः इति सूत्रम्। स्तम्भनं प्रत्यूहोक्त्या राजकार्योपरोधः तद्धेतूनां वर्ग उच्यत इति सूत्रार्थः ॥ ५ ॥

कोशसङ्गवर्गः इति सूत्रम्। कोशस्य राजार्थस्य सङ्गः अप्रदानं कोशसङ्गः तद्धेतुवर्गः उच्यत इत्यर्थः ॥ ६ ॥

बलव्यसनवर्गः इति सूत्रम्। बलं चतुरङ्गं सैन्यं मौलभृतकादिभेदेन षड्विधं तस्य व्यसनवर्गः अमानितविमानितादित्रयस्त्रिंशत्प्रकारोऽभिधीयत इत्यर्थः ॥ ७ ॥

मित्रव्यसनवर्गः इति सूत्रम्। स्पष्टार्थम्। प्रकरणद्वयमिदमेकाध्यायगतम् ॥ ८ ॥

इति व्यसनाधिकारिकमित्यादि। एवमष्टप्रकरणं व्यसनाधिकारेण प्रवृत्तमष्टममधिकरणं समुद्दिष्टमित्यर्थः ॥

अथ अभियास्यत्कर्माख्यं नवममधिकरणम्। अभियास्यतो विजिगीषोः अभियानात् प्राक् चिन्तनीयमर्थजातमस्मिन्नधिकरणे उपदेक्ष्यते। तत्र प्रथमं सूत्रं— **शक्तिदेशकालबलाबलज्ञानम्** इति। शक्तेर्देशस्य कालस्य च बलाबलज्ञानमुपदिश्यत इत्यर्थः। इदं प्रकरणमुत्तरं चैकाध्यायगते ॥ १ ॥

यात्राकालाः इति सूत्रम्। शत्रुं प्रति अभियानं यात्रा तद्योग्याः कालाः ऋतव उच्यन्त इत्यर्थः ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. बलोपादानकालाः। ४. सन्नाहगुणाः। ५. प्रतिबलकर्म। ६. पश्चात्कोपचिन्ता। ७. बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारः। ८. क्षयव्ययलाभविपरिमर्शः। ९. बाह्याभ्यन्तराश्चापदः। १०. दूष्यशत्रुसंयुक्ताः। ११. अर्थानर्थसंशययुक्ताः। १२. तासामुपायविकल्पजाः सिद्धयः। इत्यभियास्यत्कर्म नवममधिकरणम् ॥

बलोपादानकालाः इति सूत्रम्। बलानि मौलभृतकादीनि षट् तेषाम् उपादानकालाः उद्योजनसमयाः। अमुकबलममुकसमये समुद्योजयितव्यमित्ययमर्थ इह चिन्त्यत इत्यर्थः ॥ ३ ॥

सन्नाहगुणाः इति सूत्रम्। सन्नाहः शस्त्रावरणग्रहणं तस्य गुणाः श्रेष्ठत्वप्रकाराः कथ्यन्त इत्यर्थः ॥ ४ ॥

प्रतिबलकर्म इति सूत्रम्। परबलाभिभवसमर्थं बलं प्रतिबलं, तस्य करणप्रकार उच्यत इत्यर्थः ॥ ५ ॥

पश्चात्कोपचिन्ता इति सूत्रम्। पश्चात्कोपः पार्ष्णिग्राहादिकृतः कोपो दाहाविलोपादिः, स इह चिन्त्यत इत्यर्थः। इदमुत्तरं च प्रकरणमेकाध्यायगते ॥ ६ ॥

बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारः इति सूत्रम्। बाह्यप्रकृतयो राष्ट्रमुख्यान्तपालादयः, आभ्यन्तरप्रकृतयो मन्त्रिपुरोहितादयः, तासां कोपो व्यलीकजनितश्चित्तविकारः, तस्य प्रतिविधानमुच्यत इति सूत्रार्थः ॥ ७ ॥

क्षयव्ययलाभविपरिमर्शः इति सूत्रम्। क्षयो युग्यपुरुषापचयः, व्ययो हिरण्यधान्यापचयः, लाभो यानफलं भूम्यादिप्राप्तिः, तेषां विपरिमर्शः गौरवलाघवसम्प्रधारणमाभिधीयत इत्यर्थः ॥ ८ ॥

बाह्याभ्यन्तराश्चापदः इति सूत्रम्। बाह्यापदः बाह्यराष्ट्रमुख्यान्तपालाद्युत्पादिता विपदः, आभ्यन्तरापदः मन्त्रिपुरोहिताद्युत्थापिताः, तासां स्वरूपं प्रतिविधानं चोपदिश्यत इत्यर्थः ॥ ९ ॥

दूष्यशत्रुसंयुक्ताः इति सूत्रम्। दूष्याः कृत्याः पौरजानपदास्तन्मुख्याश्च, शत्रवः सहजकृत्रिमादयः, तत्संयुक्तास्तदुत्पादिताः आपद इति विशेष्यमनुवर्तते। ता इहोच्यन्ते स्वरूपतः प्रतिविधानतश्चेत्यर्थः ॥ १० ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१. स्कन्धावारनिवेशः । २. स्कन्धावारप्रयाणम् । ३. बलव्यसनावस्कन्दकालरक्षणम् । ४. कूटयुद्धविकल्पाः । ५. स्वसैन्योत्साहनम् । ६. स्वबलान्यबलव्यायोगः । ७. युद्धभूमयः

अर्थानर्थसंशययुक्ताः । इति सूत्रम् अर्थो मित्रहिरण्यभूम्यादिः। अनर्थस्तन्नाशः शरीरनाशश्च, संशयः अर्थप्राणयोः सन्देहः, तैर्युक्ता आपद उच्यन्त इत्यर्थः । इदमुत्तरं च प्रकरणमेकाध्यायगतम् ॥ ११ ॥

तासामुपायविकल्पजाः सिद्धयः इति सूत्रम् । तासां पूर्वोक्तानामापदाम् उपायविकल्पजाः उपायाः प्रशमार्थाः सामादयः तेषां विकल्पः प्रयोगभेदः तज्जनिताः सिद्धयः प्रतीकारा उच्यन्त इत्यर्थः ॥ १२ ॥

इत्यभियास्यत्कर्मेत्यादि । एवं द्वादशप्रकरणमभियास्यत्कर्माख्यं नवममधिकरणं समुद्दिष्टमित्यर्थः ॥

अथ दशमे साङ्ग्रामिकेऽधिकरणे प्रथमं सूत्रं — **स्कन्धावारनिवेशः** इति । सैन्यावासस्थानं स्कन्धावारः तस्य निवेशो निर्माणविधिरुच्यत इत्यर्थः ॥ १ ॥

स्कन्धावारप्रयाणम् इति सूत्रम् । स्कन्धावारस्य कटकस्य देशकालाद्यनुगुणसन्नाहपुरस्सरमभिषेणनमुच्यत इत्यर्थः । इदमुत्तरं च प्रकरणमेकाध्यायगतम् ॥ २ ॥

बलव्यसनावस्कन्दकालरक्षणम् इति सूत्रम् । अमानितविमानितादीनि बलव्यसनानि अवस्कन्दकाला दीर्घकान्तारानुदकाद्यध्वगमनकालाः तेभ्यः सैन्यसंरक्षणमुच्यत इत्यर्थः ॥ ३ ॥

कूटयुद्धविकल्पाः इति सूत्रम् । कूटयुद्धं नाम कपटयुद्धं बलव्यसनावस्कन्दकालादिच्छिद्रमुपलभ्य शत्रुहिंसनं, तस्य विकल्पाः भेदाः कथ्यन्त इत्यर्थः । एतदादिप्रकरणत्रयमेकाध्यायगतम् ॥ ४ ॥

स्वसैन्योत्साहनम् इति सूत्रम् । आत्मयोधानां संग्रामगुणसंकीर्तनादिना युद्धोत्साहजननमुच्यत इत्यर्थः ॥ ५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

८. पत्त्यश्वरथहस्तिकर्माणि। ९. पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः। १०. सारफल्गुबलविभागः। ११. पत्त्यश्वरथहस्तियुद्धानि। १२. दण्डभोगमण्डलासंहतव्यूहव्यूहनम्। १३. तस्य प्रतिव्यूहसंस्थापनम्। इति साङ्ग्रामिकं दशममधिकरणम्॥

स्वबलान्यबलव्यायोगः इति सूत्रम्। स्वसैन्यस्य परसैन्यापेक्षया व्यायोगः विशिष्टमायोजनं व्यवस्थापनं दिक्सूर्यवाताद्यानुगुण्यं यथा स्यात् तथा व्यूहरचनामिति यावत्। तदिहोच्यत इत्यर्थः॥ ६॥

युद्धभूमयः इति सूत्रम्। युद्धानुगुणाः समस्थिराभिकाशादिलक्षणाः भूमयः कथ्यन्त इत्यर्थः॥ ७॥

पत्त्यश्वरथहस्तिकर्माणि इति सूत्रम्। पत्तिः पदातिः तदादीनां व्यापारा उच्यन्त इत्यर्थः॥ ८॥

पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः इति सूत्रम्। पक्षौ पञ्चव्यूहात्मना स्थाप्यमानस्य बलस्य बहिः पुरस्तात्कोट्यौ, कक्षौ पश्चादन्तःपार्श्वे, उरस्यम् मध्यम्, एषां पञ्चानां व्यूहविशेषाणां बलपरिमाणानुगुण्येन व्यूहविभागोऽभिधीयत इत्यर्थः। एतदादिप्रकरणत्रयमेकाध्यायगतम्॥ ९॥

सारफल्गुबलविभागः इति सूत्रम्। सारबलं पितृपैतामहत्वादिदण्डसम्पद्युक्तं, तद्विपरीतं भीरुकं वा फल्गुबलं, तयोर्विभागो विभज्यावस्थापनं चिन्त्यत इति सूत्रार्थः॥ १०॥

पत्त्यश्वरथहस्तियुद्धानि इति सूत्रम्। स्पष्टार्थम्॥ ११॥

दण्डभोगमण्डलासंहतव्यूहव्यूहनम् इति सूत्रम्। दण्डव्यूहो भोगव्यूहो मण्डलव्यूहः असंहतव्यूहः इत्येतेषां प्रकृतिव्यूहानां तद्विकृतिव्यूहानां च रचनमभिधीयत इत्यर्थः। इदमुत्तरं च प्रकरणमेकाध्यायगतम्॥ १२॥

तस्य प्रतिव्यूहसंस्थापनम् इति सूत्रम्। तस्य दण्डादिव्यूहनस्य अर्थाद् दण्डादिव्यूहानां प्रतिव्यूहस्थापनमुच्यत इत्यर्थः॥ १३॥

इति साङ्ग्रामिकं दशममधिकरणम् इति। संग्राममधिकृत्य प्रवृत्तं सांग्रामिकं तदाख्यं दशममधिकरणम् इत्थं त्रयोदशप्रकरणकं समुद्दिष्टमित्यर्थः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१. भेदोपादानानि । २. उपांशुदण्डः । इति सङ्घवृत्तमेकादशमधिकरणम् ॥

१. दूतकर्म । २. मन्त्रयुद्धम् । ३. सेनामुख्यवधः । ४. मण्डलप्रोत्साहनम् । ५. शस्त्राग्निरसप्रणिधयः । ६. विवधासारप्र-

---

अथैकादशे सङ्घवृत्तेऽधिकरणे प्रथमं सूत्रं — **भेदोपादानानि** इति । भेदः सङ्घविश्लेषोपायः तस्य उपादानानि प्रयोगा उच्यन्त इत्यर्थः ॥ १ ॥

उपांशुदण्डः इति सूत्रम् । तूष्णींदण्डः निगूढवध उच्यत इत्यर्थः ॥ २ ॥

इति सङ्घवृत्तमेकादशमधिकरणमिति । सङ्घः शस्त्रोपजीविनां सङ्घीभावैकबलानां राजाविधेयानां समूहः, तस्मिन् वृत्तं तद्विधेयीकरणानुकूले राज्ञो व्यापारः तत्प्रतिपादकम्, एवं द्विप्रकरणम् एकादशमधिकरणं समुद्दिष्टमित्यर्थः । एतच्चैकाध्यायम् ॥

अथ आबलीयसं नाम द्वादशमधिकरणम् । अबलीयान् दुर्बलतरः तस्येदमाबलीयसं प्रबले सन्धिमनिच्छति सति दुर्बलतरस्य कृत्यम् । तदिह प्रतिपाद्यम् । तत्र प्रथमं सूत्रं — **दूतकर्म** इति । दूता नाम निसृष्टार्थाः परिमितार्थाः शासनहरा इति त्रिविधाः तेषां व्यापारोऽभिधीयत इत्यर्थः ॥ १ ॥

मन्त्रयुद्धम् इति सूत्रम् । मन्त्रः प्रज्ञोत्कर्षः तेन युद्धं मन्त्रयुद्धम् । तच्च शत्रुषड्वर्गवशगानेकभूमिपतिनाशोदाहरणादिना शत्रोर्मतिमुपजनय्य वञ्चनम् । तदिहोच्यत इति सूत्रार्थः ॥ २ ॥

सेनामुख्यवधः इति सूत्रम् । सेना चतुरङ्गबलं तत्र मुख्याः सेनापत्यादयः तेषां वधोपाय उच्यत इत्यर्थः । इदमुत्तरं चैकाध्यायगतम् ॥ ३ ॥

मण्डलप्रोत्साहनम् इति सूत्रम् । मण्डलं मित्रादिमण्डलं तस्य प्रोत्साहनम् आत्मरक्षार्थमुद्योजनं विजिगीषुणा कर्तव्यमुच्यत इत्यर्थः ॥ ४ ॥

शस्त्राग्निरसप्रणिधयः इति सूत्रम् । शस्त्राग्निरसानां गूढप्रयोगा उच्यन्त इत्यर्थः । इदमुत्तरं चैकाध्यायगतम् ॥ ५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सारवधः । ७. योगातिसन्धानम् । ८. दण्डातिसन्धानम् । ९. एक-विजयः । इत्याबलीयसं द्वादशमधिकरणम् ॥

१. उपजापः । २. योगवामनम् । ३. अपसर्पप्रणिधिः । ४. पर्युपासनकर्म । ५. अवमर्दः । ६. लब्धप्रशमनम् । इति दुर्गलम्भोपायस्त्रयोदशमधिकरणम् ॥

विवधासारप्रसारवधः इति सूत्रम् । विवधः पर्याहारः उपचारात् पर्याहारवाही स्वप्रजासकाशलभ्यायभारानेता, आसारः सुहृद्बलं, प्रसारो वनाद् यवसेन्धनाहर्ता, तेषां वध उच्यत इत्यर्थः ॥ ६ ॥

योगातिसन्धानम् इति सूत्रम् । योगः कपटोपायः देवतागृहप्रवेशाद्यवसरे शत्रोरुपरि शिलायन्त्रमोक्षणभित्तिपातनादिः तेनातिसन्धानमुच्यत इत्यर्थः । एतदादिप्रकरणत्रयमेकाध्यायान्तर्गतम् ॥ ७ ॥

दण्डातिसन्धानम् इति सूत्रम् । दण्डो वधपरिक्लेशार्थहरणादिः, तेन शत्रोरभिभवनमुच्यत इत्यर्थः ॥ ८ ॥

एकविजयः इति सूत्रम् । एकेन सहायनिरपेक्षेणैव विजिगीषुणा विजयः शत्रोरभिभव उच्यत इत्यर्थः ॥ ९ ॥

इत्याबलीयसमित्यादि । एवं नवप्रकरणमाबलीयसं द्वादशमधिकरणं समुद्दिष्टमित्यर्थः ॥

अथ त्रयोदशं दुर्गलम्भोपायाख्यमधिकरणमारभ्यते । दुर्गस्य परकीयस्य प्राप्त्युपायोऽस्मिन्नधिकरण उपदिश्यते । तत्र प्रथमं सूत्रम् — **उपजाप** इति । उपजापो भेदः उच्यत इत्यर्थः ॥ १ ॥

योगवामनम् इति सूत्रम् । योगो मुण्डजटिलादिवेषान्यत्वग्रहणं तेनोपायेन वामनं शत्रोर्दुर्गान्निष्क्रामणमभिधीयत इत्यर्थः ॥ २ ॥

अपसर्पप्रणिधिः इति सूत्रम् । अपसर्पा गूढपुरुषाः तेषां प्रणिधानं शत्रुविषये निवासनमुच्यत इत्यर्थः ॥ ३ ॥

पर्युपासनकर्म इति सूत्रम् । परदुर्गं परित उपासनकर्म सैन्यनिवासनव्यापार उच्यत इत्यर्थः । इदमुत्तरं चैकाध्यायगतम् ॥ ४ ॥

अवमर्दः इति सूत्रम् । अवमर्दः परदुर्गमर्दनं तत् कदा केन प्रकारेण कर्तव्यमित्ययमर्थोऽभिधीयत इत्यर्थः ॥ ५ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१. परघातप्रयोगः । २. प्रलम्भनम् । ३. स्वबलोपघातप्रतीकारः । इत्यौपनिषदं चतुर्दशमधिकरणम् ॥

१. तन्त्रयुक्तयः । इति तन्त्रयुक्तिः पञ्चदशमधिकरणम् ॥

लब्धप्रशमनम् इति सूत्रम् । विजिगीषुणा लब्धस्य शत्रुदुर्गादेः प्रशमनं लब्धप्रशमनम् । तच्च दुर्गादिवासिनाम् अपूर्वभूपतिविषयशङ्काद्यपोहनेन विजिगीषौ विस्रम्भजननम् । तदभिधीयत इति सूत्रार्थः ॥ ६ ॥

इति दुर्गलम्भोपाय इत्यादि । एवं षट्प्रकरणं दुर्गलम्भोपायाख्यं त्रयोदशमधिकरणं समुद्दिष्टमित्यर्थः ॥

अथौपनिषदं चतुर्दशमधिकरणम् । उपनिषत् शत्रुजयोपायरहस्यं तदधिकृत्य प्रवृत्तमौपनिषदम् । तत्र प्रथमं सूत्रं—**परघातप्रयोग** इति । शत्रुवधार्थ औषधप्रयोग उच्यत इत्यर्थः ॥ १ ॥

प्रलम्भनम् इति सूत्रम् । औषधमन्त्रप्रयोगद्वारेण क्षुत्प्रतीकारविरूपकरणादिना शत्रुवञ्चनमुच्यत इत्यर्थः । अद्भुतोत्पादनं भैषज्यमन्त्रप्रयोग इति द्विधा विभज्य प्रकरणमिदमध्यायद्वयेन वितन्यते । तत्र मार्जारोष्ट्रादिचक्षुस्साधितचूर्णादिकं भैषज्यं दृश्यादृश्यकरणादिसाधनं, 'बलिं वैरोचनमि'त्यादिर्मन्त्रः ॥ २ ॥

स्वबलोपघातप्रतीकारः इति सूत्रम् । स्वबलस्य स्वसैन्यस्य परप्रयुक्तविषाम्बुदूषणादिनिमित्तो य उपघातः तस्य प्रतीकारोऽभिधीयत इत्यर्थः ॥ ३ ॥

इत्यौपनिषदमित्यादि । एवं त्रिप्रकरणम् औपनिषदं चतुर्दशमधिकरणं समुद्दिष्टमित्यर्थः । औपनिषदिकमित्यपि पाठः । तदाणन्ताद्वन् ॥

अथान्तिमं तन्त्रयुक्तिर्नाम पञ्चदशमधिकरणम् । तन्त्रं तन्त्रावापात्मकमिदमर्थशास्त्रं तस्य युक्तिः व्याख्यानोपायभूतो न्यायः स इह प्रतिपाद्यते । तत्रेदं सूत्रं—**तन्त्रयुक्तय** इति । तन्त्रोपयुक्ता युक्तयः अधिकरणविधानादयो द्वात्रिंशदस्मिन् प्रकरणेऽभिधीयन्त इति सूत्रार्थः ॥ १ ॥

इति तन्त्रयुक्तिरित्यादि । एवमेकप्रकरणकमिदं तन्त्रयुक्त्यधिकरणं समुद्दिष्टमित्यर्थः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शास्त्रसमुद्देशः पञ्चदशाधिकरणानि सपञ्चाशदध्यायशतं साशीति प्रकरणशतं षट् श्लोकसहस्राणीति ।

सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम् ।
कौटिल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम् ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
प्रथमोऽध्यायः राजवृत्तिः ॥

अथ सर्वप्रकारेयत्ताख्यनेन कृत्स्नस्य शास्त्रस्य समुद्देशमाह — **शास्त्रसमुद्देश** इत्यादि । श्लोक इह द्वात्रिंशद् अक्षराणि, येषां समुदाय एको ग्रन्थ इति गण्यते । शेषं स्पष्टम् ।

व्युत्पित्सुप्ररोचनार्थं स्वशास्त्रस्य तन्मुख्यगुणपुष्कलतां श्लोकेनाह — **सुखे**त्यादिना । सुखं क्लेशासहं ग्रहणं बुद्धिर्येषां ते सुखग्रहणाः सुकुमारमतयः तैरपि विज्ञेयं विज्ञातुं शक्यम् । तदन्यविज्ञेयत्वं तु कैमुत्यसिद्धम् । तत्त्वार्थपदनिश्चितं तत्त्वम् अर्थस्य याथात्म्यं, अर्थः शब्दाभिधेयः, पदं वाचकशब्दः, तत्त्वतोऽर्थतः पदतश्च निश्चितम् । किं यथाप्रतिपादितमेवार्थस्य याथात्म्यम् उतान्यदपि स्यादिति सन्देहानुत्थापकं तत्त्वनिश्चितम्, अर्थपदयोरन्यूनानतिरिक्ततया सन्देहाजनकम् अर्थपदनिश्चितमिति बोद्धव्यम् । तत्त्वार्थपदानि निंश्चितानि यस्मिन्निति बहुव्रीहिर्वा । तदा तु निश्चितशब्दस्य परनिपात आहिताग्न्यादित्वात् साध्यः ।

इतीत्याद्यध्यायसमाप्तिवाक्यम् । तत्र प्रान्ते **राजवृत्ति**रिति प्रतिपाद्यसूचनम्, एतदध्यायसंक्षिप्तस्य कृत्स्नशास्त्रार्थस्य राजसम्बन्धिव्यापारात्मकत्वात् ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
प्रथमोऽध्यायः राजवृत्तिः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१. प्रकरणं विद्यासमुद्देशः — आन्वीक्षिकीस्थापना ।

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्चेति विद्याः ।

त्रयी वार्त्ता दण्डनीतिश्चेति मानवाः, त्रयीविशेषो ह्यान्वीक्षिकीति ।

वार्त्ता दण्डनीतिश्चेति बार्हस्पत्याः, संवरणमात्रं हि त्रयी लोकयात्राविद इति ।

अथ समुद्देशनिर्देशक्रमेण अधिकरणप्रकरणानि व्याख्येयानि । तत्र तावत् प्रथमाधिकरणस्यादिमं प्रकरणं द्वितीयादिभिस्त्रिभिरध्यायैः प्रपञ्च्यते । विद्यासमुद्देश इति हि प्रथमं सूत्रम् । कास्ता विद्या इत्याकाङ्क्षायामाह — **आन्वीक्षिकी**त्यादि । अर्थतत्त्वस्य हेतुभिः परीक्षणमन्वीक्षा सा प्रयोजनमस्या इति आन्वीक्षिकी हेतुविद्या । ऋग्यजुःसामानि त्रयी तेषाम् अभिचारकर्मज्ञानादिफलादथर्ववेदाद् भिन्नप्रस्थानतया पृथक्पङ्क्तिनिवेश्यानां सम्भूयैकक्रतुकार्यसाधकत्वात् तत्समुदायस्य त्रयीति संज्ञा । कृषिः पाशुपाल्यं वणिज्या च वार्त्ता । दण्डनीतिस्तु राजनीतिः । इति एवं प्रसिद्धा इति शेषः ।

तत्र मनुशिष्याणां पक्षमाह — **त्रयी**त्यादि । आन्वीक्षिकी त्रयीविशेषो हि त्रय्यनुगामितया त्रय्यर्थविचाररूपतया च त्रय्याः प्रकार एव न विद्यान्तरमित्यर्थः । तत्र त्रय्यनुगामिनी आन्वीक्षिकी साङ्ख्ययोगतर्कशास्त्राणि, अन्या तु पूर्वोत्तरमीमांसे । आह च कामन्दकः —

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं पुराणं च त्रयीदं सर्वमुच्यते ॥"

इति ।

बृहस्पतिशिष्याणां मतमाह — **वार्त्ता दण्डे**त्यादि । त्रय्या विद्यान्तरत्वाभावे हेतुमाह — **संवरणमात्रं ही**ति । त्रयी, लोकयात्राविदः वार्तादण्डनीत्यनुष्ठानलक्षणलोकतन्त्रविदुषः, संवरणमात्रं हि नास्तिकोऽयमिति लोकनिन्दाद्वारसंवृतिसाधनमेव केवलम् । लोकतन्त्रसम्यङ्निर्वहणसमर्थमपि त्रय्यपरिग्राहिणं सन्तं नास्तिक इति लोको निन्देदिति त्रयीपरिग्रहस्य यथोक्तनिन्दाद्वारगोपनमात्रफलत्वेनाल्पप्रयोजनत्वान्न सा विद्यान्तरमित्यभिप्रायः । त्रयीनिरासेन तदन्तर्गताया आन्वीक्षिक्या अपि निरासः सिद्धः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दण्डनीतिरेका विद्येत्यौशनसाः, तस्यां हि सर्वविद्यारम्भाः प्रतिबद्धा इति ।

चतस्र एव विद्या इति कौटिल्यः । ताभिर्धर्मार्थौ यद् विद्यात्, तद् विद्यानां विद्यात्वम् ।

साङ्ख्यं योगो लोकायतं चेत्यान्वीक्षिकी । धर्माधर्मौ त्रय्याम् । अर्थानर्थौ वार्त्तायाम् । नयापनयौ दण्डनीत्याम् । बलाबले चैतासां हेतु-

---

मतान्तरमाह — दण्डनीतिरेकेत्यादि । दण्डनीतिः, एका एकैव, विद्या प्राधान्येन विद्याव्यपदेशमर्हतीत्यर्थः । इति, औशनसाः शुक्रशिष्याः, कुतः, सर्वासां विद्यानामारम्भाः योगक्षेमाः, तस्यां हि प्रतिबद्धाः दण्डनीतावेव प्रतिष्ठिताः, इति कृत्वा । यद् वक्ष्यति — 'आन्वीक्षिकीत्रयीवार्त्तानां योगक्षेमसाधनो दण्डः' (अध्या० ४) इति ।

स्वमतमाह — चतस्र एवेत्यादि । विद्याः चतस्र एव, एवकारेण त्रित्वाद्विपक्षव्यवच्छेद. । आसां विद्यात्वविद्यान्तरत्वयोर्विद्यात्वमादौ निर्वचनभङ्ग्या स्थापयति — ताभिरित्यादि । विद्यात्वं नाम धर्मार्थवेदनकरणत्वम् । तच्चान्वीक्षिक्यादिषु चतसृषु अविशिष्टमित्यर्थः । विद्यान्तरत्वं तु परस्परविसदृशस्वरूपफलनिरूपणेन यथाक्रमं स्थापयिष्यते ।

तत्रान्वीक्षिक्याः स्वरूपमाह — साङ्ख्यमित्यादि । साङ्ख्यं प्रकृतिपुरुषविवेचकं शास्त्रं कपिलप्रोक्तं, योगः प्रत्याहारध्यानधारणादिप्रतिपादकं महेश्वरप्रोक्तं, लोकायतं न्यायशास्त्रं ब्रह्मगार्ग्योक्तम् । एतत्त्रितयात्मिकान्वीक्षिकी । धर्माधर्मौ त्रय्यामित्यादिना त्रय्यादीनां फलसूचनम्, तच्चान्वीक्षिकीफलस्य तद्विसदृशत्वव्युत्पादनार्थम् । धर्माधर्माविति, प्राधान्येन प्रतिपाद्याविति शेषः । तेन त्रय्यामर्थानर्थनयापनयानामानुषङ्गिकतया क्वचित् क्वचित् प्रतिपादनेऽप्यविरोधः । एवं वार्तादण्डनीत्योरपि ज्ञेयम् । तत्र धर्मोऽध्ययनयजनादिः, अधर्मः श्वमांसभक्षणादिः । अर्थः कालबीजवापादिजन्यं फलम्, अनर्थोऽकालबीजवापादिजन्यम् । नयो ज्यायसा सन्ध्यादिः येन योगक्षेमो निष्पाद्यते, अपनयस्तु ज्यायसा विग्रहादिः येन योगक्षेमो विहन्यते । एतासां त्रय्यादीनाम् । हेतुभिरन्वीक्षमाणा न्यायैः सम्प्रधारयन्ती । व्यसन इत्यादिनोपकारस्वरूपोक्तिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भिरन्वीक्षमाणान्वीक्षिकी लोकस्योपकरोति, व्यसनेऽभ्युदये च बुद्धिमवस्थापयति, प्रज्ञावाक्यक्रियावैशारद्यं च करोति ।

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
द्वितीयोऽध्यायः विद्यासमुद्देशे आन्वीक्षिकीस्थापना ॥

बुद्धिमवस्थापयति अविक्लतां करोति, बुद्धिर्दुःखे यथा नोद्विजेत सुखे च न प्रहृष्येत् तथा तां नियच्छतीत्यर्थः । यदाहुः—'न प्रहृष्येत् सुखं प्राप्य नोद्विजेतासुखादपि' इति । प्रज्ञावाक्यक्रियावैशारद्यं विचारवचनकर्मसु पाटवम् ।

प्रदीप इति । आन्वीक्षिकी सर्वविद्यानां प्रदीपः परीक्षणसाधनत्वात् । सर्वकर्मणाम् उपायः आरम्भादिफलाधिगमपर्यन्तानुष्ठानवैचित्र्यप्रतिभोत्पादकत्वात् । सर्वधर्माणां शश्वद् आश्रयः वैदिकलौकिकानां सर्वेषां धर्माणामन्वीक्षावधार्यत्वात् सर्वदा आश्रयभूता । एवञ्च त्रय्यादिविसदृशस्वरूपफलत्वादान्वीक्षिक्या विद्यान्तरत्वं सिद्धमित्यभिप्रायः ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
द्वितीयोऽध्यायः विद्यासमुद्देशे आन्वीक्षिकीस्थापना ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१. प्रक. विद्यासमुद्देशः — त्रयीस्थापना ।

सामर्ग्यजुर्वेदास्त्रयस्त्रयी अथर्ववेदेतिहासवेदौ च वेदाः । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोविचितिर्ज्योतिषमिति चाङ्गानि ।

एष त्रयीधर्मश्चतुर्णां वर्णानामाश्रमाणां च स्वधर्मस्थापनादौपकारिकः ।

स्वधर्मो ब्राह्मणस्याध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति । क्षत्रियस्याध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं च । वैश्यस्याध्ययनं यजनं दानं कृषिपाशुपाल्ये वणिज्या च । शूद्रस्य द्विजातिशुश्रूषा वार्त्ता कारुकुशीलवकर्म च ।

गृहस्थस्य स्वकर्माजीवस्तुल्यैरसमानर्षिभिर्वैवाह्यमृतुगामित्वं देवपित्रतिथिभृत्येषु त्यागः शेषभोजनं च ।

त्रयीस्थापनार्थं तत्स्वरूपमाह — **सामेत्यादि** । सामवेदः ऋग्वेदो यजुर्वेद इति त्रयस्त्रयीपदवाच्याः, अथर्ववेदः, इतिहासवेदो महाभारतादिश्च वेदपदार्थाः । शिक्षा वर्णोच्चारणोपदेशकं शास्त्रम् । कल्पः क्रत्वनुष्ठानोपदेशपरम् आश्वलायनादिप्रणीतं सूत्रम् । व्याकरणं शब्दानुशासनं पाणिनीयादि । निरुक्तं निर्वचनशास्त्रं यास्कप्रणीतम् । छन्दोविचितिः छन्दश्शास्त्रं पैङ्गलादि । ज्योतिषं सूर्यादिगत्यादिप्रतिपादकं शास्त्रम् ।

त्रय्याः फलं वक्तुमाह — **एष** इति । एष त्रयीधर्मः त्रय्युपदिष्टो धर्मः, चतुर्णां ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणां च औपकारिकः उपकारफलः । कस्मात्, स्वधर्मस्थापनात् स्वधर्मेषु स्थापनात् स्वधर्मानुपदिश्य तेषु नियन्त्रणाद्, अर्थाद् वर्णाश्रमाणाम् ।

वर्णधर्मं विवृणोति — **स्वधर्म** इत्यादि । शस्त्राजीवः शस्त्रेण आजीवो वृत्तिः । भूतरक्षणं प्राणिपालनम् । कृषिपाशुपाल्ये कृषिः केदारेषु बीजवापपरिकर्मादिविधानम्, पाशुपाल्यं पशुपालनकर्म गवाश्वादीनां पोषणचिकित्सादि । वणिज्या क्रयविक्रयव्यवहारः । द्विजातिशुश्रूषा द्विजातयो ब्रह्मक्षत्रियवैश्याः तेषां परिचरणम् । वार्त्ता कृषिपाशुपाल्यवणिज्याः । कारुकुशीलवकर्म शिल्पकर्म चारणकर्म च ।

आश्रमधर्ममाह — **गृहस्थस्येत्यादि** । गृहिणः स्वकर्माजीवः स्ववर्णोक्तकर्मणा वृत्तिः । तुल्यैः कुलादिना समानैः । असमानर्षिभिः भिन्नार्षगोत्रैः । वैवाह्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ब्रह्मचारिणः स्वाध्यायोऽग्निकार्याभिषेकौ भैक्षव्रतत्वमाचार्ये प्राणान्तिकी वृत्तिस्तदभावे गुरुपुत्रे सब्रह्मचारिणि वा ।

वानप्रस्थस्य ब्रह्मचर्यं भूमौ शय्या जटाजिनधारणमग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः ।

परिव्राजकस्य संयतेन्द्रियत्वमनारम्भो निष्किञ्चनत्वं सङ्गत्यागो भैक्षमनेकत्र अरण्यवासो बाह्याभ्यन्तरं च शौचम् ।

सर्वेषामहिंसा सत्यं शौचमनसूयानृशंस्यं क्षमा च ।

विवाहः, स्वार्थे ष्यञ् । ऋतुगामित्वं ऋतुः पुष्पस्नानादिनादूर्ध्वं द्वादशनिशाः तस्मिन् स्त्रीगमनशीलत्वम् । शेषभोजनं देवादिदत्तावशिष्टाशनम् ।

ब्रह्मेत्यादि । ब्रह्मशब्दो वेदवाची तद्ग्रहणार्थे दण्डाजिनधारणादिलक्षणे व्रते वर्तते, तच्चरितुं शीलमस्येति ब्रह्मचारी तस्य ब्रह्मचारिणः । स्वाध्यायः स्ववेदाध्ययनम् । अग्निकार्याभिषेकौ अग्निशुश्रूषात्रिषवणस्नाने । भैक्षव्रतत्वं भैक्षं भिक्षावृत्तिः व्रतत्वं व्रतित्वं गोदानान्तं कर्म तदुभयम् । एवं तावदुपकुर्वाणस्य वेदब्रह्मचारिण आसमावर्तनादनुष्ठानम् । नैष्ठिकस्य विशेषमाह— **आचार्ये प्राणान्तिकी वृत्तिरित्यादि** । गुरुकुले आप्राणोत्क्रमणकालभाविनी स्थितिः । गुरुपुत्रे आचार्यपुत्रसमीपे । सब्रह्मचारिणि वा समानशाखाध्यायिनि वा वृद्धे । कार्येति शेषः ।

वानप्रस्थस्येत्यादि । वानप्रस्थस्य वने प्रकर्षेण तिष्ठतीति वनप्रस्थः, वनप्रस्थ एव वानप्रस्थः स्वार्थेऽण्, तस्य । ब्रह्मचर्यम् ऊर्ध्वरेतस्त्वम् । भूमौ शय्या स्थण्डिले शयनम् । अग्निहोत्रं सायंप्रातरनुष्ठेयमग्निकार्यम्, अग्नये होत्रं हविराज्यादि यस्मिंस्तदिति व्युत्पत्तिः, तच्च अभिषेकस्त्रिकालस्नानं च अग्निहोत्राभिषेकौ । वन्य आहारः कन्दमूलफलादिः ।

परिव्राजकस्येत्यादि । परिव्राजकस्य परित्यज्य सर्वं व्रजतीति परिव्राजकः संन्यासी तस्य । संयतेन्द्रियत्वं जितेन्द्रियता । अनारम्भः नैष्कर्म्यम् । निष्किञ्चनत्वं निस्स्वत्वम् । सङ्गत्यागः प्रव्रजितान्तरेणापि संसर्गपरिहारः । अनेकत्र भैक्षं प्राणयात्रापर्याप्तस्यान्नस्य बहुषु गृहेषु भिक्षित्वा ग्रहणम् । बाह्याभ्यन्तरशौचं कायवाङ्मानसनैर्मल्यम् ।

सर्ववर्णाश्रमसाधारणान् धर्मानाह — **सर्वेषामिति** । अनसूया गुणपक्षपातः । आनृशंस्यम् अनिष्ठुरत्वम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वधर्मः स्वर्गायानन्त्याय च । तस्यातिक्रमे लोकः सङ्करादुच्छिद्येत ।

तस्मात् स्वधर्मं भूतानां राजा न व्यभिचारयेत् ।
स्वधर्मं संदधानो हि प्रेत्य चेह च नन्दति ॥

व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः ।
त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
तृतीयोऽध्यायः विद्यासमुद्देशे त्रयीस्थापना ॥

स्वधर्मः किमर्थमादतव्यस्तत्राह — **स्वधर्म** इति । स्वर्गाय परलोकसुखाय । आनन्त्याय च इहाविनाशाय मोक्षाय वा । अतिक्रमे उल्लङ्घने । सङ्करादुच्छिद्येत अनुष्ठातृव्यवस्थाविरहेण कर्मसङ्कराद् वर्णसङ्कराच्च उत्सादं प्राप्नुयात् । अयमाशयः — वर्णाश्रमधर्मा हि यथोक्ता अविवादसिद्धलोकयोगक्षेमहेतुभावाः तदुपासकबीजक्षेत्रसंक्रान्ततदनुष्ठानवासनासनाथैः तत्तद्वर्णाश्रमिभिरेव स्वकुलधर्मत्वबुद्ध्या भक्तिश्रद्धापुरस्सरमनुष्ठीयमानाः सन्तः सौष्ठवविशेषं प्रतिपत्तुं लोकोपकारे च कमपि कमप्यतिशयमाधातुं क्षमन्ते । ते चेदव्यवस्थमन्यैः कथञ्चिदनुष्ठीयेरन् ध्रुवं तर्हि सौष्ठवाद्धीयेरन् , लोकोपकारे च नातिशयमादधीरन्, अनुष्ठानबाह्यतां च क्रमेणासादयेयुरिति धर्मव्याकुलीभावाल्लोकविनाशः स्यादिति ।

अतः किं कर्तव्यं तत्राह — **तस्मादित्यादि** । भूतानां मनुष्याणाम् । न व्यभिचारयेत् व्यभिचरन्तं नानुमन्येत । स्वधर्मं सन्दधानः सम्यगनुष्ठापयन् । प्रेत्य परलोके, ल्यप्प्रतिरूपो निपातः ॥

वर्णाश्रमधर्मविधानद्वारेण त्रय्या महाफलत्वं वदन्नध्यायमुपसंहरति— **व्यवस्थितेत्यादि** । व्यवस्थिता वर्णाश्रमप्रतिबद्धा आर्यमर्यादा सदाचारनियमो यस्य स व्यवस्थितार्यमर्यादः । प्रसीदति मोदते । न सीदति न नश्यति ।

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
तृतीयोऽध्यायः विद्यासमुद्देशे त्रयीस्थापना ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१. प्रक. विद्यासमुद्देशः — वार्त्तादण्डनीतिस्थापना।

कृषिपाशुपाल्ये वणिज्या च वार्त्ता धान्यपशुहिरण्यकुप्यविष्टिप्रदानादौपकारिकी। तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्याम्।

आन्वीक्षिकीत्रयीवार्त्तानां योगक्षेमसाधनो दण्डः, तस्य नीतिर्दण्डनीतिः अलब्धलाभार्था, लब्धपरिरक्षणी, रक्षितविवर्धनी, वृद्धस्य तीर्थेषु प्रतिपादनी च। तस्यामायत्ता लोकयात्रा। तस्माल्लोकयात्रार्थी नित्यमुद्यतदण्डः स्यात्।

नह्येवंविधं वशोपनयनमस्ति भूतानां यथा दण्ड इत्याचार्याः।

अथ वार्त्ताया विद्यात्वं स्थापयितुं स्वरूपादिकमाह — **कृषिपाशुपाल्ये** इत्यादि। कृषिः क्षेत्रबीजवापपरिकर्मादिप्रतिपादकं शास्त्रं पराशरप्रोक्तं, पाशुपाल्यं गवाश्वादिपालनप्रकारोपदेशकं शास्त्रं गौतमशालिहोत्रादिप्रणीतम्। वणिज्या क्रयविक्रयव्यवहारतन्त्रं विदेहराजप्रणीतम्। **धान्येत्यादि।** तत्र हिरण्यम् अकुप्यं सुवर्णादि। कुप्यं स्वर्णरजतातिरिक्तं ताम्रादि तैजसं सारदारुवेणुवल्लीवल्कादिकमतैजसं च। विष्टिः कर्मकरः। तया कोशदण्डाभ्यां वार्त्तया जनिताभ्यां कोशदण्डाभ्यां कोशो धननिचयः दण्डः सेना ताभ्यां। स्वपक्षं परपक्षं च वशीकरोति स्वायत्तीकरोति, अर्थाद् राजा।

दण्डनीतेः स्वरूपादिकमाह— **आन्वीक्षिकीत्यादि।** योगक्षेमौ साधयतीति योगक्षेमसाधनः। दण्डो दमः सामादिषु प्रधानभूत उपायविशेषः। अथवा दण्डस्थत्वाद् राजा दण्डः। सति दण्डभये लोक आन्वीक्षिक्यादिषु सम्यक् प्रवर्तते, न त्वितरथेति दण्डस्यान्वीक्षिक्यादियोगक्षेमसाधनत्वं विज्ञेयम्। अत एवाहुः—

"सर्वो दण्डजितो लोको दुर्लभो हि शुचिः क्वचित्।
दण्डस्य हि भयात् कृत्स्नं जगद् भोगाय कल्पते॥"

इति। तस्य नीतिः नयनमनुष्ठानम् अर्थात् तदुपदेशशास्त्रम्। अलब्धलाभार्थेत्यादि दण्डनीतेः फलकथनम्। दण्डेन ह्यलब्धं लभ्यते, लब्धं परिरक्ष्यते परिरक्षितं वर्ध्यते, वर्धितं च तीर्थेषु पुण्यक्षेत्राध्वरादिषु विनियुज्यते। **तस्मादिति।** तस्मात् लोकवृत्तेर्दण्डनीत्यधीनत्वात्। नित्यम् उद्यतदण्डः सर्वदा दण्डप्रणयनोद्युक्तः स्याद्, अर्थाद् राजा।

नहीत्यादि। एवंविधं यथा दण्डस्तथाविधम्। वशोपनयनम् अनायत्तायत्तीकरणसाधनम्। नह्यस्ति नास्त्येव।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति कौटिल्यः । तीक्ष्णदण्डो हि भूतानामुद्वेजनीयः । मृदुदण्डः परिभूयते । यथार्हदण्डः पूज्यः । सुविज्ञातप्रणीतो हि दण्डः प्रजा धर्मार्थकामैर्योजयति । दुष्प्रणीतः कामक्रोधाभ्यामज्ञानाद् वानप्रस्थपरिव्राजकानपि कोपयति, किमङ्ग पुनर्गृहस्थान् । अप्रणीतो हि मात्स्यन्यायमुद्भावयति । बलीयानबलं हि ग्रसते दण्डधराभावे । तेन गुप्तः प्रभवतीति ।

चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः ।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे चतुर्थोऽध्यायः
विद्यासमुद्देशे वार्तास्थापना दण्डनीतिस्थापना च ।
विद्यासमुद्देशः समाप्तः ॥

तमिमं दण्डसामान्यश्लाघावादमाचार्याणां प्रतिषेधति — नेति । तत्र कारणवचनं तीक्ष्णेत्यादिना । तीक्ष्णदण्डः उग्रदण्डः, भूतानाम् उद्वेजनीयः उद्वेगजनकः उद्विजन्तेऽस्मादित्यपादानेऽनीयर् । यथार्हदण्डः युक्तदण्डः देशकालापराधानुगुण्यप्रयुज्यमानदण्डः, पूज्यः लोकबहुमान्यः । सा पूज्यता युक्तस्य दण्डस्य लोकाभ्युदयहेतुत्वादित्यभिप्रायवानाह — सुविज्ञातेत्यादि । सुविज्ञातप्रणीतः सुष्ठु शास्त्रतोऽवगत्य प्रयुक्तः । अयथावत् प्रणीतस्याप्रणीतस्य वा दण्डस्य सर्वानर्थहेतुत्वमाह — दुष्प्रणीत इत्यादिना । कामक्रोधाभ्यामज्ञानाद् दुष्प्रणीतः कामात् क्रोधादज्ञानाच्चायथावत् प्रयुक्तः । किं पुनर्गृहस्थान्, संयतेन्द्रियानपि यः कोपयति सोऽसंयतेन्द्रियान् कोपयतीति किमु वक्तव्यम् । अङ्गेत्युपदेश्यसम्बोधनम् । मात्स्यन्यायमिति महान् हि मत्स्यः क्षुद्रं मत्स्यं ग्रसत इति बलवता दुर्बलस्य यत् पीडनं स मात्स्यन्याय इत्युच्यते । बलीयानित्यादि । दण्डधराभावे दण्डप्रणेतुरभावे । तेन गुप्तः प्रभवति सुप्रणीतेन दण्डेन रक्षितः अर्थाद् दुर्बलः प्रभवति बलयुक्तो भवति ।

अध्यायान्ते श्लोकमाह — चतुर्वर्णेत्यादि । स्वधर्मकर्माभिरतः वर्णाश्रमधर्मकर्मानुष्ठानपरः । स्वेषु वेश्मसु वर्तते स्वास्थ्येन वसतीत्यर्थः । दण्डपालनाभावे हि स्वगृहेऽपि स्वास्थ्यवृत्तिर्दुर्लभेति ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे चतुर्थोऽध्यायः
विद्यासमुद्देशे वार्तास्थापना दण्डनीतिस्थापना च ।
विद्यासमुद्देशः समाप्तः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२. प्रक. वृद्धसंयोगः ।

तस्माद् दण्डमूलास्तिस्रो विद्याः । विनयमूलो दण्डः प्राणभृतां योगक्षेमावहः ।

कृतकः स्वाभाविकश्च विनयः । क्रिया हि द्रव्यं विनयति नाद्रव्यम् । शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिविष्टबुद्धिं विद्या विनयति नेतरम् ।

विद्यानां तु यथास्वमाचार्यप्रामाण्याद् विनयो नियमश्च ।

वृद्धसंयोग इति सूत्रम् । वृद्धा आन्वीक्षिक्यादिविद्याकोविदाः तैः संयोगः शिष्याचार्यभावलक्षणः सम्बन्धोऽभिधीयत इति सूत्रार्थः ।

तस्मादित्यादि । तस्मात् चतुर्वर्णाश्रमस्य लोकस्य राज्ञा सुविज्ञातप्रयुक्तदण्डमुखेन पाल्यमानस्यैव स्वधर्मकर्मानुष्ठानप्रवणतोत्पादात्, तिस्रो विद्याः आन्वीक्षिकीत्रयीवार्त्तालक्षणाः, दण्डमूलाः दण्डाधीनस्थितिकाः । दण्डश्च विनयलक्षणेन शास्त्रविज्ञानेन दत्तहस्तः प्राणिनां योगक्षेमसम्पत्तिहेतुरित्याह— **विनये**त्यादि ।

कृतक इत्यादि । तत्र विनयः, क्रियया अभियोगलक्षणया निर्वृत्तः कृतक इत्येकः । विनापि क्रियां वासनावशात् सिद्धः स्वाभाविक इत्यपरः । यथा हि संस्करणाभियोगः शाणघर्षणादिः द्रव्यं खन्यादिप्रभवं पाषाणादिविशेषं संस्करोति न पुनरद्रव्यं यंकमपि शिलादिखण्डं, तथा विद्याभियोगः स्वतस्सिद्धशुश्रूषादिबुद्धिगुणसम्पन्नमेव जनं संस्करोति, न तु तद्रहितम् । बुद्धिगुणाश्च तेऽष्टौ भवन्ति— शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिवेशाख्याः । तत्र शुश्रूषा श्रवणार्हेषु श्रोतुमिच्छा, तस्यां सत्यां श्रवणम् आसेवा, ग्रहणं श्रुतार्थज्ञानं, धारणं गृहीताविस्मरणं, विज्ञानं धारितेष्वर्थेषु साध्यसाधनादिस्वरूपविवेकज्ञानम्, ऊहः शब्दानुक्तस्य लिङ्गेनावगतिः, अपोहो युक्त्यपेतस्य हानं, तत्त्वाभिनिवेशो वस्तुयाथात्म्यज्ञानम् ।

एवं विद्याधिकारिणं तदनधिकारिणं चोक्त्वा विद्याग्रहणकाले शिष्येणाचरणीयमाह— **विद्यानां** त्विति । विद्यानाम् आचार्यप्रामाण्याद् यस्या विद्याया यो य आचार्य उपदेष्टा तस्य प्रामाण्यात् तदध्ययनकाले तं तं शिष्यं प्रति धर्मानुशासनप्रभविष्णुत्वात्, यथास्वं तत्तदाचार्यानुशासनानतिक्रमेण

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वृत्तचौलकर्मा लिपिं सङ्ख्यानं चोपयुञ्जीत । वृत्तोपनयनस्त्रयीमान्वीक्षिकीं च शिष्टेभ्यः, वार्त्तामध्यक्षेभ्यः, दण्डनीतिं वक्तृप्रयोक्तृभ्यः ।

ब्रह्मचर्यं च आ षोडशाद् वर्षात् । अतो गोदानं दारकर्म च । अस्य नित्यश्च विद्यावृद्धसंयोगो विनयवृद्ध्यर्थं, तन्मूलत्वाद् विनयस्य ।

पूर्वमहर्भागं हस्त्यश्वरथप्रहरणविद्यासु विनयं गच्छेत्, पश्चिममितिहासश्रवणे । पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रमर्थ-

---

विनयः शिक्षणम्, 'आहूतश्चाप्यधीयीत' इत्युक्तप्रकारं, समुदाचारो वा गुर्वागमनोपवेशादौ प्रत्युत्थानानुपवेशादिः, नियमश्च गुरुपरिचरणादिव्रतं च, अर्थाच्छिष्यस्य भवति ।

वृत्तेति । वृत्तचौलकर्मा कृतचौलः त्रिवर्षः पञ्चवर्षो वेत्यर्थः, लिपिम् अक्षरम्, संख्यानं गणितं च, उपयुञ्जीत नियमपूर्वमधीयीत । त्रयीमित्यादिनाप्येतत् सम्बध्यते । वृत्तोपनयनः लब्धगायत्र्युपदेशः, त्रयीम् आन्वीक्षिकीं च, शिष्टेभ्यः सम्यगधिगततद्विद्येभ्यः, उपयुञ्जीत । वार्त्ताम्, अध्यक्षेभ्यः सीताध्यक्षादिभ्यः, उपयुञ्जीत । दण्डनीतिं, वक्तृप्रयोक्तृभ्यः प्रवचनप्रयोगकुशलेभ्यः, उपयुञ्जीत ।

ब्रह्मचर्यमिति । आ षोडशाद् वर्षात् षोडशं वयोऽभिव्याप्य, ब्रह्मचर्यं, रक्ष्यमित्यार्थम् । अतः पश्चात्, गोदानं केशान्तकर्म, दारकर्म च विवाहश्च । अस्य कृतदारस्य, विद्यावृद्धसंयोगः विद्यावृद्धैः सह परिचयः, नित्यः दारकर्मोत्तरकालेऽप्यनुवर्त्यः । किमर्थं, विनयवृद्ध्यर्थं विनयस्य शास्त्रसंस्कारस्य वृद्धये । कस्मात्, विनयस्य तन्मूलत्वाद् विद्यावृद्धसंयोगप्रभवत्वात् ।

भूयः कलाभ्यासं राज्ञ उपदेष्टुमाह — **पूर्वमिति** । पूर्वम् अहर्भागम्, अत्यन्तसंयोगे द्वितीया । हस्त्यश्वरथप्रहरणविद्यासु हस्तिचर्यायामश्वचर्यायां रथचर्यायाम् आयुधविद्यायां च, विनयं शिक्षां, गच्छेत् । पश्चिमं तृतीयमहर्भागम्, इतिहासश्रवणे, विनयं गच्छेत् । इतिहासपदार्थविवरणं **पुराण**मित्यादि । पुराणं ब्राह्मादि । इतिवृत्तं श्रीरामायणमहाभारतादि । आख्यायिका दिव्यमानुषादिचरितम् । उदाहरणं न्यायोपन्यासशास्त्रं मीमांसादि,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शास्त्रं चेतीतिहासः। शेषमहोरात्रभागमपूर्वग्रहणं गृहीतपरिचयं च कुर्याद्, अगृहीतानामाभीक्ष्ण्यश्रवणं च।

श्रुताद्धि प्रज्ञोपजायते प्रज्ञाया योगो योगादात्मवत्तेति विद्यासामर्थ्यम्।

विद्याविनीतो राजा हि प्रजानां विनये रतः।
अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
पञ्चमोऽध्यायः वृद्धसंयोगः॥

धर्मशास्त्रं मानवादि। अर्थशास्त्रम् औशनसबार्हस्पत्यादि। शेषं मध्यमम् अहर्भागम् अहोरात्रभागमिति मूलग्रन्थेषु पठ्यते। तदा शिष्टं मध्यममहर्भागं, रात्रौ कार्यान्तरनिद्रादिविनियुक्तावशिष्टतया लभ्यमानं रात्रिभागं चेति व्याख्येयम्। अपूर्वग्रहणं प्रतिनवप्रमेयश्रवणं, गृहीतपरिचयं गृहीतधारणार्थं चिन्तनं च कुर्यात्। अगृहीतानाम् आभीक्ष्ण्यश्रवणम् ईषद्गृहीतानां सम्यङ्मनःप्रवेशार्थं पुनःपुनःश्रवणं च।

श्रुतादिति। श्रुतात् श्रवणात्, प्रज्ञा त्रैकालिकी बुद्धिः, उपजायते। प्रज्ञाया योगः शास्त्रोक्तानुष्ठानश्रद्धा, योगाद् आत्मवत्ता मनस्विता सत्त्ववत्ता उपजायते। इति विद्यासामर्थ्यम् इत्येतद् विद्याशक्तिजन्यं फलमित्यर्थः।

विद्याविनीत इत्यादि। विनये शिक्षणे। अनन्यां नाथान्तरशून्याम् एकनाथामित्यर्थः। शेषं स्फुटम्॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
पञ्चमोऽध्यायः वृद्धसंयोगः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. प्रक. इन्द्रियजयः — अरिषड्वर्गत्यागः ।

विद्याविनयहेतुरिन्द्रियजयः कामक्रोधलोभमानमदहर्षत्यागात् कार्यः । कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्दस्पर्शरूपरसगन्धेष्वविप्रतिपत्तिरिन्द्रियजयः शास्त्रार्थानुष्ठानं वा । कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः ।

तद्विरुद्धवृत्तिरवश्येन्द्रियश्चातुरन्तोऽपि राजा सद्यो विनश्यति— यथा दाण्डक्यो नाम भोजः कामाद् ब्राह्मणकन्यामभिमन्यमानः सबन्धुराष्ट्रो विननाश करालश्च वैदेहः, कोपाज्जनमेजयो ब्राह्मणेषु

इन्द्रियजय इति सूत्रम् । इन्द्रियाणि श्रोत्रादीनि तेषां जयः शब्दादिषु स्वस्वविषयेषु अविरुद्धा प्रवृत्तिः । सा शास्त्रसंस्कारमन्तरेण स्वत एव भवन्ती स्वाभाविक इन्द्रियजयः, शास्त्रानुष्ठाननिष्ठावशाद् भवन्ती कृतकः । स इहोच्यत इति सूत्रार्थः । इदं च सूत्रमध्यायद्वयेन भाष्यते । वृद्धसंयोगानन्तरं तद्धेतुरिन्द्रियजयः प्रसक्त इति प्रकरणसङ्गतिः ।

विद्येत्यादि । विद्याविनयहेतुः विद्यासंस्कारकारणम् । कामेति । परस्त्रीविषयोऽभिलाषः कामः, हिंसाप्रवर्तकश्चित्तविकारः क्रोधः, परद्रव्येच्छा लोभः, बालिश्यादात्मन्यनुपमत्वबुद्धिर्मानः धनविद्यादिप्रभवो गर्वो मदः, इष्टार्थप्राप्त्युपभोगजन्या प्रीतिर्हर्षः, षडेते शत्रव इत्युच्यन्ते । एषां त्यागाद् वर्जनात् । अविप्रतिपत्तिः स्वत एवाविरुद्धा प्रवृत्तिः । शास्त्रार्थानुष्ठानं शास्त्रार्थेषु उपादेयत्वेन शास्त्रतोऽवगतेषु शब्दस्पर्शादिषु अनुष्ठानं प्रवृत्तिनियमः । कृत्स्नं हि शास्त्रमिदमिन्द्रियजय इति अनुष्ठेयतया शास्त्रेण प्रतिपाद्यमानः सर्वोऽर्थ इन्द्रियजयस्य कारणमित्यर्थः, कारणे कार्योपचारः ।

तद्विरुद्धेत्यादि । तद्विरुद्धवृत्तिः शास्त्राविरुद्धानुष्ठानः । चातुरन्तोऽपि चतुरन्ता चतुस्समुद्रपर्यन्ता भूमिः तस्या ईश्वरोऽपि । तत्र कामादिषु एकैकेन विनष्टेषु द्वौ द्वौ निदर्शयति — यथेत्यादिना । भोजवंश्यो दाण्डक्यः कामाद् ब्राह्मणकन्यामपहृत्य तत्पित्रा शप्तः बन्धुराष्ट्रसहितो नष्टः, तथा विदेहाधिपः करालो ब्राह्मणीमभिलषन् ब्राह्मणेन शप्तो नष्टः । कोपाद् जनमेजयो नाम राजाऽश्वमेधे वर्तमाने ब्राह्मणैः सह कलहायितस्तच्छापान्नष्टः, तथा तालजङ्घो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विक्रान्तः तालजङ्घश्च भृगुषु, लोभादैलश्चातुर्वर्ण्यमत्याहारयमाणः सौवीरश्चाजबिन्दुः, मानाद् रावणः परदारानप्रयच्छन् दुर्योधनो राज्यादंशं च, मदाद् डम्भोद्भवो भूतावमानी हैहयश्चार्जुनः, हर्षाद् वातापिरगस्त्यमत्यासादयन् वृष्णिसङ्घश्च द्वैपायनमिति ।

एते चान्ये च बहवः शत्रुषड्वर्गमाश्रिताः ।
सबन्धुराष्ट्रा राजानो विनेशुरजितेन्द्रियाः ॥
शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः ।
अम्बरीषश्च नाभागो बुभुजाते चिरं महीम् ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
षष्ठोऽध्यायः इन्द्रियजये अरिषड्वर्गत्यागः ॥

भृगुषु विक्रम्य तच्छापान्नष्टः । लोभाद् ऐलः पुरूरवा नाम राजा चातुर्वर्ण्यमतिमात्रधनहरणेन पीडयंश्चातुर्वर्ण्यकोपान्नष्टः, तथा सौवीरपतिरजबिन्दुः । लोभादैलो नैमिशीयब्राह्मणयज्ञशालां प्रविश्य ततोऽपरिमितं धनं हर्तुमुद्युक्तो ब्राह्मणशापान्नष्ट इत्यैतिह्यं कैश्चिद् वर्ण्यते । मानाद् रावणः सीतां रामायाप्रयच्छन् नष्टः, तथा दुर्योधनो राज्यांशं पाण्डवेभ्योऽप्रयच्छन् नष्टः । मदाद् राजा डम्भोद्भवो नाम कृतसर्वप्रजावज्ञानो नरनारायणाभ्यां सह युद्धमासाद्य हतः, तथा हेहयाधिपः कार्तवीर्यो मदात् परशुरामपितरि प्रयुक्तापराधः परशुरामेण युद्धे हतः । हर्षाद् वातापिरसुरोऽगस्त्यं महर्षिं वञ्चयन् यादवसङ्घश्च व्यासमतिसन्धित्सुस्ताभ्यां शप्तौ विनेशतुः । इत्यैतिह्यानि ।

उक्ता राजान उपलक्षणम्, अन्येऽपि बहव आसन्नित्याह — **एत इत्यादि** ॥

अरिषड्वर्गस्यान्वयेऽनर्थं निदर्श्य व्यतिरेके निःश्रेयसप्राप्तिं निदर्शयति — **शत्रुषड्वर्गमित्यादि** । जामदग्न्यः परशुरामः । नाभागो नभागसूनुः ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
षष्ठोऽध्यायः इन्द्रियजये अरिषड्वर्गत्यागः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३. प्रक. इन्द्रियजयः—राजर्षिवृत्तम् ।

तस्मादरिषड्वर्गत्यागेनेन्द्रियजयं कुर्वीत, वृद्धसंयोगेन प्रज्ञां, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनं, कार्यानुशासनेन स्वधर्मस्थापनं, विनयं विद्योपदेशेन, लोकप्रियत्वमर्थसंयोगेन, हितेन वृत्तिम् ।

एवं वश्येन्द्रियः परस्त्रीद्रव्यहिंसाश्च वर्जयेत् स्वप्नं लौल्यमनृतमुद्धतवेषत्वमनर्थसंयोगं च, अधर्मसंयुक्तमनर्थसंयुक्तं च व्यवहारम् ।

धर्मार्थाविरोधेन कामं सेवेत न निस्सुखः स्यात् । समं वा त्रिवर्गमन्योन्यानुबन्धम् । एको ह्यत्यासेवितो धर्मार्थकामानामात्मानमितरौ च पीडयति ।

अर्थ एव प्रधान इति कौटिल्यः, अर्थमूलौ हि धर्मकामाविति ।

अस्मिन्नध्याये राजर्षिवृत्तमुच्यते । राजैव सन् य ऋषिः जितेन्द्रियः स राजर्षिः ।

तस्मादित्यादि । तस्माद् अरिषड्वर्गत्यागस्य श्रेयस्साधनत्वात् । वृद्धसंयोगेन प्रज्ञां कुर्वीत उत्पादयेत् विकासयेच्च । चारेण चक्षुः कुर्वीत गूढपुरुषं चक्षुस्स्थाने कुर्यात् स्वपरराष्ट्रवृत्तप्रत्यक्षीकरणार्थम् । उत्थानेन उद्योगेन, उत्थानमुद्योगः अनुष्ठानमिति पर्यायाः, योगक्षेमसाधनं योगक्षेमसम्पादनम् । कार्यानुशासनेन स्वधर्मस्थापनम् इदमीदृशमित्थं कर्तव्यमित्याज्ञापनेन स्वधर्मे लोकस्य नियन्त्रणम् । अर्थसंयोगेन लोकप्रियत्वम् अर्थस्य धनस्य स्वीकरणेन समुचितेषु पात्रेष्वर्पणेन च जनप्रियत्वं । हितेन वृत्तिं तदात्वायत्योर्यत् पथ्यं तेन लोकयात्राम् । कुर्वीतेति सर्वत्रानुषङ्गः ।

एवमित्यादि । परस्त्रीद्रव्यहिंसाः परस्त्रियं परद्रव्यं परहिंसां च । स्वप्नम् अयथोचितां निद्राम् । लौल्यं चापलम् अनृतं मिथ्यावादम् । उद्धतवेषत्वम् अविनीतवेषताम् । अनर्थसंयोगम् उक्तस्यार्थसंयोगस्य प्रत्यनीकम् ।

धर्मेत्यादि । धर्मार्थाविरोधेन धर्मार्थयोरबाधेन कामं तृतीयपुरुषार्थम् । वेति पक्षान्तरे, तच्च अन्योन्यानुबन्धं त्रिवर्गं समं सेवेतेति । परस्परसंसृष्टान् धर्मार्थकामांस्तुल्यमात्रया सेवेतेत्यर्थः । सममसेवने को दोषस्तत्राह — **धर्मार्थकामानां** मध्ये एकः अन्यतमः अत्यासेवितः अतिमात्रं व्यसनितया सेवितः सन् इतरौ अर्थकामौ धर्मकामौ धर्मार्थौ वा, पीडयति हि ।

धर्मादीनां समप्राधान्यमरोचयमान आह — **अर्थ एवेति** । एवका-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मर्यादां स्थापयेदाचार्यानमात्यान् वा, य एनमपायस्थानेभ्यो वारयेयुः, छायानालिकाप्रतोदेन वा रहसि प्रमाद्यन्तमभितुदेयुः।

सहायसाध्यं राजत्वं चक्रमेकं न वर्तते।
कुर्वीत सचिवांस्तस्मात् तेषां च शृणुयान्मतम् ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
सप्तमोऽध्यायः इन्द्रियजये राजर्षिवृत्तम्।
इन्द्रियजयः समाप्तः॥

रेण धर्मकामयोरप्राधान्यमुक्तम्। तत्र हेतुरुच्यते — **अर्थमूलौ इत्यादिना।** अर्थमूलौ अर्थसाध्यौ।

मूर्धाभिषिक्तं राजर्षिवृत्तमाह — **मर्यादामिति।** आचार्यान् गुरून्, अमात्यान् मन्त्रिणो वा, मर्यादां स्थापयेत्, सीमां परिकल्पयेत्, ताद्धर्म्यात् ताच्छब्द्यम्, सीमामिवालङ्घनस्थानमात्मनो विदध्यादित्यर्थः। ते कीदृशाः, ये एनं राजानम्, अपायस्थानेभ्यो वारयेयुः अनर्थकारणानुष्ठानेभ्यो * निवर्तयेयुः, रहसि प्रमाद्यन्तम् अन्तःपुरादावतिप्रसजन्तमेनं, छायानालिकाप्रतोदेन छाया त्रिपौरुष्यादिरूपं छायाप्रमाणमतीतघटिकावेदकं राजप्रणिधिप्रकरणे वक्ष्यमाणं नालिका घटिकाप्रमाणं तदुभयरूपेण प्रतोदेन कार्यान्तरकालातिपातसूचनद्वारा प्रसक्तेष्टकर्मप्रत्यूहजनकतया मनोऽन्यथाकारित्वात् प्रतोदतुल्येन पुनःपुनश्छायानालिकानिवेदनेनेत्यर्थः, अभितुदेयुर्वा परिव्यथयेयुश्च प्रमादभङ्गार्थम्।

किमर्थं यथोक्तसचिवस्थापनेनात्मा परतन्त्रतां नीयत इति चेत् तत्राह — **सहायेत्यादि।** सहायसाध्यं सहायनिर्वाह्यं न त्वेकाकिनात्मना निर्वाह्यम्। तत्र दृष्टान्तः — चक्रमेकं न वर्तत इति, शकटादौ युक्तम् एकं चक्रान्तरसहायरहितं चक्रं न परिभ्रमति। सचिवान् आचार्यानमात्यांश्च। शृणुयाच्च श्रुत्वानुतिष्ठेच्च ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
सप्तमोऽध्यायः इन्द्रियजये राजर्षिवृत्तम्।
इन्द्रियजयः समाप्तः॥

---

* "नृपस्य ते हि सुहृदस्त एव गुरवो मताः।
य एनमुत्पथगतं वारयन्त्यनिवारिताः॥"— इति कामन्दकः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४. प्रक. अमात्योत्पत्तिः ।

सहाध्यायिनोऽमात्यान् कुर्वीत दृष्टशौचसामर्थ्यत्वादिति भारद्वाजः, ते ह्यस्य विश्वास्या भवन्तीति ।

नेति विशालाक्षः । सहक्रीडितत्वात् परिभवन्त्येनम् । ये ह्यस्य गुह्यसधर्माणस्तानमात्यान् कुर्वीत समानशीलव्यसनत्वात्, ते ह्यस्य मर्मज्ञभयान्नापराध्यन्तीति ।

साधारण एष दोष इति पराशरः । तेषामपि मर्मज्ञभयात् कृताकृतान्यनुवर्तेत ।

अमात्योत्पत्तिरिति सूत्रम् । अमात्या नाम राज्ञः सहायाः तेषामुत्पत्तिः करणमिहोच्यत इत्यर्थः । विद्यावृद्धसंयोगेन्द्रियजययुक्तोऽपि राजा सहायमन्तरेण राज्यपालनं कर्तुमशक्त इति सहायापेक्षायां तदुत्पत्तिरुच्यत इति प्रकरणसङ्गतिः ।

के तावदमात्यपदमर्हन्तीत्यपेक्षायां भारद्वाजादयः सप्ताचार्याः सप्तधा वर्णयन्ति । तत्र भारद्वाजस्य पक्षमाह — **सहाध्यायिन** इत्यादि । दृष्टशौचसामर्थ्यत्वात् शौचं हृदयशुद्धिः तच्च सामर्थ्यं कार्यनैपुण्यं च दृष्टं सहाध्ययनकाले प्रत्यक्षितं येषां तेषां भावस्तत्त्वं तस्मात् । विश्वास्याः विश्वासयोग्याः ।

तं पक्षं विशालाक्षः प्रतिषेधति — **नेती**त्यादि । परिभवन्ति अवजानन्ति । के तर्ह्यमात्याः कार्यास्तत्राह — **ये ही**ति । गुह्यसधर्माणः गुह्यं शीलच्युतिः पारदारिकत्वादि तत्र समानाः । तथाविधानाममात्यीकरणे गुणमाह — **ते ही**ति । ते हि मर्मज्ञभयात् अस्मन्मर्मज्ञो राजेति भयात् । अस्य नापराध्यन्ति अपराधं न कुर्वन्ति, यत्नेन शीलसौष्ठवमासाद्य स्वकर्म सम्यगनुतिष्ठन्तीत्यर्थः ।

पराशरमतमाह — **साधारण** इति । एष दोषः दुश्शीलत्वं, साधारणः गुह्यसधर्मणां राज्ञश्च समानः । अस्तु को दोष इति चेदाह — **मर्मज्ञभयात्** अमात्या मन्मर्मज्ञा इति भयात्, तेषामपि अमात्यानामपि, **कृताकृतानि** असुष्ठुकृतानि कर्माणि अनुवर्तेत अनुसरेत्, अर्थाद् राजा ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यावद्भ्यो गुह्यमाचष्टे जनेभ्यः पुरुषाधिपः ।
अवशः कर्मणा तेन वश्यो भवति तावताम् ॥

य एनमापत्सु प्राणाबाधयुक्तास्वनुगृह्णीयुस्तानमात्यान् कुर्वीत, दृष्टानुरागत्वादिति ।

नेति पिशुनः । भक्तिरेषा न बुद्धिगुणः । सङ्ख्यातार्थेषु कर्मसु नियुक्ता ये यथादिष्टमर्थं सविशेषं वा कुर्युस्तानमात्यान् कुर्वीत, दृष्टगुणत्वादिति ।

नेति कौणपदन्तः । अन्यैरमात्यगुणैरयुक्ता ह्येते । पितृपैतामहानमात्यान् कुर्वीत, दृष्टापदानत्वात् । ते ह्येनमपचरन्तमपि न त्यजन्ति, सगन्धत्वात् । अमानुषेष्वपि चैतद् दृश्यते—गावो ह्यसगन्धं गोगणमतिक्रम्य सगन्धेष्वेवावतिष्ठन्ते इति ।

अस्मिन्नर्थे श्लोकमाह — यावद्भ्य इत्यादि । गुह्यम् आचष्टे स्वं शीलभ्रंशं प्रकाशयति । अवशः अधीरः । एवञ्च गुह्यसधर्मणोऽमात्यान् न कुर्यादित्यभिप्रायः ।

कांस्तर्हि कुर्यादित्यत्राह — य एनमिति । अनुगृह्णीयुः उपकुर्युः ।

उक्तं पक्षं खण्डयति — नेतीति । पिशुनः नारदः । तत्र हेतुरुच्यते — भक्तिरेषा न बुद्धिगुणः, स्वशरीरनैरपेक्ष्येण राजरक्षणप्रवृत्तिर्नामायं सेवाधर्मः नतु बुद्धिगुणः बुद्धिगुणसम्पन्नश्चामात्यो भवितुमर्हतीत्याशयः । संख्यातेत्यादि । ये संख्यातार्थेषु परिगणितद्रव्योत्पत्तिषु, कर्मसु नियुक्ताः अर्थं यथादिष्टं सविशेषं वा कुर्युः द्रव्यं क्लृप्तसंख्यानूनं क्लृप्तसंख्याधिकसंख्यं वा भावयेयुः ।

नारदपक्षं कौणपदन्तो निराचष्टे—नेति कौणपेत्यादि । अन्यैर्गुणैः धनभावनातिरिक्तैर्विश्वास्यत्वानुरक्तत्वादिभिर्गुणैः । पितृपैतामहान् पितृपितामहक्रमागतान् । दृष्टापदानत्वात् दृष्टं साक्षादनुभूतम् अपदानं पूर्ववृत्तं येषां ते दृष्टापदानाः तेषां भावस्तत्त्वं तस्मात् । एतेन पूर्वपुरुषशीलप्रत्ययगुणत्वमुक्तम् । गुणान्तरमाह — ते हीति । अपचरन्तमपि एनम् आत्मापकारिणमपि स्वामिनम् । सगन्धत्वात् सम्बन्धित्वात् परिचितत्वात्, सम्बन्धसामान्यवचन इह गन्धशब्दः । पशुदृष्टान्तमाह — अमानुषेष्विति । एतत् परिचयस्य परिचितात्यागकारणत्वम् । असगन्धम् अपरिचितम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नेति वातव्याधिः, ते ह्यस्य सर्वमवगृह्य स्वामिवत् प्रचरन्तीति। तस्मान्नीतिविदो नवानमात्यान् कुर्वीत, नवास्तु यमस्थाने दण्डधरं मन्यमाना नापराध्यन्तीति।

नेति बाहुदन्तीपुत्रः। शास्त्रविददृष्टकर्मा कर्मसु विषादं गच्छेत्। अभिजनप्रज्ञाशौचशौर्यानुरागयुक्तानमात्यान् कुर्वीत, गुणप्राधान्यादिति।

सर्वमुपपन्नमिति कौटल्यः, कार्यसामर्थ्याद्धि पुरुषसामर्थ्यं कल्प्यते सामर्थ्यतश्च।

उक्तं पक्षं वातव्याधिर्नानुमन्यत इत्याह — **नेति** वातेत्यादि। वातव्याधिरुद्धवः श्रीकृष्णमन्त्री। ते कुलक्रमागता अमात्याः। अस्य सर्वमवगृह्य स्वामिनः समस्तं विभवमवष्टभ्य स्वामिवत् प्रचरन्ति स्वतन्त्रवृत्तयो भवेयुः। के तर्ह्यमात्याः कार्या इत्याह — तस्मादित्यादि। नवान् पूर्वसम्बन्धरहितान्। दण्डधरं यमस्थाने मन्यमानाः राजानं यमवदुग्रदण्डं बुध्यमानाः।

इममपि पक्षं बाहुदन्तीपुत्रो न सहत इत्याह — **नेति बाह्विति**। कुत इत्यत्राह — **शास्त्रे**त्यादि। नीतिशास्त्रग्रन्थनिष्णातस्तदर्थानुष्ठानपरिचयविकलः अमात्यकर्मसु अवसादं प्राप्नुयात् अनिर्वाही स्यादित्यर्थः। कांस्तर्हि अमात्यान् कुर्वीतेत्यत्राह— **अभिजने**त्यादि। अभिजनो वंशशुद्धिः प्रज्ञा बुद्ध्यतिशयः शौचमुपधाशुद्धिः शौर्यम् उत्साहशक्तिः अनुरागः स्वामिभक्तिः एतैर्युक्ता ये पुरुषाः तान् अमात्यान् कुर्वीत। कुतः, गुणप्राधान्यात् गुणानामेव प्रधानत्वात्।

स्वमतमाह — **सर्वमिति**। सर्वम् उपपन्नं, शौचसामर्थ्यादयो गुणाः स्वामिपरिभवादिदोषाश्च पूर्वोक्ताः सहाध्यायिप्रभृतिषु न्याय्याः। कुतः, हि यस्मात् कारणात्, पुरुषसामर्थ्यं पुरुषस्य तत्तदधिकारपदयोग्यता, कार्यसामर्थ्यात् सामर्थ्यतश्च कार्याणां सहाध्ययनक्रीडादीनां शक्त्या सामर्थ्याच्च प्रज्ञाशास्त्रसंस्कारशौर्यादितारतम्ययोगित्वलक्षणात्, कल्प्यते व्यवस्थाप्यते इत्यर्थः। गुणदोषोभयोपपन्नत्वं वदता चार्थादिदमुक्तं भवति — सहाध्यायिप्रभृतयो न हेयाः विश्वास्यत्वादिगुणयोगात्, नापि मन्त्रिपदे कर्तव्याः परिभवादिदोषयोगात्, पारिशेष्यात् तु कर्मसचिवपदे कर्तव्याः तत्तद्गुणापेक्षेषु च कर्मसु देशकालानुरोधेन नियोक्तव्या इति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विभज्यामात्यविभवं देशकालौ च कर्म च ।
अमात्याः सर्व एवैते कार्याः स्युर्नतु मन्त्रिणः ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
अष्टमोऽध्यायः अमात्योत्पत्तिः ॥

एतदर्थकमध्यायप्रान्ते श्लोकमाह — विभज्येत्यादि । अमात्यविभवं विश्वास्यत्वाद्यमात्यगुणसम्पदम् । विभज्य यस्मिन् देशे यस्मिन् काले यस्य कर्मणः सुष्ठु निष्पत्तये यो गुणोऽपेक्ष्यते, तं तं यथायथं विविच्येत्यर्थः । सर्व एवैते तत्तद्गुणवन्तः सहाध्याय्यादयः सर्वेऽपि । अमात्याः कर्मसचिवाः कार्याः, मन्त्रिणस्तु न कार्याः मन्त्रिपदे तु न निवेश्याः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
अष्टमोऽध्यायः अमात्योत्पत्तिः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५. प्रक. मन्त्रिपुरोहितोत्पत्तिः ।

जानपदोऽभिजातः स्ववग्रहः कृतशिल्पश्चक्षुष्मान् प्राज्ञो धारयिष्णुर्दक्षो वाग्मी प्रगल्भः प्रतिपत्तिमानुत्साहप्रभावयुक्तः क्लेशसहः शुचिर्मैत्रो दृढभक्तिः शीलबलारोग्यसत्त्वसंयुक्तः स्तम्भचापल्यवर्जितः संप्रियो वैराणामकर्तेत्यमात्यसम्पत् । अतः पादार्धगुणहीनौ मध्यमावरौ ।

तेषां जनपदमवग्रहं चाप्यतः परीक्षेत, समानविद्येभ्यः शिल्पं शास्त्रचक्षुष्मत्तां च; कर्मारम्भेषु प्रज्ञां धारयिष्णुतां दाक्ष्यं च; कथा-

---

मन्त्रिपुरोहितोत्पत्तिरिति सूत्रम् । मन्त्री प्रधानामात्यः यस्मिन्नायत्ताः कर्मसाचिवाः, पुरोहितः पुरोऽग्रे धीयते सर्वकार्येषु प्रमाणत्वेन निवेश्यत इति पुरोहितः, तयोरुत्पत्तिरिहाभिधीयत इत्यर्थः । **इत्यमात्यसम्पादिति** । अमात्यस्य मन्त्रिणो गुणवैभवम् एवम्प्रकारम् । जानपदत्वादयस्तु गुणप्रकाराः । तत्र जानपदः विजिगीषुराष्ट्रभवः । अभिजातः विशुद्धान्वयः । स्ववग्रहः शोभनबन्धुरिति साम्प्रदायिकाः, सुखेनावग्रहीतुं प्रामादिकाकार्यप्रवृत्तेर्वारयितुं शक्यः । कृतशिल्पः कृतं शिक्षितं गजाश्वारोहणरथयुद्धायुधगान्धर्वविद्यादिकं येन स तथा । चक्षुष्मान् अर्थशास्त्रं चक्षुः तदभिज्ञः । प्राज्ञः सहजबुद्धिसम्पन्नः । धारयिष्णुः अविस्मरणशीलः । दक्षः क्षिप्रकारी । वाग्मी मधुरोपपन्नवक्ता । प्रगल्भः प्रौढः । प्रतिपत्तिमान् प्रतिकर्तुं प्रतिवक्तुं च समर्थः, इतिकर्तव्यतानिश्चयवान् वा । उत्साहप्रभावयुक्तः उत्साहयुक्तः पुरुषकारवान् प्रभावयुक्तः प्रभुशक्तिमान् । क्लेशसहः जितश्रमः । शुचिः चतुर्विधोपधाशुद्धः । मैत्रः सर्वत्र स्निग्धव्यवहर्ता । दृढभक्तिः अविचाल्यराजानुरागः । शीलबलारोग्यसत्त्वसंयुक्तः शीलं सद्वृत्तं बलं देहशक्तिः आरोग्यं निर्व्याधित्वं सत्त्वं धैर्यम् एतैर्युक्तः । स्तम्भचापल्यवर्जितः स्तम्भवर्जितः विगर्वः प्रणतिशीलो वा, चापल्यवर्जितः स्थिरप्रकृतिः । संप्रियः सौम्यदर्शनः । वैराणामकर्ता स्त्रीभूम्यादिनिमित्तानां वैराणामनुत्पादकः शमयिता च । एभिः पञ्चविंशतिगुणैः सम्पन्न उत्तमो मन्त्री । **अत इति** । अतः एभ्यो गुणेभ्यः, पादार्धगुणहीनौ मध्यमावरौ, चतुर्थांशगुणहीनो मध्यमः, अर्धगुणविहीनोऽधम इत्यर्थः ।

जानपदत्वादिज्ञानोपायानाह — तेषामित्यादि । तेषां जानपदत्वादीनां मध्ये अथवा उत्तममध्यमाधमानां मन्त्रिणाम् । आप्यतः आप्तियोग्यात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगेषु वाग्मित्वं प्रागल्भ्यं प्रतिभानवत्त्वं च ; आपद्युत्साहप्रभावौ क्लेशसहत्वं च ; संव्यवहाराच्छौचं मैत्रतां दृढभक्तित्वं च ; संवासिभ्यः शीलबलारोग्यसत्त्वयोगमस्तम्भमचापल्यं च ; प्रत्यक्षतः संप्रियत्वमवैरित्वं च ।

प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः । स्वयंदृष्टं प्रत्यक्षं परोपदिष्टं परोक्षं कर्मसु कृतेनाकृतावेक्षणमनुमेयम् । यौगपद्यात् तु कर्मणामनेकत्वादनेकस्थत्वाच्च देशकालात्ययो मा भूदिति परोक्षममात्यैः कारयेदित्यमात्यकर्म ।

पुरोहितमुदितोदितकुलशीलं षडङ्गे वेदे दैवे निमित्ते दण्डनीत्यां

प्रत्येतव्याद् विश्वासयोग्यादित्यर्थः, 'आप्तिः प्रत्ययितत्वे स्याल्लाभसम्बन्धयोरपि' इति केशवः । आप्तश्च यथादृष्टार्थवादी । परीक्षेत परीक्ष्य जानीयात् । समानविद्येभ्यः तुल्यविद्याविद्भ्यः । कर्मारम्भेषु कार्यानुष्ठानेषु । कथायोगेषु कार्यकथनप्रसङ्गेषु । प्रतिभानवत्त्वं नवनवप्रज्ञोन्मेषशालित्वम् । संव्यवहारात् समाचरणात् । संवासिभ्यः सहवासिभ्यः । प्रत्यक्षतः स्वयमनुभवात् ।

कस्मात् पुनर्जानपदत्वादिगुणज्ञाने प्रत्यक्षम् आप्तवाक्यमनुमानमिति त्रीणि प्रमाणानि आश्रयणीयानि, न पुनरेकमेवाश्रीयेतेत्याशङ्कायामाह — प्रत्यक्षपरोक्षानुमेयेत्यादि । राजवृत्तिः दण्डनीतिप्रतिपाद्यो राजव्यवहारः । परोपदिष्टम् आप्तवाक्यावगतम् । कृतेन अकृतावेक्षणमनुमेयम् अनुष्ठितेन कर्मांशेन करिष्यमाणांशपरिणामोत्प्रेक्षणमनुमानायत्तमित्यर्थः । एवञ्च यतो राजवृत्तिस्त्रिप्रमाणावसेया ततस्त्रिप्रमाणप्रदर्शनमित्यभिप्रायः । किमर्थं महता प्रयासेन परीक्ष्यैवामात्याः कर्तव्या इति चेत् तत्राह — यौगपद्यादित्यादि । अयं भावः— कर्माणि खलु नाम राजकीयानि बहूनि बहुप्रकाराणि बहुप्रदेशस्थानि सद्यः करणीयानि च भवन्ति । तानि सर्वाणि साक्षादेव राज्ञा स्वयमनुष्ठातुं न शक्यन्त इति यथादेशकालं तेषामनुष्ठानसिद्ध्यर्थममात्या एव तत्र राज्ञा नियोक्तव्याः । एषितव्याश्च ते गुणवन्त एव कर्मानुष्ठानसम्यक्त्वायेत्यावश्यकं तेषां महता प्रयासेन गुणपरीक्षणमिति । इत्यमात्यकर्मेति, एष मन्त्र्युत्पत्तिप्रकार उक्त इत्यर्थः ।

पुरोहितोत्पत्तिमाह — पुरोहितमित्यादि । उदितोदितकुलशीलत्वादियुक्तं पुरोहितं कुर्वीत । उदितोदितकुलशीलम् उदितोदितम् उदितैः शास्त्रो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च अभिविनीतमापदां दैवमानुषीणाम् अथर्वभिरुपायैश्च प्रतिकर्तारं कुर्वीत । तमाचार्यं शिष्यः पितरं पुत्रो भृत्यः स्वामिनमिव चानुवर्तेत ।

ब्राह्मणेनैधितं क्षत्रं मन्त्रिमन्त्राभिमन्त्रितम् ।
जयत्यजितमत्यन्तं शास्त्रानुगमशस्त्रितम् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
नवमोऽध्यायः मन्त्रिपुरोहितोत्पत्तिः ॥

क्तैर्विद्याभिजनादिभिः उदिताः समृद्धाः उदितोदिताः तेषां कुलं शीलं वृत्तं च यस्य तं तथाभूतम्, उदितोदितकुलजातम् उदितोदिताचारयुक्तं चेत्यर्थः । षडङ्गे वेदे, दैवे ज्योतिश्शास्त्रे पूर्वकर्मपरिपाकलक्षणदैवप्रतिपादके, निमित्ते शकुनशास्त्रे, दण्डनीत्यां च, अभिविनीतं शिक्षितम् । दैवमानुषीणां देवकृतानां मानुषकृतानां च, आपदाम्, अथर्वभिः अथर्वमन्त्रप्रयोगैः, उपायैश्च सामदानादिभिश्च, प्रतिकर्तारं परिहर्तारम् । तमिति । शिष्य आचार्यमिव, पुत्रः पितरमिव, भृत्यः स्वामिनमिव च, तम् अनुवर्तेत अनुसरेत् तत्परतन्त्रो भवेत् ।

एवञ्च करणे अलब्धलाभो भवतीत्यर्थकं श्लोकमाह—ब्राह्मणेनेति । ब्राह्मणेन यथोक्तगुणेन पुरोहितेन, एधितं वर्धितं, मन्त्रिमन्त्राभिमन्त्रितं मन्त्रिणो यथोक्तगुणस्य मन्त्रेण अर्थनिश्चयेन अभिमन्त्रितं संस्कृतम् । अभिरक्षितमित्यपि पाठः । अत एव शास्त्रानुगं शास्त्रोक्तानुष्ठानपरं, क्षत्रं क्षत्रियकुलकर्तृ, अशस्त्रितं सत् अशस्त्रयुक्तं सत्, युद्धं विनैवेत्यर्थः । शास्त्रानुगतशस्त्रितमिति पाठे शास्त्रानुगमात्मकशस्त्रयुक्तं तदतिरिक्तशस्त्रानपेक्षमित्यर्थः । अत्यन्तम् एकान्ततः, अजितं जयति अलब्धं लभते ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
नवमोऽध्यायः मन्त्रिपुरोहितोत्पत्तिः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

६. प्रक. उपधाभिः शौचाशौचज्ञानममात्यानाम् ।

मन्त्रिपुरोहितसखः सामान्येष्वधिकरणेषु स्थापयित्वामात्यानुपधाभिः शौचयेत् ।

पुरोहितमयाज्ययाजनाध्यापने नियुक्तममृष्यमाणं राजा अवक्षिपेत् । स सत्रिभिः शपथपूर्वमेकैकममात्यमुपजापयेत् — अधार्मिकोऽयं राजा, साधु धार्मिकमन्यमस्य तत्कुलीनमवरुद्धं कुल्यमेकप्रग्रहं सामन्तमाटविकमौपपादिकं वा प्रतिपादयामः । सर्वेषामेतद्रोचते, कथं वा तवेति । प्रत्याख्याने शुचिरिति धर्मोपधा ।

उपधाभिः शौचाशौचज्ञानममात्यानामिति सूत्रम् । उपधाभिः छलैः, अमात्यानां शौचाशौचज्ञानं शौचं स्वामिन्यदुष्टभावता अशौचं दुष्टभावता तयोर्ज्ञानम् अभिधीयत इति सूत्रार्थः। जानपदत्वादिगुणसम्पन्नोऽप्युपधाशुद्धिविरहेऽमात्यत्वं नार्हतीत्युपधाशुद्धिरुच्यत इति प्रकरणसङ्गतिः ।

मन्त्रीत्यादि । मन्त्रिपुरोहितसखः मन्त्रिपुरोहितसमुपेतः । सामान्येषु अधिकरणेषु साधारणेषु अप्रधानेष्वधिकारपदेषु । उपधाभिः छलैर्वक्ष्यमाणैः । शौचयेत् शोधयेत् ।

छलप्रयोगमाह—पुरोहितमिति। राजा अयाज्ययाजनाध्यापने याजयितुमनर्हस्य वृषलीपत्यादेर्याजनेऽध्यापने च नियुक्तं चोदितम्, अमृष्यमाणम् अधर्मनियोजनेन कुप्यन्तं, पुरोहितम् अवक्षिपेत् अवमन्येत स्वपदादवरोपयेद् वा। सः अवक्षिप्तः पुरोहितः, सत्रिभिः स्त्रीपुरुषलक्षणनिमित्तादिशास्त्राभिज्ञापदेशचारिणः सञ्चारविशेषाः सत्रिणः गूढपुरुषप्रणिधौ वक्ष्यमाणाः तैः प्रयोज्यकर्तृभिः, एकैकम्, अमात्यं, शपथपूर्वम् उपजापयेत् भेदयेत्। उपजापस्य शपथपूर्वत्वमनुद्वेगार्थम् । उपजापनप्रकारमाह—अधार्मिक इत्यादिना । अधार्मिकः अधर्मप्रवृत्तः। धार्मिकमिति तत्कुलीनादिषु सर्वत्र सम्बध्यते। तत्कुलीनं प्रकृतराजवंशभवम् । अवरुद्धम् अवरुध्य रक्ष्यमाणं तत्पुत्रादिकम्। कुल्यं राजभावार्हकुलोत्पन्नम् । एकप्रग्रहम् एकः तुल्यः सर्वैरविशेषं क्रियमाणः प्रग्रहः पूजा यस्य तं सर्वपूजितमित्यर्थः । सामन्तं विषयानन्तरं राजानम् । आटविकम् अटवीपतिम् । औपपादिकम् उपपादं प्रत्यन्तपर्वतसमीपे भवः तम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सेनापतिरसत्प्रग्रहेणावक्षिप्तः सत्रिभिरेकैकममात्यमुपजापयेल्लोभनीयेनार्थेन राजविनाशाय —सर्वेषामेतद् रोचते, कथं वा तवेति । प्रत्याख्याने शुचिरित्यर्थोपधा ।

परिव्राजिका लब्धविश्वासान्तःपुरे कृतसत्कारा महामात्रमेकैकमुपजपेत्— राजमहिषी त्वां कामयते कृतसमागमोपाया । महानर्थश्च भविष्यतीति । प्रत्याख्याने शुचिरिति कामोपधा ।

प्रवहणनिमित्तमेकोऽमात्यः सर्वानमात्यानावाहयेत् । तेनोद्वेगेन राजा तानवरुन्ध्यात् । कापटिकश्छात्रः पूर्वावरुद्धस्तेषामर्थमानावक्षिप्त-

---

अथवा औपपादिकमिति अस्माभिः सम्भूय सम्प्रधारणीयमित्यर्थः, उपपादं समर्थनमर्हतीति ठक् । अस्य प्रतिपादयामः अस्य स्थाने निवेशयामः । एतद् उपन्यस्तं मतम् । कथं वा तव, मतमिति गम्यम् । प्रत्याख्याने शुचिः इत्थमुपजापितोऽमात्यो 'नाहमीदृशं कुर्यामि'ति यदि निरस्येत् तर्हि शुद्ध इत्यर्थः । इति धर्मोपधा धर्मस्थापनवाचोयुक्त्या छलनम् । स एष धर्मप्रधानेषु शोधनप्रकारः ।

अर्थोपधामाह— सेनापतिरित्यादि । असत्प्रग्रहेण अवक्षिप्तः अपूज्यपूजनेन निमित्तेन परिभूतः, अपूज्यपूजने राज्ञा चोदितस्तदकुर्वन्नर्थमानाभ्यां हापित इत्यर्थः । लोभनीयेन उपजाप्यपुरुषकाम्येन । राजविनाशायेत्युपजापफलमुच्यते । तदनुकूल उपजापप्रकारस्तु—अपथप्रवृत्तोऽयं राजा, साधु सत्पथवर्तिनमन्यमस्य स्थाने तत्कुलीनमवरुद्धं वा प्रतिपादयाम इत्येवमादिरूपो गम्यः । सर्वेषामित्यादिकं तच्छेषवाक्यम् । लुब्धेष्वेष शोधनप्रकारः ।

स्त्रैणेषु प्रयोज्यां कामोपधामाह — परिव्राजिकेत्यादि । परिव्राजिका भिक्षुकी । कृतसत्कारा राजमहिषीभिः पूजिता । अर्थश्च धनादिकं च ।

भयोपधामाह — प्रवहणेत्यादि । प्रवहणनिमित्तं प्रवहणं नौविशेषः कर्णीरथश्च, तेन जलस्थलयात्राक्रीडोद्यानभोजनादिकं गोष्ठीकौतुकं लक्ष्यते, तदर्थमित्यर्थः । आवाहयेत् आनीय मेलयेत् । तेनोद्वेगेन तन्निमित्तेन उद्वेगेन अक्षमया । तान् अमात्यान् । अवरुन्ध्यात् अर्थमानापहारादिनापकुर्यात् । कापटिक इति । पूर्वावरुद्धः राज्ञा पूर्वमपकृतः, छात्रः कापटिकः अध्यापकाध्येतृवृत्तिः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेकैकममात्यमुपजपेत् — असत्प्रवृत्तोऽयं राजा, साध्वेनं हत्वा अन्यं प्रतिपादयिष्यामः। सर्वेषामेतद् रोचते, कथं वा तवेति। प्रत्याख्याने शुचिरिति भयोपधा।

तत्र धर्मोपधाशुद्धान् धर्मस्थीयकण्टकशोधनेषु स्थापयेद्, अर्थोपधाशुद्धान् समाहर्तृसन्निधातृनिचयकर्मसु, कामोपधाशुद्धान् बाह्याभ्यन्तरविहाररक्षासु, भयोपधाशुद्धानासन्नकार्येषु राज्ञः। सर्वोपधाशुद्धान् मन्त्रिणः कुर्यात्। सर्वत्राशुचीन् खनिद्रव्यहस्तिवनकर्मान्तेषूपयोजयेत्।

त्रिवर्गभयसंशुद्धानमात्यान् स्वेषु कर्मसु।
अधिकुर्याद् यथाशौचमित्याचार्या व्यवस्थिताः॥

कापटिकाख्यः गूढपुरुषविशेषः। तेषाम् अमात्यानां मध्ये, अर्थमानावक्षिप्तम् अर्थमानाभ्यां हापितम्, एकैकम् अमात्यम्, उपजपेत् राजसकाशाद् भेदयेत्। उपजापप्रकारकथनम् **असत्प्रवृत्त** इत्यादिना। असत्प्रवृत्तः अशोभनकर्मप्रवृत्तः। इयमुपधा भीरुविषया।

उपधाशुद्धानां यथायथं विनियोगस्थानान्याह—**तत्रेत्यादि**। तत्र उपधाचतुष्टयशोधितेषु मध्ये। धर्मस्थीयकण्टकशोधनेषु धर्मस्थानुबन्धिषु कर्मसु कण्टकशोधनेषु च वक्ष्यमाणेषु। स्थापयेत् नियुञ्जीत। समाहर्तृसन्निधातृनिचयकर्मसु समाहर्तृकर्मसु धनोत्थापनादिलक्षणेषु, सन्निधातृनिचयकर्मसु च धनरक्षणलक्षणेषु। बाह्याभ्यन्तरविहाररक्षासु बाह्याभ्यन्तरा ये विहाराः कामक्रीडाः अर्थाद् विहारसाधनभूता नृपस्त्रियः तद्रक्षणकर्मसु। तत्र बाह्या भोगिन्यः, आभ्यन्तर्यस्तु देव्य इति ज्ञेयम्। आसन्नकार्येषु शरीररक्षणादिकर्मसु। **सर्वेति**। सर्वोपधाशुद्धान् चतसृष्वप्युपधासु दृष्टशौचान्। **सर्वत्रेति**। सर्वासु उपधासु, अशुचीन्, खनिद्रव्यहस्तिवनकर्मान्तेषु खानिः सुवर्णरजताद्युत्पत्तिस्थानं द्रव्यवनं दारुयोग्यवृक्षप्रायं वनं हस्तिवनं गजोत्पत्तिवनम् एतत्सम्बन्धिषु कर्मान्तेषु व्यापारस्थानेषु, उपयोजयेत् अर्थात् कायायासकर्मणि।

तदिदमाचार्याणां मतमित्यर्थकं श्लोकमाह—**त्रिवर्गेत्यादि**। त्रिवर्गभयसंशुद्धान् त्रिवर्गभयैर्धर्मार्थकामभयोपधाभिर्दृष्टशौचान्। अधिकुर्यात् नियोजयेत्। यथाशौचं तत्तच्छुद्ध्यानुगुण्येन।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नत्वेव कुर्यादात्मानं देवीं वा लक्ष्मीश्वरः ।
शौचहेतोरमात्यानामेतत् कौटल्यदर्शनम् ॥
न दूषणमदुष्टस्य विषेणेवाम्भसश्चरेत् ।
कदाचिद्धि प्रदुष्टस्य नाधिगम्येत भेषजम् ॥
कृता च कलुषा बुद्धिरुपधाभिश्चतुर्विधा ।
नागत्वान्तं निवर्तेत स्थिता सत्त्ववतां धृतौ ॥
तस्माद् बाह्यमधिष्ठानं कृत्वा चार्ये चतुर्विधे ।
शौचाशौचममात्यानां राजा मार्गेत सत्त्रिभिः ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे दशमोऽध्यायः
उपधाभिः शौचाशौचज्ञानममात्यानाम् ॥

उक्तमाचार्यमतम् । स्वमतं तु नैवं, किन्तु अमात्यशुद्धिपरीक्षार्थे स्वात्मानं देवीं च विषयं नैव राजा कुर्यादित्येवंरूपमित्याह — **नत्वेवेत्यादि** ।

कुत आत्मानं देवीं च न लक्ष्यं कुर्यादित्यत्राह — **न दूषणमिति** । अदुष्टस्य स्वभावाद् दोषशून्यस्य अमात्यादेः प्रतीकारसमर्थस्यापि, दूषणम् उपधया वञ्चनम्, अम्भसः विषेण दूषणमिव अम्भसः स्वभावतो जीवनहेतोर्जलस्य एकान्तमरणहेतुना विषेण दूषणमिव, न चरेत् न कुर्यात् । सति प्रतीकारसामर्थ्ये दूषणेन को दोष इत्यत्राह — **कदाचिदित्यादि** । अयमर्थः — अदुष्टोऽपि यद्युपधावशात् कदाचित् प्रकर्षेण दुष्टान्तःकरणो भवेत्, तदानीम् अशक्यप्रतीकारस्तत्सकाशादनर्थ आपतेदिति ।

उपधादूषिता च धीराणां बुद्धिर्यतमाना स्वाध्यवसितार्थसिद्धिमप्राप्य नैव विरमतीत्याह — **कृता चेत्यादि** ।

कथं तर्ह्यमात्याः शोधनीया इत्याकाङ्क्षायामाह — **तस्मादिति** । तस्माद् राजा, चतुर्विधे चार्ये उपधाप्रयोगे, बाह्यं बहिरङ्गं दूष्यम्, अधिष्ठानं लक्ष्यं कृत्वा, अमात्यानां शौचाशौचं, सत्त्रिभिः सत्त्रिद्वारेण, मार्गेत परीक्षेत ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे दशमोऽध्यायः
उपधाभिः शौचाशौचज्ञानममात्यानाम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

७. प्रक. गूढपुरुषोत्पत्तिः ।

उपधाभिः शुद्धामात्यवर्गो गूढपुरुषानुत्पादयेत् कापटिकोदास्थितगृहपतिकवैदेहकतापसव्यञ्जनान् सत्रितीक्ष्णरसदभिक्षुकीश्च ।

परमर्मज्ञः प्रगल्भश्छात्रः कापटिकः । तमर्थमानाभ्यामुत्साह्य मन्त्री ब्रूयात्—राजानं मां च प्रमाणं कृत्वा यस्य यदकुशलं पश्यसि तत् तदानीमेव प्रत्यादिशेति ।

प्रव्रज्याप्रत्यवसितः[१] प्रज्ञाशौचयुक्त उदास्थितः । स वार्त्ताकर्मप्रदिष्टायां भूमौ प्रभूतहिरण्यान्तेवासी कर्म कारयेत् । कर्मफलाच्च सर्वप्रव्रजितानां ग्रासाच्छादनावसथान् प्रतिविदध्यात् । वृत्तिकामांश्चोपज-

---

गूढपुरुषोत्पत्तिरिति सूत्रम् । अमात्यशौचाशौचपरीक्षणं गूढपुरुषानन्तरेण न शक्यं कर्तुमिति तदुत्पत्तिरुच्यत इत्यर्थः । तत्रास्मिन्नध्याये संस्थोत्पत्तिः, उत्तरस्यादौ सञ्चारोत्पत्तिः ।

उपधाभिरित्यादि । उपधाभिः शुद्धामात्यवर्गः धर्मोपधादिभिः छलोपायैः शोधितसचिववर्गः । उत्पादयेत्, राजा । के ते गूढपुरुषा इत्याकाङ्क्षायामाह — कापटिकेत्यादि । चकारात् कुब्जवामनकिरातमूकबधिरजडान्धनटनर्तकगायनवादनवाग्जीवनकुशीलवा अपि गृह्यन्ते ।

परेति । परमर्मज्ञः परच्छिद्रवेदी, प्रगल्भः प्रौढः, छात्रः अध्यापकाध्येतृवृत्तिः निष्परिग्रहत्वाच्छरीरमात्रपरिच्छदो राजकार्यैकपरः । एवङ्गुणः कापटिकः कपटवृत्तित्वात् तदाख्ययोच्यते । अस्य विनियोगमाह — तमित्यादि । अर्थमानाभ्यां धनबहुमानाभ्याम् । यस्य यदकुशलं पश्यसि यस्य अमात्यादेः यद् अवद्यं चौर्यं परदाराभिमर्शनमित्येवञ्जातीयम् उपलभसे । प्रत्यादिश विज्ञापय ।

प्रव्रज्येत्यादि । प्रव्रज्याप्रत्यवसितः चतुर्थाश्रमात् प्रतिनिवृत्तः सन्न्यासं प्राप्य ततश्च्युतः, बौद्धशैवव्रतादिच्युतानामपीदमुपलक्षणम् । प्रज्ञाशौचयुक्तः प्रज्ञया मत्या शौचेन सत्त्वेन च युक्तः, उदास्थितः तदाख्यः । प्रभूतहिरण्यान्तेवासी प्रभूताः प्रचुराः हिरण्यान्तेवासिनः धनानि शिष्याश्च यस्य स तथाभूतः । अनेन वार्त्ताकर्मापेक्षिता मूलधनसम्पत् कर्मकरसम्पच्चोक्ता । सः उदास्थितः, वार्त्ताकर्मप्रदिष्टायां कृषिवाणिज्यपाशुपाल्यकर्मार्थे उपकल्पितायां, भूमौ, कर्म वार्त्ताकर्म, कारयेद् अर्थादन्तेवासिभिः । कर्मफलाच्च सर्वप्रव्रजितानां सर्वेषां

---

१. 'त्यपसृतः' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पेत् — एतेनैव वेषेण राजार्थश्चरितव्यो भक्तवेतनकाले चोपस्थातव्यमिति । सर्वप्रव्रजिताश्च स्वं स्वं वर्गमुपजपेयुः ।

कर्षको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो गृहपतिकव्यञ्जनः । स कृषिकर्मप्रदिष्टायां भूमाविति समानं पूर्वेण ।

वाणिजको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो वैदेहकव्यञ्जनः । स वणिक्कर्मप्रदिष्टायां भूमाविति समानं पूर्वेण ।

मुण्डो जटिलो वा वृत्तिकामस्तापसव्यञ्जनः । स नगराभ्याशे प्रभूतमुण्डजटिलान्तेवासी शाकं यवसमुष्टिं वा मासद्विमासान्तरं प्रका-

---

स्वकर्मकरातिरिक्तानामपि सन्न्यास्यादीनाम् । सर्ववेषधारिणामित्यपि पाठः । तत्र वेषधारिणः सन्न्यासिशैवशाक्यदिगम्बरादय एव । ग्रासाच्छादनावसथान् अन्नवस्त्रवासस्थानानि, प्रतिविदध्यात् संविदधीत । ग्रासादिप्रतिविधानस्य सर्वविषयत्वं प्रसिद्ध्यर्थं, प्रसिद्धिश्च तदर्थिनवनवान्तेवास्युपस्थानार्थेति बोद्धव्यम् । वृत्तिकामान् स्वदीयमानग्रासादिना नित्यदेहयात्रां ये कामयन्ते तान्, उपजपेच्च उपजापेन वशीकुर्याच्च । **एतेनैवे**त्यादिरुपजापप्रकारः । अनेन परिगृहीतेनैव बौद्धभिक्षुपाशुपतादिवेषेण राजप्रयोजनं परराष्ट्रवृत्तगवेषणरूपं युष्माभिरनुष्ठेयं, गृहीतपरराष्ट्रवृत्तान्तैश्च धान्यतण्डुलादिभृतिग्रहणकाले सन्निधातव्यमित्यर्थः । **सर्वे**ति । स्वं स्वं वर्गम् उपजपेयुः बौद्धा बौद्धं पाशुपताः पाशुपतम् इत्येवं स्वस्वजातीयम् उपजपेयुः उपजप्य स्वसहायान् कुर्युः ।

कर्षक इति । वृत्तिक्षीणः कृषिवृत्त्या क्षयं प्राप्तः, प्रज्ञाशौचयुक्तः, कर्षकः कृषिशीलः, गृहपतिकव्यञ्जनः तन्नाम । तत्कृत्यमाह —**स कृषी**त्यादि । **भूमाविति समानं पूर्वेणे**ति, भूमावित्यादिकम् उदास्थितकृत्योक्तेन तुल्यम् । तच्च 'प्रभूतहिरण्यान्तेवासी कर्म कारयेत् । कर्मफलाच्च सर्वगृहपतिकव्यञ्जनानां ग्रासाच्छादनावसथानि'त्यादिकं यथोचितमूह्यम् ।

वैदेहकव्यञ्जनसंज्ञमाह—**वाणिजक** इत्यादि । **वृत्तिक्षीणः** धनविरहाद् वाणिज्यवृत्तिच्युतः । **भूमाविति समानं पूर्वेणे**ति । तच्च 'प्रभूतहिरण्यान्तेवासी'त्यादिकं 'स्वं स्वं वर्गमुपजपेयुरि'त्यन्तं प्रव्राजितशब्दस्थाने वैदेहकशब्दस्य यथास्थानयोजनेन बोद्धव्यम् ।

तापसव्यञ्जनाख्यमाह — **मुण्ड** इत्यादि । मुण्डः भिक्षुक्षपणकादिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शमश्नीयात्, गूढमिष्टमाहारम् । वैदेहकान्तेवासिनश्चैनं समिद्धयोगैरर्चयेयुः । शिष्याश्चास्यावेदयेयुः — असौ सिद्धः सामेधिक इति । समेधाशास्तिभिश्चाभिगतानामङ्गविद्यया शिष्यसंज्ञाभिश्च कर्माण्यभिजनेऽवसितान्यादिशेदल्पलाभमग्निदाहं चोरभयं दूष्यवधं तुष्टिदानं विदेशप्रवृत्तिज्ञानम् इदमद्य श्वो वा भविष्यतीदं वा राजा करिष्यतीति ।

जटिलः शैवपाशुपतादिः । शाकं हरितारुयं सस्यम् । 'मूलपत्रकरीराग्रफलकाण्डाधिरूढकम् । त्वक् पुष्पं कवकं चेति शाकं दशविधं स्मृतम् ॥' इत्युक्तरूपं, वृक्षमूलपत्रफलादिकं वा । यवसमुष्टिं मुष्टिमेयं तृणम् । मासद्विमासान्तरम् एकमासव्यवहितं मासद्वयव्यवहितं वा । इदमशनक्रियाविशेषणम् । प्रकाशं सर्वजनप्रत्यक्षं यथा भवति तथा । ईदृशं प्रकाशाशनं निराहारख्यात्यर्थम् । गूढम् अन्याविदितम् । वैदेहकेति । वैदेहकान्तेवासिनश्च वणिग्वृत्तयः शिष्याश्च, एनं तापसव्यञ्जनं, समिद्धयोगैः समिद्धैः समृद्धैः योगैः इष्टार्थलाभैः, अर्चयेयुः, संभावयेयुः । अथवा समिद्धयोगैः तापसप्रसादात् समृद्धार्था वयमिति कपटयुक्तिभिः अर्चयेयुः धनदानादिना पूजयेयुरित्यर्थः । शिष्या इति । अस्य तापसस्य शिष्याश्च, असौ तापसः, सिद्धः योगी, अत एव सामेधिकः समेधा भाविनी सम्पत्तिः तदभिज्ञः, इति आवेदयेयुः प्रख्यापयेयुः । एवमारोपितमाहात्म्यस्तापसव्यञ्जनः किं कुर्यादित्याह — **समेधाशास्तिभिरिति** । समेधाशास्तिभिः अभिगतानां भाविसम्पद्विज्ञानाभिलाषैस्तां प्रष्टुमागतानाम्, अभिजने अवसितानि कर्माणि तत्कुलनिष्पन्नानि वृत्तानि, अङ्गविद्यया अङ्गानां शरीरावयवानां प्रश्नकालिकचेष्टाविशेषैः शुभाशुभज्ञप्तिप्रतिपादकेन ज्योतिषाङ्गशास्त्रेण, पुष्पशकट्येत्यन्ये, सा त्वाकाशवाणी । शिष्यसंज्ञाभिश्च शिष्याणामक्षिभ्रूविलासादिसूचनैश्च, आदिशेत् कथयेदित्यर्थः । आदेष्टव्यान्तराण्याह—अल्पलाभं किञ्चिद्धनप्राप्तिम्, आदिशेत्, प्रष्टुर्मध्यमत्व इत्यौचित्यलभ्यम् । अग्निदाहं चोरभयं च, आदिशेत्, प्रश्नकृतो राजापकारित्वे । दूष्यवधं ये दूष्याः कृत्याः प्रष्टारस्तेषां वधम्, आदिशेत् । तुष्टिदानं सन्तोषनिमित्तमर्थदानम्,[1] आदिशेत्, प्रश्नकृतो राजोपकारित्वे । विदेशप्रवृत्तिज्ञानं दूरदेशवृत्तान्तज्ञानम् आदिशेत् । इदमद्य श्वो वा भविष्यतीत्यादिशेत् । इदमद्य श्वो वा राजा करिष्यतीत्यादिशेत् । वाक्यान्त इतिशब्दः प्रकारार्थः । एवञ्जातीयमन्यच्चादिशेदित्यर्थः ।

१. 'तुष्टदा' क. ख. पाठः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदस्य गूढाः सत्रिणश्च संवादयेयुः । सत्त्वप्रज्ञावाक्यशक्तिसम्पन्नानां राजभाव्यमनुव्याहरेत्सन्त्रिसंयोगं च । मन्त्री चैषां वृत्तिकर्मभ्यां वियतेत । ये च कारणादभिक्रुद्धास्तानर्थमानाभ्यां शमयेत्, अकारणक्रुद्धान् तूष्णींदण्डेन राजद्विष्टकारिणश्च ।

पूजिताश्चार्थमानाभ्यां राज्ञा राजोपजीविनाम् ।
जानीयुः शौचमित्येताः पञ्च संस्थाः प्रकीर्तिताः ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
एकादशोऽध्यायः गूढपुरुषोत्पत्तौ संस्थोत्पत्तिः ॥

आदिश्यतां काममीदृशं, कथं पुनरिदं संवादयितुं शक्यमित्यत आह — तदस्येति । अस्य तापसस्य, तद् आदेशनं, गूढाः सत्रिणः संवादयेयुश्च यथार्थयेयुश्च, लाभाग्निदाहादीनां प्रच्छन्नोत्पादनेनेत्यर्थसिद्धम् । सत्त्वेति । सत्त्वप्रज्ञावाक्यशक्तिसम्पन्नानां धैर्यबुद्धिवाग्मित्वप्रभुशक्तियुक्तानां प्रष्टॄणां, राजभाव्यं राजसकाशाद् भाविनमर्थं धनादिलाभरूपं, मन्त्रिसंयोगं च मन्त्रिसमागमं च, अनुव्याहरेत् आदिशेत् । आदेशसंवादनाय मन्त्रिकर्तव्यमाह — मन्त्रीति । मन्त्री च अर्थाद् घटितसंयोगः, एषां वियतेत सत्त्वप्रज्ञादिसम्पन्नानामर्थे विशिष्य यत्नं कुर्यात् । कथं वियतेतेत्यत्राह — वृत्तिकर्मभ्यां वृत्तिः आजीवः कर्म व्यापारः ताभ्यां, सत्त्वप्रज्ञाद्यनुरूपवृत्तिकर्मपरिकल्पनेनेत्यर्थः । ये चेति । ये, कारणात् अपकाररूपात्, क्रुद्धाः क्रुद्धत्वेन कापटिकादिद्वारा विज्ञाताः, तान्, अर्थमानाभ्यां, शमयेत् शान्तक्रोधान् कुर्यात् । अकारणक्रुद्धान् राजद्विष्टकारिणश्च तूष्णींदण्डेन उपांशुवधेन शमयेत् ।

गूढपुरुषेषु मन्त्रिणः समुदाचार उक्तः । राज्ञस्तमाह — पूजिताश्चेति । राज्ञा, अर्थमानाभ्यां पूजिताः सन्तः अर्थाद् गूढपुरुषाः, राजोपजीविनाम् अमात्यादीनां, शौचं शुद्धिं जानीयुः । एतावता अध्यायार्थं तत्प्रान्ते सञ्चष्टे — इत्येताः पञ्च संस्थाः प्रकीर्तिता इति । इत्थं कापटिकाद्येकैकप्रधानाः पञ्च संस्थाः सम्यक् तिष्ठन्ति राजप्रयोजनकारिण आस्विति संस्थाः गूढपुरुषकर्मस्थानानि प्रकीर्तिताः व्युत्पादिताः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
एकादशोऽध्यायः गूढपुरुषोत्पत्तौ संस्थोत्पत्तिः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

८. प्रक. गूढपुरुषप्रणिधिः ।

ये चास्य सम्बन्धिनोऽवश्यभर्तव्यास्ते लक्षणमङ्गविद्यां जम्भकविद्यां मायागतमाश्रमधर्मं निमित्तमन्तरचक्रमित्यधीयानाः सत्रिणः संसर्गविद्या वा ।

ये जनपदे शूरास्त्यक्तात्मानो हस्तिनं व्यालं वा द्रव्यहेतोः प्रतियोधयेयुस्ते तीक्ष्णाः ।

गूढपुरुषप्रणिधिरिति सूत्रम् । गूढपुरुषाणां प्रणिधिः प्रणिधानं कार्येषु नियोजनमिहोच्यत इत्यर्थः । तत्र पूर्वाध्यायोद्दिष्टेषु गूढपुरुषेषु कापटिकादीनां स्वरूपं वर्णितं, सत्रितीक्ष्णरसदभिक्षुकीणां तु तद् वर्णनीयमवशिष्यते । तदिहादावभिधीयते । उभयेषां गूढपुरुषत्वाविशेषेऽप्यध्यायपृथक्त्वकरणं कर्तृभेदद्योतनार्थम् । कापटिकादीनां हि पञ्चानां मन्त्रिसहितो राजा कर्ता 'तमर्थमानाभ्यामुत्साह्य मन्त्री ब्रूयादि'त्युक्तत्वात् । सत्रितीक्ष्णरसदभिक्षुकीणां तु विना मन्त्रिणं स्वयमेव राजा कर्ता, मन्त्रिशुद्धिपरिज्ञानायापि तन्नियोजनात् । यद्वक्ष्यति—'तान् राजा स्वविषये मन्त्रिपुरोहितसेनापतियुवराजे'त्यादि । इत्थं स्फुटः कर्तृभेदः । स्वरूपतोऽप्युभयेषामस्ति भेदः । संस्थाशब्दवाच्या हि कापटिकादयः स्वस्थाने सम्यक् तिष्ठन्तो राजार्थमनुतिष्ठन्ति, न सञ्चरन्तः, सत्रिप्रभृतयस्तु सर्वत्र सञ्चरन्त एव राजार्थमनुतिष्ठन्ति सञ्चारपदवाच्या इति ।

ये चास्येत्यादि । अस्य राज्ञः, सम्बन्धिनः सगन्धाः, अवश्यभर्तव्याः अवश्यपोष्याः ये वान्तिभ , लक्षणं सामुद्रिकादि, अङ्गविद्यां शिक्षाव्याकरणादिम् अङ्गस्पर्शेन शुभाशुभपरिज्ञानविद्यां वा , जम्भकविद्यां वशीकरणान्तर्धानविद्यां, मायागतम् इन्द्रजालम् , आश्रमधर्मं मन्वादिधर्मशास्त्रं, निमित्तं कपिञ्जलरुत-पूर्णकुम्भदर्शनादि, अन्तरचक्रं पक्षिभिः शुभाशुभज्ञापनं पक्षिशास्त्रम्, इत्यधीयानाः एवञ्जातीयकमधीत्य विदन्तः, संसर्गविद्या अधीयाना वा कामतदनुबन्धिगीतनृत्तादिशास्त्राणि अधीयानाश्च, ते, सत्रिणः सत्रिसंज्ञाः ।

ये जनपद इत्यादि । त्यक्तात्मानः शरीरनिरपेक्षाः । व्यालं व्याघ्रादिम् । तीक्ष्णाः तदाख्याः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ये बन्धुषु निःस्नेहाः क्रूराश्चालसाश्च ते रसदाः ।

परिव्राजिका वृत्तिकामा दरिद्रा विधवा प्रगल्भा ब्राह्मण्यन्तःपुरे कृतसत्कारा महामात्रकुलान्यधिगच्छेत् । एतया मुण्डावृषल्यो व्याख्याताः । इति सञ्चाराः ।

तान् राजा स्वविषये मन्त्रिपुरोहितसेनापतियुवराजदौवारिकान्तर्वंशिकप्रशास्तृसमाहर्तृसन्निधातृप्रदेष्टृनायकपौरव्यावहारिककार्मान्तिकमन्त्रिपरिषदध्यक्षदण्डदुर्गान्तपालाटविकेषु श्रद्धेयदेशवेषशिल्पभाषाभिजनापदेशान् भक्तितः सामर्थ्ययोगाच्चापसर्पयेत् ।

ये बन्धुष्वित्यादि । क्रूराः आततायिनः । अलसाः अनुत्साहाः । रसदाः तदाख्याः, विषदानेऽपि निश्शङ्का इति कृत्वा तथोक्तिः ।

परिव्राजिकेत्यादि । वृत्तिकामा भोगार्थिनी । महामात्रकुलानि अधिगच्छेत् असकृदमात्यगृहाणि गच्छेत् सत्कारस्वीकारार्थम् । यैवम्भूता, सा परिव्राजिकेत्यभिधीयत इत्यर्थः । एतयेति । एतया ब्राह्मणपरिव्राजिकया उक्तया, मुण्डावृषल्यो व्याख्याताः उक्तप्रायाः ब्राह्मणपरिव्राजिकासमानाचारा वेदितव्या इत्यभिप्रायः । तत्र मुण्डाः शाक्यभिक्षुक्यः, वृषल्यः शूद्राः । इति सञ्चाराः इत्युक्तरूपाः सत्रिप्रभृतयः सञ्चारशब्देनाख्यायन्ते ।

सञ्चाराणां विनियोगमाह — तानिति । राजा स्वविषये आत्मजनपदे तान् सञ्चारान् अपसर्पयेत् चारयेत् । केषु चारयेत्, मन्त्रिपुरोहितसेनापतिप्रभृतिष्वष्टादशपुरुषेषु विषये, मन्त्र्यादीनां शुद्धिज्ञानायेत्यर्थलभ्यम् । तत्र मन्त्र्यादयः प्रसिद्धाः । दौवारिको द्वाराधिकृतः प्रतिहारी, अन्तर्वंशिकः अन्तःपुराधिकृतः, प्रशास्ता स्कन्धावारनिवेशयिता, समाहर्ता राजार्थसमाहरणकर्ता, सन्निधाता भाण्डागाराधिकृतः, प्रदेष्टा कण्टकशोधनाधिकृतः, नायकः एकद्विसहस्रपदातिनेता, पौरव्यावहारिकः पुरमुख्यः पुरप्राड्विवाको वा । पुरपाठेऽप्ययमेवार्थः । कार्मान्तिकः आकरादिकर्माधिकृतः । मन्त्रिपरिषत् मन्त्रिसभा, तदध्यक्षः । भाषाटीकायां तु मन्त्रिपरिषदध्यक्षो नाम द्वादशमण्डलाधिकारनेतेत्युक्तम् । दण्डपालः सैन्यसेनामुखादिनेता । सेनापतिस्तु अक्षौहिणीश्वरः पूर्वमुक्तः । दुर्गपालः प्राकारादिरक्षी, अन्तपालः राज्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेषां बाह्यं चारं छत्रभृङ्गारव्यजनपादुकासनयानवाहनोपग्राहिणस्तीक्ष्णा विद्युः। तं सत्रिणः संस्थास्वर्पयेयुः।

सूदारालिकस्नापकसंवाहकास्तरककल्पकप्रसाधकोदकपरिचारका रसदाः कुब्जवामनकिरातमूकबधिरजडान्धच्छद्मानो नटनर्तकगायनवादकवाग्जीवनकुशीलवाः स्त्रियश्चाभ्यन्तरं चारं विद्युः। तं भिक्षुक्यः संस्थास्वर्पयेयुः।

सीमारक्षी यो वीवधाध्यक्ष इत्युच्यते, आटविकः अटवीराज्याधिपतिः। तान् कीदृशान्, श्रद्धेयदेशवेषशिल्पभाषाभिजनापदेशान् देशो मध्यदेशगौडदेशादिः, वेषः प्रलम्बश्मश्रुत्वादिः, शिल्पं कलाकौशलं, भाषा प्राच्योदच्यादिव्याहारभेदः, अभिजनः ब्राह्मणादिजन्म, एषां देशादीनाम् अपदेशो निर्देशः श्रद्धेयः अनभिशङ्कनीयो विश्वसनीयो येषां तान् तथाभूतान्। कथं कृत्वा चारयेत्, भक्तितः सामर्थ्ययोगाच्च भक्तिं सेव्यगतां सामर्थ्ययोगं सेवकगतं चानुसृत्य। अयं भावः—सेव्येषु मन्त्र्यादिषु यो यद्देवभक्तः तस्मिंस्तद्देवभक्तवेषान् स्वस्वसामर्थ्यानुरूपच्छत्रग्रहणादिकर्मनियुक्तांश्च कृत्वा चारयेदिति।

सञ्चाराणां मध्ये तीक्ष्णाः मन्त्र्यादीनां बाह्यं समाचारं छत्रभृङ्गाराद्युपग्रहणवृत्त्या तान् सेवमानाः सन्तो जानीयुरित्याह—तेषामित्यादि। तत्र छत्रम् आतपत्रम्। भृङ्गारः पात्रभेदः कनकालुकाख्यः। व्यजनं तालवृन्तम्। पादुका उपानत्। आसनम् उपवेशसंवेशाधारः। यानम् आन्दोलिका। वाहनम् अश्वः। तमिति। तं तीक्ष्णविदितं चारं, सात्रिणः उक्तलक्षणाः, संस्थासु, अर्पयेयुः निवेदयेयुः।

विषदानसुलभसौकर्या सूदारालिकादिवृत्तिमाश्रिताः रसदाः, तथा कुब्जवामनादिच्छलजीविनः, नटनर्तकादयः, स्त्रियश्च गृहान्तर्गतं चारं जानीयुरित्याह—सूदेत्यादि। सूदः अन्नकारः, आरालिको भक्ष्यकारः, स्नापकः स्नपयिता, संवाहकः अङ्गमर्दकः, आस्तरकः शय्यास्तरणकर्ता, कल्पकः नापितः, प्रसाधकः अलङ्कर्ता, उदकपरिचारकः जलहारकः। कुब्जः गड्डुलः, वामनः खर्वः, किरातः अल्पतनुः, जडः लोकव्यवहारानभिज्ञः। कुब्जादिषु शेषाः प्रतीताः। नटः नवरसाभिनयकर्ता, नर्तकः चारणः अङ्गविक्षेपमात्रकर्ता, गायनः गान्धर्ववित्, वादकः वंशवीणादिवादयिता, वाग्जीवनः पुरावृत्तकथनो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संस्थानामन्तेवासिनः संज्ञालिपिभिश्चारसञ्चारं कुर्युः । न चान्योन्यं संस्थास्ते वा विद्युः ।

भिक्षुकीप्रतिषेधे द्वास्स्थपरम्परा मातापितृव्यञ्जनाः शिल्पकारिकाः कुशीलवा दास्यो वा गीतपाठ्यवाद्यभाण्डगूढलेख्यसंज्ञाभिर्वा

पजीवी पुस्तकवाचकः, कुशीलवः वेणः लङ्घनप्लवनादिवृत्तिः । स्त्रियः प्रतारिकाः; स्त्रीग्रहणं षण्डस्याप्युपलक्षणम् । **तमिति** । तं रसदादिविज्ञातं चारं भिक्षुक्य उक्तलक्षणाः, संस्थास्वर्पयेयुः ।

संस्थास्वर्पितश्चारः केन द्वारेण राजानं प्राप्नुयादित्यत्राह — **संस्थानामित्यादि** । संज्ञालिपिभिः अर्थसूचनाय स्वसंकेतकल्पिताभिर्लिपिभिः पत्रे निवेशिताभिः । चारसञ्चारं चारस्य बाह्यस्याभ्यन्तरस्य च व्यापारस्य सञ्चारं राज्ञि समर्पणम् । **न चेति** । संस्थाः ते वा अन्योन्यं न विद्युः, संस्थाः संस्थान्तरवेदिनः सञ्चाराश्च सञ्चारान्तरवेदिनो न भवेयुः, संवादच्छलनपरिहारार्थम् एकविज्ञाने सर्वग्रहणं मा भूदित्येतदर्थं च । अन्योन्यवेदने हि स्वस्वचारस्यान्यचारेण संवादं मिथ्यैव परिकल्प्य स्वामिनं वञ्चयेयुः, एकस्मिन् विज्ञाते तद्द्वारेणान्यस्य तद्द्वारेणान्यस्येति क्रमेण सर्वस्य ग्रहणं च प्रसज्येतेति ।

यदि भिक्षुक्यो नान्तः प्रवेशं लभेरन्, तदा सूदादिसकाशाच्चारः कथं निष्क्रामयितव्य इत्यत्राह — **भिक्षुकीति** । भिक्षुकीप्रतिषेधे भिक्षुकीनामन्तःप्रवेशप्रतिरोधे, द्वाःस्थपरम्परा चारं निर्हरेत् । एको द्वाःस्थस्तदनन्तराय द्वाःस्थाय, स तदनन्तरायेति क्रमेण चरमो द्वाःस्थो भिक्षुक्यादये बाह्यजनाय राज्ञे वा चारं समर्पयेदित्यर्थः । तदभावे मातापितृव्यञ्जनाः अन्तःपुरसेवकजनस्य माताहं पिताहमिति बन्धुत्वापदेशिनो वृद्धाः स्त्रियः पुरुषाश्च चारं निर्हरेयुः । शिल्पकारिकाः केशसंस्कारपत्रवल्लीरचनादिवैचित्र्यं शिल्पं तत्कर्त्र्यः, कुशीलवाः गायन्यः, दास्यो वा परिचारिका वा, चारं निर्हरेयुः । गीतपाठ्यवाद्यभाण्डगूढलेख्यसंज्ञाभिर्वा गीतेन सूचनीयार्थसूचकपदबन्धचारुणा गेयेन, पाठ्येन तथाविधेन श्लोकेन, वाद्येन वंशवीणादिना, भाण्डगूढलेख्येन भाण्डे जलकुम्भादौ क्षिप्तेन गूढलेख्येन च याः संज्ञा अर्थसूचनाः ताभिर्वा चारं निर्हरेयुः अर्थात् तत्तत्कुशलाः । उक्तोपायासम्भवे सूदादयः स्वयमेव चारनिर्हरणायान्तःपुराद् दीर्घरोगोन्मादापदेशादिना निमित्तेन निर्गच्छेयुरित्याह —

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चारं निर्हरेयुः । दीर्घरोगोन्मादाग्निरसविसर्गेण वा गूढनिर्गमनम् ।

त्रयाणामेकवाक्ये सम्प्रत्ययः । तेषामभीक्ष्णविनिपाते तूष्णीदण्डः प्रतिषेधो वा ।

कण्टकशोधनोक्ताश्चापसर्पाः परेषु कृतवेतना वसेयुः सम्पातनिश्चारार्थं, त उभयवेतनाः ।

गृहीतपुत्रदारांश्च कुर्यादुभयवेतनान् ।
तांश्चारिप्रहितान् विद्यात् तेषां शौचं च तद्विधैः ॥

दीर्घेत्यादि । दीर्घरोगोन्मादाग्निरसविसर्गेण समाहारद्वन्द्वोऽयम् । दीर्घरोगेण गुल्मादिना उन्मादेन ग्रहपीडया अग्निरसविसर्गेण शालायामग्निदानेन अन्नादौ विषदानेन च । अग्निरसविसर्गवचनं तज्जनितेऽन्तःपुरसम्भ्रमे गूढपुरुषाणां रोगाद्यपदेशं विनैव निर्गमनसौकर्यात् ।

गूढपुरुषार्पितस्य चारस्य कथं विश्वास्यतेत्याकाङ्क्षायाम् अन्योन्यानभिज्ञाः त्रयो गूढपुरुषाः परचारमधिकृत्य यदि वाक्यमेकार्थं ब्रूयुस्तदा तत्र विश्वासः कार्यो नत्वन्यथेत्यभिप्रायेणाह — त्रयाणामित्यादि । एकवाक्ये परस्परवाक्यसंवादिनि वाक्ये । सम्प्रत्ययः विश्वासः । अभीक्ष्णविनिपाते पौनःपुनिके वाक्यविसंवादे । तेषां तूष्णींदण्डः प्रतिषेधो वा ते उपांशु ताडनीयाः गूढपुरुषकर्मणो वारणीया वेत्यर्थः ।

किमेतावन्त एव चारपुरुषाः, उतान्येऽपि सन्तीति जिज्ञासायामाह— कण्टकेत्यादि । कण्टकशोधनोक्ताः कण्टकशोधनाधिकरणोक्ताः सिद्धप्रव्रजितचक्रचरादयश्च अपसर्पाः गूढपुरुषाः कार्याः । ते परेषु शत्रुषु तद्राज्ये तन्मन्त्र्यादिष्वष्टादशतीर्थेषु च कृतवेतनाः कल्पितजीविकाः वसेयुः सेवां कुर्युः । किमर्थं, सम्पातनिश्चारार्थं सम्पातानां चाराणां निश्चारार्थं निरायासानुष्ठानार्थं शत्रुचाराणां स्वराज्यापसर्पणे प्रवृत्तिपरिहाराय च । ते उभयवेतनाः विजिगीषोः शत्रोश्च वेतनग्राहिणः ।

गृहीतेत्यादि । उभयवेतनान्, गृहीतपुत्रदारान् कुर्यात् गृहीता राज्ञा पूजापूर्वमात्मवशे कृताः पुत्रा दाराश्च येषां तांस्तथाभूतान् कृत्वा परेषु विसृजेदित्यर्थः । अरिप्रहितान् तान् शत्रुप्रेषितान् उभयवेतनान्, तेषां शौचं च स्वीयानामुभयवेतनानां शुद्धिं च, तद्विधैः विद्यात् उभयवेतनद्वारेण जानीयात् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं शत्रौ च मित्रे च मध्यमे चावपेच्चरान्।
उदासीने च तेषां च तीर्थेष्वष्टादशस्वपि ॥

अन्तर्गृहचरास्तेषां कुब्जवामनषण्डकाः।
शिल्पवत्यः स्त्रियो मूकाश्चित्राश्च म्लेच्छजातयः ॥

दुर्गेषु वणिजः संस्था दुर्गान्ते सिद्धतापसाः।
कर्षकोदास्थिता राष्ट्रे राष्ट्रान्ते व्रजवासिनः ॥

वने वनचराः कार्याः श्रमणाटविकादयः।
परप्रवृत्तिज्ञानार्थाः शीघ्राश्चारपरम्पराः ॥

परस्य चैते बोद्धव्यास्तादृशैरेव तादृशाः।
चारसञ्चारिणः संस्था गूढाश्चागूढसंज्ञिताः ॥

एवमित्यादि। आवपेत् विसृजेत्। अष्टादशसु तेषां तीर्थेष्वपि शत्रुमित्रमध्यमोदासीनानां मन्त्रिपुरोहितसेनापतिप्रभृतिषु पूर्वोक्तेषु कार्यस्थानेषु च ॥

अन्तरित्यादि। तेषाम् अन्तर्गृहचराः शत्र्वादितचीर्थान्तानाम् अन्तर्गृहसञ्चारिणः कर्तव्याः। चित्राः नानाप्रकाराः ॥

दुर्गेष्विति। दुर्गेषु जलादिदुर्गवत्सु राजधान्यादिमहानगरेषु, वणिजः, सम्यक् तिष्ठन्तीति संस्थाः गूढपुरुषाः कार्याः। दुर्गान्ते दुर्गसीमायां सिद्धतापसाः संस्थाः कार्याः। राष्ट्रे कर्षका उदास्थिताश्च संस्थाः कार्याः। राष्ट्रान्ते राष्ट्रसीमायां व्रजवासिनः गोपालाः गूढपुरुषाः कार्याः ॥

वन इति। वने श्रमणाटविकादयः क्षपणाटवीपालप्रभृतयो वनचराः कार्याः। परप्रवृत्तिज्ञानार्थाः शत्रुव्यापारज्ञानप्रयोजनाः शीघ्राः क्षिप्रचारिण्यः चारपरम्पराः कर्तव्याः ॥

परस्येति। एते तादृशाः उक्तजातीयाः, गूढाश्चागूढसंज्ञिताः छन्नरूपा अपि अच्छन्नचिह्नधारिणः, परस्य शत्रोः, चारसंचारिणः सत्रितीक्ष्णादयः, संस्थाश्च कापटिकोदास्थितप्रभृतयश्च, तादृशैरेव तज्जातीयैरेव, बोद्धव्याः ज्ञातव्याः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अकृत्यान् कृत्यपक्षीयैर्दर्शितान् कार्यहेतुभिः ।
परापसर्पज्ञानार्थं मुख्यानन्तेषु वासयेत् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे द्वादशोऽध्यायः
गुढपुरुषोत्पत्तौ सञ्चारोत्पत्तिः, गुढपुरुषप्रणिधिः ॥

अकृत्यानिति । अकृत्यान् मुख्यान् असाध्यान् विरुद्धानपि राष्ट्रमुख्यान्, कृत्यपक्षीयैः कार्यहेतुभिः साध्यपक्षोचितैः कार्यकारणैः, दर्शितान् कृत्यता यथा स्यात् तथा बोधितान्, कृत्वेत्यार्थम् । परापसर्पज्ञानार्थं शत्रुचारपुरुषज्ञानाय अन्तेषु राष्ट्रसीमसु वासयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे द्वादशोऽध्यायः
गूढपुरुषोत्पत्तौ सञ्चारोत्पत्तिः, गूढपुरुषप्रणिधिः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

९. प्रक. स्वविषये कृत्याकृत्यपक्षरक्षणम्।

कृतमहामात्यापसर्पः पौरजानपदानपसर्पयेत्।

सत्रिणो द्वन्द्विनस्तीर्थसभाशालापूगजनसमवायेषु विवादं कुर्युः — सर्वगुणसम्पन्नश्चायं राजा श्रूयते। न चास्य कश्चिद् गुणो दृश्यते यः पौरजानपदान् दण्डकराभ्यां पीडयति इति।

तत्र येऽनुप्रशंसेयुः तानितरस्तं च प्रतिषेधयेत् — मात्स्यन्यायाभिभूताः प्रजा मनुं वैवस्वतं राजानं चक्रिरे[1]। धान्यषड्भागं पण्यदशभागं हिरण्यं चास्य भागधेयं प्रकल्पयामासुः। तेन भृता राजानः प्रजानां योगक्षेमवहाः। तेषां किल्बिषं[2] दण्डकरा हरन्ति, योगक्षेमव-

स्वविषये कृत्याकृत्यपक्षरक्षणमिति सूत्रम्। स्वविषये स्वपुरे स्वजनपदे च, कृत्याकृत्यपक्षरक्षणं कृत्याः क्रुद्धलुब्धभीतावमानिताः शत्रुभेद्याः तद्विपरीता अकृत्याः कृत्यपक्षस्य अकृत्यपक्षस्य च रक्षणं परोपजापात् पालनम् अत्रोच्यत इत्यर्थः।

तत्र जानपदकृत्याकृत्यपक्षावबोधो जानपदेषु गूढपुरुषप्रणिधानादृते न भवतीति तदिदं पूर्वाध्यायानुक्तमिदानीं प्राप्तावसरमाह — कृतेत्यादि। कृतमहामात्यापसर्पः महामात्यग्रहणं पूर्वोक्ताष्टादशतीर्थोपलक्षणम्। मन्त्रिपुरोहितादिषु चारप्रणिधानानन्तरमित्यर्थः। पौरजानपदान् अपसर्पयेत् अपसर्पैर्गूढपुरुषैः परिशोधयेत् ते स्वस्मिन्ननुरागिणोऽपरागिणो वेति। 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्चे'ति णिच्।

सत्रिण इति। सत्रिणः, द्वन्द्विनः कलहायमानाः सन्तः, तीर्थसभाशालापूगजनसमवायेषु नद्यादितीर्थेषु ब्राह्मणादिसभासु अन्नपानीयादिशालासु कर्मकरबृन्देषु नानाजातीयजनसङ्घेषु च विवादं विरुद्धं वादं वक्ष्यमाणप्रकारं कुर्युः। सर्वगुणेत्यादि स्फुटार्थम्।

तत्रेति। तत्र तीर्थादिषु। ये अनुप्रशंसेयुः यथोक्तराजनिन्दानुगुणं कथयेयुः सत्यमेवमेतदिति, तान् तं च पूर्वनिन्दकं च इतरः सत्र्यन्यतमः प्रतिषेधयेत् वारयेत्। प्रतिषेधनप्रकारं प्रपञ्चयति — मात्स्यन्यायेत्यादि। मनुं वैवस्वतं मनुनामानं विवस्वतः सूनुम्। धान्यषड्भागं धान्यस्य षष्ठमंशम्। पण्यदशभागं पण्यादीनां वस्त्रादीनां विक्रेयद्रव्याणां दशमांशम्। हिरण्यं

१. 'चक्रुः', २. 'षमदण्डकरा अयो' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हाश्च प्रजानाम् । तस्मादुञ्छषड्भागमारण्यका अपि निर्वपन्ति—तस्यैतद् भागधेयं योऽस्मान् गोपायतीति । इन्द्रयमस्थानमेतद् राजानः प्रत्यक्षहेडप्रसादाः । तानवमन्यमानं दैवोऽपि दण्डः स्पृशति । तस्माद् राजानो नावमन्तव्याः इति क्षुद्रकान् प्रतिषेधयेत् ।

किंवदन्तीं च विद्युः ।

ये चास्य धान्यपशुहिरण्यान्याजीवन्ति, तैरुपकुर्वन्ति व्यसने अभ्युदये वा, कुपितं बन्धुं राष्ट्रं वा व्यावर्तयन्ति, अमित्रमाटविकं वा

यथादेशप्रसिद्धम् । भागधेयम् अंशम् । तेन भृताः यथोक्तभागधेयरूपभृतिग्राहिणः सन्तः । प्रजानां योगक्षेमवहाः पौरजानपदानां योगक्षेमवहनरूपकर्मकराः । पौरजानपदान् दण्डकराभ्यां पीडयतीति यद् दूषणमुद्भावितं तत्र समाधिमाह—तेषामिति । तेषां दण्डकराः तत्सम्बान्धिनो दण्डकराः राजभिः प्रजासु प्रयुज्यमाना दण्डाः प्रजाभ्यो गृह्यमाणाः कराश्चेत्यर्थः । प्रजानां किल्बिषं हरन्ति पापं चौर्यादिजनितमपनुदन्ति, योगक्षेमवहाश्च योगक्षेमसाधकाश्च भवन्ति । तत्र दण्डानां किल्बिषहरत्वं दण्डानुभवस्य प्रायश्चित्तानुष्ठानस्थानीयत्वाद् बोद्धव्यं, योगक्षेमवहत्वं च स्वधर्मव्यतिक्रमभयोत्पादनेन सन्मार्गप्रवर्तकत्वात् । कराणां योगक्षेमवहत्वं तु जनहितेषु पूर्तादिकर्मसु विनियुज्यमानत्वात् स्पष्टमेव । तस्मादिति । तस्मात् कराणां रक्षाभृतिरूपत्वात्, आरण्यका अपि ऋषयोऽपि, उञ्छषड्भागम् उञ्छस्य कणश आत्तस्य धान्यादेः षष्ठमंशं, निवपन्ति वितरन्ति । किं कृत्वा, यः अस्मान् रक्षति तस्यैतद् भागधेयमिति मत्वा । इन्द्रेति । राजानः प्रत्यक्षहेडप्रसादाः प्रत्यक्षनिग्रहानुग्रहाः, अत एव एतद् इन्द्रयमस्थानम् इमे इन्द्रयमस्थानस्थिताः इन्द्रयमतुल्या इत्यर्थः, तात्स्थ्यात् ताच्छब्द्यम् । तानवमन्यमानमित्यादि स्फुटार्थम् । तानवमन्यमानानिति पाठे व्यधिकरणे द्वितीये ।

किंवदन्तीमिति । किंवदन्तीं च विद्युः जनश्रुतिं च जानीयुः, अर्थात् सत्रिणः ।

ये चेति । ये अस्य राज्ञः धान्यपशुहिरण्यानि आजीवन्ति उपजीवन्ति, तैः धान्यादिभिः व्यसने अभ्युदये वा अस्य उपकुर्वन्ति, ये वा कुपितं बन्धुं राष्ट्रं च व्यावर्तयन्ति कोपान्निवर्तयन्ति, ये वा अमित्रं शत्रुम् आटविकं

---

१. 'वे', २. 'मानानां देवोऽपि दण्डः स्पृ' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतिषेधयन्ति, तेषां मुण्डजटिलव्यञ्जनास्तुष्टातुष्टत्वं विद्युः।

तुष्टान् भूयः पूजयेत्। अतुष्टांस्तुष्टिहेतोस्त्यागेन साम्ना च प्रसादयेत्। परस्पराद्वा भेदयेदेनान् सामन्ताटविकतत्कुलीनावरुद्धेभ्यश्च। तथाप्यतुष्यतो दण्डकरसाधनाधिकारेण वा जनपदविद्वेषं ग्राहयेत्। विद्विष्टानुपांशुदण्डेन जनपदकोपेन वा साधयेत्। गुप्तपुत्रदारानाकरकर्मान्तेषु वा वासयेत् परेषामास्पदभयात्।

क्रुद्धलुब्धभीतावमानिनस्तु परेषां कृत्याः। तेषां कार्तान्तिकनैमित्तिकमौहूर्तिकव्यञ्जनाः परस्पराभिसम्बन्धम् अमित्राटविकसम्बन्धं वा विद्युः।

अटवीपालं प्रतिषेधयन्ति शत्रुभावाद् वारयन्ति, तेषां तुष्टातुष्टत्वं तुष्टत्वम-तुष्टत्वं च, मुण्डजटिलव्यञ्जना मुण्डजटिलवेषा विद्युः।

तुष्टातुष्टत्ववेदनानन्तरकार्यमाह — **तुष्टा**नित्यादि। भूयः पूजयेत् तुष्ट्यतिशयार्थम्। तुष्टिहेतोः तुष्ट्यर्थम्। त्यागेन अर्थदानेन। साम्ना सान्त्ववादेन। अर्थदानादिनाप्यतुष्टानाह — **परस्परादि**ति। एनान् अतुष्टान् परस्पराद् भेदयेत् मिथः संहता भूत्वा मापकार्षुरिति। सामन्ताटविकतत्कुलीनावरुद्धेभ्यश्च भेदयेत् सामन्तादिषु मोपजापं कार्षुरिति। तथापि अतुष्यतः भेदनेऽप्यार्जवमप्रतिपद्यमानान्, दण्डकरसाधनाधिकारेण दण्डसाधनाधिकारदानेन वा करसाधनाधिकारदानेन वा जनपदविद्वेष जानपदविरोधं ग्राहयेत् विद्विष्टान् तथा प्राप्तजनपदविद्वेषान्, उपांशुदण्डेन रहोघातेन जनपदकोपेन वा जानपदनिष्ठया स्वविद्विष्टजिघांसया वा, साधयेत् दमयेत्। किञ्च गुप्तपुत्रदारान् आकरकर्मान्तेषु वासयेत्, तत्पुत्रदारगुप्तिं स्वयमङ्गीकृत्य तान् अतुष्टान् खनिकर्मस्थानेषु व्यापारयेत्। कस्मात्, परेषामास्पदभयात् शत्रुपक्ष्याणामास्पदमिमे स्युरिति भयात्। तदेवं गूढपुरुषप्रणिधानं व्युत्पादितम्।

अथ स्वविषये कृत्याकृत्यपक्षरक्षणमाह—**क्रुद्धे**त्यादि। क्रुद्धलुब्धभीतमानिनः परेषां कृत्याः शत्रूणां कृत्याः साध्या भेद्या भवन्ति। एतेन शत्रुभेद्या अकृत्या इत्यर्थादुक्तप्रायम्। तेषां क्रुद्धादीनां, परस्पराभिसम्बन्धम्

---

१. 'प्रतिसाधयेत्', २. 'न्धं मित्राटविकस' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तुष्टानर्थमानाभ्यां पूजयेत् । अतुष्टान् सामदानभेददण्डैः साधयेत् ।

एवं स्वविषये कृत्यानकृत्यांश्च विचक्षणः ।
परोपजापात् संरक्षेत् प्रधानान् क्षुद्रकानपि ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
त्रयोदशोऽध्यायः स्वविषये कृत्याकृत्यपक्षरक्षणम् ॥

अमित्रप्रतिसम्बन्धं वा अन्योन्यसम्बन्धं शत्रुसम्बन्धं च, कार्तान्तिकनैमित्तिकमौहूर्तिकव्यञ्जना विद्युः, कार्तान्तिकाः कृतान्तो दैवं पूर्वकर्म तद्विदिनः नैमित्तिका· शुभाशुभशकुनज्ञाः मौहूर्तिकाः त्रिकालवृत्तज्ञाः तद्वेषा जानीयुः । एतेन अकृत्यज्ञानमप्युक्तप्रायम् ।

एवं कार्तान्तिकादिव्यञ्जनद्वारेण अकृत्येषु कृत्येषु च विज्ञातेषु विजिगीषोः कर्तव्यमाह — तुष्टानिति । तुष्टान् राज्ञि प्रीतिमतः अकृत्यपक्ष्यानित्यर्थः, अर्थमानाभ्यां पूजयेत् अर्थो धनं मानो बहुमानचिह्नं वलयाङ्गदादि तद्दानेन सत्कुर्यात् । अतुष्टान् कृत्यान् कृत्यपक्ष्यानित्यर्थः, सामदानभेददण्डैः साधयेद् दमयेत् ।

एवमित्यादि । एवम् उक्तप्रकारेण । विचक्षणः नीतिज्ञः । क्षुद्रकानपि अमुख्यानपि ।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरण
त्रयादशोऽध्यायः स्वविषये कृत्याकृत्यपक्षरक्षणम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१०. प्रक. परविषये कृत्याकृत्यपक्षोपग्रहः ।

कृत्याकृत्यपक्षोपग्रहः स्वविषये व्याख्यातः परविषये वाच्यः ।

संश्रुत्यार्थान् विप्रलब्धः, तुल्यकारिणोः शिल्पे वोपकारे वा विमानितः, वल्लभावरुद्धः, समाहूय पराजितः, प्रवासोपतप्तः, कृत्वा व्ययमलब्धकार्यः, स्वधर्माद् दायाद्याद् वोपरुद्धः, मानाधिकाराभ्यां भ्रष्टः, कुल्यैरन्तर्हितः, प्रसभाभिमृष्टस्त्रीकः, काराभिन्यस्तः, परोक्तदण्डितः, मिथ्याचारवारितः, सर्वस्वमाहारितः, बन्धनपरिक्लिष्टः, प्रवासितबन्धुरिति क्रुद्धवर्गः ।

परविषये कृत्याकृत्यपक्षोपग्रह इति सूत्रम् । परविषये शत्रुजनपदे, कृत्याकृत्यपक्षोपग्रहः कृत्यपक्षस्य अतुष्टवर्गस्य अकृत्यपक्षस्य तुष्टवर्गस्य च उपग्रहः उपजापादिना सङ्ग्रहः स्वायत्तीकरणम् इहोच्यत इत्यर्थः ।

प्रकरणसङ्गतिमाह — **कृत्याकृत्येत्यादि** ।

कृत्या नाम क्रुद्धलुब्धभीतमानिन इत्युक्तम् । तत्र प्रथमं क्रुद्धान् व्युत्पादयति — **संश्रुत्येति** । अर्थान् संश्रुत्य विप्रलब्धः ददामीति प्रतिज्ञाय तददानेन वञ्चितः, शिल्पे उपकारे वा तुल्यकारिणोः समानं कर्म कृतवतोर्मध्ये विमानितः अनभिनन्दितोऽन्यतरः, वल्लभावरुद्धः राज्ञः परमाप्तसेवकैः प्रतिषिद्धराजकुलप्रवेशः, समाहूय पराजितः द्यूतक्रीडार्थमाहूय हृतधनः, प्रवासोपतप्तः राजकृतेनावरोधेन स्वेप्सितदेशवासप्रतिबन्धः प्रवासः तेन दुःखितः, कृत्वा व्ययमलब्धकार्यः कार्यार्थं राजवल्लभादिभ्य उत्कोचं दत्त्वाप्यलब्धप्रयोजनः, स्वधर्माद् दायाद्याद् वा उपरुद्धः स्वधर्मो दाक्षिणात्यानां मातुलकन्यापरिणयादिः दायाद्यं दायत्वेन भोग्यं भागिनेयानां केरलेषु मातुलधनं तादृशात् स्वधर्माद् दायाद्याच्च प्रतिषिद्धः, मानाधिकाराभ्यां भ्रष्टः मानः छत्रान्दोलिकादिः परिच्छदबहुमानः अधिकारः समाहर्तृसन्निधातृप्रभृतिनियोगः ताभ्यां प्रच्यावितः, कुल्यैः कुलभवैः राजबन्ध्वादिभिर्निमित्तभूतैः अन्तर्हितः अप्रकाशं गतः, अपलपितगुणत्वादित्यर्थम् । प्रसभाभिमृष्टस्त्रीकः बलात्कारधर्षितदारः, काराभिन्यस्तः बन्दीकृतः, परोक्तदण्डितः अविचार्यैव परवचनप्रत्ययमात्रेण कृतदण्डः, मिथ्याचारवारितः प्राणिवधरूपत्वाद् यज्ञः पापकर्मेत्येवज्ञातीयेन मिथ्यान्यायेन आचाराद् यज्ञादिसत्कर्मानुष्ठानाद्

---

१. 'पातितः' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वयमुपहतः, विप्रकृतः, पापकर्माभिख्यातः, तुल्यदोषदण्डेनोद्विग्नः, पर्यात्तभूमिः, दण्डेनोपहतः, सर्वाधिकरणस्थः, सहसोपचितार्थः, तत्कुलीनोपाशंसुः, प्रद्विष्टो राज्ञा, राजद्वेषी चेति भीतवर्गः।

परिक्षीणोऽत्यात्तस्वः कदर्यो व्यसन्यत्याहितव्यवहारश्चेति लुब्धवर्गः।

आत्मसम्भावितो मानकामः शत्रुपूजामर्षितो नीचैरुपहितस्तीक्ष्णः साहसिको भोगेनासन्तुष्ट इति मानिवर्गः।

वारितः, सर्वस्वमाहारितः हृतसर्वस्वः, बन्धनपरिक्लिष्टः बन्धनेन कार्येष्वयथार्हनियन्त्रणया परिक्लिष्टः, प्रवासितबन्धुः प्रवासितः स्वदेशान्निष्कासितो बन्धुः पुत्रादिर्यस्य सः, इति एवञ्जातीयः, क्रुद्धवर्गः वेदितव्य इति शेषः।

भीतवर्गमाह— स्वयमित्यादि। स्वयमुपहतः धनार्थं स्वकृतेन परमारणादिना नृशंसकर्मणा दूषितः, विजिगीषुणा वा स्वयं धनदानेन नृशंसकर्म परमारणादिकं कारयित्वा दूषितः। स हि विजिगीषुसकाशाद् भीतो भवति— 'शत्रुपक्षादधिकधनलाभे मामप्ययं हन्यादि'ति विजिगीषुरात्मानमभिशङ्केतेति मत्वा। विप्रकृतः अन्तःपुरादौ विजिगीषुविरुद्धक्रियारम्भः, पापकर्माभिख्यातः ब्रह्महत्यादिपापकर्माभिशस्तः, तुल्यदोषदण्डेन उद्विग्नः स्वसमानदोषेऽन्यस्मिन् दण्डं प्रयुक्तं दृष्ट्वा भीतः मय्यपि दण्डः पतेदिति, पर्यात्तभूमिः भूम्यपहर्ता, दण्डेनोपहतः कर्शितः, सर्वाधिकरणस्थः सर्वेषु राजकीयनियोगस्थानेषु प्राप्तस्वाम्यः, सहसोपचितार्थः अकस्माद् साहसेन वा वर्धितधनः, साहसेति च पाठः। तत्कुलीनोपाशंसुः तस्य राज्ञः कुलीनं दायादम् उपाशंसुः कामुक उपाश्रित इत्यर्थः। शेषं स्फुटम्।

लुब्धवर्गमाह—परीत्यादि। परिक्षीणः विनष्टसर्ववैभवः, अत्यात्तस्वः अत्यात्तं राज्ञा दण्डकररूपतयातिमात्रं गृहीतं स्वं धनं यस्य सः, कदर्यः कृपणः, व्यसनी स्त्रीपानादिव्यसनवान्, अत्याहितव्यवहारः अतिमात्रप्रयुक्तधननिमित्तव्यवहारः।

मानिवर्गमाह—आत्मेति। आत्मसम्भावितः अहमतीव विद्वान् शूर इति, मानकामः धनमवधीर्य पूजामात्राभिलाषी, शत्रुपूजामर्षितः अनेन मम शत्रुः पूजित इति प्राप्तामर्षः, नीचैरुपहितः दुर्जनैः क्वचित् कार्येऽभिनिवे-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेषां मुण्डजटिलव्यञ्जनैर्यो यद्भक्तिः कृत्यपक्षीयस्तं तेनोपजापयेत्।

यथा मदान्धो हस्ती मत्तेनाधिष्ठितो यद्यदासादयति तत् सर्वं प्रमृद्नात्येवमयमशास्त्रचक्षुरन्धो राजान्धेन मन्त्रिणाधिष्ठितः पौरजानपदवधायाभ्युत्थितः। शक्यमस्य प्रतिहस्तिप्रोत्साहनेनापकर्तुम्, अमर्षः क्रियताम् इति क्रुद्धवर्गमुपजापयेत्।

यथा लीनः सर्पो यस्माद् भयं पश्यति तत्र विषमुत्सृजत्येवमयं राजा जातदोषाशङ्कस्त्वयि पुरा क्रोधविषमुत्सृजति, अन्यत्र गम्यताम् इति भीतवर्गमुपजापयेत्।

यथा श्वगणिनां धेनुः श्वभ्यो दुग्धे न ब्राह्मणेभ्यः एवमयं राजा सत्त्वप्रज्ञावाक्यशक्तिहीनेभ्यो दुग्धे नात्मगुणसम्पन्नेभ्यः। असौ राजा पुरुषविशेषज्ञः सेव्यतामिति लुब्धवर्गमुपजापयेत्।

शितः, तीक्ष्णः आत्मत्यागी, साहसिकः अतर्कितप्रवृत्तिः साहसं तद्वान्, भोगेन असन्तुष्टः बलतया भृत्या तृप्तिमप्राप्तः।

क्रुद्धादीनां कृत्यपक्षीयाणां मध्ये यो यदभिलषति तं मुण्डजटिलव्यञ्जनमुखेन तद्दानपूर्वं भेदयेदित्याह — तेषामित्यादि।

तत्र क्रुद्धवर्गस्य भेदनप्रकारमाह—यथा मदान्ध इत्यादि। मत्तेनाधिष्ठितः प्रमादिना हस्तिपकेन नियम्यमानः। आसादयति दृष्टिविषयं करोति। प्रमृद्नाति नाशयति। अशास्त्रचक्षुः राजशास्त्रलक्षणनेत्रहीनः। अभ्युत्थितः उद्युक्तः। प्रतिहस्तिप्रोत्साहनेन प्रत्यर्थ्युत्साहजननेन। अमर्षः क्रियतां प्रकोप उत्पाद्यतां, राज्ञः।

भीतवर्गस्याह— यथा लीन इत्यादि। भयं पश्यति आत्मनो विपत्तिमभिशङ्कते। पुरा जातदोषाशङ्कः पूर्वमुत्पन्नदोषवितर्कः, अथवा पुराशब्द उत्सृजतीत्यनेन सम्बध्यते उत्स्रक्ष्यतीत्यर्थः। 'यावत्पुरानिपातयोरि'ति लट्।

लुब्धवर्गस्याह — यथा श्वगणिनामित्यादि। श्वगणिनां धेनुः श्वगणस्वामिनां गौः। दुग्धे क्षीरं स्रावयति। अयं सन्निहितः। दुग्धे फलं ददाति। असौ विप्रकृष्टः सामन्तः। पुरुषविशेषज्ञः पुरुषतारतम्यवेदी।

---

१. 'हतिप्रो' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथा चण्डालोदपानश्चण्डालानामेवोपभोग्यो नान्येषामेवमयं राजा नीचो नीचानामेवोपभोग्यो न त्वद्विधानामार्याणाम् । असौ राजा पुरुषविशेषज्ञः तत्र गम्यतामिति मानिवर्गमुपजापयेत् ।

तथेति प्रतिपन्नांस्तान् संहितान् पणकर्मणा ।
योजयेत यथाशक्ति सापसर्पान् स्वकर्मसु ॥
लभेत सामदानाभ्यां कृत्यांश्च परभूमिषु ।
अकृत्यान् भेददण्डाभ्यां परदोषांश्च दर्शयेत् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
चतुर्दशोऽध्यायः परविषये कृत्याकृत्यपक्षोपग्रहः ॥

मानिवर्गस्याह — यथा चण्डालेत्यादि । चण्डालोदपानः चण्डालकूपः । आर्याः शिष्टाः ।

तथेतीति । तथेति प्रतिपन्नान् उपजापानुरोधेन परपक्षप्रवेशमङ्गीकृतवतः, पणकर्मणा संहितान् सत्यशपथादिना कृतसन्धानान्, तान् कृत्यान्, सापसर्पान् चारसहितान् कृत्वा, यथाशक्ति स्वकर्मसु योजयेत नियुञ्जीत ॥

लभेतेति । परभूमिषु परजनपदे, कृत्यान्, सामदानाभ्यां, लभेत साधयेत्, भेदस्य तेषु स्वत एव सिद्धत्वादनुपयोग इत्यभिप्रायः । अकृत्यान् भेददण्डाभ्यां लभेत । अकृत्यान् प्रति भेदनसाधनेषु परदोषप्रदर्शनस्य मुख्यत्वादाह — परदोषान् दर्शयेच्च बोधयेच्च ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
चतुर्दशोऽध्यायः परविषये कृत्याकृत्यपक्षोपग्रहः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

११. प्रक. मन्त्राधिकारः ।

कृतस्वपक्षपरपक्षोपग्रहः कार्यारम्भांश्चिन्तयेत् । मन्त्रपूर्वाः सर्वारम्भाः ।

तदुद्देशः संवृतः कथानामनिःस्रावी पक्षिभिरप्यनालोक्यः स्यात् । श्रूयते हि शुकशारिकाभिर्मन्त्रो भिन्नः श्वभिरन्यैश्च तिर्यग्योनिभिः । तस्मान्मन्त्रोद्देशमनायुक्तो नोपगच्छेत् । उच्छिद्येत मन्त्रभेदी ।

मन्त्रभेदो हि दूतामात्यस्वामिनामिङ्गिताकाराभ्याम् । इङ्गितमन्यथावृत्तिः । आकृतिग्रहणमाकारः ।

मन्त्राधिकार इति सूत्रम् । कर्मणामारम्भोपायादिकार्यनिरूपणं मन्त्रः, स इहाधिक्रियत इत्यर्थः । सर्वोपधाशुद्धा मन्त्रिणः कर्तव्या इत्युक्तम् । मन्त्रस्वरूपं तु नोक्तम् । तदिहोच्यत इति सम्बन्धः ।

स्वविषये परविषये च कृत्याकृत्यानां स्वानुकूलीकरणानन्तरं विजिगीषुणा स्वविषये दुर्गादीनां परविषये सन्धिविग्रहादीनां च कर्मणाम् आरम्भाः विमृश्य राज्ञा निर्धारयितव्या इत्याह — **कृते**त्यादि । चिन्तयेत् मन्त्रयेत् । चिन्तने हेतुमाह — **मन्त्रपूर्वाः सर्वारम्भा** इति । प्रथमं मन्त्रः तत आरम्भ इत्येष क्रमः कर्मसमृद्धिफलो लोके नियतो यस्मात् तस्माच्चिन्तयेदित्यभिप्रायः ।

मन्त्रदेशमाह — **तदि**त्यादि । तदुद्देशः मन्त्रयोग्यो देशः, संवृतः सर्वत आवृतः । कथानां वचनानाम् अनिस्स्रावी निस्स्रावो बहिर्निःष्यन्दः तद्वान् न भवतीत्यनिःस्रावी, अन्तः कथ्यमानं बहिःस्थितैर्यथा न श्रूयेत तथा सन्निवेशित इत्यर्थः । पक्षिभिरपि अनालोक्यः अदृश्यश्च स्यात् । कुत इत्यत आह—**श्रूयते ही**त्यादि । भिन्नः प्रकाशितः । **तस्मा**दित्यादि । अनायुक्तः राज्ञा मन्त्रकर्मणि अनियुक्तः । मन्त्रभेदने दण्डमाह — **उच्छिद्येते**ति । उच्छेदनमुन्मूलनम् ।

विनैव वचनमायुक्तानामिङ्गिताकाराभ्यामपि मन्त्रभेदो भवतीत्याह— **मन्त्रभेदो ही**त्यादि । अन्यथावृत्तिः स्वाभाविकचेष्टितविलक्षणं चेष्टितम् । **आकृतिग्रहणम् आकारः** आकृतिः अङ्गसंस्थानं तद्रूपं ग्रहणं भावज्ञानसाधनं स्वाभाविकाकृतिविलक्षणो मुखमालिन्यादिराकृतिविशेष इत्यर्थः, स आकारः **आकारशब्दवाच्यः** ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्य संवरणम् आयुक्तपुरुषरक्षणमा कार्यकालादिति। तेषां हि प्रमादमदसुप्तप्रलापकामादिरुत्सेकः प्रच्छन्नोऽवमतो वा मन्त्रं भिनत्ति। तस्माद् रक्षेन्मन्त्रम्।

मन्त्रभेदो ह्ययोगक्षेमकरो राज्ञस्तदायुक्तपुरुषाणां च। तस्माद्[1] गुह्यमेको मन्त्रयेतेति भारद्वाजः। मन्त्रिणामपि हि मन्त्रिणो भवन्ति। तेषामप्यन्ये।[2] सैषा मन्त्रिपरम्परा मन्त्रं भिनत्ति।

तस्मान्नास्य परे विद्युः कर्म किञ्चिच्चिकीर्षितम्।
आरब्धारस्तु जानीयुरारब्धं कृतमेव वा॥

तस्येति। तस्य संवरणम् इङ्गिताकारयोर्गोपनं, स च तच्च तदितीह 'नपुंसकमनपुंसकेने'ति नपुंसकशेष एकवद्भावश्च। आयुक्तपुरुषरक्षणम् आयुक्तानां पुरुषाणां मन्त्राधिकृतानां दूतमन्त्रिप्रभृतीनां मन्त्रभेदस्थानेभ्यो रक्षणं च, आ कार्यकालात् कार्यसिद्धिकालमभिव्याप्य, कर्तव्यमिति शेषः। मन्त्रभेदस्थानं प्रपञ्चयति — तेषां हीति। तेषाम् आयुक्तानाम्। प्रमादमदसुप्तप्रलापकामादिः प्रमादः कार्यान्तरवैयग्र्यप्रभवमनवधानं मदो मद्यपानादिजश्चित्तविकारः सुप्तप्रलापः स्वप्नालापः कामो विषयतृष्णा एते आदयो यस्य दोषसमुदायस्य सः, उत्सेकः गर्वः, प्रच्छन्नः कुड्यान्तर्गतः श्रोता, अवमतः जडोऽयमित्यवज्ञातः, वाशब्दः समुच्चये, मन्त्रं भिनत्ति रहसि विमृश्य निर्णीतमर्थं बहिरुद्गिरति। तस्मादिति। तस्मात् प्रमादादेरवमतपर्यन्ताद् वर्गात्, मन्त्रं रक्षेत्।

मन्त्रभेदो हीत्यादि। अयोगक्षेमकरः योगक्षेमविघातकः। गुह्यं गोप्यमर्थम्। एकः मन्त्रिणापि द्वितीयेन विनाभूतः। भारद्वाजपक्षस्य समर्थकमाह — मन्त्रिणामपीत्यादि। मन्त्रिपरम्परा मन्त्रिसन्तानः।

तस्मादिति। तस्मात् मन्त्रभेदप्रसङ्गात्, अस्य विजिगीषोः, चिकीर्षितं कर्तुमिष्टं, कर्म, परे अन्ये, न विद्युः, किन्तु आरब्धारः कर्मानुष्ठानोपक्रमकर्तारः, जानीयुः। तेऽपि कदा जानीयुः, आरब्धं जानीयुः आरम्भानन्तरमनुमिनुयुः, आरम्भमात्रेण कर्मणः कृत्स्ना गतिरनुमातुं शक्या चेत्। यदि न शक्या तेऽप्या निष्पत्तेर्न जानीयुरित्यभिप्रायेणाह — कृतमेव वेति॥

---

१. 'न्ययो' ख. पाठः. २. 'न्ति। सै' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नैकस्य मन्त्रसिद्धिरस्तीति विशालाक्षः । प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः । अनुपलब्धस्य ज्ञानमुपलब्धस्य निश्चयबलाधानमर्थद्वैधस्य संशयच्छेदनमेकदेशदृष्टस्य शेषोपलब्धिरिति मन्त्रिसाध्यमेतत् । तस्माद् बुद्धिवृद्धैः सार्धमासीत मन्त्रम् ।

न कञ्चिदवमन्येत सर्वस्य शृणुयान्मतम् ।
बालस्याप्यर्थवद् वाक्यमुपयुञ्जीत पण्डितः ॥

एतन्मन्त्रज्ञानं नैतन्मन्त्ररक्षणमिति पाराशराः । यदस्य कार्यमभिप्रेतं तत्प्रतिरूपकं मन्त्रिणः पृच्छेत् — कार्यमिदमेवमासीदेवं वा यदि भवेत् तत् कथं कर्तव्यमिति । ते यथा ब्रूयुः तत् कुर्यात् । एवं मन्त्रोपलब्धिः संवृतिश्च भवतीति ।

तदिदं भारद्वाजमतमाक्षिप्य विशालाक्षः प्रत्यवतिष्ठत इत्याह—**नैकस्येत्यादि** । प्रत्यक्षपरोक्षेत्यादिवाक्येन राजकर्मणः सर्वस्य सहायसापेक्षत्वं मन्त्रिपुरोहितोत्पत्तिप्रकरणोक्तं स्मारयति । अज्ञातस्य ज्ञानं, ज्ञातस्य निश्चयेन दृढीकरणम्, इदमदो वेत्यर्थयोर्द्विधाभवने सन्देहनिवर्तनम्, अंशेनोपलब्धस्यांशान्तरानुमितिरित्येवञ्जातीयं कार्यं मन्त्रिसाध्यमित्याह— **अनुपलब्धस्येत्यादिना** । **तस्मादिति** । तस्माद् राजवृत्तेः सहायसापेक्षत्वनियमात्, **बुद्धिवृद्धैः** बुद्धिप्रशस्तैः सार्धं, मन्त्रम् आसीत मन्त्रमुद्दिश्यासीत । मन्त्रशब्दस्य भावार्थत्वाद्वा 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वक्तव्यम्' इति कर्मसंज्ञायां द्वितीया ।

न कञ्चिदित्यादि । नावमन्येत नावजानीयात् । उपयुञ्जीत स्वीकुर्वीत ॥

सोऽयं विशालाक्षपक्षो मन्त्रज्ञानानुकूलः, नतु मन्त्ररक्षणानुकूल इति वदन्तः पराशरशिष्याः प्रत्यवतिष्ठन्ते इत्याह — **एतदित्यादि** । कस्तर्हि मन्त्ररक्षणोपाय इत्याह — **यदस्येति** । अस्य यत् कार्यम्, अभिप्रेतं मन्त्रयितुमिष्टं, तत्प्रतिरूपकं तत्प्रतिबिम्बभूतं तत्समानरूपं कार्यं कथागतं पुराणगतं वापदिश्य, मन्त्रिणः पृच्छेत् । कथं पृच्छेत्, इदं कार्यम्, एवमासीद् यदि अनेन प्रकारेण निष्पन्नं चेत्, अथवा एवं भवेद् यदि अनेन प्रकारेण निष्पाद्यं चेत्, कथं कर्तव्यं तर्हि केन प्रकारेणानुष्ठेयमिति । ते पृष्टा मन्त्रिणः, यथा ब्रूयुः, तत् कुर्यात् अनुतिष्ठेत् । एवम् अस्मिन् मन्त्रानुष्ठानप्रकारे, मन्त्रोपलब्धिः संवृतिश्च भवति मन्त्रज्ञानं मन्त्रगोपनं च सिध्यतीति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

नेति पिशुनः । मन्त्रिणो हि व्यवहितमर्थं वृत्तमवृत्तं वा पृष्टं[1]मनादरेण ब्रुवन्ति प्रकाशयन्ति वा । स दोषः । तस्मात् कर्मसु ये येष्वभिप्रेतास्तैः सह मन्त्रयेत् । तैर्मन्त्रयमाणो हि मन्त्रबुद्धिं गुप्तिं च लभत इति ।

नेति कौटल्यः । अनवस्था ह्येषा । मन्त्रिभिस्त्रिभिश्चतुर्भिर्वा सह मन्त्रयेत । मन्त्रयमाणो ह्येकेनार्थकृच्छ्रेषु निश्चयं नाधिगच्छेत् । एकश्च मन्त्री यथेष्टमनवग्रहश्चरति । द्वाभ्यां मन्त्रयमाणो द्वाभ्यां संहताभ्यामवगृह्यते[2], विगृहीताभ्यां विनाश्यते । त्रिषु चतुर्षु वा नैकान्तं कृच्छ्रेणोपपद्यते महादोषम्[3] । उपपन्नं तु भवति । ततः परेषु कृच्छ्रेणार्थनिश्चयो गम्यते, मन्त्रो वा रक्ष्यते ।

तदुभयमपि न सिध्यतीति वदन् नारदः प्रत्यवतिष्ठते — **नेतीति** । उभयासिद्धौ हेतुमाह — **मन्त्रिणो हीत्यादि** । व्यवहितं रूपान्तरावच्छादितस्वरूपम् । अनादरेण ब्रुवन्ति अनास्थया कथयन्ति नतु पर्यालोच्य कथयन्ति, प्रकाशयन्ति वा भिन्दन्ति च, अस्मास्वविश्वस्तोऽयं राजास्मदनुष्ठेयमप्यर्थमस्मासु न प्रकाशयतीति कोपादिति भावः । **तस्मादिति** । तस्माद् यथोक्तदोषप्रसङ्गात्, ये येषु कर्मसु अभिप्रेता मन्त्रणानुष्ठाननिपुणतया विश्वस्ततया चाभिमताः, तैः सह मन्त्रयेत् । तथा मन्त्रणे गुणमाह — **तैरित्यादि** ।

इदमपि मतमयुक्तमित्याह — **नेतीति** । कुत इत्यत्राह — **अनवस्थेति** । हि यतः एषा अनवस्था यथोक्ताभ्युपगमोऽनवस्थापादकः । अयं भावः — तत्तत्कर्माभिप्रेतैः सह मन्त्रणाङ्गीकारे कर्मणां बहुत्वाद् बहुप्रकारत्वाच्च मन्त्रीयत्तानवधारणप्रसङ्ग इति । स्वमतमाह — **मन्त्रिभिस्त्रिभिरित्यादि** । एकेन सह मन्त्रणे दोषमाह — **मन्त्रयमाण इत्यादि** । अर्थकृच्छ्रेषु कार्यसङ्कटेषु क्लेशनिर्धारणीयेषु कार्येष्वित्यर्थः । अनवग्रहः निष्प्रतिद्वन्द्वः । चरति वक्ति अनुतिष्ठति च । द्वाभ्यां सह मन्त्रणे दोषमाह — **द्वाभ्यामित्यादि** । संहताभ्याम् अवगृह्यते एकमताभ्यां सद्भ्यां स्ववशं नीयते राजा, विगृहीताभ्यां विनाश्यते परस्परविपरीतमताभ्यां सद्भ्यां कार्यहानिं प्राप्यते । त्रिचतुरमन्त्रिपक्षे विशेषमाह — **त्रिष्विति** । त्रिषु चतुर्षु वा मन्त्रसहायेषु,

---

१. 'ष्टा अना', २. 'ह्यते । तत त्रि', ३. 'पः उपपन्नस्तु भ' न. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देशकालकार्यवशेन त्वेकेन सह द्वाभ्यामेको वा यथासामर्थ्यं मन्त्रयेत।

कर्मणामारम्भोपायः पुरुषद्रव्यसम्पद् देशकालविभागः विनिपातप्रतीकारः कार्यसिद्धिरिति पञ्चाङ्गो मन्त्रः। तानेकैकशः पृच्छेत् समस्तांश्च। हेतुभिश्चैषां मतिप्रविवेकान् विद्यात्। अवाप्तार्थः कालं नातिक्रामयेत्। न दीर्घकालं मन्त्रयेत। न च तेषां पक्ष्यैर्येषाम् अपकुर्यात्।

महान् दोषोऽनर्थो येन तत् महादोषं परमानर्थहेतुभूतं राजावग्रहणादिकं, नैकान्तं नियतं न भवति, कृच्छ्रेण उपपद्यते कदाचिदुत्पाद्यमानमपि महता यत्नेनोत्पद्यते नाल्पेन यत्नेनेत्यर्थः। महादोष इति पाठे एकद्विमान्त्रिपक्षोक्तो महान् दोष इत्यर्थः कर्मधारयेण लभ्यः। उपपन्नं तु भवति मन्त्रनिश्चयेन मन्त्ररक्षणेन च उपपत्तियुक्तं भवति, अर्थाच्चिन्त्यमानं कर्म। पञ्चादिषु मन्त्रसहायेषु को दोषस्तत्राह — तत इत्यादि। ततः परेषु चतुर्भ्योऽधिकेषु पञ्चादिषु।

देशकालकार्यापेक्षया कदाचिदेकेन द्वाभ्यां च सह मन्त्रणम्, असहायस्य सतो वा मन्त्रणमिष्यत इत्याह — देशेत्यादि। यथासामर्थ्यम् आत्मात्ममन्त्रिसामर्थ्यानतिक्रमेण।

अथ मन्त्रस्य पञ्चाङ्गत्वं व्युत्पादयति — कर्मणामिति। कर्मणाम् आरम्भोपायः स्वविषये परिखाप्राकारादिरूपदुर्गादिसृष्टिलक्षणानां परविषये सन्धिविग्रहादिनिमित्तदूतसम्प्रेषणादिलक्षणानां च कार्याणामुपक्रमोपायः, पुरुषद्रव्यसम्पत् स्वविषये पुरुषाः दुर्गादिनिर्माणकुशलास्तक्षायस्कारादयः द्रव्याणि पृथुच्छदादिदारव्यवृक्षादीनि परविषये पुरुषाः सन्ध्याद्यनुष्ठानकुशलाः दूतसेनापतिप्रभृतयः द्रव्याणि रत्नस्वर्णादीनि, तेषां सम्पद् गुणवत्ता समृद्धिश्च, देशकालविभागः देशः स्वविषये दुर्गाद्यारम्भे जनपदमध्यान्तादिरनूपादिश्च कालः सुभिक्षदुर्भिक्षादिर्वर्षादिश्च परविषये सन्ध्यादौ देशः महाफलोर्वरादिः कालः अभियोगानभियोगाद्यवस्था तेषां सर्वेषां विभागः विवेकः विनिपातप्रतीकारः विनिपातो विघ्नो दुर्गनिर्माणादिविषयः सन्धिपुरुषप्रेषणादिविषयश्च तस्य प्रतीकारः प्रशमनं, कार्यसिद्धिः कर्मफलं क्षयः स्थानं वृद्धिरित्येवं त्रिरूपम्। इति पञ्चाङ्गो मन्त्रः। मन्त्रविषयमर्थं मन्त्रिष्वेकैक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मन्त्रिपरिषदं द्वादशामात्यान् कुर्वीतेति मानवाः ।
षोडशेति बार्हस्पत्याः ।
विंशतिम् इत्यौशनसाः ।
यथासामर्थ्यम् इति कौटल्यः ।

ते ह्यस्य स्वपक्षं परपक्षं च चिन्तयेयुः । अकृतारम्भमारब्धानुष्ठानमनुष्ठितविशेषं नियोगसम्पदं च कर्मणां कुर्युः । आसन्नैः सह कार्याणि पश्येत्, अनासन्नैः सह पत्रसम्प्रेषणेन मन्त्रयेत । इन्द्रस्य हि मन्त्रिपरिषदृषीणां सहस्रम् । स तच्चक्षुः । तस्मादिमं द्व्यक्षं सहस्राक्षमाहुः ।

माहूयान्यासन्निधाने पृच्छेत् — कस्तेऽत्राभिप्राय इति, संमेल्य च सभायां तान् सर्वान् 'कोऽत्र वोऽभिप्राय' इति पृच्छेदित्याह — **तानेकैकश** इत्यादि । **हेतुभिरित्यादि** । एषां मतिप्रविवेकान् अभिप्रायविभागान्, हेतुभिः विद्यात् कारणैः पर्यालोचयेद् अर्थनिश्चयार्थम् । अवाप्तार्थः निश्चितार्थः । अपकार्यजनबन्धुभिः सह न मन्त्रयेतेत्याह — **न च तेषामित्यादि** ।

अथ राजनिर्णीतकार्यजातानुष्ठान-राजनिर्णेतव्यनवनवकार्यजातोल्लेखनादिसर्वराष्ट्रकर्मनिर्वहणप्रधाना मन्त्रिपरिषन्नाम काचिद् राज्ञो भवति । तस्यां राज्ञा कति मन्त्रिणः पारिषदाः कर्तव्या इत्याकाङ्क्षायां द्वादशेति मनुशिष्याणां षोडशेति बार्हस्पत्यानां विंशतिरित्यौशनसानां कार्यानुष्ठातृपुरुषसामर्थ्यानुगुण्येन यथोक्तसङ्ख्यास्तन्न्यूनसङ्ख्यास्तदधिकसङ्ख्या वेत्यात्मनश्च मतमित्याह— **मन्त्रिपरिषदमित्यादि** ।

पारिषदानां व्यापारमाह — **ते हीत्यादि** । स्वपक्षं परपक्षं च चिन्तयेयुः स्वपक्षगतं परपक्षगतं च कार्यं समीक्षापूर्वमनुतिष्ठेयुः । कर्मणां मध्ये अकृतारम्भम् अकृतस्य कर्मणोऽनुष्ठानोपक्रमम्, आरब्धानुष्ठानम् उपक्रान्तस्य परिसमापनम्, अनुष्ठितविशेषं परिसमापितस्य संस्कारं परिनिष्ठितप्रासादादिशोभार्थसुधालेपचित्रार्पणादिजातीयं, नियोगसम्पदं नियोगाः तत्तत्कर्मकराधिकाराः तेषां सम्पदं गुणवत्तां बाहुल्यं च, कुर्युः । मन्त्रिपरिषत्सभ्येषु आसन्नानासन्नेषु विषये राजा कथं व्यवहरेदित्येतदाह — **आसन्नैरित्यादि** । पत्रसम्प्रेषणेन लिखितसकलार्थस्य लेखस्य प्रेषणेन । इत्थं बहुमन्त्रिबुद्धिसाहाय्येनार्थदर्शनस्य महाफलतयात्मसमर्थितस्य स्तुत्यर्थं सहस्राक्षपदनिर्वचन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आत्ययिके कार्ये मन्त्रिणो मन्त्रिपरिषदं चाहूय ब्रूयात् । तत्र यद् भूयिष्ठाः कार्यसिद्धिकरं वा ब्रूयुस्तत् कुर्यात् । कुर्वतश्च—

नास्य गुह्यं परे विद्युश्छिद्रं विद्यात् परस्य च ।
गूहेत् कूर्म इवाङ्गानि यत् स्याद् विवृतमात्मनः ॥
यथा ह्यश्रोत्रियः श्राद्धं न सतां भोक्तुमर्हति ।
एवमश्रुतशास्त्रार्थो न मन्त्रं श्रोतुमर्हति ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
पञ्चदशोऽध्यायः मन्त्राधिकारः ॥

भङ्ग्यार्थवादमाह—इन्द्रस्य हीति । स इन्द्रः, तच्चक्षुः तद् ऋषिसहस्रं मन्त्रिपरिषदात्मकं चक्षुः कार्यतत्त्वदर्शनसाधनं यस्य सः । द्व्यक्षमिति विशेषणेन वस्तुतः पुरुषान्तरवद् द्विनयन एवासौ सहस्राक्ष इत्युपचर्यत इति दर्शितम् ।

प्राणापायशङ्कावहे कार्ये पूर्वोक्तान् मन्त्रिणः मन्त्रिपरिषदं चेमां मेलयित्वा तत्त्वं पृच्छेदित्याह— आत्ययिक इत्यादि । तत्र भूयिष्ठा बहुतमाः, यद् ब्रूयुः, तत् कुर्याद् अनुतिष्ठेत्, अथवा यत् कार्यसिद्धिकरं ब्रूयुः अर्थाद् अभूयिष्ठा अपि, तत् कुर्यात् । कुर्वतश्चेति वक्ष्यमाणश्लोकान्वयि ।

नास्येति, यथा ह्यश्रोत्रिय इति च श्लोकावतिरोहितार्थौ ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
पञ्चदशोऽध्यायः मन्त्राधिकारः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१२. प्रक. दूतप्रणिधिः ।

उद्धृतमन्त्रो दूतप्रणिधिः । अमात्यसम्पदोपेतो निसृष्टार्थः, पादगुणहीनः परिमितार्थः, अर्धगुणहीनः शासनहरः ।

सुप्रतिविहितयानवाहनपुरुषपरिवापः प्रतिष्ठेत । शासनमेवं वाच्यः परः, स वक्ष्यत्येवं, तस्येदं प्रतिवाक्यम्, एवमतिसन्धातव्यम् इत्यधीयानो गच्छेत् । अटव्यन्तपालपुरराष्ट्रमुख्यैश्च प्रतिसंसर्गं गच्छेत् । अनीकस्थानयुद्धप्रतिग्रहापसारभूमीरात्मनः परस्य चावेक्षेत । दुर्गराष्ट्रप्रमाणं सारवृत्तिगुप्तिच्छिद्राणि चोपलभेत । पराधिष्ठानमनुज्ञातः प्रवि-

---

दूतप्रणिधिरिति सूत्रम् । दूता नाम निसृष्टार्थाः परिमितार्थाः शासनहरा इति त्रिप्रकाराः, तेषां प्रणिधानं परेषु सन्देशदानपूर्वं प्रेषणमिहाभिधीयत इति सूत्रार्थः ।

उद्धृतेति । दूतप्रणिधिः दूतस्य प्रणिधानम्, उद्धृतमन्त्रः उद्धृतः निर्धारितार्थः मन्त्रः यस्मिन् स तथाभूतः, भवति । मन्त्रार्थनिर्धारणोत्तरकालकार्यं दूतसम्प्रेषणमित्यर्थः । एवञ्च मन्त्रकथानन्तरं दूतसम्प्रेषणप्रस्तावः सङ्गत इत्यभिप्रायः । पूर्वोक्तजानपदत्वाद्यमात्यसम्पद्युक्तो दूतो निसृष्टार्थः, तस्मात् पादगुणप्रत्यवरः परिमितार्थः, अर्धगुणप्रत्यवरः शासनहरः इत्याह— **अमात्यसम्पदेत्यादि** ।

दूतकरणीयमाह — **सुप्रतिविहितेति** । सुप्रतिविहितं सम्यक् सज्जीकृतं यानं शिबिकान्दोलिकादि वाहनमश्वादि पुरुषाः शुश्रूषादिकर्मकराः परिवापः शय्यास्तरणगोणिकादिश्च यस्य सः सुप्रतिविहितयानवाहनपुरुषपरिवापः, तथाभूतः सन् प्रतिष्ठेत, दूतः शत्रुविषयं प्रति । शत्रुः स्वामिसन्देशमित्थं बोधनीयः, बोधितः स एवं वदिष्यति, तथा वदत ईदृशं प्रत्युत्तरं वक्तव्यं, शत्रोरतिसन्धानमित्थं कर्तव्यमित्येवञ्जातीयमर्थं पुनःपुनरनुसन्दधानो गच्छेदित्याह — **शासनमित्यादि** । **अटवीति** । अटव्यन्तपालपुरराष्ट्रमुख्यैश्च अटवीपालान्तपालपुरमुख्यराष्ट्रमुख्यैश्च प्रतिसंसर्गं सख्यं गच्छेत् । दूत्यायातमप्रयाणं तेभ्यो निवेद्य वा गच्छेदित्यर्थः । परविषयं गतस्य कर्माह—**अनीकेति** । आत्मनः, परस्य च अनीकस्थानयुद्धप्रतिग्रहापसारभूमीः अनीकस्य सैन्यस्य निवेशयोग्यभूमिं युद्धस्वीकारार्हभूमिम् अपसरणानुकूलभूमिं च, अवेक्षेत जानीयात् । दुर्गराष्ट्रप्रमाणं दुर्गराष्ट्रयोरियत्तां, सारवृत्तिगुप्तिच्छि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शेत् । शासनं च यथोक्तं ब्रूयात् प्राणाबाधेऽपि दृष्टे । परस्य वाचि वक्त्रे दृष्ट्यां च प्रसादं वाक्यपूजनमिष्टपरिप्रश्नं गुणकथासङ्गमासन्नमासनं सत्कारमिष्टेषु स्मरणं विश्वासगमनं च लक्षयेत् तुष्टस्य, विपरीतमतुष्टस्य । तं ब्रूयात् — दूतमुखा वै राजानस्त्वं चान्ये च । तस्मादुद्यतेष्वपि शस्त्रेषु यथोक्तं वक्तारः । तेषामन्तावसायिनोऽप्यवध्याः, किमङ्ग पुनर्ब्राह्मणाः । परस्यैतद् वाक्यमेष दूतधर्मः इति ।

वसेदविसृष्टः, पूजया नोत्सिक्तः, परेषु बलित्वं न मन्येत, वाक्यमनिष्टं सहेत, स्त्रियः पानं च वर्जयेत्, एकः शयीत, सुप्तमत्तयोर्हि

द्राणि सारं धान्यस्वर्णाद्युत्पत्तिं वृत्तिं जनानां जीविकां गुप्तिं रक्षां छिद्रं शत्र्वाक्रमणद्वारं च, उपलभेत । सारवृत्तिशब्दस्थाने सारवत्ताशब्दपाठः कामन्दकेन नूनं दृष्टः । अत एव स आह — "सारवत्तां च राष्ट्रस्य दुर्गं तद्गुप्तिमेव च । छिद्रं च शत्रोर्जानीयाद्" इति । पराधिष्ठानं शत्रुगृहम्, अनुज्ञातः प्रविशेत् परानुज्ञानानन्तरं प्रविशेत् । शासनं स्वामिसन्देशं च, प्राणाबाधेऽपि दृष्टे यथोक्तं ब्रूयात् प्राणभयेऽप्युपस्थिते स्वस्वामिसन्दिष्टप्रकारं कथयेत्, नतु स्वप्राणरक्षार्थमप्यन्यथा कथयेदित्यर्थः । परतुष्टातुष्टत्वस्य तदनुगुणव्यवहारार्थं लक्षणीयत्वादाह — परस्येत्यादि । वाग्वदनदर्शनेषु प्रसन्नत्वं, दूतोच्यमानवाक्यादरः, स्वामिगतसर्वकुशलप्रश्नः, स्वामिगुणप्रस्तावेऽवधानदानं, दूतान्तिकोपवेशनं, दूतविषयो बहुमानः, स्वादुभोग्यफलादिसंविभागे दूतस्मरणं, दूतं प्रति विश्वासोपगम इत्येतैश्चिह्नैः शत्रोस्तुष्टत्वं विपरीतैरतुष्टत्वं च विदित्वा व्यवहरेदित्यभिप्रायः । तमित्यादि । तं ब्रूयात् अतुष्टं परं वक्ष्यमाणरीत्या ब्रूयात् । दूतमुखाः दूतो मुखं स्वाभिप्रायनिवेदनद्वारं येषां ते । तस्मात् दूतानां स्वस्वामिवदनस्थानीयत्वात् । उद्यतेष्वपि वधार्थमुद्धृतेष्वपि सत्सु । वक्तारः अर्थाद् दूताः । तेषां दूतानां मध्ये । अन्तावसायिनोऽपि चण्डाला अपि । किमङ्ग पुनर्ब्राह्मणाः ब्राह्मणा अवध्या इति किमु वक्तव्यमित्यर्थः ।

वसेदिति । अविसृष्टः वसेत् यावद्विसर्जनम् । पूजया नोत्सिक्तः गर्वितो न भवेत् । परेषु बलित्वं न मन्येत अहं बलवानिति मतिं शत्रुसकाशे

---

१. 'खेन रा', २. 'न्तेवासिनो' ग. पाठः.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भावज्ञानं दृष्टम् । कृत्यपक्षोपजापमकृत्यपक्षे गूढप्रणिधानं रागापरागौ भर्तरि रन्ध्रं च प्रकृतीनां तापसवैदेहकव्यञ्जनाभ्यामुपलभेत। तयोरन्तेवासिभिश्चिकित्सकपाषण्डव्यञ्जनोभयवेतनैर्वा, तेषामसम्भाषायां याचकमत्तोन्मत्तसुप्तप्रलापैः पुण्यस्थानदेवगृहचित्रलेख्यसंज्ञाभिर्वा चारमुपलभेत । उपलब्धस्योपजापमुपेयात् । परेण चोक्तः स्वासां प्रकृतीनां परिमाणं नाचक्षीत । सर्वं वेद भवानिति ब्रूयात्, कार्यसिद्धिकरं वा ।

न प्रकाशयेत् । अनिष्टं वाक्यं परोक्तं सहेत । स्त्रियः, पानं मद्यसेवनं च वर्जयेत् । एकः असहायः शयीत । पानवर्जनैकशयनयोः कारणमाह—हि यस्मात्, सुप्तमत्तयोः, भावज्ञानं स्वप्नप्रलापमदप्रलापाभ्यां हृदयवेदनं दृष्टं प्रत्यक्षानुभूतम् । **कृत्यपक्षे**ति । कृत्यपक्षोपजापं कृत्यवर्गस्य भेदनम्, अकृत्यपक्षे, गूढप्रणिधानं तीक्ष्णरसदसामादिप्रयोगं, प्रकृतीनाम् अमात्यादीनां भर्तरि रागापरागौ रन्ध्रं च द्वेषस्थानं च, तापसवैदेहकव्यञ्जनाभ्यां संस्थाभ्याम्, उपलभेत । **तयो**रिति । तयोरन्तेवासिभिः तापसवैदेहकयोः शिष्यैः, चिकित्सकपाषण्डव्यञ्जनोभयवेतनैर्वा भिषग्वेषैः पाषण्डवेषैः उभयवेतनैश्च पूर्वोक्तैर्वा, चारम् उपलभेत परचर्यां विद्यात् । तेषामसम्भाषायां तापसव्यञ्जनादीनां सम्भाषणासौकर्ये, याचकमत्तोन्मत्तसुप्तप्रलापैः तेषां भैक्षकालभवैः प्रलापैः मत्तसाधारणैरुन्मत्तसाधारणैः सुप्तसाधारणैश्च प्रलापैः, पुण्यस्थानदेवगृहचित्रलेख्यसंज्ञाभिर्वा पुण्यस्थानेषु नदीतीरजपमण्डपमुनिगृहादिषु देवगृहेषु च गूढपुरुषान्योन्यसम्पातयोग्येषु भित्त्यर्पिताभिरालेख्यविशेषसंज्ञाभिरक्षरविशेषसंज्ञाभिर्वा, चारमुपलभेत । उपलब्धस्य परवृत्तस्य, उपजापम् उपेयाद् उपलब्धपरवृत्तानुरूपं भेदोपायं प्रयुञ्जीत, यथापेक्षम् । परेण, उक्तश्च पृष्टश्च, स्वासाम् आत्मीयानां प्रकृतीनां स्वाम्यमात्यादीनां परिमाणम् इयत्तां सारफल्गुतां वा, नाचक्षीत । तत्र किमुत्तरं प्रतिपद्येत, तत्राह—**सर्वमि**ति । भवान् सर्वं वेद चारचक्षुषा भवता न किञ्चिदत्राविदितमस्तीत्यर्थः, इति ब्रूयात् स्तुयात् । यदि स्तुत्या परो न परितुष्यति तदा किं कर्तव्यं तत्राह — कार्यसिद्धिकरं वा ब्रूयात् परिमाणं यावद् उच्यमानं दूतकार्यसिद्धिकरं स्यात्, तावद् ब्रूयात् न कृत्स्नमित्यर्थः ।

---

१. 'हृविचि' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कार्यस्य सिद्धावुपरुध्यमानस्तर्कयेत् किं भर्तुर्मे व्यसनमासन्नं पश्यन्, स्वं वा व्यसनं प्रतिकर्तुकामः, पार्ष्णिग्राहासारावन्तःकोपमाटविकं वा समुत्थापयितुकामः, मित्रमाक्रन्दं वा व्यापादयितुकामः, स्वं वा परतो विग्रहमन्तःकोपमाटविकं वा प्रतिकर्तुकामः, संसिद्धं मे भर्तुर्यात्राकालमभिहन्तुकामः, सस्यकुप्यपण्यसङ्ग्रहं दुर्गकर्म बलसमुत्थानं वा कर्तुकामः, स्वसैन्यानां वा व्यायामदेशकालावाकाङ्क्षमाणः, परिभवप्रम-

---

यदि परो दूतोपक्षिप्तं सन्ध्यादिकार्यमुचितकालेऽप्यसाधयन् 'स्थीयतां तावदिह त्वया कञ्चित् कालम् । अभिमतं ते करिष्यामी'त्युक्त्वा दूतं स्वपुरे चिरमुपरुन्धे, तदा दूतः किं कुर्यात्, तत्राह — **कार्यस्येत्यादि** । कार्यस्यासिद्धाविति पाठे परः कार्यं च दूतस्य न साधयति, प्रतिजिगमिषुं च दूतं न विसर्जयतीति रीत्यावतरणिका बोद्धव्या । तर्कयेद् उपरोधकारणं विकल्प्य चिन्तयेत् । तर्कणप्रकाराः **'किं भर्तुरि'**त्यादयः । परो, मे भर्तुः स्वामिनः, व्यसनं प्रकृतिगतम्, आसन्नं सन्निकृष्टं पश्यन्, माम् उपरुणद्धि किं न विसर्जयति किम् । एवमुत्तरत्र प्रथमान्तेषु क्रिया योज्या । अथवा स्वं व्यसनं प्रतिकर्तुकामः प्रशमयितुमिच्छुः । अथवा पार्ष्णिग्राहासारौ पार्ष्णिग्राहः शत्रुमित्रभूतः स्वामिशत्रुः आसारः शत्रुमित्रमित्रं तौ समुत्थापयितुकामः स्वामिद्रोहार्थमुद्योजयितुकामः । अथवा अन्तःकोपं मन्त्र्यादिप्रकोपम् उपजापादिनोत्पादयितुकामः । अथवा आटविकं युद्धार्थमुद्योजयितुकामः, अथवा मित्रं स्वामिनः पुरस्तान्मित्रम्, आक्रन्दं स्वामिनः पृष्ठतोमित्रं वा व्यापादयितुकामः हन्तुकामः । अथवा स्वं परतो विग्रहं परेण विग्रहमुपस्थितं स्वम् अन्तःकोपं मन्त्र्यादिप्रकोपं, स्वम् आटविकं कुपितं, प्रतिकर्तुकामः । अथवा संसिद्धं सुकरतयोपनतं, मे भर्तुः यात्राकालं शत्र्वभियानकालम् अभिहन्तुकामः । सस्यकुप्यपण्यसंग्रहं कर्तुकामः आरब्धे युद्धे सस्यादिपरिक्षयो मा मां बाधिष्टेति । अथवा दुर्गकर्म भिन्नस्फुटितदुर्गसंस्कारं कर्तुकामः । अथवा बलसमुत्थानं सैन्यवृद्धिं सैन्यस्य तत इतो विप्रकीर्णस्य समाहरणं वा कर्तुकामः । अथवा स्वसैन्यानां व्यायामदेशकालौ आकाङ्क्षमाणः शत्रुषु विक्रमणयोग्यौ देशकालावुदीक्षमाणः, मामुपरुणद्धि किम् । अथवा परिभवप्रमदाभ्यां परि-

---

१. 'माक्रन्दाभ्यां वा' ख. पाठः. २. 'द्वा' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दाभ्यां वा, संसर्गानुबन्धार्थी वा मामुपरुणद्धीति । ज्ञात्वा वसेदपसरेद् वा । प्रयोजनमिष्टमवेक्षेत वा । शासनमनिष्टमुक्त्वा बन्धवधभयादविसृष्टोऽप्यपगच्छेद् अन्यथा नियम्येत ।

प्रेषणं सन्धिपालत्वं प्रतापो मित्रसङ्ग्रहः ।
उपजापः सुहृद्भेदो दण्डगूढातिसारणम् ॥

बन्धुरत्नापहरणं चारज्ञानं पराक्रमः ।
समाधिमोक्षो दूतस्य कर्म योगस्य चाश्रयः ॥

भवेन मन्त्र्याद्यन्तःकोपोत्पादनादिजनितेनानादरेण, प्रमदेन सहसंवासप्रीत्या च मामुपरुणद्धि किम् । अथवा संसर्गानुबन्धार्थी संसर्गो विवाहादिनिमित्तः सम्बन्धः तदर्थी अनुबन्धो दोषोत्पादः तदर्थी च, माम् उपरुणद्धि किम् । इति एवं रीत्या तर्कयेदिति सम्बन्धः । **ज्ञात्वेति** । ज्ञात्वा तर्कणपूर्वं कारणं निश्चित्य, वसेत् स्नेहानिमित्तमुपरोधनमिति निश्चये सति, अपसरेद् वा अविसृष्टोऽपि अन्यथा निश्चये सति । अथवा इष्टं प्रयोजनं स्वाम्यर्थम् अवेक्षेत स्वाम्यर्थसिद्धिमवेक्ष्य वसेत् शत्रुपुर एव वसन् स्वामिनं प्रति गूढसन्देशप्रेषणेन शत्रुदुरभिसन्धीनां प्रतिविधानं कारयेदित्यभिप्रायः । **शासनमिति** । अनिष्टं शासनं शत्रुद्विष्टं स्वामिसन्देशम्, उक्त्वा, दूतः अविसृष्टोऽपि शत्रुणा, बन्धवधभयाद् आत्मनो बन्धनं वधं वा शत्रुः करिष्यतीति शङ्कया, अपगच्छेत् । अन्यथा अनपगमने नियम्येत नियन्त्र्येत शत्रुणा ।

श्लोकद्वयेन दूतकर्म संगृह्णाति—**प्रेषणमिति, बन्धुरत्नेति** च । प्रेषणं शत्रुदेशगतागतं शत्रौ स्वामिशासननिवेदनार्थं स्वामिनि शत्रुदेशवृत्तान्तस्य स्वावगतस्य निवेदनार्थं च, सन्धिपालत्वं कृतसन्धिरक्षणं, प्रतापः यथापेक्षं शत्रौ विक्रमणं, मित्रसंग्रहः, उपजापः कृत्यभेदनं, सुहृद्भेदः, दण्डगूढातिसारणं दण्डस्य सेनायाः गूढानां तीक्ष्णरसदादीनां चाक्रामणम् । गूढदण्डेत्यपि पाठः । बन्धुरत्नापहरणं बन्धूनां रत्नानां च स्वीकरणं, चारज्ञानं चाराणां गूढपुरुषाणामनुष्ठानसौष्ठवपरिज्ञानं, पराक्रमः अवसरे विक्रमणं, समाधिमोक्षः सन्धिविश्वासार्थमाहितः पुत्रादिः समाधिः तस्य मोचनं, योगस्य आश्रयश्च औपनिषदकोक्तस्य मारणादेः सेवनं च, दूतस्य कर्म भवति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वदूतैः कारयेदेतत् परदूतांश्च रक्षयेत् ।
प्रतिदूतापसर्पाभ्यां दृश्यादृश्यैश्च रक्षिभिः ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
षोडशोऽध्यायः दूतप्रणिधिः ॥

स्वदूतैरिति । एतद् उक्तं सर्वं कर्म, स्वदूतैः कारयेत्, अर्थाद् राजा । प्रतिदूतापसर्पाभ्यां प्रतिदूतप्रतिचाराभ्यां, दृश्यादृश्यैः रक्षिभिश्च दृश्यैः स्वदेशस्थैः अदृश्यैः शत्रुविषये तत्सेवकच्छद्मभिः रक्षिपुरुषैश्च, परदूतान् रक्षयेच्च यथा परदूताः स्वदेशे मित्रसंग्रहादिकर्म न कुर्युस्तथा तच्चेष्टितानि यत्नेन गवेषयेच्चेत्यभिप्रायः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
षोडशोऽध्यायः दूतप्रणिधिः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१३. प्रक. राजपुत्ररक्षणम् ।

रक्षितो राजा राज्यं रक्षत्यासन्नेभ्यः परेभ्यश्च । पूर्वं दारेभ्यः पुत्रेभ्यश्च ।

दाररक्षणं निशान्तप्रणिधौ वक्ष्यामः ।

पुत्ररक्षणं — जन्मप्रभृति राजपुत्रान् रक्षेत् । कर्कटकसधर्माणो हि जनकभक्षाः राजपुत्राः ।

तेषामजातस्नेहे पितर्युपांशुदण्डः श्रेयानिति भारद्वाजः ।

नृशंसमदृष्टवधः क्षत्रविनाशश्चेति विशालाक्षः । तस्मादेकस्थानावरोधः श्रेयानिति ।

अहिभयमेतदिति पाराशराः । कुमारो हि विक्रमभयान्मां पिता

राजपुत्ररक्षणमिति सूत्रम् । राजपुत्रेभ्यो राज्ञो रक्षणमभिधीयत इति सूत्रार्थः । पूर्वं चतुर्वर्णाश्रमतद्धर्माणां रक्षणं राज्ञा कर्तव्यमित्युक्तं, तस्य तु रक्षणं नोक्तम् । तदधुनोच्यते ।

राजा स्वबन्धुभ्यः परेभ्यश्च रक्षितः स्वप्रजास्तेभ्यो रक्षितुं प्रभवतीत्याह — **रक्षित** इत्यादि । बन्धुभ्यः केभ्यः, दारेभ्यः पुत्रेभ्यश्च, पूर्वमित्यनेन दारपुत्रा एव प्रथमं विपत्तिस्थानं राज्ञ इति दर्शयति ।

दाररक्षणमित्यादि । स्पष्टम् ।

पुत्ररक्षणमिति । उच्यत इति शेषः । **जन्मप्रभृतीत्यादि** । कर्कटकसधर्माणः कुलीरसमानस्वभावाः । तमेव धर्मं जनकमारकत्वरूपमाह—**जनकभक्षा** इति । कर्कटका हि जनकं मारयन्त एव जायन्त इति प्रसिद्धिः, अत एव कुलिनं जनकमीरयन्ति नाशयन्तीति व्युत्पत्त्या ते कुलीरा उच्यन्ते ।

अत्र भारद्वाजमतमाह — **तेषामित्यादि** । यावत् पितुः पुत्रेषु जातेषु स्नेहो नोदेति तावत् तेषां रहसि वधः प्रशस्ततर इत्यर्थः ।

निरपराधशिशुमारणमिदं महते पापाय भवति क्षत्रियकुलपरिक्षयाय चेति कृत्वा राजपुत्राणामन्तःपुरे क्वचिदवरोधनं श्रेय इति विशालाक्षो मन्यत इत्याह — **नृशंसमित्यादि** ।

एतत् सर्पसहवासवद् भयावहमिति पाराशरा मन्यन्त इत्याह — **अहीति** । भयस्थानत्वमेवोपपादयति — **कुमार** इत्यादि । विक्रमभयात्

---

१. 'छात्रेभ्य' ग, पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रुणद्धीति ज्ञात्वा तमेवाङ्के कुर्यात्। तस्मादन्तपालदुर्गे वासः श्रेयानिति।

औरभ्रकं भयमेतदिति पिशुनः । प्रत्यापत्तेर्हि तदेव कारणं ज्ञात्वान्तपालसखः स्यात्। तस्मात् स्वविषयादपकृष्टे सामन्तदुर्गे वासः श्रेयानिति ।

वत्सस्थानमेतदिति कौणपदन्तः । वत्सेनेव हि धेनुं पितरमस्य सामन्तो दुह्यात् । तस्मान्मातृबन्धुषु वासः श्रेयानिति ।

ध्वजस्थानमेतद् इति वातव्याधिः । तेन हि ध्वजेनादितिकौशिक-

स्ववधभयात् । तमेवाङ्के कुर्यात् विक्रममेवायत्नप्राप्ये समीपप्रदेशे स्वगृहे कुर्यात्। अन्तपालदुर्गे राष्ट्रसीमपालकाधिष्ठिते दुर्गे । तत्रस्थेन दूरविप्रकर्षाद् विक्रमो गृह इव न सुकर इति भावः ।

तावद्दूरस्थितादपि कुमाराद् भेतव्यमेवेति नारदो मन्यत इत्याह — **औरभ्रकमिति** । उरभ्रस्य मेषस्येदं कर्म औरभ्रम् औरभ्रमिव औरभ्रकम् । यथा मेषस्य पुरःस्थं प्रतिमेषं मूर्ध्ना जिघट्टयिषोर्दूरापसरणं पुरस्तादभिपतने शक्त्यतिशयाधायकत्वाद् भयस्थानं, तथा राजपुत्रस्य दूरान्तपालदुर्गावरोधन-मिदं पितृजिघांसोरनुबलाधानाय कल्पमानं भयस्थानं भवतीत्यभिप्रायः। भय-स्थानत्वमेव विशदयति— **प्रत्यापत्तेरित्यादि**। प्रत्यापत्तेः पितृद्रोहप्रकृत्यनिव-र्तनात् । तदेव कारणं विक्रमणशङ्कारूपम्। अन्तपालसखः अन्तपालसहायः। एतेनानुबलसम्पत्तिरुक्ता । **तस्मादित्यादि** । स्वविषयादपकृष्टे स्वजनपदाद् दूरस्थे । सामन्तदुर्गे विषयानन्तरस्य राज्ञो दुर्गे ।

तदिदं सामन्तदुर्गलक्षणं कुमारवासस्थानं गोवत्सबन्धनस्थानतुल्यम् । तं हि कुमारं गोवत्सस्थानीयं व्याजं कृत्वा धेनुस्थानीयतत्पितृसकाशात् सामन्तः स्वाभीप्सितमर्थजातं क्षीरस्थानीयं पुनःपुनर्हरेदित्यतः कारणात् कुमारस्य मातृ-बान्धवेषु निवेशनं प्रशस्ततरं कौणपदन्तो मन्यत इत्याह — **वत्सेत्यादि** ।

इदं मतमुद्धवो दूषयतीत्याह — **ध्वजेत्यादि**। एतद् ध्वजस्थानं ध्वज-सादृश्यम्, अर्थात् कुमारस्य । तद् विशदयति — **तेन हीति** । तेन ध्वजेन जीविकाचिह्नेन । **अदितिकौशिकवदिति** । नानादेवप्रतिकृतिप्रदर्शनेन भैक्ष-मर्जयन्ती या जीवति सा भिक्षुकी देवाविर्भावकत्वसादृश्याददितिरित्युच्यते कौशिको व्यालग्राही अदितिवत् कौशिकवच्च । यथाहि अदितयो देवप्रति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वदस्य मातृबान्धवा भिक्षेरन् । तस्माद् ग्राम्यधर्मेष्वेनमवसृजेयुः । सुखोपरुद्धा हि पुत्राः पितरं नाभिद्रुह्यन्तीति ।

जीवन्मरणमेतदिति कौटल्यः । काष्ठमिव हि घुणजग्धं राजकुलमविनीतपुत्रमभियुक्तमात्रं भज्येत । तस्माद् ऋतुमत्यां महिष्याम् ऋत्विजश्चरुमैन्द्राबार्हस्पत्यं निर्वपेयुः । आपन्नसत्त्वायां कौमारभृत्यो गर्भभर्मणि प्रजने[1] च वियतेत । प्रजातायाः पुत्रसंस्कारं पुरोहितः कुर्यात् । समर्थं तद्विदो विनयेयुः ।

कृतीः कौशिकाश्च सर्पान् ध्वजान् कृत्वान्नादिकं भिक्षन्ते, तथा मातृबान्धवाः कुमारं निमित्तं कृत्वा स्वाभीष्टमर्थं याचेरन्निति वाक्यार्थः। **तस्मादित्यादि ।** तस्माद् एनं ग्राम्यधर्मेषु स्त्रीसेवादिषु अवसृजेत् यथेच्छसञ्चाराय । अवसर्गस्य फलमाह — **सुखेत्यादि ।** सुखोपरुद्धाः वैषयिकानन्दयथेच्छानुभवसंविधानेनावरुद्धाः ।

स्वमतमाह — **जीवदिति ।** एतद् जीवन्मरणम् इदं ग्राम्यधर्मावसर्जनं राजपुत्रस्य जीवत एव मरणं, शास्त्राद्यविनीतत्वाद् व्यसनोपहतबुद्धिसत्त्वशरीरत्वाच्च मरणतुल्यम् । यथा वम्रिचर्वितं दारु स्पृष्टमात्रमकृतभञ्जनयत्नमपि भग्नं भवति, तथा शास्त्रसदाचाराशिक्षितकुमारं राजकुलं परेण जिगीषितमात्रम् अप्रयुक्तविक्रममपि परिध्वस्तं भवतीत्याह — **काष्ठमिवेत्यादि ।** सर्वेष्वेषु पक्षेषु दोषदर्शनात् पुत्रगुणवत्त्वाय दृष्टादृष्टार्थाः प्रयत्ना गर्भाधानप्राक्कालात् प्रभृति आस्थेया इत्याह — **तस्मादित्यादि ।** ऋतुमत्याम् ऋतुः आर्तवदर्शनादिषोडशनिशात्मकः कालो गर्भाधानयोग्यः तद्वत्याम् । ऐन्द्राबार्हस्पत्यं चरुं निर्वपेयुः इन्द्राबृहस्पतिद्वन्द्वदेवताकं हविः साधयेयुः हविर्द्रव्यकमिष्टिविशेषं कुर्युरित्यर्थः । तत्रेन्द्रप्रीणनमैश्वर्यप्रतापाद्यर्थं बृहस्पतिप्रीणनं बुद्धिविद्याद्यर्थं बोद्धव्यम् । आपन्नसत्त्वायां जातगर्भायाम् । कौमारभृत्यः शिशुवैद्यः । गर्भभर्मणि गर्भपोषणे । प्रजने प्रसवे । वियतेत विशिष्य यत्नं कुर्यात् । प्रजातायाः प्रसूतायाः । समर्थं विनयेयुः ग्रहणधारणपटुं विद्यासु शिक्षयेयुः । के, तद्विदः शिक्षणज्ञाः ।

---

1. 'प्रसवने' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सत्रिणामेकश्चैनं मृगयाद्यूतमद्यस्त्रीभिः प्रलोभयेत्—पितरि विक्रम्य राज्यं गृहाणेति। तदन्यः सत्री प्रतिषेधयेद् इत्याम्भीयाः[1]।

महादोषमबुद्धबोधनमिति कौटल्यः। नवं हि द्रव्यं येन येनार्थजातेनोपदिह्यते तत्तदाचूषति, एवमयं नवबुद्धिर्यद्यदुच्येत तत्तच्छास्त्रोपदेशमिवाभिजानाति। तस्माद् धर्ममर्थं चास्योपदिशेन्नाधर्ममनर्थं च।

सत्रिणस्त्वेनं[2] तव स्मः इति वदन्तः पालयेयुः। यौवनोत्सेकात् परस्त्रीषु मनः कुर्वाणम् आर्याव्यञ्जनाभिः स्त्रीभिरमेध्याभिः[3] शून्यागारेषु रात्रावुद्वेजयेयुः। मद्यकामं योगपानेनोद्वेजयेयुः। द्यूतकामं कापटिकैः पुरुषैरुद्वेजयेयुः। मृगयाकामं प्रतिरोधकव्यञ्जनैस्त्रासयेयुः।

विनीतस्य कुमारस्य पितृद्रोहनिवृत्त्युपायम् आम्भाचार्यानुयायिमतेनाह—सत्रिणाम् इत्यादि। मृगयाद्यूतमद्यस्त्रीभिः प्रलोभनसाधनैः। प्रलोभयेत् प्रलोभ्योपदिशेत्। अन्यः प्रलोभकादपरः।

तद् दूषयति—महेति। अबुद्धबोधनं महादोषम् अज्ञातस्य पितृद्रोहरूपस्य पापकर्मण उपदेशः परमानर्थः। नवमिति। हिशब्दो दृष्टान्ते। यथा नवं द्रव्यं मृद्भाण्डादिकं, येन येन अर्थजातेन जलघृतादिना, उपदिह्यते लिप्यते, तत्तद् आचूषति आपिबति अन्तर्गृह्णाति, एवम् अनेन प्रकारेण, नवबुद्धिः सदसद्व्यवहाराप्रविष्टबुद्धिः, अयं राजपुत्रः, यद्यद् उच्येत, तत्तत् तत् सर्वं, शास्त्रोपदेशमिव, अभिजानाति हृदये निवेशयति। तस्मादिति। तस्माद् यथोक्तात् कारणात्, अस्य धर्मम् अर्थं च उपदिशेत्, अधर्मं पितृद्रोहादिम्, अनर्थं मृगयाद्यूतपानादिकं च, नोपदिशेत्।

यदि स्वत एव राजपुत्रः परस्त्रीमद्यादिषु कामनां कुर्यात्, तदा तन्निवारणार्थं सत्रिणस्तमुपासीरन्नित्याह—सत्रिण इत्यादि। तव स्म इति वदन्तः त्वत्सेवका वयमिति विश्वासयन्तः। पालयेयुः परस्त्रीमद्यादिप्रवृत्तेर्वारयेयुरित्यर्थः। पालनप्रकारानाह—यौवनेत्यादि। यौवनोत्सेकाद् यौवनमदात्। आर्याव्यञ्जनाभिः अभिजातस्त्रीवेषधारिणीभिः। अमेध्याभिः स्वभावादशुचिभिः स्त्रीभिः करणैः उद्वेजयेयुः जुगुप्सयेयुः, परस्त्रीरतादित्यार्थम्। योगपानेन विरसद्रव्ययुक्तेन मद्येन। कापटिकैः छलदेवनदक्षैः। प्रतिरोधकव्यञ्जनैः चौरवेषैः। विक्रमबुद्धिं विक्रमे विक्रम्य हनने बुद्धिर्यस्य तम्। तथेत्यनु-

---

१. 'त्याजीम्भी', २. 'श्चैनं', ३ 'रमेध्याभि' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पितरि विक्रमबुद्धिं तथेत्यनुप्रविश्य भेदयेयुः — अप्रार्थनीयो राजा, विपन्ने घातः, सम्पन्ने नरकपातः, संक्रोशः प्रजाभिरेकलोष्टवधश्चेति ।

विरागं प्रियमेकपुत्रं वा बध्नीयात् । बहुपुत्रः प्रत्यन्तमन्यविषयं वा प्रेषयेद् यत्र गर्भः पण्यं डिम्बो वा न भवेत् । आत्मसम्पन्नं सैनापत्ये यौवराज्ये वा स्थापयेत् ।

बुद्धिमानाहार्यबुद्धिर्दुर्बुद्धिरिति पुत्रविशेषाः । शिष्यमाणो धर्मार्थावुपलभते चानुतिष्ठति च बुद्धिमान् । उपलभमानो नानुतिष्ठत्याहार्यबुद्धिः । अपायनित्यो धर्मार्थद्वेषी चेति दुर्बुद्धिः ।

प्रविश्य भेदयेयुः तथा कुर्म इति वाङ्मात्रेण तच्छन्दानुवृत्त्या ततो निवर्तयेयुः । अप्रार्थनीय इत्यादिर्निवर्तनार्थम् उपदेशः । राजा, अप्रार्थनीयः अर्थयितुम् एषितुं योग्यः अर्थनीय एष्टव्यः तद्विपरीतः प्रार्थनीयः अनेष्टव्यः द्वेष्य इति यावत्, प्रशब्दस्येह प्रस्मरतीत्यादाविव धात्वर्थविपरीतद्योतकत्वात्, प्रार्थनीयो न भवतीत्यप्रार्थनीयः अद्वेष्य इत्यर्थः । विपन्ने घातः पितृवधसमुद्यमे विफलिते सति तव वधो भवेत्, सम्पन्ने नरकपातः फलिते सति पितृवधपातकिनस्ते नरके पतनं, संक्रोशः लोकनिन्दा, प्रजाभिः एकलोष्टवधश्च प्रजाभिः समुदिताभिः कर्त्रीभिः एकैकमृत्खण्डप्रक्षेपेण घातश्च तव भवेत् ।

एवं कृतेऽपि यः पितरि निःस्नेह एव पितुः प्रिय एकश्च पुत्रो भवेत्, तदा तं बध्नीयादित्याह — **विरागमित्यादि** । बहुपुत्रश्चेद् राजा यथोक्तं पुत्रं कर्शयेदित्यभिप्रायेणाह — **बहुपुत्र** इत्यादि । प्रत्यन्तं म्लेच्छदेशम् । अन्यविषयं वा अन्यदेशं वा । यत्र गर्भः पण्यं डिम्बो वा न भवेत् यस्मिन् देशे गर्भः अन्नं राजपुत्रोचितं, पण्यं तादृशं वसनादिकमापणलभ्यं भोग्यवस्तु, डिम्बो राजपुत्रनिमित्तः प्रकृतीनां विप्लवश्च, न स्यात् । गर्भ इत्यस्य स्थाने गर्व इत्यपि पाठः । तदा त्वर्थः स्फुट एव । गुणसम्पन्नपुत्रविषये त्वाह — **आत्मसम्पन्नमित्यादि** ।

पुत्रं विभजते — **बुद्धिमानित्यादि** । पुत्रविशेषाः पुत्रभेदाः । उपदिश्यमानधर्मार्थज्ञानानुष्ठाननिष्ठो बुद्धिमान् । तज्ज्ञानमात्रवांस्तदनुष्ठानविमुख आहार्यबुद्धिः, नित्यप्रमादी धर्मार्थद्वेषणशीलश्च दुर्बुद्धिरिति त्रयाणां लक्षणमाह — **शिष्यमाण इत्यादि** ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स यद्येकपुत्रः पुत्रोत्पत्तावस्य वियतेत । पुत्रिकापुत्रानुत्पादयेद् वा । वृद्धस्तु व्याधितो वा राजा मातृबन्धुकुल्यगुणवत्सामन्तानामन्यतमेन क्षेत्रे बीजमुत्पादयेत् । न चैकपुत्रमविनीतं राज्ये स्थापयेत् ।

बहूनामेकसंरोधः पिता पुत्रहितो भवेत् ।
अन्यत्रापद ऐश्वर्यं ज्येष्ठभागि तु पूज्यते ॥
कुलस्य वा भवेद् राज्यं कुलसङ्घो हि दुर्जयः ।
अराजव्यसनाबाधः शश्वदावसति क्षितिम् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
सप्तदशोऽध्यायः राजपुत्ररक्षणम् ॥

स इति । स दुर्बुद्धिः, एकपुत्रो यदि एक एव राज्ञः पुत्रश्चेत्, अस्य दुर्बुद्धेः, पुत्रोत्पत्तौ पुत्रस्य राज्यार्हस्योत्पत्तौ वियतेत विशेषेण यत्नं कुर्यात् । अथवा पुत्रिकापुत्रान् पुत्रिकायाः 'अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति' इति परिभाषापूर्वं वराय दत्तायाः सुतायाः पुत्रान्, उत्पादयेद् राज्यार्थम् । अदुहितृको वृद्धभावाद् व्याधेर्वा गर्भाधानाक्षमश्चेद् राजा, तदा मातृबन्धोः स्वकुलजातस्य गुणवत्सामन्तस्य वा नियोगेन स्वमहिष्यां बीजमुत्पादयेदित्याह — **वृद्धास्त्वित्यादि** । सर्वथा तु अशिक्षितमेकं पुत्रं राज्ये न निवेशयेदित्याह — **न चेत्यादि** ।

बहूनामिति। बहूनां पुत्राणां मध्ये, एकसंरोधः एकस्य दुर्बुद्धेः संरोधः प्रत्यन्तादिष्ववरोधः, कर्तव्य इति शेषः । पिता, आपदोऽन्यत्र अनापदि पुत्रहितः पुत्रानुकूलवृत्तिः भवेत्। पुत्रेषु बहुषु पितृप्रियेषु विद्यमानेषु कस्य राज्यभाक्त्वमित्यत्राह — ऐश्वर्यं राजत्वं, ज्येष्ठभागि तु ज्येष्ठपुत्राश्रयमेव, पूज्यते प्रशस्यते ॥

पक्षान्तरमाह — **कुलस्येति** । अथवा राज्यं कुलस्य बहुपुत्रसङ्घस्य भवेत् बहुपुत्रसङ्घनेतृकं कार्यमित्यर्थः । तथा करणे गुणमाह — **कुलसङ्घः** कुलात्मको राज्यनेता सङ्घः, दुर्जयः जेतुमशक्यः शत्रुणा भवति । गुणान्तरमाह — **अराजव्यसनाबाधः** राजव्यसनदोषनिमित्त आबाधो जनपीडा राजव्यसनाबाधः तस्याभावः, शश्वत् सर्वदा क्षितिम् आवसति भूमिमधितिष्ठति राज्येऽनुवर्तत इत्यर्थः । नेतृसङ्घस्यावयव एकस्मिन् व्यसनविनष्टेऽप्यन्यैः सम्यक् प्रजापरिपालननिर्वर्तनादिति भावः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
सप्तदशोऽध्यायः राजपुत्ररक्षणम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१४,१५. प्रक० अवरुद्धवृत्तम्, अवरुद्धे च वृत्तिः।

राजपुत्रः कृच्छ्रवृत्तिरसदृशे कर्मणि नियुक्तः पितरमनुवर्तेत, अन्यत्र प्राणाबाधकप्रकृतिकोपपातकेभ्यः। पुण्यकर्मणि नियुक्तः पुरुषमधिष्ठातारं याचेत। पुरुषाधिष्ठितश्च सविशेषमादेशमनुतिष्ठेत्। अभिरूपं च कर्मफलमौपायनिकं च लाभं पितुरुपनाययेत्।

तथाऽप्यतुष्यन्तमन्यस्मिन् पुत्रे दारेषु वा स्निह्यन्तमरण्याय आपृच्छेत। बन्धवधभयाद् वा यः सामन्तो न्यायवृत्तिर्धार्मिकः सत्यवागविसंवादकः प्रतिग्रहीता मानयिता चाभिपन्नानां तमाश्रयेत।

अवरुद्धवृत्तमिति सूत्रम्। अवरुद्धो नाम राज्ञा स्वसन्निधेर्विवासितः, तेन राज्ञि कथं व्यवहर्तव्यमित्येतदिहोच्यत इति सूत्रार्थः। आत्मसम्पन्नः राजपुत्रः सैनापत्यादौ स्थाप्य इत्युक्तं प्राक्। तत्रात्मसम्पन्नेष्वनेकेष्वेकश्चेत् सेनापतिर्युवराजो वा क्रियेत, तदान्यो राजपुत्रो विजिगीषुः सम्पन्न इति तस्य वृत्तमभिधानीयमिति सम्बन्धः।

अवरुद्धो राजपुत्रः क्लेशनिर्वर्त्यदेहयात्रः स्वाननुरूपे कर्मणि पित्रा चोदितो यथापितृनियोगं कर्मानुतिष्ठेत्, तच्चेत् कर्म स्वप्राणसंशयकरं प्रकृतिकोपनं पातकजनकं वा न भवेदित्याह—**राजपुत्र** इत्यादि। अनुष्ठानप्रकारमाह—**पुण्ये**त्यादि। अधिष्ठातारं पुरुषं याचेत कर्मनेतारं कमपि स्वाधश्वरपुरुषं पितृसकाशाद् याचित्वा लभेत। आदेशं पितृनियोगम्। सविशेषमनुतिष्ठेत् विशेषो गुणवत्ता तद्युक्तं यथा भवति तथा चरेत्। अभिरूपं हृद्यं प्रशस्तम्। कर्मफलं स्वकर्मोत्पादितं धान्यादिकम्। औपायनिकं लाभं च कर्षकादिभ्य उपायनात्मना लब्धं द्रव्यं च। पितुरुपनाययेत् पितुः सकाशं प्रापयेत् तत्परितोषार्थं, नतु स्वयमुपयुञ्जीत।

तथापीत्यादि। तथापि अतुष्यन्तं कर्मफललाभोपनायनेनाप्यात्मनि तुष्टिमकुर्वन्तं पितरम्। दारेषु स्वमातृव्यतिरिक्तायां पत्न्याम्। अरण्याय आपृच्छेत 'तपसे वनं गन्तुं मेऽनुज्ञां देही'त्यर्थयेत। यथोक्तापृच्छादैन्यप्रकाशनेऽप्यार्जवमप्रतिपद्यमाने पितरि आत्मबन्धनहननशङ्कायां वा जातायां तं गत्यन्तराभावादभिद्रोग्धुं गुणवत्सामन्तसाहाय्यसम्पादने वियतेतेत्याह—**बन्धवधभयादि**त्यादि। अविसंवादकः अविप्रलम्भकः। अभिपन्नानां प्रति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्रस्थः कोशदण्डसम्पन्नः प्रवीरपुरुषकन्यासम्बन्धमटवीसम्बन्धं कृत्य-पक्षोपग्रहं वा कुर्यात्।

एकचरः सुवर्णपाकमणिरागहेमरूप्यपण्याकरकर्मान्तानाजीवेत्। पाषण्डसङ्घद्रव्यमश्रोत्रियभोग्यं देशद्रव्यमाढ्यविधवाद्रव्यं वा गूढमनुप्रविश्य सार्थयानपात्राणि च मदनरसयोगेनातिसन्धायावहरेत्। पारग्रामिकं वा योगमातिष्ठेत्। मातुः परिजनोपग्रहेण वा चेष्टेत।

ग्रहीता मानयिता च शरणागतानां स्वीकर्ता सत्कर्ता च। तं सामन्तमाश्रित्य तिष्ठन् कोशदण्डाभ्यां स्वार्जिताभ्यां युक्तो भूत्वा प्रकृष्टवीरपुरुषकन्यकायाः परिणयं स्वपितृजनपदाटविकसख्यं स्वपितृकृत्यवर्गस्वीकरणं च सहायोपचयार्थं कुर्यादित्याह—**तत्रस्थ** इत्यादि। अटवीसम्बन्धमित्यटवीशब्दस्तात्स्थ्यादाटविके वर्तते।

असहायविषये आह—**एकचर** इति। एकचरः एकाकी अलब्धकोशदण्डादिसहायः, सुवर्णपाकमणिरागहेमरूप्यपण्याकरकर्मान्तान् सुवर्णपाकं पुटपाकेन लोहादेः सुवर्णत्वापादनकर्म रसतन्त्रप्रयोगमिति यावत्, मणिरागहेमरूप्यपण्यानि वज्रवैदूर्यमौक्तिकादिर्मणिः लाक्षादिरञ्जनद्रव्यं रागः हेम स्वर्णं रूप्यं रजतम् इत्येतद्रूपाणि पण्यानि विक्रेयपदार्थान् आकरकर्मान्तं रत्नादिखनिव्यापारं च, आजीवेत् उपजीवेत्। एष कोशार्जनेऽभ्युपायः। उपायान्तरमाह—**पाषण्डे**ति। पाषण्डसङ्घद्रव्यं पाषण्डैः स्वसङ्घार्थं सङ्गृह्य स्थापितं धनम्, अश्रोत्रियभोग्यं देशद्रव्यं छान्दसब्राह्मणभोग्यातिरिक्तं देश्यजनसमुदायद्रव्यम्। देवद्रव्यमित्यपि पाठः। आढ्यविधवाद्रव्यं वा आढ्याः समृद्धधना या विधवास्तासां द्रव्यं वा, गूढं द्रव्यापजिहीर्षागुप्तिपूर्वं, अनुप्रविश्य अनुकूलाचरणेन वशयित्वा अर्थात् पाषण्डादीन् अवहरेत्। किञ्च सार्थयानपात्राणि सार्थस्य वणिक्सङ्घस्य यानपात्राणि पोतान् पण्ययुक्तान्, मदनरसयोगेन मदकररसदानोपायेन, अतिसन्धाय वञ्चयित्वा अर्थाद् वणिक्सङ्घम्, अवहरेत्। **पारग्रामिक**मिति। अथवा पारग्रामिकं योगं 'विजिगीषुः परग्राममवाप्तुकाम' इत्यादिना दुर्गलम्भोपायाधिकरणे वक्ष्यमाणम् उपायम्, आतिष्ठेत् आद्रियेत। अथवा मातुः, परिजनोपग्रहेण सेवकजनानुकूलनेन,

---

१. 'को वा' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कारुशिल्पिकुशीलवचिकित्सकवाग्जीवनपाषण्डच्छद्मभिर्वा नष्टरूपस्तद्व्यञ्जनसखः छिद्रे प्रविश्य राज्ञः शस्त्ररसाभ्यां प्रहृत्य ब्रूयात् — अहमसौ कुमारः, सहभोग्यमिदं राज्यमेको नार्हति भोक्तुं, तत्र ये कामयन्ते भर्तुं तानहं द्विगुणेन भक्तवेतनेनोपस्थास्य इति। इत्यवरुद्धवृत्तम् ॥

अवरुद्धं तु मुख्यपुत्रापसर्पाः प्रतिपाद्यानयेयुः, माता वा प्रतिगृहीता। त्यक्तं गूढपुरुषाः शस्त्ररसाभ्यां हन्युः। अत्यक्तं तुल्यशीलाभिः स्त्रीभिः पानेन मृगयया वा प्रसज्ज्य रात्रावुपगृह्यानयेयुः।

चेष्टेत वियतेत स्ववृद्ध्यर्थम्। अथवा, कारुशिल्पिकुशीलवचिकित्सकवाग्जीवनपाषण्डच्छद्मभिः कारवः तक्षायस्काराः शिल्पिनः चित्रकारादयः कुशीलवा गायनाः चिकित्सका वैद्याः वाग्जीवनाः पुरावृत्तकथनोपजीविनः पाषण्डाः क्षपणकबौद्धभिक्षुप्रभृतयो वेदबाह्याः तद्वेषैः सह, नष्टरूपः छन्नस्वरूपः, तद्व्यञ्जनसखः कार्वादिवेषपुरुषतुल्यः, राज्ञः पितुः, छिद्रे अपकारस्थाने, प्रविश्य, शस्त्ररसाभ्यां प्रहृत्य राजानं हत्वा, ब्रूयाद्, अर्थात् सचिवादीन्। अहमित्यादिर्वचनप्रकारः। कुमारः राजपुत्रः। सहभोग्यं ससहायनिर्वेश्यं ससहायशासनीयं वा। भर्तुम् अमात्यादिपदेष्वधिकर्तुम्। तान् भर्तुकामान्। द्विगुणेन मत्पितृदत्ताद् द्विरावृत्तेन। उपस्थास्ये पूजयिष्यामि। इत्यवरुद्धवृत्तं वर्णितमिति शेषः॥

अवरुद्धे च वृत्तिरिति सूत्रम्। अवरुद्धं पुत्रादिं प्रति विजिगीषोर्वृत्तमिति सूत्रार्थः। विजिगीषोरवरुद्धावस्थायां वृत्तमुक्तम्, अवरोद्धुरवस्थायां वृत्तमधुनोच्यते।

अवरुद्धमिति। मुख्यपुत्रापसर्पाः मुख्यानाममात्यादीनां ये पुत्राः तद्रूपा अपसर्पाः चाराः, प्रतिगृहीता माता वा राजपूजिता स्वमाता वा, अवरुद्धं राजपुत्रं, प्रतिपाद्य 'पिता ते यौवराज्यं दद्यात् त्वं चेत् तदनुकूलवृत्तिरि'ति भाषया पितृहितवृत्तिमभ्युपगमय्य, आनयेयुः पितुरन्तिकम्। कथञ्चिदपि विधेयतानासादनात् पित्रा परित्यक्तं राजपुत्रम् आयुधविषप्रयोगाभ्यां गूढपुरुषा हन्युः, अविधेयत्वेऽप्येकपुत्रत्वादपत्यस्नेहाद् वा अपरित्यक्तं तं समानस्वभावाभिः स्त्रीभिः मद्येन खेटनेन वा प्रसक्तिं कारयित्वा बद्ध्वा रात्रौ राजान्तिकं प्रापयेयुरित्याह, — त्यक्तमित्यादि।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपस्थितं च राज्येन मदूर्ध्वमिति सान्त्वयेत् ।
एकस्थमथ संरुन्ध्यात् पुत्रवान् वा प्रवासयेत् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
अष्टादशोऽध्यायः अवरुद्धवृत्तमवरुद्धे च वृत्तिः ॥

उपस्थितमिति । उपस्थितं तथा प्राप्तम् अवरुद्धम् अर्थाद् धार्मिकं, राज्येन मदूर्ध्वमिति सान्त्वयेत् राज्यमिदं मदुत्तरकाले त्वदीयं भविष्यतीति राज्येन निमित्तेनानुनयेत् । अथ एकस्थम् अभ्रातृकं पुत्रम् अर्थादधार्मिकं सन्तं, संरुन्ध्यात् कारागृहे निवेशयेत् । पुत्रवान् वा प्रवासयेत् बहुपुत्रसद्भाव-पक्षे अधार्मिकं पुत्रं हन्यादित्यर्थः ॥

इति कौटलायार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
अष्टादशोऽध्यायः अवरुद्धवृत्तम् अवरुद्धे च वृत्तिः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१६. प्रक. राजप्रणिधिः ।

राजानमुत्तिष्ठमानमनूत्तिष्ठन्ते भृत्याः । प्रमाद्यन्तमनुप्रमाद्यन्ति । कर्माणि चास्य भक्षयन्ति । द्विषद्भिश्चातिसन्धीयते । तस्मादुत्थानमात्मनः कुर्वीत । नालिकाभिरहरष्टधा रात्रिं च विभजेत् । छायाप्रमाणेन वा त्रिपौरुषी पौरुषी चतुरङ्गुला नच्छाया मध्याह्न इति चत्वारः पूर्वे दिवसस्याष्टभागाः । तैः पश्चिमा व्याख्याताः ।

तत्र पूर्वे दिवसस्याष्टभागे रक्षाविधानमायव्ययौ च शृणुयात् । द्वितीये पौरजानपदानां कार्याणि पश्येत् । तृतीये स्नानभोजनं सेवेत, स्वाध्यायं च कुर्वीत । चतुर्थे हिरण्यप्रतिग्रहमध्यक्षांश्च कुर्वीत । पञ्चमे

राजप्रणिधिरिति सूत्रम् । राज्ञः प्रणिधिः प्रणिधानं व्यापार उच्यत इति सूत्रार्थः । इन्द्रियजयप्रकरणे 'उत्थानेन योगक्षेमसाधनम्' इत्युक्तम्, उत्थानस्वरूपं त्वनुक्तमिहाभिधीयते ।

राजा स्वकर्मणि व्याप्रियते चेद्, अमात्यसमाहर्तृसन्निधातृप्रभृतयो भृत्याः स्वस्वकर्मसु व्याप्रियन्ते, स चेदालस्यान्न व्याप्रियते तेऽपि न व्याप्रियन्ते, राज्ञः कार्याणि च नाशयन्ति, तथाभूतोऽसौ राजा शत्रुभिर्वञ्च्यते च । तस्मादात्मनो व्यापारं राजानुतिष्ठेदित्याह— **राजानमित्यादि** । अनुष्ठेयानां कर्मणां कालविभागनियमं वक्तुमाह —**नालिकाभिरिति** । अहश्च रात्रिं च, नालिकाभिरष्टधा विभजेत् नालिका घटिका षष्टिविनाडिकात्मिका नालिकाप्रमाणेनाह्नो रात्रेश्च प्रत्येकमष्टौ भागान् कल्पयेत् । तत्रैकोऽष्टमभागः पादोननालिकाचतुष्टयात्मको मुहूर्तार्धयः सुप्रसिद्धः । दिवसस्याष्टावष्टमभागान् दर्शयति — **छायेत्यादि** । त्रिपौरुषी पुरुषत्रयपरिमाणा छाया, पौरुषी एकपुरुषपरिमाणा, चतुरङ्गुला अङ्गुलचतुष्टयपरिमाणा चेति त्रयः, मध्याह्नश्चतुर्थः, इति छायाप्रमाणेन एवम्प्रकारेण पुरुषच्छायामानेन, दिवसस्य, पूर्वे अष्टभागाः आदिमा अष्टमभागाः, चत्वारो भवन्ति । तैः उक्तैः पूर्वैरष्टभागैः, पश्चिमाः व्याख्याताः उत्तरा अष्टभागा उक्तप्रायाः, चतुरङ्गुला पौरुषी त्रिपौरुषी दिनान्त इत्येवं चत्वार इत्यूहितुं शक्या इत्यर्थः ।

दिवसस्याष्टभागेष्वष्टसु क्रमेणानुष्ठेयानि कर्माणि दर्शयति—**तत्र पूर्वे इत्यादि** । रक्षाविधानं राज्यनुष्ठितम् । आयव्ययौ गताहोरात्रवृत्तौ । पश्येत् विमृशेत् । स्नानभोजनं स्नानं च भोजनं च । स्वाध्यायं वेदाध्ययनम् । हिर-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मन्त्रिपरिषदा पत्रसंप्रेषणेन मन्त्रयेत, चारगुह्यबोधनीयानि च बुध्येत । षष्ठे स्वैरविहारं मन्त्रं वा सेवेत । सप्तमे हस्त्यश्वरथायुधीयान् पश्येत् । अष्टमे सेनापतिसखो विक्रमं चिन्तयेत् । प्रतिष्ठितेऽहनि सन्ध्यामुपासीत ।

प्रथमे रात्रिभागे गूढपुरुषान् पश्येत् । द्वितीये स्नानभोजनं कुर्वीत स्वाध्यायं च । तृतीये तूर्यघोषेण संविष्टः चतुर्थपञ्चमौ शयीत । षष्ठे तूर्यघोषेण प्रतिबुद्धः शास्त्रमितिकर्तव्यतां च चिन्तयेत् । सप्तमे मन्त्रमध्यासीत, गूढपुरुषांश्च प्रेषयेत् । अष्टमे ऋत्विगाचार्यपुरोहितसखः स्वस्त्ययनानि प्रतिगृह्णीयात्, चिकित्सकमाहानसिकमौहूर्तिकांश्च पश्येत् । सवत्सां धेनुं वृषभं च प्रदक्षिणीकृत्योपस्थानं गच्छेत् ।

आत्मबलानुकूल्येन वा निशाहर्भागान् प्रतिविभज्य कार्याणि सेवेत ।

ण्यप्रतिग्रहं गतदिवसोत्थितधनस्वीकारम् । अध्यक्षान् कुर्वीत कार्यविशेषेषु नियुञ्जीत । पत्रसम्प्रेषणेन मन्त्रयेत लेख्यद्वारकसंवादेन कार्यमालोचयेत् । चारगुह्यबोधनीयानि बुध्येत चारेभ्यो रहसि उपदेश्यानि कार्याणि अवगच्छेत् । स्वैरविहारं स्वच्छन्दावस्थानं विश्रमार्थम् । हस्त्यश्वरथायुधीयान् हस्त्यादियुक्तान् पदातीन् । सेनापतिसखः सेनापतिसमेतः । प्रतिष्ठिते अवसिते ।

रात्रिभागेष्वनुष्ठेयानि कर्माण्याह — प्रथम इत्यादि । तृतीये तूर्यघोषेण संविष्टः तृतीये रात्रिभागे गीतवाद्यश्रवणसुखमनुभवन्नेव शयितः । चतुर्थपञ्चमौ शयीत चतुर्थे पञ्चमे च रात्रिभागे कृत्स्ने स्वप्यात् । शास्त्रम् अर्थशास्त्रम् । इतिकर्तव्यतां कालोचितकार्यपरिपाटीम् । प्रेषयेद् यथाविषयं प्राणिदध्यात् । ऋत्विगाचार्यपुरोहितसखः ऋत्विग् याजकः आचार्यः विद्योपदेष्टा पुरोहितः मन्त्रिपुरोहितोत्पत्तिप्रकरणोपवर्णितगुणः एषां सखा । स्वस्त्ययनानि माङ्गलिकमन्त्रपाठपूर्वाण्याशीर्वचनानि । चिकित्सकमाहानसिकमौहूर्तिकांश्च पश्येदिति । चिकित्सकदर्शनं देहावस्थापरिज्ञानार्थम् महानसाधिकृतदर्शनं कल्पनीयेष्टाहारकथनार्थम् मौहूर्तिकदर्शनं तदहर्ग्रहशुभाशुभचिन्तनार्थम् । उपस्थानम् आस्थानमण्डपम् ।

त इमे निशाहर्भागा औत्सर्गिकाः, वैशेषिका अपि तु कार्यद्रष्ट्रा कल्प्यमाना न दुष्यन्तीत्याह — आत्मेत्यादि । वा अथवा । आत्मबलानुकूल्येन आत्मनो यद् बलं कार्यानुष्ठानशक्तिस्तदानुगुण्येन ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपस्थानगतः कार्यार्थिनामद्वारासङ्गं कारयेत् । दुर्दर्शो हि राजा कार्याकार्यविपर्यासमासन्नैः कार्यते । तेन प्रकृतिकोपमरिवशं वा गच्छेत् । तस्माद् देवताश्रमपाषण्डश्रोत्रियपशुपुण्यस्थानानां बालवृद्धव्याधितव्यसन्यनाथानां स्त्रीणां च क्रमेण कार्याणि पश्येत्, कार्यगौरवादात्ययिकवशेन वा ।

सर्वमात्ययिकं कार्यं शृणुयान्नातिपातयेत् ।
कृच्छ्रसाध्यमतिक्रान्तमसाध्यं वा विजायते ॥
अग्न्यगारगतः कार्यं पश्येद् वैद्यतपस्विनाम् ।
पुरोहिताचार्यसखः प्रत्युत्थायाभिवाद्य च ॥
तपस्विनां तु कार्याणि त्रैविद्यैः सह कारयेत् ।
मायायोगविदां चैव न स्वयं कोपकारणात् ॥

उपस्थानेत्यादि । अद्वारासङ्गं कारयेत् द्वारे आसङ्गः सक्तिर्निरोध इति यावत् तदभावं कारयेत्, सुलभदर्शनो भवेदित्यभिप्रायः । दुर्लभदर्शनत्वे दोषमाह — दुर्दर्श इत्यादि । कार्याकार्यविपर्यासं कार्याकार्ययोरकरणं व्युत्क्रमकरणं वा । आसन्नैः अन्तिकसेवकैः । तेन कार्याकार्यविपर्यासनेन । प्रकृतिकोपम् अमात्यादिरोषम् । अरिवशं शत्रुगोचरम् । कार्यदर्शने क्रममाह — तस्माद् देवताश्रमेत्यादि । अत्राश्रमशब्दो मुन्युपलक्षकः । व्यसनिशब्दो दुःखाभिभूतपरः । शेषं स्पष्टम् । कार्यगौरवाद् आत्ययिकवशेन वा कार्याणि पश्येत् कार्यस्य महत्त्वापेक्षया वा अमहत्त्वेऽप्यतिपातित्वापेक्षया वा कार्याणि चिन्तयेत्, क्रमं यथोक्तमनादृत्यापीत्यभिप्रायः ।

सर्वमिति । सर्वं गुरु लघु च, आत्ययिकं कार्यं, शृणुयात् श्रुत्वानुतिष्ठेत्, नातिपातयेत् नातिक्रामयेत् । अतिक्रान्तम् अतिपातितकालं किमपि सद्यस्सुकरं कार्यं, कृच्छ्रसाध्यं असाध्यं वा भवति, कालान्तरे ॥

अग्न्यगारेत्यादि । अग्न्यगारगतः अग्निहोत्रशालागतः । वैद्यतपस्विनां विदुषां तापसानां च ॥

तपस्विनामित्यादि । त्रैविद्यैः सह त्रयीविद्याविद्भिः साकं, त्रैविद्यसाहित्यवचनं कार्यनिर्णये प्रत्ययार्थम् । मायायोगविदां मायाप्रयोगाभिज्ञानाम् । न स्वयम् एकाकी सन् न कारयेत्, कुतः, कोपकारणात् कोपान्निमित्तात् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राज्ञो हि व्रतमुत्थानं यज्ञः कार्यानुशासनम् ।
दक्षिणा वृत्तिसाम्यं च दीक्षितस्याभिषेचनम् ॥
प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् ।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ॥
तस्मान्नित्योत्थितो राजा कुर्यादर्थानुशासनम् ।
अर्थस्य मूलमुत्थानमनर्थस्य विपर्ययः ॥
अनुत्थाने ध्रुवो नाशः प्राप्तस्यानागतस्य च ।
प्राप्यते फलमुत्थानाल्लभते चार्थसम्पदम् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
एकोनविंशोऽध्यायः राजप्रणिधिः ॥

राज्ञ इति । उत्थानम् उद्योगः, यज्ञः क्रत्वनुष्ठानं, कार्यानुशासनं व्यवहारनिर्णयः, दक्षिणा दानं, वृत्तिसाम्यं शत्रौ मित्रे च गुणदोषापेक्षया तुल्यं व्यवहरणं, दीक्षितस्य अभिषेचनम् अवभृथनिर्वर्तनं च राज्ञो व्रतम् ॥

प्रजासुख इति । प्रजासुखे सति, राज्ञः सुखम्, अस्ति । प्रजानां हिते च सति राज्ञो हितम्, अस्ति । राज्ञः आत्मप्रियं हितं न भवति, किं तर्हि, प्रजानां प्रियं तु हितं प्रजानां प्रियमेव हितं भवति ॥

तस्मादिति । तस्माद् उक्तात् कारणात्, राजा नित्योत्थितः नित्योद्योगी सन्, अर्थानुशासनम् अर्थव्यवहारं, कुर्यात् । उत्थानम् उद्यमः, अर्थस्य मूलं सिद्ध्युपायः, विपर्ययः अनुत्थानम् अनर्थस्य मूलम् ॥

अनुत्थान इति । अनुत्थाने आलस्यादुद्योगाकरणे, प्राप्तस्य पूर्वसिद्धस्य, अनागतस्य सेत्स्यतश्च अर्थस्य, नाशः, ध्रुवः निश्चितः । उत्थानात् फलं प्राप्यते, अर्थात् सद्यः, अर्थसम्पदं लभते च अर्थस्य प्राप्तस्य रक्षणसिद्ध्या अप्राप्तस्य प्राप्तिसिद्ध्या च समृद्धिं प्राप्नोति च । उत्थानस्यैवं त्रैकाल्यहितत्वं समर्थितम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
एकोनविंशोऽध्यायः राजप्रणिधिः ॥

०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१७. प्रक. निशान्तप्रणिधिः ।

वास्तुकप्रशस्ते देशे सप्राकारपरिखाद्वारमनेककक्ष्यापरिगतमन्तःपुरं कारयेत् ।

कोशगृहविधानेन वा मध्ये वासगृहं, गूढभित्तिसञ्चारं मोहनगृहं तन्मध्ये वा वासगृहं, भूमिगृहं वा आसन्नकाष्ठचैत्यदेवतापिधानद्वारमनेकसुरुङ्गासञ्चारम् । प्रासादं वा गूढभित्तिसोपानं, सुषिरस्तम्भप्रवे-

---

निशान्तप्रणिधिरिति सूत्रम् । निशान्तं राजभवनं तस्य प्रणिधिः, तत्सम्बद्धमनुष्ठानमुच्यत इति सूत्रार्थः । 'दाररक्षणं निशान्तप्रणिधौ वक्ष्याम' इत्युक्तं राजपुत्ररक्षणे । तदिदानीमभिधीयते ।

वास्तुकेत्यादि । वास्तुकप्रशस्ते वास्तुविद्याभिज्ञश्लाघिते । सप्राकारपरिखाद्वारं प्राकारः सालः परिखा दुर्गवेष्टनखातिका द्वाराणि अपवरकाणि एतैर्युक्तम् । अनेककक्ष्यापरिगतम् अनेकाभिः कक्ष्याभिः प्रकोष्ठकैः परिगतम् अन्तःपुरं कारयेत् ।

कोशेति । कोशगृहविधानेन कोशगृहनिर्माणविधया सन्निधातृनिचयकर्मप्रकरणे वक्ष्यमाणया, मध्ये अन्तःपुरमध्ये, स्वस्य वासगृहं गर्भागारं कारयेद्, राजा । गूढभित्तिसञ्चारं गूढः अनन्यलक्ष्यः भित्तिसञ्चारः भित्त्यन्तरस्थो गतागतमार्गो यस्य तथाभूतं, मोहनगृहं मार्गव्यामोहकरत्वाद् मोहनसंज्ञं किमपि वृत्ताकारं गृहं, कारयेत् । तन्मध्ये वा तथाकारितस्य मोहनगृहस्य मध्ये वा वासगृहं कारयेत् । भूमिगृहं वा कारयेद् भूमिं खात्वा तदन्तः कृतसन्निवेशं गृहं भूमिगृहं तच्च कारयेद्, अर्थान्मोहनगृहस्य मध्ये । कीदृशं भूमिगृहम्, आसन्नकाष्ठचैत्यदेवतापिधानद्वारम् आसन्नकाष्ठे चैत्ये निकटदिग्वर्तिनि देवालये या देवता प्रसिद्धा दुर्गा तदन्या वा रौद्री तद्रूपं पिधानम् उत्कीर्णतद्देवताप्रतिमाङ्कं दारुलोहादिमयमाच्छादनं यस्य तत् तथाभूतं द्वारं यस्य तादृशम् । देवतापिहितद्वारे तस्मिन् गतागतमार्गसंविधानमाह — अनेकसुरुङ्गासञ्चारम् अनेकाः सुरुङ्गासञ्चाराः तिर्यग्भूखातात्मकाः सञ्चरणमार्गा यस्य तत् तादृशम् । किञ्च प्रासादं, गूढभित्तिसोपानं गूढानि अन्याविदितानि भित्तिसोपानानि भित्त्यन्तरगतानि आरोहणानि यस्य तं तथाभूतम्, अथवा सुषिरस्तम्भप्रवेशापसारं वा अन्तः सुषिरवता स्तम्भेन स्तम्भमार्गेण प्रवेशः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शापसारं वा। वासगृहं यन्त्रबद्धतलावपातं कारयेद् आपत्प्रतीकारार्थम्। आपदि वा कारयेत्। अतोऽन्यथा वा विकल्पयेत् सहाध्यायिभयात्।

मानुषेणाग्निना त्रिरपसव्यं परिगतमन्तःपुरमग्निरन्यो न दहति, न चात्रान्योऽग्निर्ज्वलति, वैद्युतेन भस्मना मृत्संयुक्तेन करकवारिणावलिप्तं च।

जीवन्तीश्वेतामुष्ककपुष्पवन्दाकाभिरक्षीवे जातस्याश्वत्थस्य प्रतानेन वा गुप्तं सर्पा विषाणि वा न प्रसहन्ते। मार्जारमयूरनकुलपृषतो-

---

अपसारो निर्गमश्च यस्मिंस्तं तथाभूतं वा कारयेत्। प्रकारान्तरमाह—**वासगृहमिति**। वासगृहं, यन्त्रबद्धतलावपातं यन्त्रबद्धं तलावपातं च यन्त्रेणोपरिभूमौ धारितं यन्त्रस्रंसने सत्यधोदेशनिपातुकं च कारयेत्। किमर्थम्, आपत्प्रतीकारार्थं शत्रुभयप्रतिक्रियार्थम् अधःस्थितशत्रुमारणार्थमित्यर्थः। आपदि वा कारयेत् पूर्वमताहृशमप्यापत्समये वा तादृशं कारयेत्। उक्तं वासगृहकाप्स्यप्रकारं शत्रुरपि तुल्यशास्त्रवेत्ता विज्ञाय चेष्टेतेति यदि शङ्का स्यात्, तदा प्रकारान्तरेण स्वबुद्धिप्रतिभातेन वासगृहं विकल्पयेदित्याह — **अतोऽन्यथा वेत्यादि**।

निर्मितस्य निशान्तस्याग्निभयपरिहारोपायमाह—**मानुषेणेति**। मानुषेणाग्निना शत्रुनिहतस्य वा शूलारोपणमारितस्य वा मनुष्यस्यास्थिन कल्माषवेणुना मथनादुत्थितेनाग्निना, त्रिः अपसव्यं परिगतं त्रीन् वारान् वामावर्तेन परीतं, परिगमनस्य अथर्वोक्तमन्त्रोच्चारणपूर्वकत्वं तु साम्प्रदायिकमर्थगम्यम्। अन्तःपुरम् अन्योऽग्निर्न दहति। अत्र अन्तःपुरे, अन्योऽग्निर्न च ज्वलति। मृत्संयुक्तेन वल्मीकमृत्तिकासंमिश्रेण, वैद्युतेन भस्मना विद्युदुद्भूताग्निदग्धद्रुमभवेन भसितेन, करकवारिणा वर्षोपलजलयुक्तेन सता, अवलिप्तं च कृतलेपनमन्तःपुरं च, अन्योऽग्निर्न दहति, न चात्र ज्वलति।

विषप्रतीकारमाह— **जीवन्तीति**। जीवन्तीश्वेतामुष्ककपुष्पवन्दाकाभिः जीवन्ती गुडूची श्वेता शङ्खिनी मुष्कको लोध्रभेदः पुष्पवन्दाका करवीरोपरिजाता वृक्षरुहा ताभिः अर्थात् तासां मूलैः पत्रैश्च गुम्फिताभिर्मालाभिः गृहनिवेशिताभिः, अक्षीवे शिग्रौ जातस्य अश्वत्थस्य पिप्पलस्य, प्रतानेन च तत्पत्रनिर्मितेन माल्येन च गृहनिवेशितेन, गुप्तं गृहं सर्पाः, विषाणि दारदादीनि स्थावरविषाणि वा, न प्रसहन्ते न बाधन्ते। मार्जारमयूरनकुलपृषतोत्सर्गः सर्पान्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्सर्गः सर्पान् भक्षयति। शुकः शारिका भृङ्गराजो वा सर्पविषशङ्कायां क्रोशति। क्रौञ्चो विषाभ्याशे माद्यति, ग्लायति जीवञ्जीवकः, म्रियते मत्तकोकिलः, चकोरस्याक्षिणी विरज्येते। इत्येवम् अग्निविषसर्पेभ्यः प्रतिकुर्वीत।

पृष्ठतः कक्ष्याविभागे स्त्रीनिवेशो गर्भव्याधिवैद्यप्रत्याख्यातसंस्था वृक्षोदकस्थानं च। बहिः कन्याकुमारपुरम्। पुरस्तादलङ्कारभूमिः मन्त्रभूमिरुपस्थानं कुमाराध्यक्षस्थानं च। कक्ष्यान्तरेष्वन्तर्वंशिकसैन्यं तिष्ठेत्।

भक्षयति बिडालकेकिबभ्रुमृगाः गृहे निर्यन्त्रणविसृष्टाः सर्पान् नाशयन्ति। शुकः, शारिका पक्षिभेदः, भृङ्गराजो वा धूम्याटोऽलिभेदो वा, सर्पविषशङ्कायां क्रोशति क्रन्दति। विषाभ्याशे विषसान्निध्ये, क्रौञ्चः पक्षिविशेषः, माद्यति विह्वलति। जीवञ्जीवकः पक्षिभेदः ग्लायति क्षीणहर्षो भवति। मत्तकोकिलः म्रियते। चकोरस्य चन्द्रिकाप्रियस्य पक्षिणः, अक्षिणी विरज्येते विरागं प्राप्नुतः स्ववर्णं त्यजत इत्यर्थः। इत्येवम् उक्तप्रकारं वस्तुतत्त्वं विदित्वा, अग्निविषसर्पेभ्यः, प्रतिकुर्वीत रक्षां विदधीत।

पृष्ठत इति। पृष्ठतः कक्ष्याविभागे राजावसथस्य पश्चाद्भागे पृथङ्निर्मितायां कक्ष्यायां, स्त्रीनिवेशः देवीवासस्थानं भवति। तस्य पृष्ठतः कक्ष्याविभागे, गर्भव्याधिवैद्यप्रत्याख्यातसंस्थाः गर्भसंस्था देवीनां गर्भावस्थायां वासार्था तस्याः पृष्ठतो व्याध्यवस्थायां वासार्था व्याधिसंस्था तस्याः पृष्ठतः अचिकित्सनीयरोगा इति वैद्येन परित्यक्तानां देवीनां वासार्था वैद्यप्रत्याख्यातसंस्था चेत्येतास्तिस्रः संस्थाः। तासां पृष्ठतः वृक्षोदकस्थानं च उद्यानतटाकादिकं च भवति। बहिः उक्तेभ्यो बहिर्देशे, कन्याकुमारपुरं कन्यानिवेशः अप्राप्तयौवनराजपुत्रनिवेशश्च भवति। इत्थं पृष्ठसन्निवेशः उक्तः। पुरस्तात्सन्निवेशमाह — **पुरस्तादिति**। पुरस्ताद् वासभवनस्यासन्ने कक्ष्याविभागे, अलङ्कारभूमिः दृष्टिविलोभनविचित्रमण्डनयुक्तः प्रासादः, ततो मन्त्रभूमिः मन्त्रसभा, तत उपस्थानम् आस्थानमण्डपः, ततः कुमाराध्यक्षस्थानं कुमारस्थानं यूनां राजपुत्राणां स्थानम् अध्यक्षस्थानं सन्निधातृसमाहर्तृप्रभृतीनां कार्याध्यक्षाणां स्वकर्मानुष्ठानस्थानं च, भवति। कक्ष्यान्तरेषु कक्ष्याणां मध्येषु अन्तर्वंशिकसैन्यम् अन्तःपुराधिकृतानां कञ्चुकिप्रभृतीनां गणः, तिष्ठेत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्तर्गृहगतः स्थविरस्त्रीपरिशुद्धां देवीं पश्येत् । न काञ्चिदभिगच्छेत् । देवीगृहे लीनो हि भ्राता भद्रसेनं जघान, मातुः शय्यान्तर्गतश्च पुत्रः कारूशम् । लाजान् मधुनेति विषेण पर्यस्य देवी काशिराजं, विषदिग्धेन नूपुरेण वैरन्त्यं, मेखलामणिना सौवीरं, जालूथमादर्शेन, वेण्यां गूढं शस्त्रं कृत्वा देवी विडूरथं जघान । तस्मादेतान्यास्पदानि परिहरेत् ।

मुण्डजटिलकुहकप्रतिसंसर्गं बाह्याभिश्च दासीभिः प्रतिषेधयेत् । नचैनाः कुल्याः पश्येयुरन्यत्र गर्भव्याधिसंस्थाभ्यः । रूपाजीवाः

अन्तर्गृहेत्यादि । अन्तर्गृहगतः स्ववासगृहस्थितः, नतु देवीगृहगतः, स्थविरस्त्रीपरिशुद्धाम् आप्तवृद्धपरिचारिकया परिशोधितां, देवीं पश्येत् । काञ्चिद् नाभिगच्छेत् कामपि देवीमुद्दिश्य स्वयं तद्गृहं न गच्छेत् । देवीगृहाभिगमने दोषं निदर्शयति—**देवीगृह** इत्यादि । भ्राता कलिङ्गेश्वरस्य भद्रसेनस्य राज्ञः सोदर्यः वीरसेननामा । स हि तद्भार्यया कृतसंजल्पस्तद्गृहैकदेशनिलीनो राज्यं च जिहीर्षुर्भद्रसेनं जघानेति इतिहासः । कारूशं करूशदेशाधिपतिम् । वृद्धस्त्रीजनापरिशोधितदेवीदर्शने दोषं निदर्शयति—**लाजानि**ति । देवी, मधुनेति मधुना माक्षिकेण मिश्रिताः इति वदन्ती, लाजान् विषेण पर्यस्य मिश्रयित्वा भोजयित्वा च, काशिराजं युद्धविजितदेवीबन्धूपरोधापराधिनं, जघान । वैरन्त्यं तन्नामकं वनवासिदेशेश्वरं, देवी सपत्नीमिथ्याभिशंसनमन्युवशंवदा, विषदिग्धेन स्पर्शवेधिगरलोपलिप्तेन, नूपुरेण जघान क्रीडाभिघातमिषेण मारितवतीत्यर्थः । सौवीरं तद्देशपतिं परन्तपाख्यं मेखलामणिना काञ्चीरत्नेन विषदिग्धेन, देवी अतिवाक्पारुष्यतापिता, जघान । जालूथं राजानम् अयोध्याधिपतिं, देवी पतिदारान्तरासक्तिमन्यूपतप्ता, आदर्शेन मुकुरेण विषदिग्धेन, जघान आदर्शस्पर्शेन मुखे विसर्पमुत्पाद्य व्यापादयामास । देवी शस्त्रं वेण्यां गूढं कृत्वा विडूरथं राजानं जघान । तस्माद् एतानि आस्पदानि व्यापत्तिनिमित्तानि, परिहरेत् ।

मुण्डेत्यादि । मुण्डजटिलकुहकैः मुण्डैः बौद्धभिक्षुक्षपणकादिभिः जटिलैः शैवपाशुपतादिभिः कुहकैः मायाप्रयोक्तृभिश्च प्रतिसंसर्गं परिचयम् अर्थाद् देवीनां, प्रतिषेधयेद् वारयेत् । बाह्याभिः दासीभिश्च प्रतिषेधयेद् अर्थात् प्रतिसंसर्गम् । **नचे**ति । कुल्याः देवीबान्धवाः, एनाः देवीः, गर्भव्याधिसंस्थाभ्योऽन्यत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्नानप्रघर्षशुद्धशरीराः परिवर्तितवस्त्रालङ्काराः पश्येयुः । आशीतिकाः पुरुषाः पञ्चाशत्काः स्त्रियो वा मातापितृव्यञ्जनाः स्थविरवर्षवराभ्यागारिकाश्चावरोधानां शौचाशौचं विद्युः स्थापयेयुश्च स्वामिहिते ।

स्वभूमौ च वसेत् सर्वः परभूमौ न सञ्चरेत् ।
नच बाह्येन संसर्गं कश्चिदाभ्यन्तरो व्रजेत् ॥

सर्वं चावेक्षितं द्रव्यं निबद्धागमनिर्गमम् ।
निर्गच्छेदधिगच्छेद् वा मुद्रासङ्क्रान्तभूमिकम् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
विंशोऽध्यायः निशान्तप्रणिधिः ॥

प्रसवव्याध्यनुमरणकालेभ्योऽन्यस्मिन् काले, न पश्येयुः । रूपेत्यादि । रूपाजीवाः वेश्याः । स्नानप्रघर्षशुद्धशरीराः स्नानेन कायमलघर्षणेन च शुद्धदेहाः । पश्येयुः, राजानं परिचर्यार्थम् । देवीनां शौचाशौचगवेषणपूर्वं पथि स्थापनं बन्धुकरणीयं के कुर्युस्तत्राह — आशीतिका इति । मातापितृव्यञ्जनाः मातापितृसधर्माणः, आशीतिका अशीतिवयस्काः, पुरुषाः, पञ्चाशत्काः पञ्चाशद्वयस्काः, स्त्रियो वा, स्थविरवर्षवराभ्यागारिकाश्च वृद्धाः षण्डाश्च येऽभ्यागारिकाः कुटुम्बचिन्तकास्ते च, अवरोधानाम् अन्तःपुरस्त्रीणां शौचाशौचं विद्युः स्वामिहिते स्थापयेयुश्च, अर्थादवरोधान् ।

स्वभूमाविति । सर्वः देवीजनोऽन्तर्वंशिकजनश्च, स्वभूमौ आत्मनः क्लृप्ते स्थाने, वसेत्, परभूमौ न सञ्चरेत् । आभ्यन्तरः कश्चिद् जनः बाह्येन जनेन संसर्गं नच व्रजेद् गच्छेत् ॥

सर्वमिति । निबद्धागमनिर्गमम् अमुकस्थानादागतममुकस्थानं गमिष्यतीति पुस्तकार्पितागमनिर्गमं, मुद्रासंक्रान्तभूमिकं मुद्राभिरागमनिर्गमस्थानसम्बन्धिनीभिः संक्रान्ता अङ्किता भूमिः आधारभाण्डं यस्य तत् तथाभूतं, सर्वं द्रव्यं धनम्, अवेक्षितं स्वयं साक्षाद् दृष्टं सत्, निर्गच्छेद् अधिगच्छेद्वा निर्गमयेत् स्वीकुर्याद्वा ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
विंशोऽध्यायः निशान्तप्रणिधिः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

१८. प्रक. आत्मरक्षितकम् ।

शयनादुत्थितः स्त्रीगणैर्धन्विभिः परिगृह्येत, द्वितीयस्यां कक्ष्यायां कञ्चुकोष्णीषिभिर्वर्षवराभ्यागारिकैः, तृतीयस्यां कुब्जवामनकिरातैः, चतुर्थ्यां मन्त्रिभिः सम्बन्धिभिर्दौवारिकैश्च प्रासपाणिभिः ।

पितृपैतामहं महासम्बन्धानुबन्धं शिक्षितमनुरक्तं कृतकर्माणं जनमासन्नं कुर्वीत, नान्यतोदेशीयमकृतार्थमानं स्वदेशीयं वाप्यपकृत्योपगृहीतम् । अन्तर्वंशिकसैन्यं राजानमन्तःपुरं च रक्षेत् ।

गुप्ते देशे माहानसिकः सर्वमास्वादबाहुल्येन कर्म कारयेत् । तद् राजा तथैव प्रतिभुञ्जीत पूर्वमग्नये वयोभ्यश्च बलिं कृत्वा ।

आत्मरक्षितकमिति सूत्रम् । आत्मनो रक्षणमुच्यत इत्यर्थः । राज्ञः पुत्रदारेभ्यो रक्षणमुक्तं, तदन्येभ्य इदानीमभिधीयते ।

शयनादित्यादि । धन्विभिः धनुष्पाणिभिः । परिगृह्येत परिवार्येत । कञ्चुकोष्णीषिभिः वारबाणशिरस्त्राणधारिभिः । वर्षवराभ्यागारिकैः षण्डैः राजगृहकार्यचिन्तकैश्च । कुब्जवामनकिरातैः गडुलैः खर्वैर्म्लेच्छजातिविशेषैश्च । प्रासपाणिभिः कुन्तहस्तैः ।

अङ्गरक्षकमाह — पित्रित्यादि । पितृपैतामहं वंशपारम्पर्यप्राप्तम् । महासम्बन्धानुबन्धं महान् प्रशस्तः सम्बन्धोऽन्वयः येषां ते महासम्बन्धाः महाकुलाः तैरनुबन्धः सम्बन्धानुवृत्तिर्यस्य तम् । शिक्षितं कृतविद्यम् । कृतकर्माणं कृतं दृष्टं कर्म अनुरक्तपुरुषोचितं यस्य तम् । आसन्नं कुर्वीत निकटवर्तिनं कुर्वीत स्वदेहरक्षार्थम् । वैदेशिकमकृतधनहिरण्यादिदानसत्कारं सन्तं, स्वदेशीयमपि वा पूर्वमपकृत्य पश्चात् स्वीकृतं जनम् आसन्नं न कुर्यादित्याह — नान्यतोदेशीयमित्यादि । अन्तरिति । अन्तर्वंशिकसैन्यं कञ्चुकिनिर्मुण्डकादिगणः, राजानम् अन्तःपुरं च रक्षेत् ।

अभ्यवहाररक्षार्थमाह — गुप्ते इति । माहानसिकः पाकशालानियुक्तः, गुप्ते अन्यादृश्ये देशे, सर्वं कर्म सर्वप्रकारं पाककर्म, आस्वादबाहुल्येन कारयेत् बहुलमास्वाद्य साधयेत्, अथवा आस्वादः स्वादुता तदतिशययुक्तं कारयेत् । राजा, तत् साधितमन्नादिकं, तथैव तेनैव रूपेण युक्तं नतु यातयामतया वैरूप्यमापन्नं, प्रतिभुञ्जीत । किं कृत्वा, पूर्वं स्वयमभ्यवहरणात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अग्नेर्ज्वालाधूमनीलता शब्दस्फोटनं च विषयुक्तस्य, वयसां विपत्तिश्च । अन्नस्योष्मा मयूरग्रीवाभः शैत्यमाशु क्लिष्टस्येव वैवर्ण्यं सोदकत्वमक्लिन्नत्वं च । व्यञ्जनानामाशुशुष्कत्वं च क्काथः श्यामफेनपटलविच्छिन्नभावो गन्धस्पर्शरसवधश्च । द्रवेषु हीनातिरिक्तच्छायादर्शनं फेनपटलसीमन्तोर्ध्वराजीदर्शनं च । रसस्य मध्ये नीला राजी, पयसस्ताम्रा, मद्यतोययोः काली, दध्नः श्यामा, मधुनः श्वेता । द्रव्याणामार्द्राणाम्

प्राक्, अग्नये बलिं कृत्वा वैश्वदेवं कृत्वा, वयोभ्यश्च बलिं कृत्वा पक्षिभ्यश्च बलिं दत्वा । तदुभयं विहितानुष्ठानार्थं विषप्रतीकारार्थं च बोद्धव्यम् ।

विषयुक्तचिह्नान्याह—अग्नेरिति । विषयुक्तस्य विषदूषितान्नसंपृक्तस्य, अग्नेः, ज्वालाधूमनीलता ज्वालाधूमयोर्नीलत्वं, शब्दस्फोटनं च चटचटाशब्दश्च भवति । विषयुक्तानां वयसां विषसंस्पृष्टान्नभक्षिणां पक्षिणां, विपत्तिश्च मरणं च भवति । अन्नस्येति । अन्नस्य विषमिश्रस्य, ऊष्मा बाष्पः, मयूरग्रीवाभः मयूरकण्ठवद् मेचकः, आशु शैत्यं सद्यः शीतत्वं, क्लिष्टस्येव वैवर्ण्यं करसंपिष्टस्येव वर्णवैरूप्यं, सोदकत्वं सिक्थैकीभावः अवैशद्यं वा, अक्लिन्नत्वं च असम्यक्पाकत्वं च भवति । व्यञ्जनानामिति । व्यञ्जनानां सूपादीनाम्, आशुशुष्कत्वं शीघ्रशोषः, क्काथः अग्नियोगे तक्रादेरिवोत्क्वथनं, श्यामफेनपटलविच्छिन्नभावः श्यामस्य जायमानस्य फेनमण्डलस्य विच्छिन्नत्वं व्यञ्जनाद् विभक्ततया स्थितिः, गन्धस्पर्शरसवधश्च गन्धस्पर्शरसानां नाशश्च, भवति । द्रवेष्विति । द्रवेषु यूषादिषु विषयुक्तेषु, हीनातिरिक्तच्छायादर्शनं हीनाया अतिरिक्ताया वा स्वीयच्छायाया दर्शनं, फेनपटलसीमन्तोर्ध्वराजीदर्शनं फेनपटलस्य दर्शनं सीमन्तदर्शनं विभागदर्शनम्—अर्थात् फेनपटलस्य यूषादिभ्यो विभक्ततयावस्थानदर्शनम्—ऊर्ध्वराजीदर्शनम् उपरिरेखादर्शनं च, भवति । रसस्येति । रसस्य सर्पिस्तैलेक्षुरसादेः विषयुक्तस्य, मध्ये नीला राजी, पयसः क्षीरस्य मध्ये ताम्रा राजिः, मद्यतोययोः सुराजलयोः मध्ये काली राजिः, दध्नः श्यामा वैदूर्यवर्णा राजिः, मधुनः माक्षिकस्य श्वेता राजिः, भवति । द्रव्याणामिति । आर्द्राणां द्रव्याणाम् आम्रदाडिमफलादीनां विषयुक्तानाम्, आशुप्रम्लानत्वम्, उत्पक्वभावः अतिपक्वस्येव पूतीभावः, क्काथनीलश्यावता च क्काथे निष्पाके नीलत्वं कार्ष्ण्यं श्यावत्वं कापिश्यं च भवति । शुष्काणां द्रव्याणाम्

१. 'मा च म' ख. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आशुप्रम्लानत्वमुत्पक्कभावः क्वाथनीलश्यावता च । शुष्काणामाशुशातनं वैवर्ण्यं च । कठिनानां मृदुत्वं मृदूनां कठिनत्वं च । तदभ्याशे क्षुद्रसत्त्ववधश्च । आस्तरणप्रावरणानां श्याममण्डलता तन्तुरोमपक्ष्मशातनं च । लोहमणिमयानां पङ्कमलोपदेहता स्नेहरागगौरवप्रभाववर्णस्पर्शवधश्च । इति विषयुक्तलिङ्गानि ।

विषप्रदस्य तु शुष्कश्याववक्त्रता वाक्सङ्गः स्वेदो विजृम्भणं चातिमात्रं वेपथुः प्रस्खलनं वाक्यविप्रेक्षणमावेशः कर्मणि स्वभूमौ चानवस्थानमिति ।

तस्मादस्य जाङ्गलीविदो भिषजश्चासन्नाः स्युः ।

आशुशातनं चूर्णीभावः, वैवर्ण्यं च भवति । कठिनानां द्रव्याणां विषयुक्तानां मृदुत्वं, मृदूनां कठिनत्वं च भवति । तदभ्याश इति । तदभ्याशे क्षुद्रसत्त्ववधश्च विषयुक्तद्रव्यसमीपे चरतां क्षुद्रजन्तूनां पिपीलिकादीनां मरणं च भवति । आस्तरणेत्यादि । आस्तरणप्रावरणानाम् आसनशयनकम्बलानां नीशाराणां च कार्पासतन्त्वाविकादिमयानां विषस्पृष्टानां, श्याममण्डलता विवर्णमण्डलयुक्तता, तन्तुरोमपक्ष्मशातनं च तन्तूनां रोम्णां च यानि पक्ष्माणि सूक्ष्मांशाः तेषां शातनं भ्रंशनं च, भवति । लोहेत्यादि । लोहमणिमयानां लोहः सुवर्णादिः मणिः स्फटिकादिः तन्मयानां वस्तूनां विषयुक्तानां, पङ्कमलोपदेहता पङ्कमलेनोपदेहो लेपनं यस्मिंस्तत्ता, स्नेहरागगौरवप्रभाववर्णस्पर्शवधश्च स्नेहः स्निग्धत्वं रागः त्विट् गौरवं गुरुत्वं प्रभावः स्वकार्यसाधनशक्तिः वर्णः शुक्लादिः स्पर्शः श्लक्ष्णखरादिस्पर्शगुणः एतेषां नाशश्च भवति । इति विषयुक्तलिङ्गानि विषयुक्तवस्तुलक्षणानि, विज्ञेयानीति शेषः ।

विषप्रदस्य निग्रहाय लिङ्गान्याह — विषेत्यादि । शुष्कश्याववक्त्रता शुष्ककपिशमुखत्वम् । वाक्सङ्गः वाचि प्रतिबन्धः । प्रस्खलनम् अविषमेऽपि देशे । वाक्यविप्रेक्षणं वाक्ये येनकेनाप्युच्यमानेऽवधानदानम् । आवेशः परवशता । कर्मणि अनवस्थानं स्वव्यापारेऽनवस्थितिः आरब्धं कर्मानिर्वर्त्यैवान्यत्र प्रवृत्तिः । स्वभूमौ अनवस्थानं च प्रथमादिकक्ष्यानियुक्तस्य तां विहाय द्वितीयादिकक्ष्यागमनं च ।

तस्मादित्यादि । अस्य राज्ञः । जाङ्गलीविदः विषविद्याभिज्ञाः । भिषजश्च विषेतरचिकित्सकाश्च ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भिषग् भैषज्यागारादास्वादविशुद्धमौषधं गृहीत्वा पाचकपेषकाभ्यामात्मना च प्रतिस्वाद्य राज्ञे प्रयच्छेत् । पानं पानीयं चौषधेन व्याख्यातम् ।

कल्पकप्रसाधकाः स्नातशुद्धवस्त्रहस्ताः समुद्रमुपकरणमन्तर्वंशिकहस्तादादाय परिचरेयुः ।

स्नापकसंवाहकास्तरकरजकमालाकारकर्म दास्यः कुर्युः, ताभिरधिष्ठिता वा शिल्पिनः । आत्मचक्षुषि निवेश्य वस्त्रमाल्यं दद्युः, स्नानानुलेपनप्रघर्षचूर्णवासस्नानीयानि च स्ववक्षोबाहुषु च । एतेन परस्मादागतकं च व्याख्यातम् ।

भिषगिति । भिषग्, भैषज्यागाराद् औषधशालायाः, आस्वादविशुद्धं स्वयमास्वादेन निर्दोषतयावगतम्, औषधं गृहीत्वा, पाचकपेषकाभ्याम् औषधपक्तृपेष्टृभ्याम्, आत्मना च, प्रतिस्वाद्य राजसमक्षं स्वादयित्वा, राज्ञे प्रयच्छेद् दद्यात् । **पानमिति** । पानं मद्यं, पानीयं च जलं च, औषधेन व्याख्यातम् औषधदानोक्तविधिना शोधयित्वा दातव्यमित्युक्तप्रायमित्यर्थः ।

कल्पकेत्यादि । कल्पकप्रसाधकाः कल्पका नापिताः श्मश्रुशिल्पिनः प्रसाधका अलङ्कर्तारश्च, स्नातशुद्धवस्त्रहस्ताः सन्तः स्नाताः शुद्धवस्त्राः शुद्धहस्ताश्च सन्तः, समुद्रं मुद्राङ्कितम् उपकरणं क्षुरवस्त्राभरणमञ्जूषादिकम्, अन्तर्वंशिकहस्ताद् आदाय तदुपनेतृकञ्चुकिहस्ताद् गृहीत्वा, परिचरेयुः, राजानम् ।

स्नापकेत्यादि । तत्र संवाहकः अङ्गमर्दकः । आस्तरकः आसनशयनकल्पकः । शेषाः प्रसिद्धाः । स्नापकादिकर्म दास्यः सुपरीक्षिताः कुर्युः । ताभिः दासीभिः, अधिष्ठिता अध्यक्षिताः, शिल्पिनो वा स्नापकादिशिल्पिनो वा, कुर्युः । **आत्मेत्यादि** । वस्त्रमाल्यम् आत्मचक्षुषि, निवेश्यं विषयोगशुद्धिबोधनार्थं निधाय, दद्युः राज्ञे । स्नानानुलेपनप्रघर्षचूर्णवासस्नानीयानि च स्नानं गन्धामलकादि अनुलेपनं चन्दनादि प्रघर्षः पञ्चकषायादि चूर्णवासः पटवासकादि स्नानीयं स्नाने शिरसि देयं चूर्णम् एतानि च, स्ववक्षोबाहुषु स्ववक्षःसहितेषु भुजेषु, चाद् उक्ते च, निवेश्य दद्युः । **एतेनेति** । परस्मादागतकं च परदेशात् प्राप्तं भोग्यवस्तु च, एतेन उक्तेन वस्त्रादिदानविधिना, व्याख्यातं प्रतिपादितदानविधानं, बोद्धव्यमिति शेषः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुशीलवाः शस्त्राग्निरसवर्जं नर्मयेयुः । आतोद्यानि चैषामन्तस्तिष्ठेयुः, अश्वरथद्विपालङ्काराश्च ।

मौलपुरुषाधिष्ठितं यानवाहनमारोहेत्, नावं चाप्तनाविकाधिष्ठिताम् । अन्यनौप्रतिबद्धां वातवेगवशां च नोपेयात् । उदकान्ते सैन्यमासीत । मत्स्यग्राहविशुद्धमवगाहेत । व्यालग्राहपरिशुद्धमुद्यानं गच्छेत् ।

लुब्धकैः श्वगणिभिरपास्तस्तेनव्यालपराबाधभयं चललक्षपरिचयार्थं मृगारण्यं गच्छेत् ।

आप्तशस्त्रग्राहाधिष्ठितः सिद्धतापसं पश्येद्, मन्त्रिपरिषदा सामन्तदूतम् । सन्नद्धोऽश्वं हस्तिनं रथं वारूढः सन्नद्धमनीकं गच्छेत् ।

कुशीलवा इति । कुशीलवाः लङ्घनप्लवनादिनर्मवृत्तयो मनुष्यजातिभेदाः ; शस्त्राग्निरसवर्जम् आयुधवह्निविषाणि प्रेक्षणीयाङ्गानि वर्जयित्वा तदन्यैरुपकरणैरित्यर्थः, नर्मयेयुः क्रीडां दर्शयेयुः, राजान्तिके । एषां कुशीलवानाम्, आतोद्यानि च वाद्यानि च , अन्तः राजभवनाभ्यन्तरे, तिष्ठेयुः , विषशङ्कापरिहारार्थं, नर्मप्रदर्शनावसरे परं तैर्गृह्येरन्नित्यभिप्रायः । अश्वरथद्विपालङ्काराश्च अश्वादीनां त्रयाणाम् अलङ्काराश्च , अन्तस्तिष्ठेयुरिति सम्बध्यते ।

मौलेत्यादि । मौलपुरुषाधिष्ठितम् आप्तप्रधानपुरुषकृताध्यक्ष्यं, यानवाहनं शिबिकादिकमश्वादिकं च, आरोहेत् । नावं च, आप्तनाविकाधिष्ठितां विश्वस्ततारकाध्यक्षितां सतीम्, आरोहेत् । अन्यनौप्रतिबद्धाम् अन्यया नावा सहैव नेतव्या यथा स्यात् तथान्यस्यां नावि सूत्रबद्धां , नावं , वातवेगवशां वातायत्तगमनां नावं च, नोपेयात् नारोहेत् । नावा गच्छतश्च रक्षार्थमुभयतीरयोः सैन्यं तिष्ठेदित्याह — **उदकान्त** इति । **मत्स्येत्यादि** । मत्स्यग्राहविशुद्धं मत्स्यग्राहाः कैवर्ताः तैर्विशुद्धं परिशोधितम्, अर्थान्निश्चिततिमिनक्रादिहिंस्रजन्त्वसान्निध्यं , जलम् , अवगाहेत स्नानार्थम् । **व्यालेत्यादि** । व्यालग्राहपरिशुद्धं व्यालग्राहाः सर्पग्राहिणः तैः परिशोधितम् , उद्यानं गच्छेत् ।

लुब्धकैरिति । लुब्धकैः व्याधैः, श्वगणिभिः श्वगणजीविभिश्च, अपास्तस्तेनव्यालपराबाधभयं निरस्तचोरव्याघ्राद्युपद्रवभयं, मृगारण्यं, चललक्षपरिचयार्थं हरिणादिषु चललक्ष्येषु वेधाभ्यासार्थं, गच्छेत् ।

अपूर्वं सिद्धतापसं दिदृक्षुमागतम् आप्तशस्त्रिगुप्त एव सन् पश्येत् शत्रुप्रणिहितत्वभयादित्यभिप्रेत्याह — **आप्तेत्यादि** । **मन्त्रीत्यादि** । मन्त्रिपरिषदा, अधिष्ठित इत्यर्थ, सामन्तदूतं पश्येत् । **सन्नद्ध** इति । सन्नद्धः शिरस्त्रा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निर्याणेऽभियाने च राजमार्गमुभयतः कृतारक्षं दण्डिभिरपास्तशस्त्रहस्तप्रव्रजितव्यङ्गं गच्छेत् । न पुरुषसम्बाधमवगाहेत । यात्रासमाजोत्सवप्रवहणानि च दशवर्गिकाधिष्ठितानि गच्छेत् ।

यथा च योगपुरुषैरन्यान् राजाधितिष्ठति ।
तथायमन्यबाधेभ्यो रक्षेदात्मानमात्मवान् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे एकविंशोऽध्यायः आत्मरक्षितकम् । एतावता कौटलीयस्यार्थशास्त्रस्य विनयाधिकारिकं प्रथममधिकरणं समाप्तम् ॥

णाद्यामोचनसुभगयुद्धोचितवेषः, अश्वं हस्तिनं रथं वा आरूढः सन्, सन्नद्धम् अनीकं युद्धसज्जं सैन्यं, गच्छेत् ।

निर्याण इति । निर्याणे देशान्तरं प्रति गमने, अभियाने प्रवेशे च, राजमार्गम् उभयतः राजमार्गस्योभयपार्श्वयोः, दण्डिभिः वेत्रिभिः, कृतारक्षं कृतरक्षाविधानं यथा भवति तथा, अपास्तशस्त्रहस्तप्रव्रजितव्यङ्गं शस्त्रहस्ताः प्रव्रजिताः सन्न्यासिनः व्यङ्गाः अङ्गविहीनाश्च अपास्ताः राजदृष्टिगोचराद्दुत्सारिताः यस्मिन् कर्मणि तद् यथा भवति तथा, गच्छेत् । **न पुरुषे**त्यादि । पुरुषसम्बाधं जनसङ्कुलं प्रदेशं, नावगाहेत न प्रविशेत् । **यात्रे**त्यादि । यात्रासमाजोत्सवप्रवहणानि च यात्रा देवतानां, समाजो जनसमुदायः, उत्सवः इन्द्रवसन्तोत्सवादिः, प्रवहणम् उद्यानभोजनादि एतानि, दशवर्गिकाधिष्ठितानि गच्छेद् दशवर्गिकेण दशभटनायकेन अधिष्ठितानि कृत्वा गच्छेद् न त्वेकाकी परिमितपरिवारो वेत्यर्थः ।

अध्यायप्रान्ते श्लोकमाह—**यथा चे**ति । यथा, अयं राजा विजिगीषुः, योगपुरुषैः कापटिकैः गूढपुरुषैः, अन्यान् नृपतीन्, अधितिष्ठति बाधत इत्यर्थः, तथा, अन्यबाधेभ्यः तत्प्रकारेभ्यः अन्यनृपोत्पादितेभ्यः योगपुरुषोपद्रवेभ्यः, आत्मानम्, आत्मवान् प्रयत्नवान् सन् रक्षेत् ॥

व्याख्यायाम**र्थशास्त्रस्य कौटल्यमुनि**जन्मनः ।
आद्याधिकरणं पूर्त्तिं **गाणपत्यामु**पागमत् ॥

इति श्री**वञ्चिमण्डलमहाराजा**श्रितस्य ताम्रपर्णीतीरवर्ति**तरुवाग्रहारा**भिजनस्य श्री**सीताम्बा**श्री**रामसुब्रह्मण्यार्य**सूनोर्महामहोपाध्याय**गणपतिशास्त्रिणः** कृतिषु कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे एकविंशोऽध्यायः आत्मरक्षितकम् । विनयाधिकारिकं प्रथममधिकरणं समाप्तम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अध्यक्षप्रचारः — द्वितीयमधिकरणम् ।

१९. प्रक. जनपदनिवेशः।

भूतपूर्वमभूतपूर्वं वा जनपदं परदेशापवाहनेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेत् ।

शूद्रकर्षकप्रायं कुलशतावरं पञ्चशतकुलपरं ग्रामं क्रोशद्विक्रोशसीमानमन्योन्यारक्षं निवेशयेत् । नदीशैलवनगृष्टिदरीसेतुबन्धशाल्मलीशमीक्षीरवृक्षानन्तेषु सीम्नां स्थापयेत् ।

अष्टशतग्राम्या मध्ये स्थानीयं, चतुश्शतग्राम्या द्रोणमुखं,

अथाध्यक्षप्रचाराख्यं द्वितीयमधिकरणमारभ्यते । यथोक्तगुणसम्पन्नो राजा सर्वाणि कार्याणि तत्तदध्यक्षद्वारेणैवाध्यक्षयितुं प्रभवतीत्यतोऽध्यक्षांस्तद्व्यापारांश्च प्राधान्येनाभिधातुमिदमधिकरणम् । तत्रेदं प्रथमं सूत्रं — **जनपदनिवेश** इति । जनश्चतुर्वर्णाश्रमजातिलक्षणः, पदं तस्य स्थानं स्थानीय-द्रोणमुख-कार्वटिक-संग्रह-ग्रामादिकं, तस्य निवेशः रचनात्राभिधीयत इति सूत्रार्थः । 'स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि प्रकृतिरि'त्युक्तं, तत्र स्वाम्यमात्यप्रकृती प्रतिपादिते, जनपदप्रकृतिरिदानीमभिधीयते ।

भूतेत्यादि । भूतपूर्वं पूर्वं स्थितम्, अभूतपूर्वम् अभिनवं वा, जनपदं, परदेशापवाहनेन परदेशाज्जनानयनेन, स्वदेशाभिष्यन्दवमनेन वा अभिष्यन्दोऽतिवृद्धिः वमनमाहरणं स्वदेशे जनानामतिवर्धनादाधारापर्याप्तिदोषादन्यत्राहरणेन वा, निवेशयेद् रचयेत् ।

शूद्रेत्यादि । ग्रामं, शूद्रकर्षकप्रायं शूद्रकृषीवलबहुलं, कुलशतावरं गृहशतान्यूनं, पञ्चशतकुलपरं पञ्चशतानधिकगृहयुक्तं, क्रोशद्विक्रोशसीमानं क्रोशसीमानं द्विक्रोशसीमानं वा एकस्माद् ग्रामाद् ग्रामान्तरस्य क्रोशदूरव्यवधानं क्रोशद्वयव्यवधानं वा यथा भवेत् तथा क्लृप्तमित्यर्थः, अन्योन्यमारक्षतीत्यन्योन्यारक्षं परस्परसाहाय्यकरणक्षमं, निवेशयेत् । नदीत्यादि । सीम्नाम् अन्तेषु, नदी, शैलः शिलाकूटः, वनं, गृष्टिर्बदरा नामौषधिर्वृक्षविशेषो वा, दरी श्वभ्रं, सेतुबन्धः, शाल्मली स्थिरायुराख्यो वृक्षः, शमी सक्तुफला, क्षीरवृक्षः वटादिरित्येतान् स्थापयेत् सीमरक्षार्थम् ।

अष्टशतेत्यादि । अष्टशतग्राम्याः अष्टशतानां ग्रामाणां समूहस्य, मध्ये, स्थानीयं तदाख्यं तावद्ग्रामजनतायाः क्रयविक्रयादिकर्मणोपजीव्यं रमणीयं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्विशतग्राम्याः कार्वटिकं[1], दशग्रामीसङ्ग्रहेण सङ्ग्रहणं स्थापयेत् ।

अन्तेष्वन्तपालदुर्गाणि जनपदद्वाराण्यन्तपालाधिष्ठितानि स्थापयेत् । तेषामन्तराणि वागुरिकशबरपुलिन्दचण्डालारण्यचरा रक्षेयुः ।

ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यो ब्रह्मदेयान्यदण्डकराण्यभिरूपदायकानि प्रयच्छेत् । अध्यक्षसङ्ख्यायकादिभ्यो गोपस्थानिकानीकस्थचिकित्सकाश्वदमकजङ्घाकारिकेभ्यश्च[2] विक्रयाधानवर्जम् ।

महाग्रामं, स्थापयेत् निवेशयेत्, चतुश्शतग्राम्याः मध्ये, द्रोणमुखं तदाख्यं स्थानीयप्रत्यवरं ग्रामभेदं स्थापयेत्, द्विशतग्राम्या मध्ये, कार्वटिकं तदाख्यं कर्वटापरपर्यायं द्रोणमुखप्रत्यवरं स्थापयेत्, दशग्रामीसंग्रहेण ग्रामदशकसंग्रहणेन, संग्रहणं तदाख्यं कर्वटादधमं महाद्रङ्गापरपर्यायं स्थापयेत् ।

अन्तेष्विति । अन्तेषु जनपदावसानेषु, अन्तपालदुर्गाणि, अन्तपालाधिष्ठितानि अन्तपालैरनुष्ठिताध्यक्ष्याणि, जनपदद्वाराणि जनपदप्रवेशमार्गभूतानि च स्थापयेत् । तेषाम् अन्तराणि अन्तपालदुर्गाणामन्तरालदेशान्, वागुरिकशबरपुलिन्दचण्डालारण्यचराः वागुरिकाः मृगबन्धनजीविनः शबराः शूद्राद् भिल्ल्यां जाताः पुलिन्दाः निष्ट्यात् किरात्यां जाताः चण्डालाः श्मशानपालाः अरण्यचराः वनचारिणश्च, रक्षेयुः ।

ऋत्विगित्यादि । ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यः याजकाध्यापकपुरोधश्छान्दसेभ्यः, अदण्डकराणि दण्डो नाम द्विःकृषिक्लृप्तौ त्रिःकृष्यनुष्ठानादिनिमित्तः कुल्यादिजलात्युपयोगादिनिमित्तो वा दमः करः कृषिफलषष्ठांशः तदुभयरहितानि, अभिरूपदायकानि अभिरूपेभ्यः अर्हेभ्यः पुत्रादिभ्यो दायः दानं येषां तानि तथाभूतानि वंशपारम्पर्यभोग्यानीत्यर्थः यथेच्छविनियोगयोग्यानीति वा, ब्रह्मदेयानि ब्राह्मणेभ्यो देयानि अर्थात् क्षेत्राणि, प्रयच्छेद् दद्यात् । अध्यक्षेत्यादि । विक्रयाधानवर्जं मूल्यमादाय दानं विक्रयः आधीकरणमाधानं तदुभयाधिकारवर्जं केवलोपभोगायेत्यर्थः, अध्यक्षसंख्यायकादिभ्यः अध्यक्षाः सुवर्णाध्यक्षादयः सङ्ख्यायकाः गणकाः तत्प्रभृतिभ्यः, गोपस्थानिकानीकस्थचिकित्सकाश्वदमकजङ्घाकरिकेभ्यश्च गोपः दशग्रामीपञ्चग्राम्याद्यधिकारी स्थानिको नगरचतुर्भागाधिकारी अनीकस्थः हस्तिशिक्षा-

---

१. 'खार्व' ख. पाठः. २. 'ङ्घालके' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

करदेभ्यः कृतक्षेत्राण्यैकपुरुषिकाणि प्रयच्छेत् । अकृतानि कर्तृभ्यो नादेयात् ।

अकृषतामाच्छिद्यान्येभ्यः प्रयच्छेत् । ग्रामभृतकवैदेहका वा कृषेयुः । अकृषन्तोऽवहीनं दद्युः । धान्यपशुहिरण्यैश्चैनाननुगृह्णीयात् । तान्यनु सुखेन दद्युः ।

अनुग्रहपरिहारौ चैभ्यः कोशवृद्धिकरौ दद्यात् । कोशोपघातिकौ वर्जयेत् । अल्पकोशो हि राजा पौरजानपदानेव ग्रसते । निवेशसमकालं यथागतकं वा परिहारं दद्यात् । निवृत्तपरिहारान् पितेवानुगृह्णीयात् ।

विचक्षणः चिकित्सको वैद्यः अश्वदमकः अश्वशिक्षाभिज्ञः जङ्घाकारिकः जाङ्घिको दूरदेशगतागतजीवी एतेभ्यश्च, क्षेत्रं प्रयच्छेदिति सामर्थ्यलभ्यम् ।

करदेभ्य इति । करदेभ्यः राजभागदायिभ्यः, कृतक्षेत्राणि कृतानि क्षेत्राणि पूर्वसिद्धसौष्ठवान् व्रैहेयशालेयादीन् केदारान्, ऐकपुरुषिकाणि एकेनैव ग्रहीतृपुरुषेण भोग्यानि, प्रयच्छेत् । अकृतानि साध्यसौष्ठवानि अर्थात् क्षेत्राणि, कर्तृभ्यो नादेयात् सौष्ठवसाधकेभ्यः करदेभ्यो न गृह्णीयात्, सर्वविधस्वाम्येन तेष्वेव स्थापयेदित्यर्थः । इह आदेयादित्यात्मनेपदाकरणमार्षम् ।

अकृषतामिति । अकृषतां कृषिमकुर्वतां, क्षेत्राणीति शेषः, आच्छिद्य हृत्वा, अन्येभ्यः प्रयच्छेत् । तदभावे ग्रामभृतकवैदेहकाः ग्रामाधिकारिणो वणिजश्च, कृषेयुः । अकृषन्तः अभ्युपेत्य कृषिमकुर्वन्तः, अवहीनं नष्टं, दद्युः । अनुपायाच्चेदकर्षणं तदा कथमित्याह — धान्यपशुहिरण्यैश्च कृष्यनुष्ठानापेक्षितैः, एनान् अभ्युपेतकृषीन् अनुगृह्णीयात् । अनु पश्चात् कृषिफलप्राप्त्यनन्तरं, तानि, धान्यादीनि सुखेन आत्मवृत्त्यपीडया, दद्युः, कर्षका राज्ञे ।

अनुग्रहेत्यादि । एभ्यः कृषिकर्तृभ्यः, अनुग्रहपरिहारौ च स्वस्थवृद्ध्यर्थं दीयमानं द्रव्यमनुग्रहः दौस्थ्यपरिहारेण स्वास्थ्यसिद्ध्यर्थं दीयमानं द्रव्यं परिहारः तौ, कोशवृद्धिकरौ दद्यात् आत्मकोशवर्धने यथा पर्यवस्येतां तथा दद्यात् । कोशोपघातिकौ कोशक्षयफलौ अनुग्रहपरिहारौ, वर्जयेत् । कुतः, हि यतः अल्पकोशः राजा पौरजानपदानेव, ग्रसते पीडयति, स्वकोशपूरणार्थम् । **निवेशेत्यादि** । निवेशसमकालं परिहारं निवेशः इदम्प्रथमकुलस्थापनं तत्तुल्यकालं परिहारं तत्काले क्लसो यः स्वास्थ्यसिद्ध्यर्थ उपकारस्तमित्यर्थः, दद्यात् । यथागतकं वा दद्यात् आगतानतिक्रमेण च दद्यात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आकरकर्मान्तद्रव्यहास्तिवनव्रजवणिक्पथप्रचारान् वारिस्थलपथपण्यपत्तनानि च निवेशयेत् ।

सहोदकमाहार्योदकं वा सेतुं बन्धयेत् । अन्येषां वा बध्नतां भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात्, पुण्यस्थानारामाणां च । सम्भूयसेतुबन्धादपक्रामतः कर्मकरबलीवर्दाः कर्म कुर्युः । व्ययकर्मणि च भागी स्याद् , न चांशं लभेत ।

नवनवागतकुलेभ्योऽपि दद्यादित्यर्थः । निवृत्तेत्यादि । निवृत्तपरिहारान् प्रत्यर्पितपरिहारद्रव्यान्, पितेव, अनुगृह्णीयाद् वृद्ध्यर्थमनुग्रहद्रव्यं दत्त्वोपकुर्यात् ।

आकरेत्यादि । आकरकर्मान्तद्रव्यहस्तिवनव्रजवणिक्पथप्रचारान् आकरकर्मान्तः आकरव्यापारस्थानं द्रव्यवनं दारुचन्दननिर्यासाद्युपकरणप्रसवक्षमं वनं हस्तिवनं गजवनं व्रजप्रचारः गोध्यक्षवक्ष्यमाणः वणिक्पथप्रचारः वणिक्पथव्यापारः एतान्, वारिस्थलपथपण्यपत्तनानि च जलपथस्थलपथपण्यक्रयविक्रयस्थानानि च, निवेशयेत् कारयेत् । पत्तनशब्दस्य क्रयविक्रयस्थानवाचित्वमाश्रित्येत्थं व्याख्यातम् । नाविकगम्यपुरवाचित्वाश्रयणे तु पण्यपत्तनं पण्यप्रधानं नौमात्रगम्यं पुरमिति व्याख्येयम् । पट्टनशब्दपाठे पुनः पण्यपट्टनं पण्यप्रधानं पट्टनं शकटैरश्वैर्नौभिश्च गम्यं पुरमित्यर्थः, 'पट्टनं शकटैर्गम्यं घोटकैर्नौभिरेव च' इति यादवाभिधानात् ।

सहोदकमिति । सहोदकं नित्यप्रवृत्तोदकं नद्यादौ, सेतुं वारणं, बन्धयेत् कुल्यादिद्वारेण कृष्याद्यर्थम् । आहार्योदकं नद्यादितो वर्षासु तुङ्गस्थलेभ्यश्च समानेयजलं सेतुं वा बन्धयेत् । बध्नतां सेतुं रचयताम् , अन्येषां वा जनानां च, भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात् भूमिः प्रभूतजलावरोधयोग्यं स्थलं मार्गः जलप्रवेशनिर्गमसरणिः वृक्षोपकरणं सारदार्वादिकम् एतैरनुग्रहम् एतद्दानोपकारं कुर्यात् । पुण्यस्थानारामाणां च निर्मीयमाणानां विषये, भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात् । सम्भूयेत्यादि । सम्भूयसेतुबन्धाद् जनैः सङ्घीभूय क्रियमाणात् सेतुबन्धाद्, अपक्रामतः अपसरतः अनिच्छया स्वीयं कर्मांशमकुर्वतो जनस्य, कर्मकरबलीवर्दाः भृत्याः उक्षाणश्च, कर्म कुर्युः राजा बलात् तैः कर्म कारयेदित्यभिप्रायः । अपक्रामतोऽन्यमपि दण्डमाह — व्ययकर्मणीति । व्ययकर्मणि च भागी अंशभाक् स्यात्, अंशं च न लभेत, अर्थात् सेतुबन्धानन्तरभवे तत्फले ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मत्स्यप्लवहरितपण्यानां सेतुषु राजा स्वाम्यं गच्छेत् । दासाहितकबन्धूननशृण्वतो राजा विनयं ग्राहयेत् । बालवृद्धव्याधितव्यसन्यनाथांश्च राजा बिभृयात्, स्त्रियमप्रजातां प्रजातायाश्च पुत्रान् ।

बालद्रव्यं ग्रामवृद्धा वर्जयेयुरा व्यवहारप्रापणाद्, देवद्रव्यं च ।

अपत्यदारान् मातापितरौ भ्रातॄनप्राप्तव्यवहारान् भगिनीः कन्या विधवाश्चाबिभ्रतः शक्तिमतो द्वादशपणो दण्डोऽन्यत्र पतितेभ्यः, अन्यत्र मातुः ।

पुत्रदारमप्रतिविधाय प्रव्रजतः पूर्वः साहसदण्डः, स्त्रियं च प्रव्रा-

---

मत्स्येत्यादि । सेतुषु, उत्पद्यमानानामिति शेषः, मत्स्यप्लवहरितपण्यानां मत्स्याः प्रसिद्धाः प्लवाः कारण्डवाः जलजलजविहारिणः हरितानि पद्मोत्पलकशेरुकादीनि एषां पण्यवस्तूनां, स्वाम्यं स्वामित्वं, राजा गच्छेत्, नतु सम्भूयसेतुकारिणोऽपि । दासेत्यादि । अननुशृण्वतः स्वरक्षकनिदेशावधीरिणः, दासाहितकबन्धून् दासान् गर्भदास-गृहजात-क्रीत-लब्ध-दायोपगतादीन् आहितकान् स्वामिना धनग्रहणेनाधितां नीतान् बन्धून् पुत्रादींश्च, राजा, विनयं प्रणतिं, ग्राहयेत् । बालवृद्धव्याधितव्यसन्यनाथांश्च अनाथा ये बालादयः तांश्च, बिभृयात् पोषयेत् । अप्रजातां वन्ध्यां स्त्रियं, प्रजातायाः पुत्रांश्च, बिभृयात्, सा च ते च यद्यनाथा इत्यार्थम् ।

बालेत्यादि । बालद्रव्यं बालस्य अप्राप्तव्यवहारस्य नाथहीनस्य द्रव्यं, ग्रामवृद्धाः, वर्जयेयुः नोपयुञ्जीरन् तथैव स्थापयेयुर्वर्धनार्हं चेद् वर्धयेयुश्चेत्यभिप्रायः । कियन्तं कालम्, आ व्यवहारप्रापणात् व्यवहारप्राप्तिकालं यावत् । देवद्रव्यं च देवालयद्रव्यं च, ग्रामवृद्धा वर्जयेयुः, अवधेरयोगान्नित्यम् ।

अपत्येत्यादि । अपत्यदारान् अपत्यं दारांश्च । दारमिति पाठे समाहारद्वन्द्वः । अप्राप्तव्यवहारान् भ्रातॄन् बालान् सोदर्यान् । कन्याः भगिनीः विधवा भगिनीश्च । शक्तिमतः रक्षणोपायवतः । पतितेभ्योऽन्यत्र पतितव्यतिरेकेण, अपत्यादीनामपतितानामेवारक्षणे दण्डो नतु पतितानाम् । पतितेष्वपि प्रतिप्रसवमाह — अन्यत्र मातुरिति । माता तु पतितापि रक्षणीयैवेत्यर्थः ।

पुत्रेत्यादि । पुत्रदारमप्रतिविधाय प्रव्रजतः पुत्राणां दाराणां च जीवनोपायमदर्शयित्वा सन्न्यस्यतः, स्त्रियं प्रव्राजयतश्च प्रव्रजन्तीं प्रयोजयतश्च, पूर्वः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जग्रतः । लुप्तव्यवायः प्रव्रजेदापृच्छच धर्मस्थान्, अन्यथा नियम्येत ।

वानप्रस्थादन्यः प्रव्रजितभावः, सुजातादन्यः सङ्घः, सामुत्थायकादन्यः समयानुबन्धो वा नास्य जनपदमुपनिविशेत ।

न च तत्रारामा विहारार्थाः शालाः स्युः । नटनर्तनगायनवादकवाग्जीवनकुशीलवा वा न कर्मविघ्नं कुर्युः, निराश्रयत्वाद् ग्रामाणां, क्षेत्राभिरतत्वाच्च पुरुषाणां कोशविष्टिद्रव्यधान्यरसवृद्धिर्भवतीति ।

साहसदण्डः प्रथमः साहसदण्डः 'पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः' इति मनूक्तलक्षणः कर्तव्यः । लुप्तेत्यादि । लुप्तव्यवायः निश्शेषनष्टमैथुनशक्तिः पुरुषः, धर्मस्थान् धर्मशास्त्रानुसारेण व्यवहारनिर्णयेऽधिकृतान् प्राड्विवाकादीन्, आपृच्छ्य अनुज्ञाप्य, प्रव्रजेत् परिव्रजेत् सन्न्यस्येत्, अन्यथा नियम्येत अनेवंप्रव्रजन् कारागृहे निवेश्येत ।

अथ जनपदवासानर्हानाह—वानेत्यादि । वानप्रस्थादन्यः प्रव्रजितभावः वैखानसादतिरिक्तः प्रव्रजितावस्थः, अर्थाच्चतुर्थाश्रमी, अस्य राज्ञो जनपदं नोपनिविशेत नाध्यासीत । प्रतिषेधनिमित्तं तु अभिशङ्कनीयशीलत्वमुक्तप्रायम् । सुजातादन्यः सङ्घः सुष्ठु जातात् राजराज्यक्षेमायोत्पन्नात् जनसङ्घाद् अन्यो दुर्जातः जनसङ्घः, अस्य जनपदं नोपनिविशेत । सामुत्थायकादन्यः समयानुबन्धो वा समुत्थायकाः सम्भूयसेतुबन्धादिराजप्रजानुकूलकर्मकारिणः तेषां सम्बन्धी सामुत्थायकः सामुत्थायकात् समयानुबन्धाद् अन्यः राजजनपदद्रोहफलः समयानुबन्धः सङ्केतरचना च, अस्य जनपदं नोपनिविशेत ।

न चेति । तत्र जनपदे, आरामाः विहारार्थाः सर्वजनविनोदस्थानान्युपवनानि, शालाश्च प्रेक्षणीयप्रयोगशालाश्च, न स्युः । आरामशालाप्रतिषेधस्य फलमाह — नटेत्यादि । नटनर्तनगायनवादकवाग्जीवनकुशीलवा वा, कर्मविघ्नं कृष्याद्यनुष्ठानविघ्नं न कुर्युः, नाट्यनृत्तगानवादनकथावर्णननर्मक्रियासु स्ववृत्तिषु न चेष्टेरन्निति भावः । कस्मात्, ग्रामाणां निराश्रयत्वाद् नाट्यादिप्रयोगयोग्यशालारहितत्वात् । एवञ्च सिद्धं परमफलमाह —क्षेत्रेत्यादि । पुरुषाणां क्षेत्राभिरतत्वाद् विनोदस्थानाभावेन स्वस्वकर्मस्थानासक्तत्वात्, कोशविष्टिद्रव्यधान्यरसवृद्धिर्भवति कोशस्य, विष्टेः हठकारयितव्यस्य कर्मणः, द्रव्यस्य द्रुभवस्य दार्वादिपदार्थस्य, धान्यस्य, रसस्य तैलेक्षुरसादेश्च वृद्धिः भवति । इति एवम्प्रकारं फलम् उन्नेयमित्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परचक्राटवीग्रस्तं व्याधिदुर्भिक्षपीडितम् ।
देशं परिहरेद् राजा व्ययक्रीडाश्च वारयेत् ॥
दण्डविष्टिकराबाधै रक्षेदुपहतां कृषिम् ।
स्तेनव्यालविषग्राहैर्व्याधिभिश्च पशुव्रजान् ॥
वल्लभैः कार्मिकैः स्तेनैरन्तपालैश्च पीडितम् ।
शोधयेत् पशुसङ्घैश्च क्षीयमाणं वणिक्पथम् ॥
एवं द्रव्यद्विपवनं सेतुबन्धमथाकरान् ।
रक्षेत् पूर्वकृतान् राजा नवांश्चाभिप्रवर्तयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
प्रथमोऽध्यायः जनपदनिवेशः,
आदितो द्वाविंशः ॥

परचक्रेति । राजा परचक्राटवीग्रस्तं परचक्रं शत्रुकपटः शत्रुसैन्यं वा अटवी तात्स्थ्याद् अटवीपालः ताभ्यां ग्रस्तं, व्याधिदुर्भिक्षपीडितं, देशं परिहरेत् परचक्रादिभ्यो दूरीकुर्यादित्यर्थः । व्ययक्रीडाश्च धनव्ययहेतुभूताः क्रीडाश्च वारयेत् ॥

दण्डविष्टीति । दण्डविष्टिकराबाधैः दण्डविष्टिकराणामतिरेचनानिमित्ताभिः पीडाभिः, उपहतां कृषिं रक्षेत्, युक्तदण्डविष्टिकरो भूत्वेत्यार्थम् । स्तेनव्यालविषग्राहैः व्याधिभिश्च उपहतान् पशुव्रजांश्च रक्षेत् स्तेनादिभिरुपघातो यथा न भवेत् तथा पालयेत् ॥

वल्लभैरित्यादि । वल्लभैः राजदयितैः, कार्मिकैः राजशुल्काधिकृतैः, स्तेनैः, अन्तपालैः, पशुसङ्घैश्च व्याघ्रादिसङ्घैश्च, पीडितम्, अत एव क्षीयमाणं वणिक्प्रचारवैरल्यात्, वणिक्पथं शोधयेत् रक्षेत् वल्लभादिपीडापरिहारद्वारेण ॥

एवमित्यादि । स्पष्टार्थः श्लोकः ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
प्रथमोऽध्यायः जनपदनिवेशः,
आदितो द्वाविंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२०. प्रक. भूमिच्छिद्रविधानम् ।

अकृष्यायां भूमौ पशुभ्यो विवीतानि प्रयच्छेत् । प्रदिष्टाभयस्थावरजङ्गमानि च ब्राह्मणेभ्यो ब्रह्मसोमारण्यानि, तपोवनानि च तपस्विभ्यो गोरुतपराणि प्रयच्छेत् । तावन्मात्रमेकद्वारं खातगुप्तं स्वादुफलगुल्मगुच्छमकण्टकिद्रुममुत्तानतोयाशयं दान्तमृगचतुष्पदं भग्ननखदंष्ट्रव्यालं मार्गायुकहस्तिहस्तिनीकलभं मृगवनं विहारार्थं राज्ञः कारयेत् ।

सर्वातिथिमृगं प्रत्यन्ते चान्यन्मृगवनं भूमिवशेन वा निवेशयेत् ।

कुप्यप्रदिष्टानां च द्रव्याणामेकैकशो वा वनं निवेशयेद्, द्रव्यवनकर्मान्तानटवीश्च द्रव्यवनापाश्रयाः ।

भूमिच्छिद्रविधानमिति सूत्रम् । भूमिच्छिद्रं सस्याद्युत्पत्त्यनर्हा भूमिः तस्य विधानं सफलत्वसम्पादनप्रकारः उच्यत इति सूत्रार्थः । वणिक्पथप्रचारान् निवेशयेदित्युक्तमधस्तात्, निवेशनस्थानं त्वधुनाभिधीयते ।

अकृष्यायामिति । अकृष्यायां भूमौ मालगर्तशैलशर्करिलप्रायतया कृषिरहितायां भूमौ, पशुभ्यो गोमाहिषमेषेभ्यः विवीतानि प्रयच्छेत् तृणजलवन्ति स्थलानि विसृजेत् । प्रदिष्टेत्यादि । किञ्च, प्रदिष्टाभयस्थावरजङ्गमानि दत्ताभयानि स्थावरजङ्गमानि स्थावराणि वृक्षलतादीनि जङ्गमानि सौम्यमृगादीनि च येषु तानि तथाभूतानि, गोरुतपराणि गव्यूतिपरमपरिमाणानि, ब्रह्मसोमारण्यानि वेदाध्ययनसोमयागाद्यनुष्ठानार्थानि वनानि, ब्राह्मणेभ्यः प्रयच्छेत् ब्राह्मणसमुदायोपयोगाय विसृजेत्, तपोवनानि च यथोक्तविशेषणानि, तपस्विभ्यः प्रयच्छेत् । तावदिति । तावन्मात्रं गोरुतपरम्, एकद्वारं, खातगुप्तं परिखापरिक्षिप्तं, स्वादुफलगुल्मगुच्छं मनोज्ञफललताप्रतानस्तबकम्, अकण्टकिद्रुमं कण्टकशून्यवृक्षयुक्तम्, उत्तानतोयाशयम् अगम्भीरजलाधारं, दान्तमृगचतुष्पदं दान्ताः मनुष्यपरिचयविश्वस्ता मृगाश्चतुष्पदाश्चान्ये यस्मिंस्तत् तथाभूतं, भग्ननखदंष्ट्रव्यालं भग्ननखदंष्ट्राः उद्धृतनखदंष्ट्रा व्याला व्याघ्रादिमृगाः यस्मिंस्तत् तथाभूतं, मार्गयुकहस्तिहस्तिनीकलभं मृगयुकर्मयोग्याः करिकरिणीकरिपोताः यस्मिंस्तत् तथाभूतं, मृगवनं, राज्ञः विहारार्थं कारयेत् । मार्गयुकशब्दः आर्हीयठगन्तः । मार्गायुकेति मातृकापाठेषु द्वितीयस्याचो दीर्घत्वं साध्यम् ।

सर्वेत्यादि । प्रत्यन्ते समीपे, भूमिवशेन वा योग्यभूम्युपलम्भानुसारेणाप्रत्यन्ते वा, सर्वातिथिमृगं सर्वे अतिथिमृगा यस्मिन् देशान्तराल्लुब्धकोपद्रुता आगत्य वसन्ति तत् सर्वातिथिमृगं नाम, अन्यद् मृगवनं निवेशयेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रत्यन्ते हस्तिवनमटव्यारक्षं निवेशयेत्। नागवनाध्यक्षः पार्वतं नादेयं सारसमानूपं च नागवनं विदितपर्यन्तप्रवेशनिष्कसनं नागवनपालैः पालयेत्। हस्तिघातिनं हन्युः। दन्तयुगं स्वयंमृतस्याहरतः सपादचतुष्पणो लाभः।

नागवनपाला हस्तिपकपादपाशिकसैमिकवनचरकपारिकर्मिकसखा हस्तिमूत्रपुरीषच्छन्नगन्धा भल्लातकीशाखाप्रतिच्छन्नाः पञ्चभिः सप्तभिर्वा हस्तिबन्धकीभिः सह चरन्तः शय्यास्थानपद्यालण्डकूलपातोद्देशेन हस्तिकुलपर्यग्रं विद्युः।

कुप्येति। कुप्यप्रदिष्टानां कुप्याध्यक्षप्रकरणोक्तानां, द्रव्याणां शाकतिनिशादिसारदारुवर्गस्य उटजचिमियादिवेणुवर्गस्य मालतीमूर्वादिवल्कवर्गस्य चेत्येतेषाम् एकैकशो वा वनं निवेशयेत् एकैकस्य एकैकं वनं कल्पयेत्। द्रव्यवनकर्मान्तान् अटवीश्च द्रव्यवनसम्बद्धानि कर्माणि वनानि च, द्रव्यवनापाश्रयाः द्रव्यवनोपजीविनः पुरुषाः, निवेशयेयुरिति विपरिणामेन सम्बन्धः विदध्युरित्यर्थः।

प्रत्यन्ते इति। प्रत्यन्ते जनपदावसानदेशे, हस्तिवनं नागवनम्, अटव्यारक्षम् अटव्या आरक्षाः परिरक्षका यस्मिंस्तत् तथाभूतं, निवेशयेत्। नागवनाध्यक्षः, पार्वतं नादेयं सारसम् आनूपं च पर्वताश्रयं नद्याश्रयं सरोव्यपाश्रयं साम्बुदेशाश्रयं च, नागवनं, विदितपर्यन्तप्रवेशनिष्कसनं विज्ञातपरिसराभिगमनिर्गमं कृत्वा, नागवनपालैः पालयेत्। हस्तिघातिनं शबरपुलिन्दादिं, हन्युः। स्वयंमृतस्य अर्थाद्धस्तिनः, दन्तयुगम्, आहरतः उपनयतः वनेचरजनस्य, सपादचतुष्पणो लाभः पारितोषिकं, देय इति शेषः।

नागवनेत्यादि। नागवनपालाः, हस्तिपकपादपाशिकसैमिकवनचरकपारिकर्मिकसखाः हस्तिपक आधोरणः पादपाशिकः पादपाशबन्धनकुशलः सैमिकः सीमाधिकृतः वनचरकः वनवासी पारिकर्मिकः हस्तिपरिचरणचतुरः एतैः सहिताः, हस्तिमूत्रपुरीषच्छन्नगन्धाः हस्तिमूत्रपुरीषगन्धन्यक्कृतगन्धान्तराः, भल्लातकीशाखाप्रतिच्छन्नाः अरुष्कराख्यवृक्षविटपावच्छादिताः, पञ्चभिः सप्तभिर्वा हस्तिबन्धकीभिः सह गजबन्धनशिक्षिताभिर्वशाभिः सह, चरन्तः सन्तः, शय्यास्थानपद्यालण्डकूलपातोद्देशेन शयनावस्थानपदपङ्क्तिविण्मूत्रप्राघातप्रदेशदर्शनेन, हस्तिकुलपर्यग्रं गजयूथसञ्चारपरमावधिं विद्युः।

---

१. 'वल्लकी' ख. पाठ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यूथचरमेकचरं निर्यूथं यूथपतिं हस्तिनं व्यालं मत्तं पोतं बद्ध-[१]मुक्तं च निबन्धेन विद्युः । अनीकस्थप्रमाणैः प्रशस्तव्यञ्जनाचारान्[२] हस्तिनो गृह्णीयुः । हस्तिप्रधानो हि विजयो राज्ञाम् । परानीकव्यूहदुर्ग-स्कन्धावारप्रमर्दना ह्यतिप्रमाणशरीराः प्राणहरकर्माणो हस्तिन इति ।

कलिङ्गाङ्गगजाः श्रेष्ठाः प्राच्याश्चेदिकरूशजाः ।
दाशार्णाश्चापरान्ताश्च द्विपानां मध्यमा मताः ॥
सौराष्ट्रिकाः पाञ्चनदास्तेषां प्रत्यवराः स्मृताः ।
सर्वेषां कर्मणा वीर्यं जवस्तेजश्च वर्धते ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वितीयोऽध्यायः भूमिच्छिद्रविधानम्,
आदितस्त्रयोविंशः ॥

यूथेत्यादि । यूथचरं यूथेनैव सह चरति नत्वेकाकी यस्तम्, एकचरम् एक एव चरति नतु यूथेन सह यस्तं, निर्यूथं यूथनिर्गतं, यूथपतिं, व्यालं क्रूरस्वभावं, मत्तं प्रभिन्नं, पोतं दशवर्षकं, बद्धमुक्तं च, हस्तिनं, निबन्धेन विद्युः यूथचरादिहस्तीयत्तादिकं गणनपुस्तके समारोप्य तेन जानीयुरित्यर्थः । अनीकस्थप्रमाणैः प्रशस्तव्यञ्जनाचारान् हस्तिशिक्षाविचक्षणैः प्रमाणभूतैः श्लाघितलक्षणचर्यान् हस्तिनः, गृह्णीयुः, राजार्थे । हि यस्मात् कारणाद्, राज्ञां विजयः शत्रुजयः हस्तिप्रधानः हस्तिमुख्यसाधनकः । हस्तिनां मुख्य-साधनत्वं विशदयितुमाह — परेत्यादि । अतिप्रमाणशरीराः महाप्रमाणदेहाः अत एव प्राणहरकर्माणः, हस्तिनः, परानीकव्यूहदुर्गस्कन्धावारप्रमर्दनाः परेषां शत्रूणां सैन्यविन्यासस्य प्राकारादिदुर्गस्य राजधान्याश्च विध्वंसकाः खलु । इतिर्हेतुवचनः गृह्णीयुरित्यनेन सम्बन्धनीयः ।

गजेषूत्तममध्यमाधमान् श्लोकाभ्यामाह — कलिङ्गेत्यादिना सौरा-ष्ट्रिका इत्यादिना च । कालिङ्गाङ्गगजाः कलिङ्गाङ्गदेशोद्भवा गजाः । दाशार्णाः दशार्णदेशभवाः, आपरान्ताः पश्चिमदेशजाः । प्रत्यवराः अधमाः । श्रेष्ठा-दीनां त्रयाणां वीर्यवेगप्रतापाः क्रियया वर्धन्त इत्याह — सर्वेषामित्यादि ।

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वितीयोऽध्यायः भूमिच्छिद्रविधानम्,
आदितस्त्रयोविंशः ॥

---

१. 'बन्धमु' क, ग., 'बद्धं मु' ख. पाठः. २. 'ञ्चजनाः' ख. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२१. प्रक. दुर्गविधानम् ।

चतुर्दिशं जनपदान्ते साम्परायिकं दैवकृतं दुर्गं कारयेद्, अन्तर्द्वीपं स्थलं वा निम्नावरुद्धमौदकं, प्रास्तरं गुहां वा पार्वतं, निरुदकस्तम्बमिरिणं वा धान्वनं, खञ्जनोदकं स्तम्बगहनं वा वनदुर्गम् । तेषां नदीपर्वतदुर्गं जनपदारक्षस्थानं, धान्वनवनदुर्गमटवीस्थानम् आपद्यपसारो वा ।

जनपदमध्ये समुदयस्थानं स्थानीयं निवेशयेद् वास्तुकप्रशस्ते देशे नदीसङ्गमे ह्रदस्य वा अविशोषस्याङ्के सरसस्तटाकस्य वा वृत्तं दीर्घं

दुर्गविधानमिति सूत्रम् । दुर्गरचनोच्यत इति सूत्रार्थः । जनपदप्रकृतिरुक्ता, दुर्गप्रकृतिरधुनाभिधीयते ।

चतुर्दिशमिति । जनपदान्ते, चतुर्दिशं चतसृषु दिशासु व्यापकं, साम्परायिकं युद्धोचितं, दैवकृतं दुर्गं कारयेत् स्वभावविषमस्थलं दुर्गत्वेनाश्रयेत् । किंरूपं तत् कारयेदित्यत्राह — अन्तरित्यादि । अन्तर्द्वीपं मध्यगतद्वीपम् अर्थात् समन्तान्नदीपरिवेष्टनमित्येकं, निम्नावरुद्धं स्थलं वा निम्नैः सरोभिः समन्ताद् वेष्टितं स्थलं वेत्यपरम्, औदकं जलपरिवेष्टनदुर्गमत्वादौदकपदव्यपदेश्यं दुर्गम् । प्रास्तरं गुहां वा पर्वतप्रस्तरमयमित्येकं देवखातबिलात्मकं वेत्यपरम्, पार्वतं पर्वतकृतं दुर्गम् । निरुदकस्तम्बम् इरिणं वा जलतृणसङ्घातशून्यमित्येकम् ऊषरं वेत्यपरम्, धान्वनं धन्वकृतं दुर्गम् । खञ्जनोदकं खञ्जनं पङ्किलत्वाद् गतिवैक्लव्यकरमुदकं यस्मिंस्तत् तथाभूतमित्येकं स्तम्बगहनं वा अप्रकाण्डद्रुमदुष्प्रवेशं वेत्यपरं, वनदुर्गं तदाख्यम् । तदेवमौदकाद्येकैकद्वैविध्यादष्टौ दुर्गाणि सिद्धानि । तेषामिति । तेषां दुर्गाणां मध्ये, नदीपर्वतदुर्गं नदीदुर्गं पर्वतदुर्गं च, आपदि जनपदारक्षस्थानं जनपदस्य रक्षाहेतुः, भवति, धान्वनवनदुर्गम् अटवीस्थानं धान्वनदुर्गं वनदुर्गं च आटविकरक्षास्थानमापदि, अपसारो वा, आपदि अपसरणस्थानं वा, अर्थाद् राज्ञः ॥

दुर्गविधानमुक्त्वा स्थानीयादिकमाह— जनपदेत्यादि । जनपदमध्ये, समुदयस्थानं धनोत्पत्तिस्थानभूतं, स्थानीयं महाग्रामादिकं पूर्वोक्तं निवेशयेत् । कीदृशे प्रदेशे, वास्तुकप्रशस्ते वास्तुविद्याभिज्ञनिर्दिष्टे देशे, नदीसङ्गमे नद्युपश्लेषे, अविशोषस्य सदाजलस्य, ह्रदस्य सरसः, तटाकस्य पद्माक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चतुरश्रं वा वास्तुकवशेन प्रदक्षिणोदकं पण्यपुटभेदनमंसवारिपथाभ्यामुपेतम् । तस्य परिखास्तिस्रो दण्डान्तराः कारयेत् चतुर्दश द्वादश दशेति दण्डान् विस्तीर्णाः विस्तारादवगाधाः पादोनमर्धं वा त्रिभागमूला मूले चतुरश्राः पाषाणोपहिताः पाषाणेष्टकाबद्धपार्श्वा वा तोयान्तिकीरागन्तुतोयपूर्णा वा सपरिवाहाः पद्मग्राहवतीः ।

चतुर्दण्डावकृष्टं परिखायाः षड्दण्डोच्छ्रितमवरुद्धं तद्द्विगुणविष्कम्भं खाताद् वप्रं कारयेद् ऊर्ध्वचयं मञ्चपृष्ठं कुम्भकुक्षिकं वा हस्तिभि-

---

रस्य वा अङ्के समीपे वा । कीदृशं निवेशयेत्, वास्तुकवशेन वास्तुस्थित्यनुसारेण वृत्तं वर्तुलाकारं, दीर्घं, चतुरश्रं वा, प्रदक्षिणोदकं प्रदक्षिणवाहिसलिलं, पण्यपुटभेदनं पण्यपुटानां पण्यकरण्डानां तत्तत्पण्योत्पत्तिस्थानेभ्यः प्रहितानां भेदनं बन्धविस्रंसनम् अनन्यत्रकार्यतया सङ्केतितं यस्मिंस्तत् तथाभूतम्, अंसवारिपथाभ्यामुपेतं स्थलमार्गजलमार्गाभ्यां गम्यम् । **तस्येति** । तस्य स्थानीयस्य, तिस्रः प्रथममध्यमतृतीयाः, परिखाः कारयेत्, कीदृशीः, दण्डान्तराः द्विचत्वारिंशदङ्गुल एको हस्त इति गणनया देशकालमानप्रकरणोक्तया चत्वारो हस्ता एको दण्डः दण्डमितम् अन्तरं परस्परव्यवधानं यासां ताः तथोक्ताः, चतुर्दशदण्डान् द्वादशदण्डान् दशदण्डान् इत्येवंक्रमेण विस्तीर्णाः, विस्ताराद् विस्तारपरिमाणात् पादोनं चतुर्भागहीनम्, अर्धं वा, अवगाधाः निम्नाः, तदुभयानुपपत्तावाह — त्रिभागमूला वा विस्तारत्रिभागमानं मूलम् अधस्तलं निम्नत्वं यासां तास्तथाभूताः, मूले चतुरश्राः सम्यग्बद्धाः, पाषाणोपहिताः शिलारचिताः, पाषाणेष्टकाबद्धपार्श्वा वा, तोयान्तिकीः आजलोदयदेशखाताः स्वतः सम्पन्नजला इत्यर्थः, आगन्तुतोयपूर्णा वा नद्याद्यागतजलसम्भृता वा, सपरिवाहा जलनिर्गममार्गोपेताः, पद्मग्राहवतीः नलिननक्रयुक्ताः ।

वप्रविधानमाह — **चतुर्दण्डावकृष्टमिति** । खाताद् वप्रं कारयेत् परिखातादुद्धृतया मृदा प्राकाराधारभूतं चयं निर्मापयेत् । कथम्भूतं, परिखायाः चतुर्दण्डावकृष्टं षोडशहस्तविप्रकृष्टं, षड्दण्डोच्छ्रितं चतुर्विंशतिहस्तोन्नतम्, अवरुद्धं मृद्गलनं यथा न भवेत् तथाधस्तात् कृतसंरोधं, तद्द्विगुणविष्कम्भम् उच्छ्रयद्विगुणविस्तारम्, ऊर्ध्वचयम् अधःस्थूलोपरिकृशमूर्ध्वचयाख्यं, मञ्चपृष्ठम् उपर्यधस्ताच्च तुल्यवैपुल्यं मञ्चपृष्ठाख्यं, कुम्भकुक्षिकं वा ऊर्ध्वाधःकृशं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गोभिश्च क्षुण्णं कण्टकिगुल्मविषवल्लीप्रतानवन्तम् । पांसुशेषेण वास्तुच्छिद्रं वा पूरयेत् ।

वप्रस्योपरि प्राकारं विष्कम्भद्विगुणोत्सेधमैष्टकं द्वादशहस्तादूर्ध्वमोजं युग्मं वा आ चतुर्विंशतिहस्तादिति कारयेत् । रथचर्यासञ्चारं तालमूलमुरजकैः कपिशीर्षकैश्चाचिताग्रं[1] पृथुशिलासंहितं वा शैलं कारयेद्, न त्वेव काष्ठमयम्, अग्निरवहितो हि तस्मिन् वसति ।

विष्कम्भचतुरश्रमट्टालकमुत्सेधसमावक्षेपसोपानं कारयेत्, त्रिंशद्दण्डान्तरं च ।

मध्यस्थूलं कुम्भकुक्षिकाख्यं वा, हस्तिभिर्गोभिश्च क्षुण्णं प्रघातदृढीकृतं, कण्टकिगुल्मविषवल्लीप्रतानवन्तं कण्टकवद्भिस्तृणसङ्घातैः विषलताप्रतानैश्च युक्तम् । **पांस्वित्यादि** । पांसुशेषेण वप्रविनियुक्तावशिष्टया मृदा, वास्तुच्छिद्रं नगरवास्तुगर्तं राजवास्तुगर्तं च, पूरयेद्वा पूरयेच्च ।

प्राकारविधानमाह — **वप्रस्येति** । विष्कम्भद्विगुणोत्सेधं स्वविस्तारद्विगुणोच्छ्रयम् । ऐष्टकं पक्वेष्टकचितम् । उत्सेधमानं विशदयन्नाह — द्वादशहस्तादूर्ध्वम् ओजं युग्मं वा त्रयोदशपञ्चदशादिविषमसंख्यहस्तप्रमाणोत्सेधं चतुर्दशषोडशादिसमसंख्यहस्तप्रमाणोत्सेधं वेत्यर्थः । उत्सेधमानस्य परमावधिमाह — आ चतुर्विंशतिहस्तात् चतुर्विंशतिहस्तोत्तमपरिमाणोत्सेधमित्यर्थः । उत्सेधं केचिद् विषमसंख्यमिच्छन्ति समसंख्यमपरे, तत्रान्यतरानिर्बन्धोऽकिञ्चित्कर इत्योजयुग्मोभयोक्त्या सूचयति । इति एवम्प्रकारं, प्राकारं, वप्रस्योपरि कारयेत् । अनुक्तविशेषणकथनपूर्वं प्राकारस्य प्रकारान्तरमाह — **रथेत्यादि** । रथचर्यासञ्चारं रथचर्यया रथगत्या सञ्चारो रथिगतागतं यस्मिंस्तं तथाभूतम् उपरि रथगतागतपर्याप्तविस्तारयुक्तत्वमनेनोक्तं, तालमूलमुरजकैः कपिशीर्षकैश्च आचिताग्रं तालवृक्षमूलप्रतिकृतिभिर्मुरजप्रतिकृतिभिः कपिशीर्षप्रतिकृतिभिश्च शिलेष्टकाचूर्णनिर्मिताभिः समन्विताग्रं, पृथुशिलासंहितं शैलं वा विपुलशिलाबद्धम् ऐष्टकविलक्षणं शिलामयं वा, कारयेद्, अर्थात् प्राकारम् । काष्ठमयं तु प्राकारं, नैव कारयेत् । कुतः, हि यतः, तस्मिन् काष्ठमये, अग्निः अवहितः सन् वसति ।

विष्कम्भेत्यादि । अट्टालकं प्राकाराग्रे रणगृहं, कारयेत् । कीदृशं, विष्कम्भचतुरश्रं विस्तारस्यानुरूपम् अर्थादायामे चोत्सेधे च, उत्सेधसमावक्षेपसो-

---

१. 'श्चारचि' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वयोरट्टालकयोर्मध्ये सहर्म्यद्वितलामध्यर्धायामां प्रतोलीं कारयेत् ।

अट्टालकप्रतोलीमध्ये त्रिधानुष्काधिष्ठानं सापिधानच्छिद्रफलकसंहितमितीन्द्रकोशं कारयेत् ।

अन्तरेषु द्विहस्तविष्कम्भं पार्श्वे चतुर्गुणायाममनुप्राकारम् अष्टहस्तायतं देवपथं कारयेत् ।

दण्डान्तरा द्विदण्डान्तरा वाचार्याः कारयेद्, अग्राह्ये देशे प्रधावितिकां निष्कुहद्वारं च ।

पानम् उत्सेधानुरूपावरोहसोपानं, त्रिंशद्दण्डान्तरं च त्रिंशद्दण्डप्रमाणमिथोऽव्यवधानं च ।

द्वयोरिति । द्वयोरट्टालकयोर्मध्ये, सहर्म्यद्वितलां हर्म्यं धवलगृहमिति ख्यातमैष्टकं गृहं तेन तदीयेन च द्वितलेन साहिताम्, अध्यर्धायामां विस्तारात् सार्धगुणपरिमाणदैर्घ्यां, प्रतोलीं गृहविशेषं, कारयेत् ।

अट्टालकप्रतोलीमध्य इति । अट्टालकप्रतोल्योर्मध्ये, इन्द्रकोशं खट्वाविशेषं कारयेत् । कथम्भूतं, त्रिधानुष्काधिष्ठानं त्रयाणां धानुष्काणां धन्विनां स्थितिपर्याप्तं, सापिधानच्छिद्रफलकसंहितं सापिधानानि अवच्छादसाधनोपेतानि छिद्राणि यस्मिंस्तेन तथाभूतेन फलकेन संहितं कृतसन्धानं च ।

अन्तरेष्विति । अनुप्राकारम्, अन्तरेषु अट्टालकप्रतोलीन्द्रकोशानामन्तरालेषु, द्विहस्तविष्कम्भं द्विहस्तविस्तारं, पार्श्वे अर्थात् प्राकारस्य, चतुर्गुणायामम् अष्टहस्तायतामित्यर्थः, देवपथं देवपथ इव देवपथः रहस्यमार्गः तं, कारयेत्, मातृकायाम् 'अष्टहस्तायतामि'त्यपि पठ्यते । तत्तु पुनरुक्तं द्रष्टव्यम् ।

दण्डेत्यादि । दण्डान्तराः दण्डप्रमाणविष्कम्भाः, द्विदण्डान्तरा वा, चार्याः आरोहावरोहभूमीः कारयेत् । अग्राह्य इति । अग्राह्ये ग्रहणायोग्ये देशे, प्रधावितिकां प्रतिपक्षैर्बाणे प्रयुज्यमाने तद्गोचरपरिहारेण भटस्य सुखतिरोधानार्थः क्षुद्रो वरणः प्रधावितिका तां, कारयेत्, प्राकारोपरि । निष्कुहद्वारं च कोटरविवरं च प्राकारबहिर्वर्तिप्रतिपक्षचेष्टितगूढदर्शनार्थं, कारयेत् प्रधावितिकान्तिके ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बहिर्जानुभञ्जनीत्रिशूलप्रकरकूपकूटावपातकण्टकप्रतिसराहिपृष्ठतालपत्रशृङ्गाटकश्वदंष्ट्रार्गलोपस्कन्दनपादुकाम्बरीषोदपानकैः छन्नपथं कारयेत् ।

प्राकारमुभयतो मण्डपकमध्यर्धदण्डं कृत्वा प्रतोलीषट्तलान्तरं द्वारं निवेशयेत् पञ्चदण्डादेकोत्तरवृद्ध्याष्टदण्डादिति चतुरश्रम् । द्विदण्डं वा । षड्भागमायामादधिकमष्टभागं वा ।

बहिरिति । बहिः परिखाबहिर्भूमिषु, जानुभञ्जनीत्रिशूलप्रकरकूपकूटावपातकण्टकप्रतिसराहिपृष्ठतालपत्रशृङ्गाटकश्वदंष्ट्रार्गलोपस्कन्दनपादुकाम्बरीषोदपानकैः छन्नपथं कारयेत् जानुभञ्जन्यो जानुमात्रीनामधेया दारुमया यन्त्रकीलाः त्रिशूलप्रकरः सारदारुलोहनिर्मितानां तीक्ष्णत्रिशृङ्गाणामायुधविशेषाणां समूहः कूपा अन्धवः कूटा अयश्शलाकाः अवपातास्तृणादिच्छन्ना गर्ताः कण्टकप्रतिसराः आयसाः कण्टकाचिता रज्जुविशेषाः अहिपृष्ठानि निर्मांससर्पपृष्ठास्थिसदृशाकाराण्ययोमयानि तीक्ष्णाग्राणि तालपत्राणि तथाविधान्येव तालपत्राकाराणि शृङ्गाटकानि त्रिकोटिकानि लौहयन्त्राणि श्वदंष्ट्रास्तदाकारा यन्त्रभेदाः अर्गलानि विष्कम्भाकाराणि यन्त्राणि उपस्कन्दनानि स्खलनार्थानि काष्ठानि पादुकाः एकपादमात्रपातपर्याप्ताः पङ्कपूरिता गर्ताः अम्बरीषाणि अग्निसम्भृततप्तभ्राष्ट्रगर्भा गर्ताः उदपानकानि दुष्पीतोदकाः कुपुष्करिण्यः एतैश्छन्नं पन्थानं कारयेत् ।

इत्थं परिखावप्रप्राकाराणां विधानमुक्त्वा द्वारविधानमाह —**प्राकारमुभयत** इत्यादि । अस्यार्थः —यत्र द्वारं निर्मितिसितं तत्र प्राकारोभयभागयोः अध्यर्धदण्डविस्तारं मण्डपं परिकल्प्य प्रतोलीषट्तलैरवच्छादितं तदाधारभूतैः षड्भिस्तोरणस्तम्भैर्युक्तं द्वारं निवेशयेत् कारयेत् । पञ्चदण्डात् प्रभृति एकोत्तरवृद्ध्या अष्टदण्डपरमावधिकेन विस्तारेण प्राकारानुरूपेण युक्तं चतुरश्रं निवेशयेदिति । **द्विदण्डं वेति** । दण्डद्वयविस्तारयुक्तं वा द्वारं निवेशयेत् । इदमेकीयपक्षे । पक्षान्तरमाह —**षड्भागमिति** । आयामाद् दैर्घ्येण, षड्भागमष्टभागं वाधिकम् आश्रितविस्तारमानापेक्षया तदीयषष्ठांशाधिकं तदीयाष्टमांशाधिकं वा निवेशयेत् । इदमेवं विवृण्वन्ति —पञ्चदण्डचतुरश्रस्य षड्भागः साष्टाङ्गुलं हस्तत्रयम्, अष्टभागस्तु सार्धं हस्तद्वयं, चतुर्विंशत्यङ्गुल एको हस्तः, हस्तचतुष्टयमेको दण्ड इति चाश्रयणादिति । एवं षड्दण्डचतुरश्रादिषूह्नेयम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्चदशहस्तादेकोत्तरमष्टादशहस्तादिति तुलोत्सेधः ।

स्तम्भस्य परिक्षेपाः षडायामा द्विगुणो निखातः चूलिकायाश्चतुर्भागः।

आदितलस्य पञ्च भागाः शाला वापी सीमागृहं च । दशभागिकौ समत्तवारणौ द्वौ प्रतिमञ्चौ अन्तरम् आणिः । हर्म्यं च समुच्छ्रयादर्धतलं स्थूणावबन्धश्च । आर्धवास्तुकमुत्तमागारं त्रिभागान्तरं वा,

---

पञ्चदशेत्यादि । एतद् व्याचक्षते— द्वादशहस्तोत्सेधस्य प्राकारसभागृहस्य पञ्चदशहस्तोत्सेधांस्तुलास्तम्भान् कुर्यात् । एवं तद्धस्तचतुर्भागाश्रयेण एकोत्तरवृद्ध्या अष्टादशहस्तपर्यन्तमुत्सेधं कुर्यात् । स एष तुलोत्सेध इति । तलोत्सेध इति पाठे उक्तमानैस्तुलास्तम्भैरुपलक्षितस्यादितलस्योच्छ्रय इत्यर्थः ।

स्तम्भस्येति । स्तम्भस्य परिक्षेपाः परिधयः षडायामाः स्तम्भोत्सेधषड्भागदीर्घाः, पञ्चदशहस्तोत्सेधस्य स्तम्भस्य परिधिमानं सार्धद्विहस्तं कल्पनीयमिति भावः । निखातो द्विगुणः स्तम्भस्य निखातायामः परिक्षेपायामद्विगुणः, पञ्चदशहस्तोत्सेधस्य पञ्चहस्त इति भावः । चूलिकायाश्चतुर्भागः चूलिका नाम स्तम्भशिखा तस्या आयामः परिक्षेपायामचतुर्भाग इत्यर्थः ।

आदीत्यादि । अयमर्थः—प्रतोलिकात्रितलेषु मध्ये प्रथमतलं पञ्चधा विभज्य तेषु पञ्चसु भागेषु शाला वापी सीमागृहं च कार्याणीति । इदं विवृण्वन्ति — मध्यमे भागे वापीं वापीप्रान्तभागयोः दीर्घचतुरश्रे द्वे शाले शालाप्रान्तयोः सीमागृहं च कारयेदिति । सीमागृहं नाम शालाद्वयप्रान्तयुगलगते पञ्चभागे क्रियमाणं चतुष्कोणं कोष्ठगृहमित्याहुः । **दशभागिकावि**ति । दशभागिकौ शालादशभागविस्तारौ, समत्तवारणौ निर्यूहयुक्तौ, द्वौ प्रतिमञ्चौ मञ्चप्रतिकृती ऐष्टकौ सन्निवेशविशेषौ, कार्यौ, अर्थाच्छालायाः प्रान्ततः । अन्तरं शालासीमागृहयोरन्तरालं कार्यम् । आणिः कार्यः । स च क्षुद्रं द्वारमित्याहुः । **हर्म्यं चे**ति । हर्म्यम् उपरितलं चन्द्रशाला तच्च, समुच्छ्रयादर्धतलम् उत्सेधेन प्रथमतलस्यार्धं प्रथमतलोत्सेधापेक्षयार्धोत्सेधं कार्यम् । आणिहर्म्यमिति पाठे आणिः सीमा तत्रत्यं हर्म्यं सीमागृहवदुपरितले सीमनिर्मिता चन्द्रशालेत्यर्थः । स्थूणावबन्धश्च क्षुद्रस्तम्भनिवेशश्च अर्थाद् द्वितीयतले । **आर्धवास्तुकमि**ति । उत्तमागारं तृतीयतलम्, आर्धवास्तुकं त्रिदण्ड एको वास्तुरिति परिभाषया वास्तोरर्धं सार्धदण्डः तत्प्रमाणकं कार्यम्, अर्थाद्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इष्टकावबद्धपार्श्वं, वामतः प्रदक्षिणसोपानं गूढभित्तिसोपानमितरतः।

द्विहस्तं तोरणशिरः, त्रिपञ्चभागिकौ द्वौ कवाटयोगौ, द्वौ द्वौ परिघौ, अरत्निरिन्द्रकीलः, पञ्चहस्तमणिद्वारं, चत्वारो हस्तिपरिघाः।

निवेशार्धं हस्तिनखः मुखसमः। सङ्क्रमोऽसंहार्यो वा भूमिमयो वा निरुदके।

प्राकारसमं मुखमवस्थाप्य त्रिभागगोधामुखं गोपुरं कारयेत्। प्राकारमध्ये कृत्वा वापीं पुष्करिणीद्वारं, चतुश्शालमध्यर्थान्तराणिकं

पञ्चदण्डचतुरश्रस्य द्वारस्य। त्रिभागान्तरं वा पञ्चदण्डत्रिभागोऽन्तरमवकाशो यस्य तत् तथाभूतं वा, उत्तमागारं कार्यम्। इह वाशब्दात् त्रिभागद्वयान्तर-पक्षार्धान्तरपक्षयोरपि सङ्ग्रह इत्याहुः। इष्टकावबद्धपार्श्वे, वामतः प्रदक्षि-णसोपानम्, इतरतो दक्षिणतः, गूढभित्तिसोपानं च कार्यम्। तृतीयतलवि-धिरयमधस्तलेऽपि योज्यः।

द्विहस्तमिति। तोरणशिरः द्वारशीर्षं, द्विहस्तं, कार्यम्। त्रिपञ्चभा-गिकौ त्रयः पञ्चभागा अनयोरिति तथाभूतौ, द्वौ कवाटयोगौ कार्यौ। द्वौ द्वौ परिघौ अर्गले, कार्यौ। इन्द्रकीलः कवाटधारणार्थः प्रधानः कीलविशेषः, अरत्निः निष्कनिष्ठमुष्टिकहस्तदीर्घः कार्यः। अणिद्वारं क्षुद्रद्वारम् अर्थान्महा-कवाटमध्यगं, पञ्चहस्तं कार्यम्। हस्तिपरिघाश्चत्वारः गजार्गलानि लक्षणया गजगतिद्वाराणि चत्वारि कार्याणि, कृत्स्नो द्वारमण्डपावकाशश्चतुर्गजप्रवेशपर्याप्त कार्य इत्यभिप्रायः।

निवेशार्धमिति। हस्तिनखः दुर्गावतरणार्थः क्रमनिम्नो हस्तिनखाभो मृत्कूटः, निवेशार्धं द्वारसन्निवेशस्यार्धमानः पञ्चदण्डचतुरश्रस्य सार्धद्विदण्डोत्से-धमान इत्यर्थः, मुखसमः द्वारसमानविस्तारश्च, कार्यः। **संक्रम** इति। **संक्रमः** दुर्गसञ्चरः, असंहार्यः स्थिरो दार्वादिमय इत्यर्थः तथाविधो वा, निरुदके भूमिमयो वा, कार्यः।

इत्थं महाद्वारविधानमभिधाय द्वारान्तरविकल्पमाह—**प्राकारे**त्यादि। प्राकारसमं मुखमवस्थाप्य प्राकारतुल्यमानं निस्सरणं परिकल्प्य, त्रिभाग-गोधामुखं त्रिभागः विस्तारतृतीयांशस्तत्प्रमाणं गोधामुखं गोधामुखाकारं द्वारं यस्य तत् तथाभूतं, गोपुरं पुरद्वारं, कारयेत्। **प्राकारमध्य** इति। प्राकार-मध्ये वापीं कृत्वा पुष्करिणीद्वारं वापीयोगवशेन पुष्करिण्याख्यं द्वारं कारयेत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुमारीपुरं, मुण्डहर्म्यं द्वितलं मुण्डकद्वारं, भूमिद्रव्यवशेन वा। त्रिभागाधिकायामा भाण्डवाहिनीः कुल्याः कारयेत्।

तासु पाषाणकुद्दालकुठारीकाण्डकल्पनाः।
मुसुण्ठिमुद्गरा दण्डचक्रयन्त्रशतघ्नयः॥
कार्याः कार्मारिकाः शूलवेधनाग्राश्च वेणवः।
उष्ट्रग्रीव्योऽग्निसंयोगाः कुप्यकल्पे च यो विधिः॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
तृतीयोऽध्यायः दुर्गविधानम्, आदितश्चतुर्विंशः॥

अध्यर्धान्तराणिकम् अन्तरम् अणिश्च पूर्वोक्तादध्यर्धाधिकं यस्य तत् तथाभूतं, चतुश्शालं शालाचतुष्टयं, कृत्वा, कुमारीपुरं कुमारीपुराख्यं द्वारं कारयेद्, अर्थाद् यथोक्तचतुश्शालयुक्तं द्वारमेव कुमारीपुरसंज्ञं बोद्धव्यम्। द्वितलं द्विभूमं, मुण्डहर्म्यं निश्शृङ्गं हर्म्यं, वृत्तमालिकामित्यन्ये, कृत्वा, मुण्डकद्वारं मुण्डहर्म्ययोगान्मुण्डकाख्यं द्वारं, कारयेत्। भूमिद्रव्यवशेन वा भूमिद्रव्यसम्पदनुरोधेन वा, कारयेद्, अर्थाद् यथोक्तमेकैकं द्वारम्। **त्रिभागेत्यादि**। त्रिभागाधिकायामाः त्रिभागाधिकः स्वविस्तारमानापेक्षया तृतीयांशाभ्यधिकमानः आयामो दैर्घ्यं यासां तास्तथाभूताः, भाण्डवाहिनीः कर्मोपकरणगतागतव्यवहारार्थाः, कुल्याः कारयेत्।

कुल्यासु निवेशनीयानि भाण्डानि श्लोकद्वयेनाह — **तास्वित्यादि**, **कार्या** इत्यादि च। काण्डः बाणः, कल्पना गजोपकरणं, मुसुण्ठिर्गदा सायःकीला दारुमयी मुद्गरः दीर्घगदाकारं स्थूलाग्रमायुधम्, दण्डः क्षेपणीयो लगुडविशेषः, चक्रं सारवृत्तमायुधं, यन्त्रं जामदग्न्यभैमादि, शतघ्निः लोहकण्टकाचितं चतुस्तालप्रमाणमायुधम्। कार्मारिकाः कर्मारोऽयस्कारः तच्छिल्पसाध्याः तोमरादयः, उष्ट्रग्रीव्यः उष्ट्रग्रीवाकाराः शस्त्र्यः, अग्निसंयोगाः अग्निः संयुज्यते विपक्षदाहार्थमेष्वित्यग्निसंयोगाः गुल्गुलुमदनसर्जरसश्रीवेष्टगन्धपाषाणादयः, कुप्यकल्पे च यो विधिः कुप्याध्यक्षप्रकरणे यो विधीयते स च, तासु कुल्यासु, कार्यः। स तु शाकतिनिशादिदारुवर्गः उटजचिमियादिवेणुवर्गः गोधासेरकद्वीपिप्रभृतिचर्मवसादिश्चेति बोद्धव्यम्। स्पष्टमन्यत्॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
तृतीयोऽध्यायः दुर्गविधानम्, आदितश्चतुर्विंशः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२२. प्रक. दुर्गनिवेशः।

त्रयः प्राचीना राजमार्गास्त्रय उदीचीना इति वास्तुविभागः। स द्वादशद्वारो युक्तोदकभूमिच्छन्नपथः।

चतुर्दण्डान्तरा रथ्याः। राजमार्गद्रोणमुखस्थानीयराष्ट्रविवीतपथाः संयानीयव्यूहश्मशानग्रामपथाश्चाष्टदण्डाः। चतुर्दण्डः सेतुवनपथः। द्विदण्डो हस्तिक्षेत्रपथः। पञ्चारत्नयो रथपथश्चत्वारः पशुपथो द्वौ क्षुद्रपशुमनुष्यपथः।

प्रवीरे वास्तुनि राजनिवेशश्चातुर्वर्ण्यसमाजीवे। वास्तुहृदयादुत्तरे नवभागे यथोक्तविधानमन्तःपुरं प्राङ्मुखमुदङ्मुखं वा कारयेत्।

दुर्गनिवेश इति सूत्रम्। दुर्गे परिखावप्रप्राकाराट्टालप्रतोलीन्द्रकोशदेवपथादिकं यथोक्तं तस्मिन् निवेशः राजमार्गादिविभजनपूर्वं योग्यदेशरचनीयं राजामात्यादि-दुर्गान्तर्निवासिप्रकृतिभवनसंस्थानं, तदिहोच्यत इति सूत्रार्थः।

राजमार्गाः प्राक्प्रत्यगायतास्त्रयो दक्षिणोत्तरायतास्त्रय इत्येवं षोढा वास्तुर्विभक्तव्य इत्याह— त्रय इत्यादि। स इति। स वास्तुविभागः, द्वादशद्वारः दिशिदिशि द्वारत्रिकक्रमेण द्वादशभिर्द्वारैर्युक्तः, युक्तोदकभूमिच्छन्नपथः उदकं वापीकूपादि भूमिर्जलनिर्गममार्गः छन्नपथः गूढसुरुङ्गामार्गः ते युक्ता वास्तुविस्तारानुरूपा यस्मिन् स तथाभूतः, कार्यः इति शेषः।

चतुरित्यादि। रथ्या अल्पमार्गाः उपवीथ्य इत्यर्थः, चतुर्दण्डान्तराः चतुर्दण्डविस्ताराः। राजमार्गद्रोणमुखस्थानीयराष्ट्रविवीतपथाः राजमार्गो द्रोणमुखपथः स्थानीयपथः राष्ट्रपथः विवीतपथ इत्येते, संयानीयव्यूहश्मशानग्रामपथाश्च संयानीयं क्रयविक्रयव्यवहारप्रधानं पट्टनं तत्पथः व्यूहपथः शत्रुपरिवेष्टनावसरे प्राकारेषु समन्तात् सद्यो गन्तुमुपकल्पितः सैन्यस्य मार्गः श्मशानपथः ग्रामपथ इत्येते च, अष्टदण्डाः कार्याः। सेतुवनपथः सेतुपथो वनपथश्च, चतुर्दण्डः। हस्तिक्षेत्रपथः हस्तिपथः क्षेत्रपथश्च, द्विदण्डः। रथपथः पञ्चारत्नयः निष्कनिष्ठमुष्टिकहस्तपञ्चकविस्तार इत्यर्थः, पशुपथः गोमहिषादिमार्गः, चत्वारोऽरत्नयः अरत्निचतुष्टयप्रमाणः, क्षुद्रपशुमनुष्यपथः मेषादिक्षुद्रपशुमार्गः मनुष्यमार्गश्च, द्वौ अरत्नी।

प्रवीर इति। प्रवीरे प्रकर्षेण वीर्ययुक्ते, चातुर्वर्ण्यसमाजीवे वर्णचतुष्टयोपजीव्यगुणसम्पन्ने, वास्तुनि, राजनिवेशः राजभवनं, कार्यम्। वा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्य पूर्वोत्तरं भागमाचार्यपुरोहितेज्यातोयस्थानं मन्त्रिणश्चावसेयुः। पूर्वदक्षिणं भागं महानसं हस्तिशाला कोष्ठागारं च। ततः परं गन्धमाल्यधान्यरसपण्याः प्रधानकारवः क्षत्रियाश्च पूर्वां दिशमधिवसेयुः। दक्षिणपूर्वं भागं भाण्डागारमक्षपटलं कर्मनिषद्याश्च। दक्षिणपश्चिमं भागं कुप्यगृहमायुधागारं च। ततः परं नगरधान्यव्यावहारिककार्मान्तिकबलाध्यक्षाः पक्वान्नसुरामांसपण्याः रूपाजीवास्तालावचरा वैश्याश्च दक्षिणां दिशमधिवसेयुः। पश्चिमदक्षिणं भागं खरोष्ट्रगुप्तिस्थानं कर्मगृहं च। पश्चिमोत्तरं भागं यानरथशालाः। ततः परम्

स्त्वित्यादि। एकाशीतिपदात्मकस्य वास्तुनो मध्यमो नवभागो वास्तुहृदयं, वास्तुहृदयाद्, उत्तरे नवभागे, यथोक्तविधानं निशान्तप्रणिधिप्रतिपादितप्रकारम्, अन्तःपुरं, प्राङ्मुखम् उदङ्मुखं वा कारयेत्। **तस्येति**। आचार्यपुरोहितेज्यातोयस्थानम् आचार्यपुरोहितयोर्यज्ञस्थानं तोयस्थानं च, मन्त्रिणश्च, तस्य अन्तःपुरस्य, पूर्वोत्तरं भागमावसेयुः पूर्वोत्तरे भागे स्थितिं कुर्युरित्यर्थः। महानसं पाकशाला, हस्तिशाला हस्तिपृष्ठाकारं सभागृहं, कोष्ठागारं च अन्तर्गृहमपवरकाख्यं च, पूर्वदक्षिणं भागम्, आवसेयुरिति सम्बध्यते आश्रयेयुरिति च तदर्थः। **तत इति**। ततः परं राजभवनाद् बहिः, गन्धमाल्यधान्यरसपण्याः गन्धपण्याः माल्यपण्याः धान्यपण्याः रसपण्याश्च, प्रधानकारवः मुख्यशिल्पिनः, क्षत्रियाश्च, पूर्वां दिशमधिवसेयुः। भाण्डागारम्, अक्षपटलं रूप्याद्यायव्ययगणनस्थानं, कर्मनिषद्याश्च स्वर्णरजतशिल्पस्थानानि च, दक्षिणपूर्वं भागम्, अधिवसेयुः आश्रयेयुः। कुप्यगृहं स्वर्णरजतेतरस्थानम्, आयुधागारं च, दक्षिणपश्चिमं भागम् आश्रयेत्। **ततः परमिति**। ततः परं, नगरधान्यव्यावहारिककार्मान्तिकबलाध्यक्षाः नगरव्यावहारिकः धान्यव्यावहारिकः कार्मान्तिकः आकरादिकर्मान्ताधिकृतः बलाध्यक्षः सेनाध्यक्ष इत्येते, पक्वान्नसुरामांसपण्याः पक्वान्नादिविक्रेतारः, रूपाजीवा वेश्याः, तालावचरा नटाः, वैश्याश्च, दक्षिणां दिशम् अधिवसेयुः। खरोष्ट्रगुप्तिस्थानं गर्दभक्रमेलककारागृहाणि, कर्मगृहं च यत्र गृहादिकं निर्मीयते च ध्वंस्यते च परीक्षाद्यर्थं तत् स्थलं च, अथवा खरोष्ट्रादिव्यापारशाला च, पश्चिमदक्षिणं भागम्, आश्रयेत्। यानरथशालाः शिबिकादियानशाला रथशालाश्च, पश्चिमोत्तरं भागम्, आश्रयेयुः। **ततः परमिति**। ततः परं ततः परस्तात्, पश्चिमां दिशम्,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ऊर्णासूत्रवेणुचर्मवर्मशस्त्रावरणकारवः शूद्राश्च पश्चिमां दिशमधिवसेयुः, उत्तरपश्चिमं भागं पण्यभैषज्यगृहम्, उत्तरपूर्वं भागं कोशो गवाश्वं च। ततः परं नगरराजदेवता लोहमणिकारवो ब्राह्मणाश्चोत्तरां दिशमधिवसेयुः। वास्तुच्छिद्रानुशालेषु श्रेणीप्रवहणिकनिकाया आवसेयुः।

अपराजिताप्रतिहतजयन्तवैजयन्तकोष्ठकान् शिववैश्रवणाश्विश्रीमदिरागृहं च पुरमध्ये कारयेत् । कोष्ठकालयेषु यथोद्देशं वास्तुदेवताः स्थापयेत्। ब्राह्मैन्द्रयाम्यसैनापत्यानि द्वाराणि। बहिः परिखाया धनुश्शतावकृष्टाश्चैत्यपुण्यस्थानवनसेतुबन्धाः कार्याः, यथादिशं च दिग्देवताः।

ऊर्णासूत्रवेणुचर्मवर्मशस्त्रावरणकारवः ऊर्णावानकारवः कार्पासतन्तुवानकारवः वेणुवानकारवः चर्मकारवो वर्मकारवः शस्त्रावरणकारव इत्येते, शूद्राश्च, अधिवसेयुः। पण्यभैषज्यगृहं पण्यगृहम् औषधशाला च, उत्तरपश्चिमं भागम्, अधिवसेत्। कोशः धान्यादिसंग्रहस्थानं, गवाश्वं च गावोऽश्वाश्च, उत्तरपूर्वं भागम् अधिवसेत्। तत इति। ततः परं, नगरराजदेवताः नगरदेवताः राजकुलदेवताश्च, लोहमणिकारवः अयस्कारवैकटिकाः, ब्राह्मणाश्च, उत्तरां दिशमधिवसेयुः। वास्त्वित्यादि। श्रेणीप्रवहणिकनिकायाः श्रेणी रजकतन्तुवायतुन्नवायादयः प्रवहणिकाः विदेशागता वणिजः तेषां समूहाः, वास्तुच्छिद्रानुशालेषु वास्तुच्छिद्रावकाशेषु आवसेयुः। वसेयुरिति श्रेयान् पाठः।

अपराजितेत्यादि। अपराजिताप्रतिहतजयन्तवैजयन्तकोष्ठकान् अपराजिता दुर्गा अप्रतिहतो विष्णुः जयन्तः सुब्रह्मण्यः वैजयन्त इन्द्रः एतेषामालयान्, शिववैश्रवणाश्विश्रीमदिरागृहं च शिवादीनां मदिरान्तानां पञ्चानां गृहं च, पुरमध्ये कारयेत्। कोष्ठकेत्यादि। कोष्ठकालयेषु पूर्वोक्तेषु, यथोद्देशं स्वस्वदेशानतिक्रमेण, वास्तुदेवताः स्थापयेत्। ब्राह्मेत्यादि। ब्राह्मैन्द्रयाम्यसैनापत्यानि ब्राह्मं ब्रह्मदेवताकमुत्तरम् ऐन्द्रं पूर्वं याम्यं दक्षिणं सैनापत्यं पश्चिममित्येतानि, द्वाराणि, अर्थात् पुरस्य। बहिरिति। परिखाया बहिः, धनुश्शतावकृष्टाः दण्डशतविप्रकृष्टाः, चैत्यपुण्यस्थानवनसेतुबन्धाः चैत्य उद्देशवृक्षः पुण्यस्थानं तीर्थादिकं वनं सेतुबन्ध इत्येते, कार्याः। दिग्देवताश्च, यथादिशं स्वस्वदिगनुरोधेन कार्याः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उत्तरः पूर्वो वा श्मशानवाटः, दक्षिणेन वर्णोत्तमानाम्। तस्यातिक्रमे पूर्वः साहसदण्डः।

पाषण्डचण्डालानां श्मशानान्ते वासः।

कर्मान्तक्षेत्रवशेन वा कुटुम्बिनां सीमानं स्थापयेत्। तेषु पुष्पफलवाटषण्डकेदारान् धान्यपण्यनिचयांश्च अनुज्ञाताः कुर्युः, दशकुलीवाटं कूपस्थानम्। सर्वस्नेहधान्यक्षारलवणभैषज्यशुष्कशाकयवसवल्लूरतृणकाष्ठलोहचर्माङ्गारस्नायुविषविषाणवेणुवल्कलसारदारुप्रहरणावरणाश्मनिचयाननेकवर्षोपभोगसहान् कारयेत्। नवेनानवं शोधयेत्।

उत्तर इत्यादि। वर्णोत्तमानां शूद्राणाम्। वर्णोत्तराणामित्यपि पाठः। पूर्वः साहसदण्डः सार्धद्विशतपणलक्षणः।

पाषण्डेत्यादि। पाषण्डचण्डालानां कापालिकादीनां प्लवपुल्कसादीनां च।

कर्मान्तेत्यादि। कुटुम्बिनां दुर्गान्तवासयितव्यानां वर्णावराणां, कर्मान्तक्षेत्रवशेन कर्मनिर्वृत्तेः क्षेत्रस्य चानुरूप्येण, सीमानं तदुपयोक्तव्यक्षेत्रमर्यादां, स्थापयेत्। वाशब्दश्चस्थाने वाक्यभूषणम्। तेष्विति। तेषु क्षेत्रेषु पुष्पफलवाटषण्डकेदारान् पुष्पफलवाटः पुष्पफलदायकं वनं षण्डः पद्मादिसङ्घातः केदारो धान्योत्पादभूमिः एतान्, धान्यपण्यनिचयांश्च धान्यपण्यसंग्रहांश्च, अनुज्ञाताः कुर्युः, अर्थात् तत्कर्मार्हाः। ते च सीताध्यक्षो विवीताध्यक्षो दुर्गसीमवासिनः कुटुम्बिनश्च। दशकुलीत्यादि। दशकुलीवाटं मध्यमहलद्वयकर्षणीया भूमिः कुलं दशानां कुलानां समाहारो दशकुली। दशगवकृष्या भूमिरित्यपरे। तावत्प्रमाणं वाटं, कूपस्थानं कूपमातृकं, कुर्युः एकैकस्य दशकुलीवाटस्यैकैकं कूपं पोषणार्थं कुर्युरिति भावः। निचेतव्यद्रव्याण्याह — सर्वस्नेहेत्यादि। सर्वविधस्नेहादिद्वाविंशतिनिचयान् बहुवर्षोपभोगक्षमान् निवेशयेद् दुर्गेषु। तत्र शाकं वृक्षसम्बन्धि मूलपत्रकरीराग्रफलकाण्डाधिरूढकत्वक्पुष्पकवकात्मकं दशकम्। यवसं धान्यपलालम्। वल्लूरं शुष्कमांसम्। अङ्गारो निर्वाणाग्निकमिन्धनम्। स्नायुर्वस्नसा। प्रहरणं खड्गादि। स्पष्टमन्यत्। नवेनेति। नवेन अनवं शोधयेत् नूतने यथोक्तद्रव्यजाते लब्धे पुराणं तद् व्यययेत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हस्त्यश्वरथपादातमनेकमुख्यमवस्थापयेत् । अनेकमुख्यं हि परस्परभयात् परोपजापं नोपैतीति ।

एतेनान्तपालदुर्गसंस्कारा व्याख्याताः ।

न च बाहिरिकान् कुर्यात् पुरराष्ट्रोपघातकान् ।
क्षिपेज्जनपदस्यान्ते सर्वान् वा दापयेत् करान् ॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्थोऽध्यायः दुर्गनिवेशः, आदितः पञ्चविंशः ॥

हस्तीत्यादि । हस्त्यश्वरथपादातं चतुरङ्गं सैन्यम्, अनेकमुख्यम् अनेके मुख्या बलप्रधाना यस्मिंस्तत् तथाभूतम् , अवस्थापयेद् , दुर्गेषु । बलप्रधानानां बहुत्वे गुणमाह— **अनेकेत्यादि** । एकश्चेद् बलप्रधानः स समानपुरुषान्तराभावान्निर्भयो लोभादिना परोपजापमङ्गीकृत्य कृत्स्नं बलं स्वाधिष्ठीयमानं भेदयेत् , बहवश्चेद् बलप्रधानाः ते परस्पराभिशङ्किताः परोपजापं नोपगच्छेयुरिति बहुप्रधानाधिष्ठितं बलं पराभेद्यं भवतीति भावः ।

एतेनेति । एतेन यथोक्तेन पुरदुर्गसंस्कारविधिना, अन्तपालदुर्गसंस्काराः व्याख्याताः जनपदसीमापालाधिष्ठितानां दुर्गाणां गुणाधानान्युक्तप्रायाणि, ते पुरदुर्गसंस्कारवद् विधातव्या इत्यर्थः ।

अध्यायान्ते श्लोकमाह — **न चेति** । बाहिरिकान् कितववञ्चकनटनर्तकादीन् , न च कुर्यात् पुरे नैव वासयेदित्यर्थः, अर्थाद् राजा । तत्र हेतुसमर्पकं विशेषणं पुरराष्ट्रोपघातकानिति, यतस्ते पौरान् जानपदांश्च कापथप्रवर्तनयोपघ्नन्ति तस्मादित्यर्थः । यदि वासयेत् तदा विधिमाह— जनपदस्य, अन्ते सीमायाम् 'जनपदे चैतानि'त्यपपाठः । क्षिपेद् वासयेद्, बाहिरिकान् । सर्वान् वा सर्वानिव जनपदान्तवास्तव्यानन्यान् कौटुम्बिकानिवेत्यर्थः, करान् दापयेद् बाहिरिकान् । इहाणिकर्तॄणां बाहिरिकाणां णौ कर्मत्वमपाणिनीयं, जल्पतिप्रभृतित्वकल्पनया वा ददातेरौपसंख्यानिकं तत् साध्यम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्थोऽध्यायः दुर्गनिवेशः, आदितः पञ्चविंशः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

२३. प्रक. सन्निधातृनिचयकर्म ।

सन्निधाता कोशगृहं पण्यगृहं कोष्ठागारं कुप्यगृहमायुधागारं बन्धनागारं च कारयेत् ।

चतुरश्रां वापीमनुदकोपस्नेहां खानयित्वा पृथुशिलाभिरुभयतः पार्श्वं मूलं च प्रचित्य सारदारुपञ्जरं भूमिसमत्रितलमनेकविधानं कुट्टिमदेशस्थानतलमेकद्वारं यन्त्रयुक्तसोपानं देवतापिधानं भूमिगृहं कारयेत् । तस्योपर्युभयतोनिषेधं सप्रग्रीवमैष्टकं भाण्डवाहिनीपरिक्षिप्तं कोशगृहं कारयेत् प्रासादं वा । जनपदान्ते ध्रुवनिधिमापदर्थमभित्यक्तैः पुरुषैः कारयेत् ।

सन्निधातृनिचयकर्मेति सूत्रम् । सन्निधाता द्रव्यं सञ्चित्य निधाता भाण्डागाराधिपतिः तस्य निचयकर्म द्रव्यसंग्रहरक्षणकर्म, तदिहोच्यत इति सूत्रार्थः । निचेयद्रव्यप्रसङ्गान्निचेतृव्यापाराभिधानम् ।

सन्निधातेति । सन्निधाता, कोशगृहं रत्नस्वर्णादिनिधानस्थानं, पण्यगृहं विक्रेयद्रव्यनिवेशस्थानं, कोष्ठागारम् उदरोपयोगिधान्यस्नेहादिनिक्षेपस्थानं, कुप्यगृहं सारदारुवेणुवल्लीवर्गादिरक्षणस्थानम्, आयुधागारं, बन्धनागारं च कारागृहं च, कारयेत् ।

कोशगृहनिर्माणप्रकारमाह—**चतुरश्रामिति** । चतुरश्रां, वापीं तदाकारं गर्तम्, अनुदकोपस्नेहाम् उदकोपक्लेदरहितां, खानयित्वा, उभयतः समन्तात्, पार्श्वं मूलं च, पृथुशिलाभिः, प्रचित्य, सारदारुपञ्जरं सारदारुमयपञ्जरयुक्तं, भूमिसमत्रितलं भूमिसमानि भूम्यानुरूप्यनिर्मितानि त्रीणि तलानि उपरितलमध्यमतलाधस्तलानि यस्य तत् तथाभूतम्, अनेकविधानम् अनेकानि विधानानि कोष्ठकादिरचनाः यस्मिंस्तत् तथाभूतं, कुट्टिमदेशस्थानतलं देश उपरितलं स्थानं मध्यतलं तलम् अधोभूमिका इत्येतानि कुट्टिमानि दृढनिबद्धानि यस्य तत् तथाभूतम्, एकद्वारं, यन्त्रयुक्तसोपानं यन्त्रे युक्तानि यथावसरनिवेशनापसरणक्षमतया संश्लिष्टानि सोपानानि यस्य तत् तथाभूतं, देवतापिधानम् उत्कीर्णदेवताप्रतिमाङ्कं पिधानं दार्वादिमयमाच्छादनं यस्य तत् तथाभूतं, भूमिगृहं कारयेत् । **तस्येति** । तस्य भूमिगृहस्य, उपरि, उभयतोनिषेधं बहिरन्तश्चार्गलयुक्तं, सप्रग्रीवं प्रग्रीवेण मुखशालया सहितम्, ऐष्टकं पक्वेष्टकामयं, भाण्डवाहिनीपरिक्षिप्तं द्रव्याधारशालापरिवृतं, कोशगृहं प्रासादं वा उपरिगृहमिव कारयेत् । **जनपदेत्यादि** । आपदर्थं विपत्कालोपयोगार्थं,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

पक्वेष्टकास्तम्भं चतुश्शालमेकद्वारमनेकस्थानतलं विवृतस्तम्भापसारमुभयतः पण्यगृहं, कोष्ठागारं च, दीर्घबहुलशालं कक्ष्यावृतकुड्यमन्तः कुप्यगृहं, तदेव भूमिगृहयुक्तमायुधागारं, पृथग् धर्मस्थीयं महामात्रीयं विभक्तस्त्रीपुरुषस्थानमपसारतः सुगुप्तकक्ष्यं बन्धनागारं कारयेत्।

सर्वेषां शालाखातोदपानवच्च स्नानगृहाग्निविषत्राणमार्जारनकुलारक्षाः स्वदैवपूजनयुक्ताः कारयेत्।

ध्रुवनिधिम् अनपायनिधिकम् अर्थात् प्रासादं, जनपदान्ते, अभित्यक्तैः वध्यैः पुरुषैः, कारयेत्। वध्यपुरुषा हि राज्ञा यत्नरक्षिताः निधिगुप्तिस्थानविधानरहस्यं निर्माणकाले नोद्भिन्द्युः, निर्माणनिर्वृत्त्युत्तरकाले च सद्यो मारिता भवन्तीति सोऽयं ध्रुवनिधिरनन्यवेद्यो वेदितव्यः।

पण्यगृहादिविधिमाह—**पक्वे**त्यादि। पक्वेष्टकास्तम्भं पक्वेष्टकामयैः स्तम्भैर्युक्तं, चतुश्शालं चतस्रश्चतुर्दिग्गता अन्योन्यसम्मुखीनाः शाला यस्मिंस्तत् तथाभूतम्, एकद्वारम्, अनेकस्थानतलम् अनेकैः कोष्ठैर्भूमिकाभिश्च युक्तम्, उभयत उभयपार्श्वयोः, विवृतस्तम्भापसारं विवृतस्तम्भः विस्तृतस्तम्भः अपसारोऽलिन्दो यस्य तत् तथाभूतं, पण्यगृहं, कोष्ठागारं च कारयेत्। दीर्घबहुलशालं, कक्ष्यावृतकुड्यं कक्ष्याभिः प्रकोष्ठकैः वृतं परीतं कुड्यं यस्मिंस्तत् तथाभूतं, कुप्यगृहम्, अन्तः कारयेत्। भूमिगृहयुक्तं, तदेव कुप्यगृहमेव, आयुधागारं कारयेत्। बन्धनागारं, धर्मस्थीयं महामात्रीयं पृथक् कारयेद् धर्मस्थीयमित्येकं महामात्रीयमित्यपरं च प्रत्येकं निर्मापयेत्। तत्र धर्मस्था व्यवहारनिर्णेतारः तत्सम्बन्धि धर्मस्थीयं व्यवहारार्थमागतानामवस्थित्यर्थं व्यवहारपराजितनिरोधार्थं च स्थानमित्यर्थः। महामात्राः सन्निधातृसमाहर्तृप्रभृतयोऽर्थाधिकारिणः तत्सम्बन्धि महामात्रीयं विश्वासाधित्वेन गृहीतानां युद्धप्रगृहीतादीनां च जनानां निवेशस्थानमित्यर्थः। बन्धनागारं कीदृशं, विभक्तस्त्रीपुरुषस्थानम्, अपसारतः सुगुप्तकक्ष्यम् अपसरणमार्गमनुसृत्य सुष्ठु रक्षितकक्ष्यम्।

सर्वेषामिति। सर्वेषां कोशगृहादीनां षण्णां, शालाखातोदपानवत् शालापरिखाकूपैस्तुल्यं स्नानगृहाग्निविषत्राणमार्जारनकुलारक्षाः स्नानगृहम् अग्नित्राणं मानुषाग्निना त्रिरपसव्यपरिगमनरूपं निशान्तप्रणिध्युक्तं विषत्राणं मार्जारनकुलौ विषत्राणभूतौ मार्जारनकुलौ वा आरक्षा रक्षिपुरुषैर्गुप्तिं च, स्वदैवपूजनयुक्ताः स्वस्वदैवतार्चनयुक्ताः, कारयेत्। तत्र कोशगृहस्य धनदो देवता, पण्यकोष्ठागारयोः श्रीदेवी, कुप्यगृहस्य विश्वकर्मा, आयुधबन्धनागारयोर्यमवरुणाविति विवेकः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कोष्ठागारे वर्षमानमरत्निमुखं कुण्डं स्थापयेत् ।

तज्जातकरणाधिष्ठितः पुराणं नवं च रत्नं सारं फल्गु कुप्यं वा प्रतिगृह्णीयात् । तत्र रत्नोपधावुत्तमो दण्डः कर्तुः कारयितुश्च, सारोपधौ मध्यमः, फल्गुकुप्योपधौ तच्च तावच्च दण्डः ।

रूपदर्शकविशुद्धं हिरण्यं प्रतिगृह्णीयाद्, अशुद्धं छेदयेत् । आहर्तुः पूर्वः साहसदण्डः ।

शुद्धं पूर्णमभिनवं च धान्यं प्रतिगृह्णीयात् । विपर्यये मूलद्विगुणो दण्डः ।

तेन पण्यं कुप्यमायुधं च व्याख्यातम् ।

सर्वाधिकरणेषु युक्तोपयुक्ततत्पुरुषाणां पणद्विपणचतुष्पणाः, परमपहारेषु पूर्वमध्यमोत्तमवधा दण्डाः ।

कोष्ठेत्यादि । कोष्ठागारे, वर्षमानं वर्षं वृष्टिर्मीयतेऽनेनेति तथाभूतम्, अरत्निमुखम् अरत्निचतुरश्रमुखं, कुण्डं गर्तं, स्थापयेत् खानयेत् ।

तज्जातेत्यादि । पुराणं नवं च, विविच्येति शेषः, रत्नं मणिमुक्तादिकं, सारं चन्दनादि, फल्गु वस्त्रादि, कुप्यं वा दारुचर्मवेणुवल्ककोष्ठोपकरणादिकं वा, तज्जातकरणाधिष्ठितः रत्नादितद्वस्तुव्यवहारिवंश्यैः कायस्थैश्चोपेतः सन्, प्रतिगृह्णीयात् संगृह्णीयात् । तत्रेति । तत्र, रत्नोपधौ निर्गुणरत्नं प्रतिनिधाय गुणवद्रत्नहरणे, कर्तुः कारयितुश्च, उत्तमो दण्डः पणसाहस्ररूप उत्तमसाहसः । सारोपधौ, मध्यमः मध्यमसाहसः । फल्गुकुप्योपधौ, तच्च तावच्च दण्डः यद् द्रव्यं हृतं तच्च तत्समपरिमाणं तज्जातीयमपरं चेत्युभयं दण्डो भवति ।

रूपेत्यादि । हिरण्यं प्रणीतमुद्राङ्कं स्वर्णं रजतं च दीनारादिकं, रूपदर्शकविशुद्धं रूपपरीक्षकमुखेन विज्ञातशुद्धिकं, प्रतिगृह्णीयात् । अशुद्धं कूटप्रणीतं, हिरण्यं, छेदयेद् भञ्जयेद् अपुनरुपयोगाय । आहर्तुः कूटहिरण्यानेतुः, पूर्वः साहसदण्डः ।

शुद्धमिति । शुद्धं निर्बुसं, पूर्णम् अनूनमानम्, अभिनवं च धान्यं, प्रतिगृह्णीयाद्, धान्यग्रहणाधिकृतः । विपर्यये अतथाविधधान्यप्रतिग्रहे, मूलद्विगुणो दण्डः ।

पण्यकुप्यायुधप्रतिग्रहेऽपि धान्योक्त एव न्याय इत्याह — तेनेत्यादि ।

सर्वेत्यादि । सर्वाधिकरणेषु सर्वेष्वधिकारस्थानेषु, युक्तोपयुक्ततत्पुरुषाणां युक्तः प्रधानः उपयुक्तस्तत्सहकारी तत्पुरुषाः तयोरधश्चराः तेषां, पणद्विपण-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कोशाधिष्ठितस्य कोशावच्छेदे घातः। तद्वैयावृत्त्यकाराणामर्धदण्डः। परिभाषणमविज्ञाते। चोराणामभिप्रधर्षणे चित्रो घातः।

तस्मादाप्तपुरुषाधिष्ठितः सन्निधाता निचयाननुतिष्ठेत्।
बाह्यमाभ्यन्तरं चायं विद्याद् वर्षशतादपि।
यथा पृष्टो न सज्जेत व्ययशेषं च दर्शयेत्॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चमोऽध्यायः सन्निधातृनिचयकर्म,
आदितः षड्विंशः॥

चतुष्पणाः एकः पणः द्वौ पणौ चत्वारः पणाश्च, दण्डाः, अपहारेषु पूर्वोक्तजातीयेषु। परमपहारेषु सकृद्दण्डनात् परतोऽपहारेषु, पूर्वमध्यमोत्तमवधा दण्डाः पूर्वसाहसो मध्यमसाहस उत्तमसाहसो वधश्च दण्डाः। तत्राद्यास्त्रयो दण्डा यथाक्रमं प्रयोक्तव्याः, वधदण्डस्तु ततोऽपि परस्तादपहारेषु प्रयोक्तव्य इति बोद्धव्यम्।

कोशेत्यादि। कोशाधिष्ठितस्य कोशाधिष्ठातुः भाण्डागाराध्यक्षस्य, कोशावच्छेदे कोशस्य सुरुङ्गाद्युपायेनापहारे, घातः वधदण्डः। तद्वैयावृत्त्यकाराणां तस्य वैयावृत्त्यकाराः विशेषेण आ समन्ताद् वर्तत इति व्यावृत्तः परिचारकः तस्य कर्म वैयावृत्त्यं परिचर्या तत् कुर्वन्तः परिचारकाः तेषाम्, अर्धदण्डः। अविज्ञाते सति अर्थात् कोशाधिष्ठातृकृते कोशावच्छेदे, परिभाषणं तद्वैयावृत्त्यकाराणां सनिन्दोपालम्भः। **चोराणामिति**। चोराणाम् अभिप्रधर्षणे कुड्यसन्धिच्छेदादिना धनापहरणे, चित्रो घातः।

तस्मादित्यादि। स्पष्टम्।

बाह्यमिति। बाह्यं जनपदोत्थम्, आभ्यन्तरं नगरोत्थं च, आयं, विद्यात्, सन्निधाता। कथं विद्यात्, यथा वर्षशतादपि पृष्टः अतीतं वर्षशतमधिकृत्यापि आयं चोदितः, न सज्जेत न सक्तो भवेत् निष्प्रतिबन्धं ददेदित्यर्थः, व्ययशेषं दर्शयेच्च व्ययितावशिष्टं द्रव्यं दृष्टिगोचरं कारयेच्च, भाण्डागारे॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चमोऽध्यायः सन्निधातृनिचयकर्म,
आदितः षड्विंशः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२४. प्रक. समाहर्तृसमुदयप्रस्थापनम्।

समाहर्ता दुर्गं राष्ट्रं खनिं सेतुं वनं व्रजं वणिक्पथं चावेक्षेत ।

शुल्कं दण्डः पौतवं नागरिको लक्षणाध्यक्षो मुद्राध्यक्षः सुरा सूना सूत्रं तैलं घृतं क्षारः सौवर्णिकः पण्यसंस्था वेश्या द्यूतं वास्तुकं कारुशिल्पिगणो देवताध्यक्षो द्वारबाहिरिकादेयं च दुर्गम् ।

सीता भागो बलिः करो वणिक् नदीपालस्तरो नावः पट्टनं विवीतं वर्तनी रज्जूश्चोररज्जूश्च राष्ट्रम् ।

समाहर्तृसमुदयप्रस्थापनमिति सूत्रम् । समाहर्ता विषयबलयध्यक्षः तेन करणीयं समुदयप्रस्थापनं धनोत्पत्तिप्रवर्तनमुच्यत इति सूत्रार्थः । अर्थोपधाशुद्धः सन्निधातृकर्मणि समाहर्तृकर्मणि च नियोक्तव्य इत्युक्तं प्राक् । तद्व्यापार इदानीमभिधीयते ।

दुर्गादिसप्तकं समाहर्त्रा चिन्तनीयमित्याह— समाहर्तेत्यादि ।

दुर्गपदार्थं विवृणोति — शुल्कमित्यादि । शुल्कं घट्टदेयं, दण्डः दम उत्तमसाहसादिः, पौतवं तुलामानपरिच्छेदः, नागरिको नगराध्यक्षः, लक्षणाध्यक्षः क्षेत्रारामादिसीमाचिह्नाध्यक्षः, मुद्राध्यक्षः, सुरा मद्याध्यक्षः, सूना प्राणिवधाध्यक्षः, सूत्रं सूत्राध्यक्षः, तैलं तद्विक्रयी, घृतं तद्विक्रयी, क्षारः गुडविक्रयी, सौवर्णिकः सुवर्णनियुक्तः, पण्यसंस्था पण्यनिवेशशाला, वेश्याः, द्यूतं, वास्तुकम् आवसथनिर्मातारस्तक्षादयः, कारुशिल्पिगणः कारवः स्थूलशिल्पकाराः शिल्पिनः सूक्ष्मशिल्पकाराः तेषां गणः, देवताध्यक्षः देवालयकार्यधूर्वहः, द्वारबाहिरिकादेयं च द्वारबाहिरिकसम्बन्धि आदेयं पुरादिद्वारपालैर्भृतित्वेन ग्राह्यं बाहिरिकेभ्यो नटनर्तकादिभ्यो राज्ञा ग्राह्यं चेति यावत्, दुर्गं शुल्कादिद्वाविंशत्युपायलभ्यं द्रव्यं दुर्गशब्दितमित्यर्थः ।

सीतादित्रयोदशकं राष्ट्रशब्दितमित्याह — सीतेत्यादि । सीता कृषिः, भागः धान्यषड्भागः, बलिः उपहारः भिक्षा वा, करः फलवृक्षादिसम्बद्धं राजदेयं, वणिक् वणिग्द्वारेणादेयं, नदीपालः तीर्थरक्षकद्वारेणादेयं, तरः नदीतरणवेतनं, नावः नावध्यक्षद्वारलभ्यं, पट्टनम् अल्पनगरलभ्यं, विवीतं विवीताध्यक्षद्वारेणादेयं, वर्तनी मार्गः तल्लभ्यम् अर्थादन्तपालद्वारलभ्यं, रज्जूः विषयपालादेयमित्याहुः; चोररज्जूः चोरग्राहकाय ग्रामदेयमित्याहुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुवर्णरजतवज्रमणिमुक्ताप्रवालशङ्खलोहलवणभूमिप्रस्तररसधातवः खनिः।

पुष्पफलवाटषण्डकेदारमूलवापाः सेतुः।

पशुमृगद्रव्यहस्तिवनपरिग्रहो वनम्।

गोमहिषमजाविकं खरोष्ट्रमश्वाश्वतराश्च व्रजः।

स्थलपथो वारिपथश्च वणिक्पथः।

इत्यायशरीरम्। मूलं भागो व्याजी परिघः क्लृप्तं रूपिकमत्ययश्चायमुखम्।

खनिमाह — **सुवर्णे**त्यादि। वज्रः हीरकः, मणिर्मरतकादिः। भूमिधातुः प्रस्तरधातुः रसधातुश्च। स्पष्टमन्यत्। सुवर्णादिद्वादशकं खननलभ्यत्वात् खनिशब्दवाच्यम्।

सेतुमाह — **पुष्पे**त्यादि। पुष्पवाटः कुङ्कुमादिवनं, फलवाटः वार्ताकोर्वारुकादिवाटी, अनयोः पुष्पफलशब्दाभ्यां ग्रहणं वाटशब्देन तु इक्षुवाटस्य, षण्डं कदलीक्रमुकादि, केदारः धान्यक्षेत्रं, मूलवापः आर्द्रकहरिद्रालामज्जाद्युत्पत्तिस्थलम्। पुष्पवाटादयः षट् सेतुशब्दिताः।

वनमाह — **पशुमृगे**त्यादि। पशुवनमृगवनद्रव्यवनहस्तिवनानां परिग्रहो वनमिति शब्द्यत इत्यर्थः। तत्र पशुर्गवयादिः, मृगो हरिणादिः, द्रव्यं शाकतिनिशादि, हस्ती कालिङ्गादिः।

गवाद्यष्टकं व्रजशब्दितमित्याह — **गोमहिष**मित्यादि। अजाश्छागाः। अविका मेषाः। खराः गर्दभाः। अश्वतराः वेसराः। स्पष्टमन्यत्।

वणिक्पथं द्विविधमाह — **स्थले**त्यादि।

इतीति। इति आयशरीरम् उक्तसप्तषष्टिप्रकारं दुर्गादिसप्तकं धनागमस्थानम्। उक्त आयशरीरे मूलादिसप्तकं प्रधानत्वाद् मुखस्थानीयमित्याशयेनाह — **मूल**मित्यादि। मूलं धान्यफलादिविक्रयलब्धं धनम्। मूल्यमित्येव पाठः क्वचित्। भागः षड्भागः, व्याजी विंशतिभागः पुनर्माने मा भूदूनतेत्यधिकं गृह्यमाणः, परिघः आतरद्रव्यं, क्लृप्तम् अमुकग्रामस्यैतावदिति प्रतिनियतं हिरण्यं धान्यं च, रूपिकं लवणाध्यक्षेण तद्विक्रयिभ्यः प्रस्थशतस्याष्टशो गृह्यमाणो लवणभागः, अत्ययश्च अध्यक्षप्रचार-धर्मस्थीय-कण्टकशोधनोक्तविधया गृह्यमाणमपराधदण्डद्रव्यं च, आयमुखम्। अत्र संग्रहश्लोकान् पठन्ति —

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देवपितृपूजादानार्थं स्वस्तिवाचनमन्तःपुरं महानसं दूतप्रावर्तिमं कोष्ठागारमायुधागारं पण्यगृहं कुप्यगृहं कर्मान्तो विष्टिः पत्त्यश्वरथद्विपपरिग्रहो गोमण्डलं पशुमृगपक्षिव्यालवाटाः काष्ठतृणवाटश्चेति व्ययशरीरम् ।

राजवर्षं मासः पक्षो दिवसश्च व्युष्टम् । वर्षाहेमन्तग्रीष्माणां तृतीय

"शरीरं सप्तधायस्य तावन्त्येव मुखानि च ।
प्रभेदा. सप्तषष्टिः स्युर्व्यये द्वाविंशतिः स्थिताः ॥
द्वाविंशतिविधं दुर्गं राष्ट्रभेदास्त्रयोदश ।
खनिर्द्वादशधा तत्र सेतवश्चैव षड्विधाः ॥
वनं चतुर्विधं ज्ञेयं व्रजभेदोऽपि चाष्टधा ।
द्विधा वणिक्पथश्चैवं शरीरं सप्तषष्टिधा ॥" इति ।

अथ व्ययशरीरमाह—देवेत्यादि । देवपितृपूजादानार्थं देवपितृपूजादानप्रयोजनकं, तत्र देवपूजा देवाराधनं पितृपूजा श्राद्धकर्म दानं पर्वसु ब्राह्मणबालवृद्धातुरानाथादिभ्यो दीयमानं, स्वस्तिवाचनं शान्तिकपौष्टिकार्थे पुरोहिताय दीयमानम्, अन्तःपुरं देवीभोगिनीराजपुत्रेभ्यो देयं, महानसं पाकशालार्थो व्ययः, दूतप्रावर्तिमं दूतस्य परविषयगतागतप्रवर्तनार्थो व्ययः, कोष्ठागारं भोज्यद्रव्यावस्थानगृहं तन्निर्माणादिनिमित्तो व्ययः, आयुधागारम् आयुधनिर्माणशाला तद्रक्षणशाला च, पण्यगृहं पण्यगृहार्थो व्ययः, कुप्यगृहं तत्सम्बद्धं धनं शाकतिनिशादिसारदारुवेणुवल्लीवल्कादिच्छेदनानयनरक्षणादिविषयो व्यय इति यावत्, कर्मान्तः कृष्यादिव्यापारव्ययः, विष्टिः हठकारितकर्मार्थो व्ययः, पत्त्यश्वरथद्विपपरिग्रहः पत्त्यादिचतुष्टयार्थो व्ययः, गोमण्डलं गोमहिषमेषाद्यर्थो व्ययः, पशुमृगपक्षिव्यालवाटाः पशवो वन्यपशवः मृगा हरिणादयः पक्षिणः शुकशारिकादयः व्यालाः सिंहव्याघ्रादयः एषां वाटाः रक्षणस्थानानि तन्निमित्तो व्यय इत्यर्थः, काष्ठतृणवाटः काष्ठतृणवाटार्थो व्ययः, चशब्दादावश्यकव्ययान्तरपरिग्रहः, त एते द्वाविंशतिर्व्ययाः व्ययशरीरम् ।

राजेत्यादि । राजवर्षम् आ राजराज्याभिषेकादारब्धः संवत्सरः, मासः, पक्षः, दिवसश्च, व्युष्टं राजवर्षादिचतुष्टयं व्युष्टसंज्ञमित्यर्थः । एतच्च अमुकराजवर्षेऽमुकमासेऽमुकपक्षेऽमुकदिवसेऽमुकपुरुषेणानीतमेतावद् धनम्, अद्यामुकपुरुषायैतावद् दत्तमिति रीत्या निबन्धपुस्तकादिषु लेख्यमिति बोद्धव्यम् । वर्षाहेमन्तेत्यादेरयमर्थः—राजवर्षस्य त्रिधा विभक्तस्य सिंहकन्यातुलावृश्चिका-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सप्तमा दिवसोनाः पक्षाः, शेषाः पूर्णाः । पृथगधिमासक इति कालः ।

करणीयं सिद्धं शेषमायव्ययौ नीवी च ।

संस्थानं प्रचारः शरीरावस्थापनमादानं सर्वसमुदयपिण्डः सञ्जातम् एतत् करणीयम् ।

कोशार्पितं राजहारः पुरव्ययश्च प्रविष्टं, परमसंवत्सरानुवृत्तं शासनमुक्तं मुखाज्ञप्तं चापातनीयम्, एतत् सिद्धम् ।

सिद्धिप्रकर्मयोगः दण्डशेषमाहरणीयं, बलात्कृतप्रतिस्तब्धमवसृष्टं च प्रशोध्यम्, एतच्छेषमसारमल्पसारं च ।

श्चत्वारो रविमासा वर्षर्तुरित्येको भागः, धनुर्मकरकुम्भमीनाख्याश्चत्वारो हेमन्त इति द्वितीयः, मेषवृषभमिथुनकुलीराख्याश्चत्वारो ग्रीष्म इति तृतीयः इत्येतेषां त्रयाणां भागानां ये प्रत्येकमष्टौ पक्षास्तेषु तृतीयपक्षे सप्तमपक्षे चैकैको दिवसो हीयते, अवशिष्टास्तु पक्षा अनूनदिवसा इति । **पृथगिति** । अधिमासकः अधिकः सौरमासादतिरिक्तः शुक्लप्रतिपदादिर्दर्शावसानश्चान्द्रो मासः, पृथग्, इति कालः उक्तप्रकारो व्यवहारार्थः कालो विज्ञेयः ।

करणीयादिषट्कमुद्दिशति — **करणीयमित्यादि** ।

करणीयं षड्विधमाह — **संस्थानमित्यादिना** । तत्र संस्थानम् अमुकग्रामादियदादेयमिति क्लृप्तिः, प्रचारो देशः, शरीरावस्थापनं जनपदनगरयोरायशरीरमेतावदिति निश्चयः, आदानं धान्यहिरण्यादेर्यथाकालग्रहणं, सर्वसमुदयपिण्डः सर्वेषां समुदयानां पिण्डः प्रतिग्रामं प्रतिनगरं चोत्पन्नानां धनानां सङ्घातः तज्ज्ञानमित्यर्थः, सञ्जातं सर्वोपायलब्धधनेयत्ताज्ञानम्, एतद् उक्तं षट्कं, करणीयम् अवश्यकार्यत्वात् करणीयशब्दितम् ।

सिद्धमाह—**कोशेत्यादि** । कोशार्पितं भाण्डागारिकहस्तेऽर्पितं, राजहारः राज्ञा स्वीयकार्यार्थं समाहर्तृसकाशाद् गृहीतं, पुरव्ययश्च पुरे शालानिर्माणाद्यर्थं व्ययितं धनं च, प्रविष्टं प्रविष्टशब्दितम् । परमसंवत्सरानुवृत्तम् अतीतवर्षसम्बद्धमप्रविष्टतया स्थितं, शासनमुक्तं राजाज्ञालेखनिरस्तं, मुखाज्ञप्तं राजवाग्विश्राणितं च, आपातनीयम् आपातनीयशब्दितं समुदयाद् व्यवकलनीयमिति कृत्वा । एतत् प्रविष्टत्रिकमापातनीयत्रिकं चेत्युभयरूपं षट्कं, सिद्धं सिद्धशब्दितम् ।

षड्विधं शेषमाह—**सिद्धीत्यादि** । सिद्धिप्रकर्मयोगः सिद्धौ सिद्धधान्यादौ प्रकर्मयोगः स्वायत्तीकरणप्रवृत्तिरदत्तकरप्रवेशनार्था, दण्डशेषं सैन्योपयु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वर्तमानः पर्युषितोऽन्यजातश्चायः। दिवसानुवृत्तो वर्तमानः। परमसांवत्सरिकः परप्रचारसङ्क्रान्तो वा पर्युषितः। नष्टप्रस्मृतमायुक्तदण्डः पार्श्वं पारिहीणिकमौपायनिकं डमरगतकस्वमपुत्रकं निधिश्चान्यजातः। विक्षेपव्याधितान्तरारम्भशेषश्च व्ययप्रत्यायः। विक्रये पण्यानामर्घवृद्धिरुपजा मानोन्मानविशेषो व्याजी क्रयसङ्घर्षे वा वृद्धिरित्यायः।

क्तावशिष्टद्रव्यं च, आहरणीयं सुखेनाहर्तुं शक्यत्वादाहरणीयसंज्ञम्। बलात्कृतप्रतिस्तब्धं राजवल्लभाद्याश्रयबलाददत्तं देयं प्रतिस्तब्धापरपर्यायम्, अवसृष्टं च पुरमुख्यैः कामचारादत्तं च, प्रशोध्यं प्रयत्नसाध्यत्वात् प्रशोध्यसंज्ञम्। एतदुक्तमाहरणीयद्विकं प्रशोध्यद्विकं चेतीदं चतुष्टयमित्यर्थः, असारं प्रवेशनार्थे कृतेऽपि व्यये निष्फलम्, अल्पसारं च बहुव्ययसाध्याल्पफलं च, शेषं तत्संज्ञम्।

आयं त्रेधा विभज्य व्युत्पादयति— **वर्तमान** इति। आयः, वर्तमानः पर्युषितः अन्यजातश्च इति त्रिविधः। तत्र दिवसानुवृत्तः नित्यः, वर्तमानः। परमसांवत्सरिकः अतीतवर्षग्राह्यः वर्तमानवर्षे गृहीतः, परप्रचारसंक्रान्तः भूतपूर्वाध्यक्षकालप्रविष्टः यद्वा शत्रुविषयादागतः, वाशब्दः समुच्चये, पर्युषितः तदाख्यः। नष्टप्रस्मृताद्यष्टकमन्यजात इत्याह— **नष्टेत्यादि**। नष्टप्रस्मृतं विस्मृताभिज्ञातमिति भाषाटीका। प्रशब्द इह प्रकर्षे न तु धात्वर्थविपरीतत्वे इति तत्पक्षे वक्तव्यम्। नष्टमपगतं प्रस्मृतं विस्मृतमिति तु कोष्ठागाराध्यक्षप्रकरणे भट्टस्वामी। आयुक्तदण्डः तत्तत्कार्याध्यक्षेभ्योऽपराधिभ्यो गृहीतो दण्डः, पार्श्वं करातिरेचनलक्षणवक्रोपायलब्धं धनम्। प्रभुत्वाधिगम्यमिति केचित्। पारिहीणिकं चतुष्पदविनाशितसस्यदण्डाधिगम्यं धनम्, औपायनिकम् उपायनत्वेन गृहीतं, डमरगतकस्वं डमरः शत्रुकलहविप्लवः तदवसरे शत्रुसैन्यादपहृतं धनम्, अपुत्रकम् अविद्यमानदायादकं धनं, निधिश्च निधिलाभश्च, अन्यजातः अष्टावेतेऽन्यजातशब्दिताः। आयस्य प्रकारान्तरमाह — **विक्षेपेत्यादि**। विक्षेपव्याधितान्तरारम्भशेषश्च विक्षेपशेषः किञ्चित्कार्यसाधनाय नियुक्तस्य सैन्यस्यार्थे व्ययितावशिष्टं धनं व्याधितशेषः भेषजशालाव्ययितशिष्टम् अन्तरारम्भशेषः दुर्गप्रासादादिनिमित्तव्ययितावशिष्टम् इत्येतत् त्रिकं, व्ययप्रत्यायः तदाख्ययोच्यते। पुनरप्यायस्य पाञ्चविध्यमाह — **विक्रय** इत्यादिना। विक्रये पण्यानामर्घवृद्धिः क्रयाभ्यधिकेन मूल्येन पण्यविक्र-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नित्यो नित्योत्पादिको लाभो लाभोत्पादिक इति व्ययः । दिवसानुवृत्तो नित्यः । पक्षमाससंवत्सरलाभो लाभः । तयोरुत्पन्नो नित्योत्पादिको लाभोत्पादिक इति ।

व्ययसंजातादायव्ययविशुद्धा नीवी प्राप्ता चानुवृत्ता चेति ।

याल्लब्धमधिकं धनं विक्रेतृसकाशादुपस्थापितम्, उपजा प्रतिषिद्धविक्रयलब्धं, मानोन्मानविशेषः मानोन्मानयोर्विशेषकरणेन मेयाधिक्यसम्पादनाल्लब्धं, व्याजी विंशतिभागः पुनर्मीयमानमेयोनतापरिहारार्थमधिकतया गृह्यमाणः, क्रयसंघर्षे वृद्धिः स्पर्धया मूल्यवर्धनाल्लब्धं, वाशब्दश्चकारार्थः । इत्यायः उक्तप्रकारेणायो व्याख्यातः । भाषाटीका तु नष्टप्रस्मृतादिकमन्तरारम्भशेषान्तमेकादशकमन्य-जातभेद इति, व्ययप्रत्यायादिषट्कमायस्य प्रकारान्तरमिति च व्याचष्टे । तत्तु 'विक्षेपव्याधितान्तरारम्भशेषं च व्ययप्रत्यायः' इति कोष्ठागाराध्यक्षवक्ष्य-माणग्रन्थेन विरुध्यते ।

अथ व्ययमाह—**नित्य** इति । नित्यो नित्योत्पादिकः लाभो लाभो-त्पादिक इति चतुर्विधो व्ययः । तत्र दिवसानुवृत्तः प्रात्यहिको व्ययः नित्यः । **पक्षमाससंवत्सरलाभ** इति तादर्थ्यात् ताच्छब्द्यं, पक्षलाभार्थो मासलाभार्थः संवत्सरलाभार्थश्च व्ययः, लाभः लाभशब्दितः । तयोर्नित्यलाभयोः, उत्पन्नः तत्र नित्योत्पन्नो लाभोत्पन्नश्च व्ययः, नित्योत्पादिको लाभोत्पादिक इति व्यप-दिश्यत इति शेषः । यथाक्रमं च संबन्धः । क्लृप्तवेतनातिरेकेण एतावतो नित्यव्ययस्यैतावदिति विशेषतः कर्मकरेभ्यो यद् दीयते स व्ययो नित्यव्य-योत्पन्नत्वान्नित्योत्पादिकशब्दितः, एतावतो लाभनिमित्तव्ययस्यैतावदिति विशे-षतस्तेभ्यो यद् दीयते स लाभाख्यव्ययोत्पन्नत्वाल्लाभोत्पादिकशब्दित इति विवेक्तव्यम् ।

सर्वव्ययावशेषो नीवीत्याह—**व्ययेत्यादि** । व्ययसञ्जाताद् व्ययसमष्टेः सर्वव्ययद्वारेभ्य इत्यर्थः, उत्थितेति शेषः, आयव्ययविशुद्धा आयव्ययस-म्यग्गणनपरिनिश्चिता, नीवी नीवीशब्दितं द्रव्यमित्यर्थः । सा च द्विप्रकारा प्राप्ता चानुवृत्ता चेति । तत्र प्राप्ता भाण्डागारं प्रविष्टा, अनुवृत्ता तत्प्रवेशाय प्रस्थितेति ज्ञेयम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं कुर्यात् समुदयं वृद्धिं चायस्य दर्शयेत् ।
ह्रासं व्ययस्य च प्राज्ञः साधयेच्च विपर्ययम् ॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे षष्ठोऽध्यायः
समाहर्तृसमुदयप्रस्थापनम्, आदितः सप्तविंशः ।

अध्यायान्ते श्लोकमाह — एवमिति । एवम् उक्तैः प्रकारैः, समुदयं धनोत्पत्तिं, कुर्यात्, आयस्य वृद्धिं च, व्ययस्य ह्रासं च दर्शयेत्, समाहर्ता। स कीदृशः, प्राज्ञः प्रजानुपपीडयायवृद्धिप्रदर्शने कर्मकरानुपपीडया व्ययह्रासप्रदर्शने च निपुणः । विपर्ययं च साधयेत् आयव्यययोर्वृद्धिह्रासवैपरीत्यं यदि यदृच्छयोपनमेत् तदपि वारयेदित्यर्थः, यद्वा विपर्ययं व्ययवृद्धिमपरिहार्यतया प्रसक्तां कालान्तरभाव्यायवृद्ध्युपायनिश्चयेन समर्थयेदपीत्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे षष्ठोऽध्यायः
समाहर्तृसमुदयप्रस्थापनम्, आदितः सप्तविंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२५. प्रक. अक्षपटले गाणनिक्याधिकारः।

अक्षपटलमध्यक्षः प्राङ्मुखमुदङ्मुखं वा विभक्तोपस्थानं निबन्धपुस्तकस्थानं कारयेत्।

तत्राधिकरणानां सङ्ख्याप्रचारसञ्जाताग्रं, कर्मान्तानां द्रव्यप्रयोगे वृद्धिक्षयव्ययप्रयामव्याजीयोगस्थानवेतनविष्टिप्रमाणं, रत्नसार-

---

अक्षपटले गाणनिक्याधिकार इति सूत्रम्। अक्षपटले अक्षाणां द्रव्याणां पटले गणनपुस्तकलेखनादिकर्मानुष्ठानदेशे, गाणनिक्याधिकारः गाणनिका गणननियुक्तास्तेषां कर्म गाणनिक्यं तस्याधिकारः प्रस्ताव इह क्रियत इति सूत्रार्थः। अर्थोपधाशुद्धा अर्थसम्बद्धे कर्मणि नियोक्तव्या इत्युक्तमधस्तात्। स पुनरर्थव्यापार इदानीमभिधीयत इति सम्बन्धः।

अक्षेत्यादि। अध्यक्षः आयुक्तप्रधानः, अक्षपटलं तत्तदध्यक्षाणां सम्भूयस्वस्वकर्मानुष्ठानदेशं कारयेत्। कीदृशं, प्राङ्मुखमुदङ्मुखं वा, दिग्द्वयोपादानं तन्मुखस्य माङ्गलिकत्वद्योतनायातादृशस्य वैपरीत्यद्योतनाय च। पुनः कीदृशं, विभक्तोपस्थानं विभक्तानि उत्तममध्यमाधमानामध्यक्षाणां पृथक्स्थित्यनुकूलतया विभज्य विहितानि उपस्थानान्यन्तःकक्ष्याः यस्मिंस्तत् तथाभूतम्। पुनः कथम्भूतं, निबन्धपुस्तकस्थानं गणकपुस्तकनिवेशाधिष्ठानभूतम्।

निबन्धपुस्तकेषु लेखनीयं वस्तुजातमाह—तत्रेति। तत्र अक्षपटले, अधिकरणानां संख्याप्रचारसञ्जाताग्रं द्रव्योत्पत्तिस्थानानां संख्यां नामतः परिगणनं प्रचारसञ्जातयोरग्रं च प्रचारो जनपदः सञ्जातं सर्वोत्पत्तिसमुदायः तयोरियत्तां च, निबन्धपुस्तकस्थं कारयेत् एतावद्भ्य उत्पत्तिस्थानेभ्य इयत्परिमाणे जनपदे प्रत्यब्दमेतावद् धनमुत्पद्यत इति निबन्धपुस्तके लेखयेदित्यर्थः। कर्मान्तानां द्रव्यप्रयोगे कर्मान्ताः खनिधान्योत्पत्तिभूमिपण्यरूप्यादिकर्मस्थानानि तत्सम्बद्धे द्रव्यप्रयोगे तत्तत्कर्मकरेभ्यो द्रव्याणां विनियोग इत्यर्थः, वृद्धिक्षयव्ययप्रयामव्याजीयोगस्थानवेतनविष्टिप्रमाणं वृद्धिक्षयव्ययादीनामष्टानां प्रमाणं च, निबन्धपुस्तकस्थं कारयेत्। तत्र वृद्धिः कुसीदं, क्षयः युग्यपुरुषविनियोगः, व्ययः धान्यहिरण्यविनियोगः, प्रयामः सिद्धधान्यराशिः क्रयादरो वा, व्याजी तुलादण्डसम्बद्धा दण्डव्याजी प्रस्थमानसम्बद्धा मानव्याजी चेत्युभयविधा, योगो द्रव्यापद्रव्यमिश्रणं, स्थानं ग्रामादिकं, वेतनं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

फल्गुकुप्यानामर्घप्रतिवर्णकप्रतिमानमानोन्मानभाण्डं, देशग्रामजातिकुलसङ्घानां धर्मव्यवहारचारित्रसंस्थानं, राजोपजीविनां प्रग्रहप्रदेशभोगपरिहारभक्तवेतनलाभं, राज्ञश्च पत्नीपुत्राणां रत्नभूमिलाभं निर्देशौत्पादिकप्रतीकारलाभं, मित्रामित्राणां च सन्धिविक्रमप्रदानादानं निबन्धपुस्तकस्थं कारयेत् ।

ततः सर्वाधिकरणानां करणीयं सिद्धं शेषमायव्ययौ नीवीम्

कर्मकरभृतिः, विष्टिः बलकारितं कर्म । रत्नसारफल्गुकुप्यानामर्घप्रतिवर्णकप्रतिमानमानोन्मानभाण्डं रत्नादीनां चतुर्णामर्घादिषट्कं, निबन्धपुस्तकस्थं कारयेत् । तत्र अर्घं मूल्यं, प्रतिवर्णको वर्णगुणः, प्रतिमानं माषगुञ्जादि, मानम् आकृतिपरिच्छेदः, उन्मानमूर्ध्वमानं, भाण्डं मूलधनम् । देशग्रामजातिकुलसङ्घानां देशः पूर्वदेशमध्यमदेशादिः ग्रामः प्रसिद्धः जातिर्ब्राह्मणादिः कुलं गोत्रं सङ्घगणः एषां पञ्चानां, धर्मव्यवहारचारित्रसंस्थानं धर्मः यजनादिः स्मृत्युक्तः व्यवहारो दायभागः चारित्रं समुदाचारो देशादिप्रतिनियतो मातुलकन्यापरिणयादिलक्षणः तेषां संस्थानमविचलनं यद्वा स्वरूपं, निबन्धपुस्तकस्थं कारयेत् । राजोपजीविनां, प्रग्रहप्रदेशभोगपरिहारभक्तवेतनलाभं प्रग्रहः पूजा मन्त्रिपुरोहितादीन् प्रति प्रत्युद्गमनबहुमानः प्रदेशो वासस्थानं भोग उपायनं परिहारः करमुक्तिः भक्तम् अश्वगजपदात्यभ्यवहारः वेतनं भृतिः इत्येषां लाभं, निबन्धपुस्तकस्थं कारयेत् । राज्ञः, पत्नीपुत्राणां च पत्नीनां पुत्राणां च, रत्नभूमिः लाभं तदुपयुज्यमानानां रत्नानां भूमीनां स्थानीयादीनां च लाभं, निबन्धपुस्तकस्थं कारयेत् । निर्देशौत्पादिकप्रतीकारलाभं निर्देशं राजतत्पत्नीपुत्राणां नित्यदेयातिरिक्तं देयं सामन्तव्यपदेशाख्यम् औत्पादिकलाभम् उत्सवादिभवं धनलाभं प्रतीकारलाभं व्याध्यादिप्रशमननिमित्तं धनलाभं च, निबन्धपुस्तकस्थं कारयेत् । औत्पत्तिकेति पाठे भूकम्पनिर्घाताद्युत्पातदोषशान्त्यर्थं धनलाभमित्यर्थो बोद्धव्यः । मित्रामित्राणां, सन्धिविक्रमप्रदानादानं च मित्रेषु सन्धाय प्रदीयमानं धनम् अमित्रेषु विक्रम्य विगृह्य आदीयमानं धनं च, निबन्धपुस्तकस्थं कारयेत् ।

तत इति । सर्वाधिकरणानां सर्वेषां कर्मस्थानानाम् अर्थात् तदध्यक्षाणां, करणीयं सिद्धं शेषम् आयव्ययौ नीवीं करणीयादिषट्कं पूर्वाध्यायो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपस्थानं प्रचारचरित्रसंस्थानं च निबन्धेन प्रयच्छेत् । उत्तममध्यमावरेषु च कर्मसु तज्जातिकमध्यक्षं कुर्यात्, सामुदायिकेष्ववक्लृप्तिकं यमुपहत्य न राजानुतप्येत ।

सहग्राहिणः प्रतिभुवः कर्मोपजीविनः पुत्रा भ्रातरो भार्या दुहितरो भृत्याश्चास्य कर्मच्छेदं वहेयुः ।

त्रिशतं चतुःपञ्चाशच्चाहोरात्राणां कर्मसंवत्सरः । तमाषाढीपर्य-

---

क्तलक्षणम्, उपस्थानं कायस्थानां स्वस्वकार्यदर्शनार्थसन्निधानकालं, प्रचारचरित्रसंस्थानं च प्रचारो जनपदः चरित्रमाचारः संस्थानं पूर्वस्थितिरित्येतत्त्रिकं च, निबन्धेन प्रयच्छेत् निबन्धपुस्तके विलिख्य दद्यात् । **उत्तमे**त्यादि । उत्तममध्यमावरेषु कर्मसु, तज्जातिकं तदनुरूपम्, अध्यक्षं कुर्यात । तत्रोत्तमं कर्म धनसंग्रहणं भाण्डागाराधिकारश्च, मध्यमं कोष्ठागारायुधागारादिगतं कर्म, अवरं सुरासूनाद्यध्यक्षकर्म । तज्जातिकानां बहुत्वे व्यवस्थार्थमाह— **सामुदायिकेष्वि**ति । सामुदायिकेषु एककर्मसाधकसमुदायान्तर्गतेषु बहुषु कर्मकरेषु मध्ये, अवक्लृप्तिकम् अवक्लृप्तिर्नाम असावदः कर्माध्यक्षयितुं क्षम इति नैपुणगुणकीर्त्युपलम्भमूला सम्भावना सास्मिन्नस्तीत्यवक्लृप्तिकस्तं यथोक्तसम्भावनाविषयमित्यर्थः । अयमभिप्रायः — कर्मकरेषु नैपुणयुक्तं समनैपुणेषु गुणयुक्तं समगुणेषु च कीर्तियुक्तमध्यक्षं कुर्यादिति । अवक्लृप्तिकमपि किं सर्वमेवाध्यक्षं कुर्यात्, नेत्याह—**यमुपहत्य न राजानुतप्येते**ति । राजा, यम् उपहत्य अपराधवशाद् दण्डयित्वा, नानुतप्येत पश्चात्तप्तो न भवेत्, तं तथाविधमवक्लृप्तिकमध्यक्षं कुर्यादिति सम्बन्धः । एतेन ब्राह्मणात्मबन्धुमहासम्बन्धिनां व्युदासः सिद्धः ।

अपचरदध्यक्षविषयं सामान्यन्यायमाह — **सहग्राहिण** इति । अस्य कर्मच्छेदम् अनेनाध्यक्षेणादत्तं देयशेषं, सहग्राहिणः सहहर्तारः, प्रतिभुवो लग्नकाः, कर्मोपजीविनः कर्मकराः संख्यायकाः, पुत्राः, भ्रातरः, भार्याः, दुहितरः, भृत्याश्च इत्येतेऽष्टौ, वहेयुः प्रापयेयुः पूर्वपूर्वाभावे यथोत्तरं दद्युरित्यर्थः ।

त्रिशतमिति । अहोरात्राणां त्रिशतं चतुष्पञ्चाशच्च कर्मसंवत्सरः चतुष्पञ्चाशदधिकत्रिशतसंख्याका दिवसाः सर्वकर्मविषय एकः संवत्सरो गण्यते । तत्र दिवसषट्कोनता ऋतावृतावेकदिवसह्रासाद् बोद्धव्या । तं कर्मसंवत्सरम् आषाढीपर्यवसानं दद्यात् आषाढमासपूर्णिमान्तम् अर्थाच्छ्रावण-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वसानमूनं पूर्णं वा दद्यात् । करणाधिष्ठितमधिमासकं कुर्यात् । अपसर्पाधिष्ठितं च प्रचारम् । प्रचारचरित्रसंस्थानान्यनुपलभमानो हि प्रकृतः समुदयमज्ञानेन परिहापयति, उत्थानक्लेशासहत्वादालस्येन, शब्दादिष्विन्द्रियार्थेषु प्रमादेन, सङ्क्रोशाधर्मानर्थभीरुर्भयेन, कार्यार्थिष्वनुग्रहबुद्धिः कामेन, हिंसाबुद्धिः कोपेन, विद्याद्रव्यवल्लभापाश्रयाद् दर्पेण, तुलामानतर्कगणिकान्तरोपधानाल्लोभेन ।

तेषामानुपूर्व्या यावानर्थोपघातः तावानेकोत्तरो दण्ड इति

मासोपक्रमं कल्पयेत् । ऊनं पूर्णं वा दद्यात् तं चाध्यक्षस्यान्तरालकालापगमे तावत्पर्यन्तमपूर्णं गणयेत्, पूर्णकालस्थितिपक्षे तु पूर्णं गणयेत कर्मभृतिशोधनादावित्यर्थः । अधिमासकं करणाधिष्ठितं गणकाधिष्ठितं गणकद्वारेण गणितं, कुर्यात् । प्रचारं च जनपदं च, अपसर्पाधिष्ठितं चारावेक्षितं, कुर्यात् । अपसर्पाप्रणिधाने दोषमाह—**प्रचारेत्यादि** । प्रचारचरित्रसंस्थानानि देशवृत्तान्तान् तत्पूर्वस्थितीश्च, अनुपलभमानः अपसर्पद्वारेणाविजानन्, प्रकृतः अध्यक्षः, अज्ञानेन हेतुना, समुदयं धनोत्पत्तिं, परिहापयति परिहीयमानं प्रयोजयति । पुनः केन केन हेतुनेत्येतद् **उत्थाने**त्यादिनाभिधीयते । उत्थानक्लेशासहत्वादालस्येन उद्यमखेदासहनत्वनिमित्तयालसतया, शब्दादिषु इन्द्रियार्थेषु प्रमादेन गीतकामिन्यादिषु विषयेष्वनवधानप्रवृत्त्या, संक्रोशाधर्मानर्थभीरुर्भयेन निन्दाधर्मलोपानर्थोपनिपातशङ्कित्वमूलेन साध्वसेन, कार्यार्थिषु अनुग्रहबुद्धिः कामेन कार्यार्थिनोऽनुग्रहीष्यामीत्येवंबुद्धिमूलया स्वेच्छया, हिंसाबुद्धिः कोपेन नृशंसत्वनिमित्तेन क्रोधेन, विद्याद्रव्यवल्लभापाश्रयाद् दर्पेण विद्याद्रव्यराजवल्लभव्यपाश्रयनिमित्तेन मदेन, तुलामानतर्कगणिकान्तरोपधानाल्लोभेन तुलान्तरेण उन्मानदण्डविशेषेण मानान्तरेण प्रस्थादिमानसाधनविशेषेण तर्कान्तरेण संभावनाविशेषेण गणिकान्तरेण गणनविशेषेण च यदुपधानं छलनं तत्प्रयोजकेन लोभेनेत्यर्थः । तदेवमज्ञानालस्यप्रमादभयकामकोपदर्पलोभात्मका अष्टौ दोषाः समुदयपरिहापननिमित्तभूता वेदितव्याः ।

परिहापितसमुदयानां दण्डचिन्तायामाह— **तेषामिति** । तेषाम् उक्तदोषयुक्तानामष्टानाम्, आनुपूर्व्या क्रमेण, यावान् अर्थोपघातः तत्तद्दोषवशादुपहतो यत्परिमाणोऽर्थः, तावान् एकोत्तरः तत्परिमाण एकादिगुणाधिकोऽर्थः, दण्ड

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मानवाः । सर्वत्राष्टगुण इति पाराशराः । दशगुण इति बार्हस्पत्याः । विंशतिगुण इत्यौशनसाः । यथापराधम् इति कौटल्यः ।

गाणनिक्यान्याषाढीमागच्छेयुः । आगतानां समुद्रपुस्तभाण्डनीवीकानामेकत्रासम्भाषावरोधं कारयेत् । आयव्ययनीवीनामग्राणि श्रुत्वा नीवीमवहारयेत् । यच्चाग्रादायस्यान्तरवर्णे नीव्या वर्धेत, व्ययस्य वा यत् परिहापयेत्, तदष्टगुणमध्यक्षं दापयेत् । विपर्यये तमेव प्रति स्यात् ।

इति, मानवाः मनुशिष्याः, वदन्तीति शेषः । सर्वेषु दोषेष्वविशेषादष्टगुण इति पाराशराः, दशगुण इति बार्हस्पत्याः, विंशतिगुण इति शुक्रशिष्याश्च मन्यन्त इत्याह — **सर्वत्रे**त्यादि । स्वमतमाह—**यथे**त्यादि । यथापराधम् अपराधानुसारेण अपराधमहत्त्वाल्पत्वादिपर्यालोचनया दण्डः कल्पनीय इत्यभिप्रायः ।

अथाध्यक्षाणां वार्षिकगणितप्रदर्शनकाल उच्यते — **गाणनिक्यानीति** । गाणनिक्यानि गणनाः अर्थात् तत्प्रदर्शकाः अध्यक्षाः आषाढीम् आगच्छेयुः गणनप्रदर्शनार्थमाषाढमासि आगच्छेयुः । समुद्रपुस्तभाण्डनीवीकानां समुद्रं मुद्रायुक्तं पुस्तभाण्डं निबन्धपुस्तकपेटी नीवी व्ययितशिष्टधनं च येषां तथाविधानाम्, आगतानाम् अध्यक्षाणाम्, एकत्रासम्भाषावरोधं पुस्तकदर्शनस्थलेऽन्योन्यमन्त्रणशून्यमवरुध्य रक्षणं कारयेत् । आयव्ययनीवीनाम्, अग्राणि इयत्ताः, श्रुत्वा मुखत आकर्ण्य, नीवीम्, अवहारयेत् उपनाययेत् । **यच्चे**ति । नीव्याः, अन्तरवर्णे व्ययितावशेषस्यावहारितस्य प्रकारवर्णनपुस्तके, यद् धनम्, आयस्याग्राद् अध्यक्षोक्ताद्, वर्धेत अधिकतया विभाव्येत, व्ययस्य वा अग्राद् अध्यक्षोक्ताद्, यद् धनं, परिहापयेद् परिहीणं कुर्यात्, तद् अष्टगुणम्, अध्यक्षं दापयेद् अध्यक्षसकाशाद् गृह्णीयादित्यर्थः । **विपर्यय** इति । आयस्य यथाप्राप्तादधिकतया लेखनं व्ययस्य यथाकृतादूनतया लेखनं व्ययितावशेषस्य यथास्थितादाधिक्येन लेखनं वा विपर्ययः तस्मिन् पुस्तकदृष्टे सति, तमेव प्रति स्यात् अधिकमध्यक्षस्यैव भागः अध्यक्षायैव देयं नतु तस्य दण्डः कश्चिदित्यर्थः । 'लक्षणेत्थम्भूते'त्यादिना भागे प्रतेः कर्मप्रवचनीयता ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथाकालमनागतानामपुस्तनीवीकानां वा देयदशबन्धो दण्डः। कार्मिके चोपस्थिते कारणिकस्याप्रतिबध्नतः पूर्वः साहसदण्डः, विपर्यये कार्मिकस्य द्विगुणः।

प्रचारसमं महामात्राः समग्राः श्रावयेयुरविषममात्राः। पृथग्भूतो मिथ्यावादी चैषामुत्तमदण्डं दद्यात्।

अकृताहोरूपहरं मासमाकाङ्क्षेत। मासादूर्ध्वं मासद्विशतोत्तरं दण्डं दद्यात्। अल्पशेषनीवीकं पञ्चरात्रमाकाङ्क्षेत ततः परम्।

क्लृप्तकालेऽनागतानां पुस्तकनीवीविरहेणागतानां चाध्यक्षाणां देयदशगुणो दण्ड इत्याह — **यथाकालमित्यादि। कार्मिक** इति। कार्मिके अध्यक्षे उपस्थिते पुस्तदर्शनार्थं यथाकालं सन्निहिते सति, अप्रतिबध्नतः अप्रतियुज्यमानस्य असम्बध्नतः, कारणिकस्य गणनाधिकृतस्य, पूर्वः साहसदण्डः। विपर्यये अप्रतियोगदोषे कार्मिकगते सतीत्यर्थः, कार्मिकस्य द्विगुणः पूर्वः साहसदण्डः।

प्रचारेत्यादि। महामात्राः राज्ञः प्रधानभूताः कर्मसहायाः, समग्राः, अविषममात्राः अविषमाः परस्परानुकूलाः प्रवृत्तीः संगता आयव्ययनीवीयत्ता वा, प्रचारसमं श्रावयेयुः प्रचारो जनपदः तात्स्थ्याज्जानपदाः तत्साधारणं यथा भवति तथा श्रावयेयुः, जानपदान् सदसि मेलयित्वा बोधयेयुरित्यर्थः। एषां महामात्राणां मध्ये, पृथग्भूतः विसंवादी, मिथ्यावादी च, **उत्तमदण्डम्** उत्तमसाहसदण्डं, दद्यात्।

अकृतेत्यादि। अकृताहोरूपहरं कृते क्लृप्ते अहोरूपे दिवसे हर्तव्यं यो हरत्युपनयति स कृताहोरूपहरः उपहर्तव्यद्रव्ययथाकालोपहर्ता स न भवतीत्यकृताहोरूपहरः तं, तथाविधमध्यक्षं, मासम् आकाङ्क्षेत प्रतीक्षेत, हर्तव्यहरणार्थमेकमासावधिं तस्मै दद्यादित्यर्थः। मासावधावहर्तुर्दण्डमाह — **मासादिति।** मासाद् ऊर्ध्वम् अनुपहरणे, मासद्विशतोत्तरं मासस्यैकैकस्य द्वे शते उत्तरे यस्य तं तथाभूतं, दण्डं पूर्वोक्तं, दद्यात्। अल्पशेषार्पणीयनीवीके विशेषमाह — **अल्पेत्यादि।** अल्पशेषनीवीकं, ततः परं मासात् परतः, पञ्चरात्रं रात्रिपञ्चकमधिकम्, आकाङ्क्षेत। तत ऊर्ध्वमप्यनुपहरणे दण्डं दद्यादित्यर्थसिद्धम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कोशपूर्वमहोरूपहरं धर्मव्यवहारचरित्रसंस्थानसङ्कलननिर्वर्तनानुमानचारप्रयोगैरवेक्षेत ।

दिवसपञ्चरात्रपक्षमासचातुर्मास्यसंवत्सरैश्च प्रतिसमानयेत् । व्युष्टदेशकालमुखोत्पत्त्यनुवृत्तिप्रमाणदायकदापकनिबन्धकप्रतिग्राहकैश्चायं समानयेत् । व्युष्टदेशकालमुखलाभकारणदेययोगपरिमाणाज्ञा-

---

कोशेत्यादि । कोशपूर्वम् अहोरूपहरम् अर्पणीयनीवीधनपुरस्सरं क्लृप्तदिवसपुस्तकोपनेतारम् अध्यक्षं, धर्मव्यवहारचरित्रसंस्थानसंकलननिर्वर्तनानुमानचारप्रयोगैः अवेक्षेत धर्मप्रयोगादिभिरष्टभिः प्रकारैः परीक्षेत—किमसौ वस्तुत एव सद्वृत्तः उत दाम्भिक इति । तत्र धर्मः स्मृतिविहितः, व्यवहारः पूर्वपक्षोत्तरपक्षलक्षणः, चरित्रं लोकाचारः, संस्थानं पूर्वस्थितिः, सङ्कलनं सर्वधनैकीकारगणना, निर्वर्तनं कार्यनिष्पत्तिः, अनुमानं कृतेनाकृताभ्यूहः, चारा गूढपुरुषाः ।

गणनलेखनपरिपाटीमाह— **दिवसेत्यादि** । दिवसपञ्चरात्रपक्षमासचातुर्मास्यसंवत्सरैश्च प्रतिसमानयेत् दिवसः पञ्चरात्रं पक्षो मासश्चातुर्मास्यं संवत्सर इत्येभिर्विभागैः संख्याय सम्पादयेत् अर्थाद् आयव्ययनीवीः । अयं भावः — संवत्सरस्यादिमे मासि पूर्वपक्षस्य प्रतिपदमारभ्या पञ्चम्याः दैनन्दिनीः आयव्ययनीवीः पृथग् गणनपुस्तकेषु विलिख्य पञ्चमीपर्यन्तदिवसपञ्चकाङ्कान् संकलय्य निवेशयेत् । एवं षष्ठ्यादिदशम्यन्तदिवसपञ्चकाङ्कान् एकादश्यादिपञ्चदश्यन्तदिवसपञ्चकाङ्कांश्च प्रत्येकं संकलय्य निवेशयेत् । तानिमांस्त्रीन् दिवसपञ्चकाङ्कानेकीकृत्य पक्षाङ्कं, पूर्वापरपक्षद्वयाङ्कैकीकरणेन मासाङ्कं, मासचतुष्टयाङ्कैकीकरणेन चातुर्मास्याङ्कं, चातुर्मास्यत्रिकाङ्कैकीकरणेन संवत्सराङ्कं च सम्यक् संख्याय सम्पादयेदिति । आयव्ययनीवीनां साधारणविधिवचनानन्तरं प्रातिस्विकविधिष्वभिधानीयेषु प्रथममायस्य व्ययनीवीनिमित्तत्वेन प्राधान्यात् तं दर्शयति— **व्युष्टेत्यादि** । व्युष्टदेशकालमुखोत्पत्त्यनुवृत्तिप्रमाणदायकदापकनिबन्धकप्रतिग्राहकैः आयं समानयेत् व्युष्टादिविवरणयुक्ताम् आयगणनां सम्पादयेदित्यर्थः । तत्र व्युष्टं राजवर्षमासपक्षदिवसाः, देशः, कालो वर्षादिः, मुखम् आयमुखमायशरीरं च, उत्पत्तिः तदुत्पन्नं शुल्कादि, अनुवृत्तिः स्थानान्तरसंक्रान्तिः, प्रमाणं, दायकः करस्य दाता, दापकः दापयिता राजपुरुषः, निबन्धको लेखकः, प्रतिग्राहको ग्रहीता । व्ययसमानयनविधिमाह — **व्युष्टदेशकालमुखलाभेत्यादि** । तत्र व्युष्टदेशकाल-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पकोद्धारकनिधातृकप्रतिग्राहकैश्च व्ययं समानयेत् । व्युष्टदेशकालमुखानुवर्तनरूपलक्षणपरिमाणनिक्षेपभाजनगोपायकैश्च नीवीं समानयेत् ।

राजार्थे कारणिकस्याप्रतिबध्नतः प्रतिषेधयतो वाज्ञां निबन्धादायव्ययमन्यथा वापि कल्पयतः पूर्वः साहसदण्डः ।

क्रमावहीनमुत्क्रममविज्ञातं पुनरुक्तं वा वस्तुकमवलिखतो द्वादशपणो दण्डः ।

नीवीमवलिखतो द्विगुणः, भक्षयतोऽष्टगुणः, नाशयतः पञ्चबन्धः प्रतिदानं च । मिथ्यावादे स्तेयदण्डः । पश्चात् प्रतिज्ञाते द्विगुणः प्रस्मृतोत्पन्ने च ।

मुखानि पूर्वोक्तानि, लाभः 'पक्षमाससंवत्सरलाभो लाभ' इति गताध्यायोक्तः कारणं निमित्तं, देयं दानीयद्रव्यं, योगो द्रव्यापद्रव्यमिश्रणं, परिमाणमियत्ता, आज्ञापकः चोदकः, उद्धारकः ऋणग्राही ऋणं वा, निधातृकः भाण्डागारिकः, प्रतिग्राहकः ब्राह्मणादिः । नीवीविधिमाह— व्युष्टदेशकालमुखानुवर्तनेत्यादि । तत्र रूपं द्रव्यस्य स्वरूपं, लक्षणं तच्चिह्नं, परिमाणं तन्मानं, निक्षेपभाजनं द्रव्यनिधानभाण्डं, गोपायकस्तद्रक्षः, शेषं प्रतीतम् ।

अथ यथासम्भवं सामान्यदण्डमाह — राजार्थ इति । राज्ञो धनहिरण्यादिलाभरूपे प्रयोजने, अप्रतिबध्नतः असम्बध्नतः राजार्थं पुस्तकेष्वलिखत इत्यर्थः, आज्ञां, प्रतिषेधयतो वा अननुतिष्ठतश्च, आयव्ययं, निबन्धात् क्लृप्तनियमाद्, अन्यथा प्रकारान्तरेण, कल्पयतोऽपि वा, कारणिकस्य पूर्वः साहसदण्डः ।

क्रमेत्यादि । वस्तुकं, क्रमावहीनमवलिखतः उत्तममध्यमाधमेषु क्रमहीनं लिखतः, उत्क्रममवलिखतः पूर्वमधमं पश्चादुत्तममिति व्युत्क्रमं लिखतः, अविज्ञातमवलिखतः वेदितुमनर्हया रीत्या लिखतः, पुनरुक्तमवलिखतो वा लिखितं पुनर्लिखतो वा, द्वादशपणो दण्डः ।

नीवीमिति । नीवीम्, अवलिखतः अवहीनं लिखतः, द्विगुणः पणचतुर्विंशतिः, दण्डः । नीवीं भक्षयतः, अष्टगुणः पणषण्णवतिः, दण्डः । नीवीं नाशयतः नटनर्तकादिभ्यो दत्त्वा लोपयतः, पञ्चबन्धः पञ्चगुणः षष्टिपणो दण्डः, प्रतिदानं च नाशितपुनर्दानं च, भवति । मिथ्यावादे स्तेयदण्डः असत्यवचने चौर्यदण्डः । पश्चात् प्रतिज्ञाते पूर्वमलिखित एव गणनपरिशोधनायां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपराधं सहेताल्पं तुष्येदल्पेऽपि चोदये ।
महोपकारं चाध्यक्षं प्रग्रहेणाभिपूजयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तमोऽध्यायः अक्षपटले गाणनिक्याधिकारः,
आदितोऽष्टाविंशः ॥

विज्ञाते विषये, प्रस्मृतोत्पन्ने च पूर्वं विस्मृत्य पश्चाच्चिन्तिते च विषये, द्विगुणः स्तेयदण्डाद्द्विगुणः, दण्डः ।

श्लोकमाह — अपराधमिति । अल्पमपराधं सहेत, अर्थादध्यक्षस्य । अल्पेऽपि उदये आयवृद्धौ अर्थादध्यक्षोपपादितायां, तुष्येत् । महोपकारम् अध्यक्षं, चशब्दस्त्वर्थे, प्रग्रहेण प्रकृष्टग्रहणेन यावज्जीवपरिग्रहेण, अभिपूजयेत् बहुमानयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तमोऽध्यायः अक्षपटले गाणनिक्याधिकारः,
आदितोऽष्टाविंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२६. प्रक. समुदयस्य युक्तापहृतस्य प्रत्यानयनम् ।

कोशपूर्वाः सर्वारम्भाः । तस्मात् पूर्वं कोशमवेक्षेत ।

प्रचारसमृद्धिश्चरित्रानुग्रहश्चोरग्रहो युक्तप्रतिषेधः सस्यसम्पत् पण्यबाहुल्यमुपसर्गप्रमोक्षः परिहारक्षयो हिरण्योपायनमिति कोशवृद्धिः ।

प्रतिबन्धः प्रयोगो व्यवहारोऽवस्तारः परिहापणमुपभोगः परिवर्तनमपहारश्चेति कोशक्षयः ।

सिद्धीनामसाधनमनवतारणमप्रवेशनं वा प्रतिबन्धः । तत्र दशबन्धो दण्डः ।

समुदयस्य युक्तापहृतस्य प्रत्यानयनमिति सूत्रम् । समुदयो नाम द्रव्योत्पत्तिस्थानेभ्य उत्थितं धनं, युक्ता अध्यक्षाः, युक्तापहृतस्य समुदयस्य प्रत्यानयनं पुनःप्रापणमिहाभिधीयत इति सूत्रार्थः ।

किमर्थं धनसंग्रहे महान् यत्न उपदिश्यत इत्यपेक्षायामाह—**कोशेत्यादि** । सर्वारम्भाः कोशपूर्वाः सर्वाणि कार्याणि तन्त्रसम्बद्धानि जनपदनिवेशादीनि आवापसम्बद्धानि च सन्धिविग्रहादीनि धननिमित्तकानि । तस्मात् कारणात, कोशं, पूर्वं सर्वकार्याणामग्रे, अवेक्षेत यथा स वृद्धिं प्राप्नुयात् न क्षयं तथा चिन्तयेदित्यर्थः ।

कोशस्योदयहेतून् नव दर्शयति—**प्रचारेत्यादि** । प्रचारसमृद्धिः जनपदसम्पत्, चरित्रानुग्रहः देशजातिकुलाचाराणां पूर्वस्थित्यनतिक्रमेण परिपालनं, चरित्ररक्षणसन्तुष्टा हि जनाः कोशं राज्ञो वर्धयन्तीति, चोरग्रहः तस्करवधस्तस्करेभ्यो धनग्रहणं च, युक्तप्रतिषेधः युक्तानामध्यक्षाणां प्रतिषेधो धनापहाराद् वारणम् उत्कोचग्रहणनिमित्ताद्वा प्रजापीडनाद् वारणं, सस्यसम्पत् उच्चावचधान्यसमृद्धिः, पण्यबाहुल्यं पण्यानां जलजानां स्थलजानां च विक्रेयद्रव्याणां बहुलमुत्पत्तिरुपलम्भश्च, उपसर्गप्रमोक्षः अग्न्याद्युपद्रवमोचनं, परिहारक्षयः करमुक्त्यभावः अवधौ धनग्रहणोपेक्षाविरहो वा, हिरण्योपायनं सुवर्णरजतादिरूपोपदा, इति कोशवृद्धिः एवं नव कोशवृद्धिहेतवः ।

कोशक्षयहेतूनष्टावुद्दिशति—**प्रतिबन्ध** इत्यादि ।

सिद्धीनामिति । सिद्धीनां सिद्धद्रव्याणां राजग्राह्यकरादीनाम्, असाधनम् अनुत्पादनम्, उत्पन्नानां वा अनवतारणमहस्तप्रापणम्, अवतारितानां वा अप्रवेशनं भाण्डागाराप्रापणम्, इति प्रतिबन्धस्त्रिधा । **तत्रेति** । तत्र प्रतिबन्धे, दशबन्धो दशगुणः, दण्डः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कोशद्रव्याणां वृद्धिप्रयोगः प्रयोगः । पण्यव्यवहारो व्यवहारः । तत्र फलद्विगुणो दण्डः ।

सिद्धं कालमप्राप्तं करोत्यप्राप्तं प्राप्तं वेत्यवस्तारः । तत्र पञ्चबन्धो दण्डः ।

क्लृप्तमायं परिहापयति व्ययं वा विवर्धयतीति परिहापणम् । तत्र हीनचतुर्गुणो दण्डः ।

स्वयमन्यैर्वा राजद्रव्याणामुपभोजनमुपभोगः । तत्र रत्नोपभोगे घातः, सारोपभोगे मध्यमः साहसदण्डः, फल्गुकुप्योपभोगे तच्च तावच्च दण्डः ।

राजद्रव्याणामन्यद्रव्येणादानं परिवर्तनं, तद् उपभोगेन व्याख्यातम् ।

कोशेत्यादि । कोशद्रव्याणां कोशप्रवेश्यद्रव्याणां, वृद्धिप्रयोगः वृद्ध्यर्थं प्रयोगः स्वयं वृद्धिमुपजीव्य पश्चाद् मूलं कोशेऽर्पयिष्यामीति, स प्रयोगः । पण्यव्यवहारः कोशद्रव्यैर्वाणिज्यकरणं, व्यवहारः । तत्र प्रयोगव्यवहारयोः दण्डः फलद्विगुणः ।

सिद्धमिति । सिद्धं प्राप्तं, कालं ग्राह्यद्रव्यग्रहणकालम्, अप्राप्तं, करोति आपादयति उत्कोचलिप्सया, अप्राप्तं वा कालं प्राप्तं करोति प्रद्वेषेण, इत्यवस्तारः इत्यनेन प्रकारेण प्राप्तकालाप्राप्तीकरणमप्राप्तकालप्राप्तीकरणमिति द्विविधोऽवस्तारः । तत्र अवस्तारे, दण्डः पञ्चबन्धः ।

क्लृप्तमिति । क्लृप्तं प्रतिनियतम् आयं परिहापयति न्यूनयति, व्ययं वा क्लृप्तं विवर्धयति अतिरेचयति, इति परिहापणम्, एवं द्विधा परिहापणम् । तत्र, दण्डः हीनचतुर्गुणः नाशितद्रव्यचतुर्गुणः ।

रत्नसारफल्गुकुप्यानां राजद्रव्याणां स्वयमुपभोजनं परैर्वोपभोजनमिति द्विविध उपभोग इत्याह — स्वयमित्यादि । तत्र दण्डोपदेशवाक्यं — तत्रेत्यादि । तच्च उपभुक्तद्रव्यं च । तावच्च तत्परिमाणमपरं च ।

परिवर्तनं व्याचष्टे — राजद्रव्याणामित्यादि । अन्यद्रव्येणादानम् अन्यद् द्रव्यं सच्छायं प्रतिनिधाय ग्रहणम् । उपभोगेन तद् व्याख्यातमिति उपभोगसमानदण्डं परिवर्तनमित्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सिद्धमायं न प्रवेशयति, निबद्धं व्ययं न प्रयच्छति, प्राप्तां नीवीं विप्रतिजानीत इत्यपहारः । तत्र द्वादशगुणो दण्डः ।

तेषां हरणोपायाश्चत्वारिंशत्—पूर्वं सिद्धं पश्चादवतारितं, पश्चात् सिद्धं पूर्वमवतारितं, साध्यं न सिद्धम्, असाध्यं सिद्धं, सिद्धमसिद्धं कृतम्, असिद्धं सिद्धं कृतम्, अल्पसिद्धं बहुकृतं, बहुसिद्धमल्पं कृतम्, अन्यत् सिद्धमन्यत् कृतम्, अन्यतः सिद्धमन्यतः कृतं, देयं न दत्तमदेयं

त्रिप्रकारमपहारमाह—**सिद्धमिति** । सिद्धम् उत्पन्नम्, आयं, न प्रवेशयति लेख्ये नारोपयति इत्येकोऽपहारः । निबद्धं पुस्तकारोपितं व्ययं राजाज्ञप्तं पारितोषिकादिलक्षणं, न प्रयच्छति राजनिर्दिष्टाय पात्राय न ददाति, इति द्वितीयोऽपहारः । प्राप्तां हस्तगतां, नीवीं, विप्रतिजानीते नाद्यापि हस्तप्राप्तेत्यपलपति, इति तृतीयोऽपहारः । तत्र अपहारे, दण्डो द्वादशगुणः ।

तेषामिति । तेषाम् अध्यक्षाणां, हरणोपायाः राजद्रव्यापहरणद्वाराणि, चत्वारिंशद् वक्ष्यमाणरीत्या । अपहारपरिहरणार्थमपहृतप्रत्यानयनार्थं च तद्व्युत्पादनम् । तान् दर्शयति—**पूर्वं सिद्धमित्यादिना** । **पूर्वं सिद्धं पश्चादवतारितमिति**, पूर्वसस्यत्वात् पूर्वप्रवेश्यः शाल्यादेः करः पश्चिमसस्यगोधूमादिकरेण सह प्रवेशितः स तु मध्यकालेऽध्यक्षेणोपजीव्यो भवति । **पश्चात् सिद्धं पूर्वमवतारितमिति**, पश्चिमसस्यगोधूमादिकरस्य कियांश्चिद् भागः पूर्वसस्यकरेण सह पूर्वमेव प्रवेशित आत्ययिकराजकार्यार्थित्वच्छलात् । **साध्यं न सिद्धमिति**, ग्राह्यः करो न गृहीतो लञ्चादिना राज्ञ एवमाज्ञेति । **असाध्यं सिद्धमिति**, अकरददेवब्राह्मणादेरग्राह्यः करो गूढं गृहीतः । **सिद्धमसिद्धं कृतमिति**, करदेन प्रवेशित एव करः अप्रवेशित इत्युक्त्वापहृतः, गृहीत एव करस्यैकदेशो न गृहीत इत्यपलपितो वा । **असिद्धं सिद्धं कृतमिति**, कृत्स्नकरदानार्हे काले तस्य करस्यार्धं दत्त्वा शेषार्धं पश्चाद् दास्यामीत्युक्तेन लञ्चवशीकृतेनाध्यक्षेण तच्छेषार्धं दत्तत्वेन पुस्तके लिखितम् । **अल्पसिद्धं बहुकृतमिति**, पञ्चाशति प्रविष्टायां शतं प्रविष्टमित्यध्यक्षेण लञ्चग्राहिणा लिखितम् । **बहुसिद्धमल्पं कृतमिति**, शतं गृहीत्वा पञ्चाशदिति पुस्तके लिखितं लञ्चादिना । **अन्यत् सिद्धमन्यत् कृतमिति**, शालिः सिद्धः कोद्रवो लिखितः शालिकरग्रहणनिमित्तस्य लाभस्यात्मसात्कारार्थम् । **अन्यतः सिद्धमन्यतः कृतमिति**, देवदत्ताद् गृहीतं यज्ञदत्ताद् गृहीतमिति पुस्तके लिखितम् । **देयं**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दत्तं, काले न दत्तमकाले दत्तम्, अल्पं दत्तं बहु कृतं, बहु दत्तमल्पं कृतम्, अन्यद् दत्तमन्यत् कृतम्, अन्यतो दत्तमन्यतः कृतं, प्रविष्टमप्रविष्टं कृतम्, अप्रविष्टं प्रविष्टं कृतं, कुप्यमदत्तमूल्यं प्रविष्टं, दत्तमूल्यं न प्रविष्टं, सङ्क्षेपो विक्षेपः कृतः, विक्षेपः सङ्क्षेपो वा, महार्घमल्पार्घेण परिवर्तितम्, अल्पार्घं महार्घेण वा, समारोपितोऽर्घः, प्रत्यवरोपितो वा,

---

न दत्तम् अदेयं दत्तमिति, देयं स्वर्णरजतादिकं कस्मैचिद् दातव्यतया राज्ञाज्ञापितं तस्मै न दत्तं, किन्तु अदेयं फल्गुकुप्यादिकं कालान्तरे कथञ्चिद् दत्तम्। **काले न दत्तमकाले दत्तमिति**, यज्ञाद्यर्थं कस्मैचिद् दीयतामिति राज्ञाज्ञप्तं यज्ञादिकाले वर्तमाने न दत्तं किन्त्वतिक्रान्ते कथञ्चिद् दत्तं लञ्चग्रहणपीडापुरस्सरम्। **अल्पं दत्तं बहुकृतमिति**, शतं दीयतामिति राजाज्ञायां तत् पञ्चाशतात्मसात्कारार्थया साग्रं पुस्तके विलिखितम्। **बहुदत्तमल्पं कृतमिति**, शतं देवदत्ताय दीयतामिति राजादेशे विंशतिं स्वयं गृहीत्वाशीतिमात्रं तस्मै दत्तम्। **अन्यद् दत्तमन्यत् कृतमिति**, राज्ञादिष्टाः शालयः कोद्रवास्तु दत्ताः। **अन्यतो दत्तमन्यतः कृतमिति**, देवदत्तायादिष्टं यज्ञदत्ताय दत्तम्। **प्रविष्टमप्रविष्टं कृतमिति**, कोशेनिवश्यमुपहास्तितमेव द्रव्यमनुपहस्तितमिति वा किञ्चिदेवोपहस्तितमिति वोक्त्वापहृतम्, अथवा कार्यविशेषार्थे 'प्रजाभ्यो धनमुत्थाप्यानीयताम्' इत्यादिष्टे तदुत्थाप्य नाद्याप्युत्थितमित्युक्त्वा कालहरणेनोपजीवितम्। **अप्रविष्टं प्रविष्टं कृतमिति**, अगृहीत एव करदेभ्यः करो लब्धं गृहीत्वा प्रविष्ट इति लिखितः। **कुप्यमदत्तमूल्यं प्रविष्टमिति**, कुप्यं वस्त्रादिकं राजादेशाद् ऋणेन गृहीतं कथञ्चित् कालान्तरे दत्तमूल्यैकदेशं कृत्वा दत्तसमग्रमूल्यमिति पुस्तके लिखितम्। **दत्तमूल्यं न प्रविष्टमिति**, महामूल्यदानेन क्रीतं कुप्यं तावन्मूल्यक्रीतत्वेन पुस्तकेऽनिबद्धम् अर्थादल्पमूल्यक्रीतत्वेन निबद्धमित्ययं विशेषोऽपहारोपायः। **संक्षेपो विक्षेपः कृत इति**, संक्षेपः जनसमूहदेयः पिण्डकरः विक्षेपः कृतः विप्रकीर्णकरः कृतः समूहिभ्यः प्रत्येकं विभज्य ग्राह्यः कृत इत्यर्थः, तथाकरणे हि राजद्रव्यमुपजीवितुं शक्यं ग्राम्यजनाश्चेति। **विक्षेपः संक्षेपो वेति**, जनादेकस्माद् बहुभिर्मासैरल्पशो ग्राह्यो विप्रकीर्णकरः एकस्मिन्नेव समये संपिण्ड्य ग्राह्यः कृतः, एवं हि कुर्वताध्यक्षेण राजद्रव्यमुपजीवितुं लभ्यते जनाश्चेति। **महार्घमल्पार्घेण परिवर्तितमिति**, महार्घं युग्यवाहनादि अल्पार्घेण युग्यादिना विनिमितं विनिमायापहृतम्। **अल्पार्घं महार्घेण वेति**, अल्पमूल्यम् अत एव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रात्रयः समारोपिताः, प्रत्यवरोपिता वा, संवत्सरो मासविषमः कृतः, मासो दिवसविषमो वा, समागमविषमः, मुखविषमः, धार्मिकविषमः, निर्वर्तनविषमः, पिण्डविषमः, वर्णविषमः, अर्घविषमः, मानविषमः, मापनविषमः, भाजनविषम इति हरणोपायाः ।

महाविक्रयविषयभूतं सामुद्रलवणादि पण्यं महामूल्येन अत एव अल्पविक्रयविषयेण सैन्धवलवणादिना परिवर्तितं विनिमितं, तद्धि शीघ्रविक्रयेण लाभमुत्पादयत् पण्याध्यक्षस्योपजीव्यं भवतीति । **समारोपितोऽर्घ** इति, अर्घस्य यथास्थितादर्घादतिरेचनमित्यर्थः । तथा हि करणे क्रेतारः स्वोपकारकामा भवन्तः पण्याध्यक्षस्यार्घनियामकस्योपजीव्या भवन्तीति । **प्रत्यवरोपितो** वेति, अर्घ इति सम्बध्यते, अर्घप्रत्यवरोपणे हि कृते विक्रेतारः यथास्थितार्घकामा भवन्तः पण्याध्यक्षस्योपजीव्या भवन्तीति । **रात्रयः समारोपिता** इति, पञ्चरात्रवेतनं कर्मकरेभ्यो दत्त्वा सप्तरात्रवेतनं दत्तमित्येवञ्जातीयो रात्रिसमारोपः, अनेन ह्युपायेन कर्मकरेभ्यो धनमपह्रियते । **प्रत्यवरोपिता** वेति, रात्रय इति वर्तते, स्वामिसकाशाद् दशरात्रव्ययं गृहीत्वाष्टरात्रव्ययो गृहीत इत्येवञ्जातीयं रात्रिप्रत्यवरोपणम्, अनेन ह्युपायेन स्वामिद्रव्यमुपजीव्यते । **संवत्सरो मासविषमः कृत** इति, अधिमासरहित एव संवत्सरः साधिमासः कृत इत्यर्थः, अनेनोपायेनाधिमासलाभोऽपह्रियते । **मासो दिवसविषमो** वेति, अनूनदिवसो मासो दिवसोनः कृतः । **समागमविषम** इति, समागमे विषये विषमो व्यापार इत्यर्थः, तद्यथा समागतानां दृष्टानां कर्मकराणां भक्तवेतनदाने परोक्षं कमपि द्रष्टव्यमपदिश्य स्वयं तद्भक्तवेतनं गृह्णाति । **मुखविषम** इति, कुतश्चिदायमुखादुत्पन्नं द्रव्यमन्यस्मादायमुखादुत्पन्नमिति ख्यापितं तदधिकृतादुत्कोचं गृहीत्वा । **धार्मिकविषम** इति, 'ब्राह्मणेभ्यः प्रत्येकं पणशतं दीयतामि'ति राजादेशे पुरोहितेन पुरोहितपुरुषेण वा तदर्धापहरणम् । **निर्वर्तनविषम** इति, किञ्चित्कर्मनिर्वर्तनप्रवृत्तौ विषमाचरणमित्यर्थः, तद्यथा — करदेभ्यः करोद्ग्राहकर्मनिर्वर्तनप्रसङ्गे करदान् 'युष्माभिरचैव करो निर्यातयितव्य' इत्यवरुध्य लञ्चग्रहणेन काश्चिन्मुञ्चतीति । **पिण्डविषम** इति, पिण्डे समूहे विषमाचरणं, यथा — समूहदेये विषये समूहिनमेकं लञ्चग्रहणादिना वर्जयित्वा समूहिभ्य इतरेभ्यो देयग्रहणम् । **वर्णविषम** इति, ब्राह्मणा एवाद्योत्तीर्णाः नान्ये इत्युक्त्वा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्रोपयुक्तनिधायकनिबन्धकप्रतिग्राहकदायकदापकमन्त्रिमन्त्रिवैयावृत्त्यकरानेकैकशोऽनुयुञ्जीत । मिथ्यावादे चैषां युक्तसमो दण्डः । प्रचारे चावघोषयेत् — अमुना प्रकृतेनोपहताः प्रज्ञापयन्त्विति । प्रज्ञापयतो यथोपघातं दापयेत् । अनेकेषु चाभियोगेष्वपव्ययमानः सकृदेव परोक्तः सर्वं भजेत । वैषम्ये सर्वत्रानुयोगं दद्यात् । महत्यर्थापहारे चाल्पेनापि सिद्धः सर्वं भजेत ।

तद्दिवसवेतनस्यात्मसात्करणं नावध्यक्षेण कृतम्, अथवा स्वर्णेऽष्टवर्णके ग्राह्ये नववर्णकं स्वर्णदायकाद् गृहीत्वाष्टवर्णकस्यैव राज्ञेऽर्पणं सुवर्णाध्यक्षेण कृतम् । **अर्घविषम** इति, सेनानिवेशादावर्घस्याव्यवस्थितत्वात् तं किञ्चिदधिकमपदिश्य राजार्थोपजीवनम् । **मानविषम** इति, परिमाणोन्मानसाधनवैषम्यमित्यर्थः, तच्च हीनैस्तैर्देयं दत्त्वा महद्भिर्दत्तमिति ख्यापनम्, अथवा देयस्य हीनैर्दानं महद्भिः स्वीकरणम् । **मापनविषम** इति, मापनकृतं वैषम्यं मातृहस्तविशेषोत्पादितं वस्त्रादिमानविषयं वैषम्यम् । **भाजनविषम** इति, 'आज्यपूर्णं घटशतं दीयतामि'त्युक्ते अल्पानां घटानां शतं दत्त्वा महतां घटानां शतं दत्तमिति लेखनं, तेन राजद्रव्यमपह्रियत इत्ययं चत्वारिंशत्तमो द्रव्यापहरणोपायः । इतिशब्दः परिसमाप्तिवचनः, हरणोपायाः समाप्ताः, किञ्चिद्भेदेन संभवन्तोऽप्यन्ये यथोक्तेष्वेवान्तर्भवन्तीत्यभिप्रायः ।

तत्रेति । तत्र हरणोपायेषु शङ्क्यमानेष्विति शेषः, उपयुक्तादीन् अष्टौ एकैकशः प्रत्येकम्, अनुयुञ्जीत पृच्छेद् — 'इदमनेनाध्यक्षेणापहृतं नवे'ति । तत्रोपयुक्तो युक्तानामुपरि नियुक्तः प्रत्ययितपुरुषः, निधायकः भाण्डागारिकः, निबन्धको लेखकः, प्रतिग्राहकः प्रतिग्रहीता, दायकः करदः, दापकः राजपुरुषः, मन्त्री युक्तस्य धीसचिवः, मन्त्रिवैयावृत्यकरः मन्त्रिणः कर्मकरः । **मिथ्येत्यादि** । मिथ्यावादे च, एषाम् उपयुक्तादीनां, युक्तसमः अध्यक्षतुल्यो, दण्डः । **प्रचारे** च जनपदे च, अवघोषयेत् सपटहताडमवख्यापयेत्, केन प्रकारेण, अमुना प्रकृतेन अध्यक्षेण, उपहताः उत्कोचग्रहणादिना पीडिता जनाः, प्रज्ञापयन्तु आवेदयन्तु स्वां स्वां पीडामित्यार्थम्, इति अनेन प्रकारेण । **प्रज्ञापयतः** जनस्य, यथोपघातम् उपघातानुरोधेन, दापयेद् द्रव्यम् । **अनेकेष्विति** । अनेकेष्वभियोगेषु उपघातावेदनेष्वनेककृतेषु युगपत् प्राप्तेषु सत्सु, अपव्ययमानः सर्वमुपघातमात्मकृतमनभ्युपगच्छन् युक्तः, सकृदेव परोक्तः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृतप्रतिघातावस्थः सूचको निष्पन्नार्थः षष्ठमंशं लभेत, द्वादशमंशं भृतकः। प्रभूताभियोगादल्पनिष्पत्तौ निष्पन्नस्यांशं लभेत। अनिष्पन्ने शारीरं हैरण्यं वा दण्डं लभेत, न चानुग्राह्यः।

निष्पत्तौ निक्षिपेद् वादमात्मानं वापवाहयेत्।
अभियुक्तोपजापात् तु सूचको वधमाप्नुयात्॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितियाधिकरणे अष्टमोऽध्यायः
समुदयस्य युक्तापहृतस्य प्रत्यानयनम्,
आदितः एकोनत्रिंशः॥

एकत्राभियोगे एकेनाभियोक्त्रा साक्ष्यादिभिर्विभावितः पराजितः, सर्वं भजत सर्वाभियोगार्थं यथाभागं दद्यात्। **वैषम्य** इति। अनेकेष्वभियोगेष्वेकत्र संप्रतिपत्तिरितरत्र विप्रतिपत्तिश्च वैषम्यं तस्मिन्, सर्वत्रानुयोगं दद्याद् विप्रतिपन्नेषु सर्वेष्वभियोगेषु साक्षिप्रश्नावसरं दद्याद् रागद्वेषादिनिमित्तमिथ्याभियोगशङ्कापनुत्तये। एकाभियोक्तृविषयमाह— **महती**ति। महति अर्थापहारे, प्रभूतस्वर्णरजतादिनानार्थापहारे केनचित् प्रज्ञापिते, अल्पेनापि सिद्धः एकदेशेनापि साक्ष्यादिभिर्विभावितापचारः, सर्वं भजेत अभियोगविषयं कृत्स्नमर्थं दद्याद्, अर्थाद् विप्रतिपद्यमानो युक्तः।

कृतप्रतिघातेत्यादि। सूचकः अध्यक्षापचारपिशुनः, कृतप्रतिघातावस्थः कृतः स्वीकृतः प्रतिघातावस्थः प्रतिघातार्थोऽवस्थः अध्यक्षोत्पाद्यानर्थप्रतीकारार्थः प्रतिभूर्येन स तथाभूतः भवेदिति शेषः, यद्यध्यक्षापचारं कश्चित् सूचयेत् स प्रतिघातप्रातिभाव्यं गृहीत्वैव सूचयेदित्यर्थः। स निष्पन्नार्थः सिद्धसूचितार्थः, षष्ठमंशं लभेत, साधिताद् धनात्। **द्वादशमि**ति। भृतकः भृत्यः सूचकः, द्वादशमंशं लभेत। **प्रभूते**त्यादि। बहुप्रकारद्रव्यविषयेऽभियोगे प्रभूताभियोगाद् अभियोगविषयबहुप्रकारद्रव्यमध्याद्, अल्पनिष्पत्तौ अल्पस्यैव साक्ष्यादिभिः संसिद्धौ, निष्पन्नस्यांशं लभेत सूचकः। **अनिष्पन्न** इति। अनिष्पन्ने अभियुक्तेऽर्थे सर्वथैवासंसिद्धे सति, शारीरं हैरण्यं वा दण्डं मिथ्याभियोगनिमित्तं दमं, लभेत, न चानुग्राह्यः न च रक्षणीयः, निर्दोषविसृष्टाध्यक्षप्रभवेभ्योऽनर्थेभ्य इत्यार्थम्।

निष्पत्ताविति। निष्पत्तौ सूचितार्थसत्यत्वसिद्धौ, वादम् अभियोगं, निक्षिपेद् विरमयेत् सूचकः, आत्मानं वा अपवाहयेत् आत्मानं चाभियोग-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बन्धान्मोचयेत्, अनिष्पत्तौ वादपरिसमापनमात्ममोचनं वा सूचकेन कर्तुमशक्यमित्यभिप्रायः। भट्टस्वामी तु 'निष्पत्तौ सूचितार्थसंसिद्धौ, निक्षिपेद् अन्यत्र दूष्यादौ सञ्चारयेद्, वादं सूचकत्वापवादम्। आत्मानं वापवाहयेद् अहमेतस्मिन् काले विषयेऽत्र नासमिति प्रख्यापयेद्' इति व्याचष्टे। यदि तु अभियुक्तेनाध्यक्षेण लञ्चोपप्रलोभनाद्युपायैर्भेदं नीतः सूचकः स्वाभियुक्तार्थासाधकं राजान्तिके ब्रूयात्, तदा स वधदण्डमर्हतीत्याह — **अभियुक्ते**त्यादि॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे अष्टमोऽध्यायः
समुदयस्य युक्तापहृतस्य प्रत्यानयनम्,
आदित एकोनत्रिंशः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२७. प्रक. उपयुक्तपरीक्षा।

अमात्यसम्पदोपेताः सर्वाध्यक्षाः शक्तितः कर्मसु नियोज्याः। कर्मसु चैषां नित्यं परीक्षां कारयेत् चित्तानित्यत्वान्मनुष्याणाम्। अश्वसधर्माणो हि मनुष्या नियुक्ताः कर्मसु विकुर्वते।

तस्मात् कर्तारं करणं देशं कालं कार्यं प्रक्षेपमुदयं चैषु विद्यात् ते यथासन्देशमसंहता अविगृहीताः कर्माणि कुर्युः, संहता भक्षयेयुः

उपयुक्तपरीक्षेति सूत्रम्। उपयुक्ता युक्तानामुपरि नियुक्ताः प्रत्ययितपुरुषाः, औपरिका इति ये व्यपदिश्यन्ते, तेषां परीक्षा दोषगवेषणेति सूत्रार्थः। युक्तापह्नतप्रत्यानयनोक्त्या गताध्याये युक्तानां परीक्षणीयत्वमवगतं, तत् किमुपयुक्तानामप्यस्ति, उत नेति सन्देहे प्रकरणमिदमारब्धमिति सङ्गतिः।

अमात्येत्यादि। अमात्यसम्पदोपेताः 'जानपदोऽभिजात' इत्युक्तजानपदत्वादिगुणसमृद्धियुक्ताः। एतेनार्थोपधाशुद्धियोगमात्रेण नालमिति सूचितम्। सर्वाध्यक्षाः सर्वे अध्यक्षा उपयुक्ता युक्ताश्च, शक्तितः तत्तत्कर्मसामर्थ्यानुसारेण, कर्मसु नियोज्याः। एषां कर्मसु च, परीक्षां दोषगवेषणां नित्यं कारयेत्। अर्थोपधाशुद्धानामेव कर्मसु नियोक्तव्यत्वस्य प्रागभिधानान्नियोगानन्तरं पुनः परीक्षायाः किं कारणं, तत्राह — **मनुष्याणां चित्तानित्यत्वादिति**। मनुष्यचित्तं स्वभावादव्यवस्थितं यतः। स्वाभाविकचित्तानित्यत्वमुक्त्वावस्थाविशेषभवमाह— **अश्वेत्यादि**। यथाहि अश्वा रथवहनकर्मानियोगदशायां साधुशीला एव सन्तस्तन्नियोगदशायां विकारं प्राप्नुवन्ति, एवं कर्मसु अनियोगदशायां सुशीला एव परिदृष्टाः नियोगदशायां शीलवैकृतं प्राप्नुवन्तीत्यर्थः।

तस्मादिति। तस्मात् यथोक्तात् कारणात्, कर्तारम् अध्यक्षं, करणं धर्माद्यधिकरणम् अनुष्ठानं वा, देशं स्थानीयादिकं, कालम् अहोरात्रादिं दुर्भिक्षकालादिं वा, कार्यं करणीयं, प्रक्षेपं कर्मकरभृतिम्, उदयं लाभं च, एषु अध्यक्षेषु विषये, विद्यात्। ते अध्यक्षाः, यथासन्देशं स्वाम्यादेशानतिक्रमेण, असंहता अकृतान्योन्यसङ्केताः, अविगृहीताः अकृतान्योन्यविरोधाः, कर्माणि कुर्युः। संहतिविग्रहयोर्दोषमाह — **संहता इत्यादि**। कर्माणीत्यनुवर्तते। कर्माणि भक्षयेयुः कर्मफलान्यपहरेयुः। कर्माणि विनाशयेयुः निष्फलीकुर्युः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विगृहीता विनाशयेयुः । न चानिवेद्य भर्तुः किञ्चिदारम्भं कुर्युरन्यत्रापत्प्रतीकारेभ्यः । प्रमादस्थानेषु चैषामत्ययं स्थापयेद् दिवसवेतनव्ययद्विगुणम् ।

यश्चैषां यथादिष्टमर्थं सविशेषं वा करोति स स्थानमानौ लभेत ।

अल्पायतिश्चेन्महाव्ययो भक्षयति । विपर्यये यथायतिव्ययश्च न भक्षयति इत्याचार्याः । अपसर्पेणैवोपलभ्यते इति कौटल्यः ।

स्वामिनमपृष्ट्वा न कमपि कर्मविशेषमग्निजलादिनिमित्तविपत्प्रतीकारातिरेकेण कुर्युरित्याह—**न चानिवेद्ये**त्यादि । **प्रमादे**त्यादि । एषाम् अध्यक्षाणां, प्रमादस्थानेषु स्त्रीमद्यादिव्यसनेषु दृष्टेषु, अत्ययं दण्डं, स्थापयेत् सद्य एव प्रयुञ्जीत । कियन्तं स्थापयेत्, दिवसवेतनव्ययद्विगुणं दिवसवेतनस्य प्रमाददिवससम्बन्धिनोऽध्यक्षवेतनस्य दिवसव्ययस्य प्रमादनिमित्तकतद्दिवसकर्मादर्शनजन्यस्यार्थनाशस्य च द्विगुणम् ।

यश्चैषामिति । एषाम् अध्यक्षाणां मध्ये, यः, अर्थं राजकार्यं, यथादिष्टं करोति स्वाम्युपदिष्टप्रकारकं निष्पादयति, सविशेषं वा करोति आदिष्टाभ्यधिकगुणयुक्तं वा निष्पादयति, सः, स्थानमानौ लभेत प्रकृष्टं पदान्तरं पूजां च प्राप्नुयात् ।

राजार्थजानपदार्थग्रसनाग्रसनोपलम्भेऽभ्युपायाकाङ्क्षायां व्ययमहत्त्वाल्पत्वसमत्वलिङ्गकमनुमानमाचार्या अभ्युपायं मन्यन्त इत्याह—**अल्पे**त्यादि । अल्पायतिरल्पधनागमः, महाव्ययश्चेद् अनल्पार्थोपभोगो यदि भवेत्, तदा सः भक्षयति राजप्रजार्थमुपजीवति । विपर्यये यथायतिव्ययश्च महायतित्वे सत्यल्पव्यय आयत्यनुरूपव्ययश्च, न भक्षयति । इत्याचार्याः । स्वमतमाह —**अपसर्पेणैवेति** अपसर्पेणैवोपलभ्यते चारद्वारेणैव दुष्टादुष्टत्वमध्यक्षाणां निश्चीयते 'त्रयाणामेकवाक्ये संप्रत्यय' इति गूढपुरुषप्रणिध्युक्तादिशेत्यर्थः । एवकारेण महाव्ययत्वाल्पव्ययत्वयोरुपलब्ध्युपायत्वं व्यवच्छिद्यते । ते ह्यल्पायतेरपि महाकुटुम्बिन उद्धारग्रहणेन महाव्ययत्वदर्शनात् प्रभूतराजप्रजाद्रव्यापहारिणोऽपि सहजकृपणतयाल्पव्ययत्वदर्शनाच्च व्यभिचरिते इत्यभिप्रायः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यः समुदयं परिहापयति स राजार्थं भक्षयति । स चेदज्ञानादिभिः परिहापयति तदेनं यथागुणं दापयेत् ।

यः समुदयं द्विगुणमुद्भावयति स जनपदं भक्षयति । स चेद् राजार्थमुपनयत्यल्पापराधे वारयितव्यः, महति यथापराधं दण्डयितव्यः ।

यः समुदयं व्ययमुपनयति स पुरुषकर्माणि भक्षयति । स कर्मदिवसद्रव्यमूल्यपुरुषवेतनापहारेषु यथापराधं दण्डयितव्यः ।

यः समुदयमिति । यः, समुदयं द्रव्योत्पत्तिं, परिहापयति न्यूनयति, स राजार्थं भक्षयति । सः, अज्ञानादिभिः अज्ञानालस्यभयप्रमादकामकोपदर्पलोभैर्गाणनिक्याधिकारोक्तैः, परिहापयति चेद् , एनं, तद् हापितं द्रव्यं, यथागुणं द्विगुणं त्रिगुणम् अधिकगुणं वा अपराधानुसारिगुणं, दापयेत् ।

यः समुदयं द्विगुणमिति । यः समुदयं, द्विगुणं क्लृप्तादधिकम्, उद्भावयति, सः, जनपदं भक्षयति कथमन्यथा समुदयाधिक्यमिति । सः, राजार्थम् उपनयति चेत् स्वोद्भावितमधिकं साकल्येन राज्ञेऽर्पयति चेत्, तर्हि, अल्पापराधे अल्पेऽपराधे जनपदपीडने, वारयितव्यः 'मा पुनरेवं जानपदेभ्यः क्लृप्ताधिकमुद्भावये'ति प्रतिषेद्धव्यः । महति द्विगुणत्रिगुणाद्युद्भावनरूपे कोशक्षयफलकजनपदकर्शनहेतावपराधे स्वयमपहरणरूपे च, यथापराधं दण्डयितव्यः । यदुक्तं —

"यथान्नकर्शनात् प्राणाः क्षीयन्ते सर्वदेहिनाम् ।
तथा कोशा नरेन्द्राणां क्षीयन्ते राष्ट्रकर्शनात् ॥" इति ।

यः समुदयं व्ययमिति । यः, व्ययं कर्मार्थव्ययाय क्लृप्तं धनं, समुदयम् उपनयति समुदये प्रवेशयति व्ययितमकृत्वेत्यार्थं, सः, पुरुषकर्माणि भक्षयति पुरुषान् कर्मकरान् कर्माणि च नाशयति कर्मानुष्ठापनेन । तस्य दण्डमाह — स इति । सः, कर्मदिवसद्रव्यमूल्यपुरुषवेतनापहारेषु कर्मार्थदिवसस्य यद् द्रव्यं तद्दिवसकर्मसाध्यं फलं तस्य मूल्यं कल्पितः कश्चिदर्थः कर्मदिवसद्रव्यमूल्यं पुरुषवेतनं पुरुषाणां कर्मकराणां वेतनं कर्मदिवसद्रव्यमूल्यस्य पुरुषवेतनस्य च अपहारेषु विनाशनेषु, यथापराधम् अपराधानुसारेण दण्डयितव्यः कर्मदिवसद्रव्यमूल्यं कर्मकरपुरुषवेतनं च यावत् कर्माकरणेन हापितं तावद् दापयितव्य इत्यभिप्रायः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्मादस्य यो यस्मिन्नधिकरणे शासनस्थः स तस्य कर्मणो याथातथ्यमायव्ययौ च व्याससमासाभ्यामाचक्षीत ।

मूलहरतादात्विककदर्यांश्च प्रतिषेधयेत् । यः पितृपैतामहमर्थमन्यायेन भक्षयति स मूलहरः । यो यद्यदुत्पद्यते तत्तद् भक्षयति स तादात्विकः । यो भृत्यात्मपीडाभ्यामुपचिनोत्यर्थं स कदर्यः । स पक्षवांश्चेदनादेयः, विपर्यये पर्यादातव्यः ।

यो महत्यर्थसमुदये स्थितः कदर्यः सन्निधत्ते, अवनिधत्ते, अवस्रावयति वा — सन्निधत्ते स्ववेश्मनि, अवनिधत्ते पौरजानपदेषु, अवस्रावयति परविषये — तस्य सत्री मन्त्रिमित्रभृत्यबन्धुपक्षमागतिं गतिं च द्रव्याणामुपलभेत ।

तस्मादिति । तस्मात् समुदयविषयेऽपराधे दण्डविधानात्, योऽध्यक्षः, यस्मिन्नधिकरणे, शासनस्थो नियुक्तः, सः, तस्य कर्मणः तदधिकरणसम्बद्धस्य कर्मणः, याथातथ्यं यथास्थितिम्, आयव्ययौ च, व्याससमासाभ्यां संक्षेपविस्ताराभ्याम्, अस्य राज्ञः, आचक्षीत निवेदयेत् ।

मूलहरेत्यादि । मूलहरतादात्विककदर्यान् प्रतिषेधयेत् मूलहरणादिकर्मणो वारयेत् । के पुनर्मूलहरादय इत्यत्राह—**यः पितृपैतामहमिति** । यः, पितृपैतामहं पितृपितामहार्जितम्, अर्थम्, अन्यायेन भक्षयति दुर्विनियोगेन नाशयति, स मूलहरः । यद्यदुत्पद्यते प्रत्यहं लभ्यते, तत्तद् यः, भक्षयति दुर्विनियोगेन नाशयति, स तादात्विकः । यः भृत्यात्मपीडाभ्याम् अर्थम्, उपचिनोति वर्धयति, स कदर्यः । प्रतिषेधानन्तरमपि मूलहरणाद्यनुवृत्तावाह—**स इति** । सः मूलहराद्यन्यतमः, पक्षवांश्चेत् पक्षो बन्धुसम्पत् तद्वान् यदि, अनादेयः अग्राह्यः तद्बन्धुकोपपरिहारार्थमगृहीतधन एव स्थानादवरोपणीय इत्यर्थः । विपर्यये पक्षवत्त्वाभावे, पर्यादातव्यः सर्वस्वं हर्तव्य इत्यर्थः ।

यो महतीति । यः कदर्यः महति अर्थसमुदये स्थितः सन्, सन्निधत्ते अवनिधत्ते अवस्रावयति वा, तत्र सन्निधानावनिधानावस्रावणानि विवृणोति—स्ववेश्मनि सन्निधत्ते भूगर्तस्तम्भकोटरादिषु स्थापयति, पौरजानपदेषु अवनिधत्ते रक्षणार्थं निक्षिपति, परविषये अवस्रावयति शत्रुजनपदे धनसञ्चारणं करोति, तस्य अध्यक्षस्य, मन्त्रिमित्रभृत्यबन्धुपक्षं मन्त्र्यादिचतुष्टयबलं, द्रव्याणामागतिं गतिं च, सत्री गूढपुरुषप्रणिध्युक्तलक्षणः, उपलभेत ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यश्चास्य परविषये सञ्चारं कुर्यात् तमनुप्रविश्य मन्त्रं विद्यात्। सुविदिते शत्रुशासनापदेशेनैनं घातयेत् ।

तस्मादस्याध्यक्षाः सङ्ख्यायकलेखकरूपदर्शकनीवीग्राहकोत्तराध्यक्षसखाः कर्माणि कुर्युः ।

उत्तराध्यक्षा हस्त्यश्वरथारोहाः। तेषामन्तेवासिनः शिल्पशौचयुक्ताः सङ्ख्यायकादीनामपसर्पाः ।

बहुमुख्यमनित्यं चाधिकरणं स्थापयेत् ।

यश्चेति । यश्च परविषये, अस्य कदर्यस्य, सञ्चारं द्रव्यसञ्चारणं कुर्यात्, तम्, अनुप्रविश्य अनुकूलतया प्रविश्य तन्मित्रं तद्भृत्यो वा भूत्वेत्यर्थः, मन्त्रं विद्यात् अभिसन्धिरहस्यं जानीयात् सत्री । सुविदित इति। सुविदिते सत्रिद्वारेण सम्यग् विज्ञाते मन्त्रे, एनं कदर्यं, शत्रुशासनापदेशेन घातयेत् शत्रुणा कदर्यमभिसम्बुध्य प्रहितं 'प्रेषितोऽर्थः प्रतीष्टः, अवशिष्टः क्षिप्रं प्रेष्यतामि'ति लिखितवृत्तान्तं किमपि लेख्यं शत्रुविषयागतजनहस्तादन्तपालेन गृहीतोपनीतमित्येवं कूटसृष्टस्यैव शत्रुशासनस्य अपदेशेन प्रख्यापनेन हतं कारयेत् ।

तस्मादिति। तस्माद् राजद्रव्यापहारे यथोक्तदण्डविधानात्, अध्यक्षाः, अस्य राज्ञः, कर्माणि धनसम्बद्धानि कार्याणि, संख्यायकलेखकरूपदर्शकनीवीग्राहकोत्तराध्यक्षसखाः कुर्युः संख्यायकादिसाक्षिकाः सन्तः कुर्युः। संख्यायकाः गणकाः, लेखकाः प्रसिद्धाः, रूपदर्शकाः निष्कदीनारादिरूपपरिशोधकाः, नीवीग्राहकाः व्ययितशिष्टधनग्रहणाधिकृताः, उत्तराध्यक्षा औपरिकाः।

के पुनरुत्तराध्यक्षाः कर्तव्या इत्यत्राह—उत्तरेत्यादि । हस्त्यश्वरथारोहाः हस्त्यारोहा अश्वारोहा रथारोहाश्च वृद्धभावादिना युद्धाक्षमत्वं प्रतिपन्नाः, उत्तराध्यक्षाः कर्तव्याः। तेषामिति ! तेषाम् उत्तराध्यक्षाणां, शिल्पशौचयुक्ता अन्तेवासिनः शिल्पं नियोगानुष्ठानकौशलं शौचं स्वकृत्याविसंवादनं ताभ्यामुपेताः शिष्याः, संख्यायकादीनामपसर्पाः संख्यायकलेखकादिप्रवृत्त्युपलम्भार्था गूढपुरुषाः कर्तव्याः ।

बहित्यादि । अधिकरणं युक्तकर्मस्थानं, बहुमुख्यं स्थापयेत् बहवो मुख्याः प्रधाना यस्मिंस्तत् तथाभूतं कुर्यात्, बहवश्चेत् प्रधानास्तेऽन्योन्यशङ्किता राजार्थं नापहरन्तीति। अनित्यं च स्थापयेत् अनित्यं न विद्यते नित्यः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथा ह्यनास्वादयितुं न शक्यं
जिह्वातलस्थं मधु वा विषं वा ।
अर्थस्तथा ह्यर्थचरेण राज्ञः
स्वल्पोऽप्यनास्वादयितुं न शक्यः ॥
मत्स्या यथान्तस्सलिले चरन्तो
ज्ञातुं न शक्याः सलिलं पिबन्तः ।
युक्तास्तथा कार्यविधौ नियुक्ता
ज्ञातुं न शक्या धनमाददानाः ॥
अपि शक्या गतिर्ज्ञातुं पततां खे पतत्रिणाम् ।
नतु प्रच्छन्नभावानां युक्तानां चरतां गतिः ॥
आस्रावयेच्चोपचितान् विपर्यस्येच्च कर्मसु ।
यथा न भक्षयन्त्यर्थं भक्षितं निर्वमन्ति वा ॥

।स्थिरश्चिरस्थायी युक्तो यस्मिंस्तत् तथाभूतं च कुर्यात् । नित्यो हि युक्तश्चिरसंवाससुलभां मित्रसम्पदमवष्टभ्यात्मदोषान् निह्नुवीत, जानपदाश्च तस्य दोषान् कालान्तरात्मापकारभिया नाविष्कुर्युरिति ।

अध्यायान्ते श्लोकानाह — **यथाहीत्यादि** । अनास्वादयितुं न शक्यम् अर्थादास्वादनपरिहारमिच्छतापि । अशक्यत्वोपपादकमाह — **जिह्वातलस्थमिति** । विनापि पुरुषयत्नेन तदुदरप्रवेशं यद्देशसन्निकर्षे लभेत तद्देशनित्यसन्निहितमित्यर्थः । **अर्थ** इति । योऽत्यल्पत्वाद् भक्षितविज्ञातोऽप्यनर्थापर्यवसायी मधुस्थानीयो, यश्च महत्त्वाद् वधदण्डान्तपरमानर्थपर्यवसायी विषस्थानीयः, स उभयविधोऽपि । अर्थचरः अर्थेषु व्याप्रियमाणोऽध्यक्षः । तदेवमर्थभक्षणस्याध्यक्षदुष्परिहरत्वमनेनोक्तम् ॥

कृतमप्यध्यक्षैरर्थभक्षणं जलचरमत्स्यजलपानवद् गगनचरपक्षिगतिवच्च स्वामिना दुरवबोधमिति श्लोकद्वयेनाह — **मत्स्या यथान्तरिति, अपि शक्या गतिरिति** च ॥

अत एतेषु राजा किं कुर्यात्, तत्राह— **आस्रावयेदिति** । उपचितान् अर्थभक्षणसमृद्धान् अध्यक्षान्, आस्रावयेद् भक्षितमर्थमाहारयेद् उपचयरूपेण लिङ्गेनापसर्पाद्युपायेन च तदपचारमवगम्येत्यार्थम् । कर्मसु विपर्यस्यत् व्यत्ययेन निवेशयेद् उच्चकर्मस्थानेभ्योऽवरोप्य नीचकर्मस्थानेषु नियु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न भक्षयन्ति ये त्वर्थान् न्यायतो वर्धयन्ति च ।
नित्याधिकाराः कार्यास्ते राज्ञः प्रियहिते रताः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
नवमोऽध्यायः उपयुक्तपरीक्षा,
आदितस्त्रिंशः ॥

ज्ञीतेत्यर्थः । आस्रावणविपर्यसनभयाच्चाध्यक्षा अर्थभक्षणे न प्रवर्तन्ते, भक्षितं चार्थं प्रत्याहरन्तीत्यभिप्रायेणाह —यथेत्यादि । तथा आस्रावयेदित्येवं पूर्वार्धेन सम्बन्धः । सोऽयमर्थभक्षकविषयो विधिः प्रपञ्चितः ॥

ये पुनरर्थचरा अपि सन्तो महान्तं यत्नमास्थाय राजजानपदार्थं न भक्षयन्ति, प्रत्युत न्यायतः परिवर्धयन्ति, तथाविधा राजप्रियहितानुष्ठानपराः स्थिराधिकाराः कर्तव्या इत्याह — न भक्षयन्तीत्यादि ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
नवमोऽध्यायः उपयुक्तपरीक्षा,
आदितस्त्रिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२८. प्रक. शासनाधिकारः।

शासने शासनमित्याचक्षते। शासनप्रधाना हि राजानः, तन्मूलत्वात् सन्धिविग्रहयोः।

तस्मादमात्यसम्पदोपेतः सर्वसमयविदाशुग्रन्थश्चार्वक्षरो लेखवाचनसमर्थो लेखकः स्यात्। सोऽव्यग्रमना राज्ञः सन्देशं श्रुत्वा

शासनाधिकार इति सूत्रम्। शासनं नाम लिखितकार्यार्थं तालपत्रादि, तस्याधिकारो विधिरुच्यत इति सूत्रार्थः। 'अर्धगुणहीनः शासनहरः' इति शासनं यत् सूत्रितं दूतप्रणिधौ तदिह निरूप्यत इति सङ्गतिः।

किं तच्छासनमित्याह—**शासने शासनमित्याचक्षत** इति। पत्रारूढोऽर्थः शासनं तस्मिन् शासनमिति व्यपदेशं कुर्वन्त्याचार्याः, नतु सन्दिष्टेऽर्थे वाचिकाख्ये इत्यर्थः। कुतः पुनः शासनवाचिकयोर्मध्ये शासनस्य निरूपणादरो नतु वाचिकस्येत्याकाङ्क्षायामाह — **शासने**त्यादि। सन्धिविग्रहयोरिति षाड्गुण्योपलक्षणम्। तेनायमर्थः— हि यस्माच्छासनमेव राज्ञां मन्त्रगुप्तिपुरस्सरषाड्गुण्यव्यापाराव्यभिचारनिर्वाहकतया प्रधानं, वाचिकं तु सन्देशहरगतप्रमादादिदोषसम्भावितमन्त्रभेदतया व्यभिचारित्वान्न प्रधानमिति।

शासनस्य प्रधानत्वाद् विशिष्टगुण एव तल्लेखको भवितुमर्हतीत्याह— **तस्मादि**त्यादि। तस्माद्, अमात्यसम्पदोपेतः 'जानपदोऽभिजात' इति मन्त्रिपुरोहितोत्पत्तिप्रकरणोक्ताः पञ्चविंशतिर्जानपदत्वादयो गुणा अमात्यसम्पत् तया युक्तः, सर्वसमयवित् सर्वेषां वर्णानाम् आश्रमाणां वर्णातिरिक्तानां चाचाराभिज्ञः, आशुग्रन्थः शीघ्रवाक्यसन्दर्भप्रसरः, चार्वक्षरः चारूणि एकैकशः समुदायतश्च दर्शनीयान्यक्षराणि लिपयो यस्य सः, लेखवाचनसमर्थः लेखस्य स्फुटसुस्वरयथास्थानवाक्यविश्रमसुभगपठनप्रवीणः, लेखस्याप्रकाश्यार्थस्य संज्ञालेखस्य वर्जिताक्षरस्य पदवाक्यसंकेतितलेखविशेषात्मकस्य वाचने व्यवहारे समर्थ इत्यपरे। एवमेकोनत्रिंशता गुणैर्युक्तो लेखकः स्यात्। स च लेखको राज्ञोच्यमानं वाचिकमनाकुलेन मनसा श्रुत्वार्थान् पौर्वापर्यक्रमेण परलेखार्थानुगुण्यानानुगुण्याभ्यां च निश्चित्य लेखं लिखेदित्याह— **सोऽव्यग्रे**त्यादि। तत्र युक्तानामव्यग्रमनस्कता राजसत्काराद भवति। यदाहुः —

"नीचापि बुद्धिर्नृपमानयोगाच्छ्रेष्ठत्वमायाति तदाश्रितानाम्।
अग्र्यापि निर्वाति हि मानहीना स्नेहं विना दीपशिखेव तूर्णम्॥"

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निश्चितार्थं लेखं विदध्यात्, देशैश्वर्यवंशनामधेयोपचारमीश्वरस्य, देश नामधेयोपचारमनीश्वरस्य ।

जातिं कुलं स्थानवयःश्रुतानि कर्मर्द्धिशीलान्यथ देशकालौ ।
यौनानुबन्धं च समीक्ष्य कार्ये लेखं विदध्यात् पुरुषानुरूपम् ॥

इति । परलेखानुरूप्यानानुरूप्यनिश्चयविषयेऽपि श्लोकमुदाहरन्ति —

"श्रुत्वा नरेन्द्रवाक्यं परभावं चावधार्य परलेखात् ।
लेखः खलु कर्तव्यो गुणदोषविनिश्चययत्नेन ॥"

इति । कीदृशं विदध्यात्, ईश्वरस्य राज्ञः, देशैश्वर्यवंशनामधेयोपचारं देशादीनां चतुर्णामुपचारो यस्मिंस्तं तथाभूतम् । तत्र देशोपचारोऽध्युष्यमाणदेशनिर्देशेनोपचारः, यथा — मध्यदेशमलङ्कुर्वाणमिति । ऐश्वर्योपचारः भूकोशदण्डसम्पन्निर्देशोपचारः 'मध्यदेशाधिपतिमसंख्याताप्रतिहतदण्डक्षपितरिपुपक्षम्' इत्येवञ्जातीयः । वंशोपचारः 'सोमान्वयभूषणम्' इत्येवम्प्रकारः । नामधेयोपचारः 'महाराजाधिराजश्रीसिंहवर्मदेवम्' इत्येवञ्जातीयः । अनीश्वरस्य अमात्यादेः, देशनामधेयोपचारं देशोपचारनामोपचारयुक्तम् । तत्र देशोपचारः 'कान्यकुब्जमलङ्कुर्वाणम्' इत्यादिः । नामोपचारः 'श्रीसोमदत्तमि'त्यादिः ।

जातिकुलाद्येकादशकमपि लेखविधौ समीक्षणीयमित्याह — **जातिमित्यादि** । तत्र जातिर्ब्राह्मणादिः । तत्समीक्षा च ब्राह्मणो ब्राह्मणस्य ज्यायसोऽभिवादपूर्वं कनीयस आशीर्वचनपूर्वं क्षत्रियस्य स्वस्त्यादिपदपूर्वं, क्षत्रियादिर्ब्राह्मणस्य प्रणामपूर्वमित्येवञ्जातीया । कुलम् अन्ववायो भोजादिः । स्थानमधिकारः सान्धिविग्रहिकादिः । वयो यौवनादि । श्रुतं शास्त्रविज्ञानम् । कर्म वृत्तिः । ऋद्धिर्धनसम्पत् । शीलं सदाचारः । देशो वासस्थानम् । कालः तदात्वमायतिश्च । यौनानुबन्धो विवाहसम्बन्धः । इदं जात्याद्येकादशकं, समीक्ष्य पर्यालोच्य, कार्ये कार्यविषये, पुरुषानुरूपं पुरुषाणां हीनमध्यमोत्तमानां यथाक्रममाज्ञापनबोधनविज्ञापनाद्युक्तिप्रकारैरनुरूपं लेखं विदध्यात् । श्लोकं चात्रोदाहरन्ति —

"वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥" इति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अर्थक्रमः, सम्बन्धः, परिपूर्णता, माधुर्यमौदार्यं, स्पष्टत्वमिति लेखसम्पत् ।

तत्र यथावदनुपूर्वक्रिया प्रधानस्यार्थस्य पूर्वमभिनिवेश इत्यर्थस्य क्रमः ।

प्रस्तुतस्यार्थस्यानुपरोधादुत्तरस्य विधानमा समाप्तेरिति सम्बन्धः ।

अर्थपदाक्षराणामन्यूनानतिरिक्तता हेतूदाहरणदृष्टान्तैरर्थोपवर्णनाश्रान्तपदतेति परिपूर्णता ।

लेखसम्पदमाह — **अर्थक्रम** इत्यादि ।

अर्थक्रमादीन् षड् लेखगुणान् स्वयमेव व्याचष्टे — **तत्रे**त्यादि । तत्र अर्थक्रमादीनां मध्ये । यथावदनुपूर्वक्रिया यथार्हं क्रमकरणम् । तदेव स्फुटप्रतिपत्तये विवृणोति — प्रधानस्यार्थस्य पूर्वमभिनिवेश इति । अभ्यर्हितस्यार्थस्य पूर्वं लेखनं पश्चादन्यस्येत्ययमर्थक्रमो नाम लेखगुणः ।

सम्बन्धमाह —**प्रस्तुतस्ये**ति । प्रस्तुतस्य प्रक्रान्तस्य, अर्थस्य, अनुपरोधाद् अबाधात्, उत्तरस्यार्थस्य, आ समाप्तेर्विधानम् आ लेखपरिसमापनालेखनं पूर्वपूर्वलिखितार्थाविरोधेनोत्तरोत्तरार्थलेखनमिति यावत्, इत्ययं सम्बन्धाख्यो गुणः ।

परिपूर्णतामाह — **अर्थे**त्यादि । अर्थपदाक्षराणामन्यूनानतिरिक्तता अर्थस्य पदानामक्षराणां चान्यूनतानातिरिक्तता च । अर्थन्यूनता यथा — 'हस्तिनौ प्रयच्छे'त्युक्ते हस्तिनं प्रयच्छेति लेखनम् । इहार्थमात्रं न्यूनं पदाक्षराणि तु न न्यूनानि न चातिरिक्तानि । 'हस्तिनं प्रयच्छे'त्युक्ते हस्तिनौ प्रयच्छेति लेखनेऽर्थातिरिक्तता पदाक्षराणि तु तावन्त्येव । पदन्यूनता यथा — 'कालिङ्गं हस्तिनं प्रयच्छे'त्युक्ते विशेषणपरित्यागेन 'हस्तिनं प्रयच्छे'ति लेखनं, 'हस्तिनं प्रयच्छे'ति निर्विशेषणोक्तौ सविशेषणलेखनं पदाधिकता । अक्षरन्यूनता यथा — सलिलशब्दोक्तौ वारिशब्दलेखनं, तद्वैपरीत्यलेखनेऽक्षराधिकता । हेतूदाहरणदृष्टान्तैरर्थोपवर्णना हेतुः कारणम् उदाहरणं शास्त्रसंवादाभिधानं दृष्टान्तो लोकसिद्धार्थनिदर्शनं हेत्वादिभिस्त्रिभिरर्थस्य प्रस्तुतस्य उपवर्णना सम्प्रतिपत्तिसम्पादनम् । अश्रान्तपदता वाक्यार्थे पदवचनं, यथा 'सन्धिं कुरु' इति पदसमूहप्रतिपाद्यस्यार्थस्य 'सन्धत्स्व' इत्येकेन पदेन प्रतिपादनम् । इति परिपूर्णता अनेन प्रकारेण परिपूर्णता नाम गुणः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुखोपनीतचार्वर्थशब्दाभिधानं माधुर्यम् ।
अग्राम्यशब्दाभिधानमौदार्यम् ।
प्रतीतशब्दप्रयोगः स्पष्टत्वमिति ।
अकारादयो वर्णास्त्रिषष्टिः ।

वर्णसङ्घातः पदम् । तच्चतुर्विधं नामाख्यातोपसर्गनिपाताश्चेति । तत्र नाम सत्त्वाभिधायि । अविशिष्टलिङ्गमाख्यातं क्रियावाचि । क्रियाविशेषकाः प्रादय उपसर्गाः । अव्ययाश्चादयो निपाताः ।

सुगमसुन्दरार्थप्रतिपादकशब्दप्रयोगो नाम माधुर्यम्, अग्राम्यशब्दप्रयोग औदार्यं, सुप्रसिद्धशब्दप्रयोगश्च स्पष्टत्वमित्याह—**सुखोपनीते**त्यादि ।

शब्दप्रसङ्गात् तद्गतं पदवाक्यविभागं पदवाक्यगतं च लेखे करणीयं विशेषान्तरं निरूपयिष्यन् पदारम्भकत्वात् प्रथममक्षराणि निरूपयति—**अकारादयो वर्णास्त्रिषष्टि**रिति । तत्र ह्रस्वदीर्घप्लुतभेदादचो द्वाविंशतिः, कादयो मावसानाः स्पर्शाख्याः पञ्चविंशतिः, यरलवा अन्तःस्थाख्याश्चत्वारः, अयोगवाहा अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयाश्चत्वारः, यमाक्षराणि चत्वारि, शषसहा ऊष्माख्याश्चत्वारः इत्येवं वर्णानां त्रिषष्टित्वम् । यदाहुः—

"दीर्घाः स्वराणां तत्राष्टौ पञ्च ह्रस्वाः प्लुता नव ।
चतुर्धायोगवाहोष्मयमान्तस्थाः पृथक् पृथक् ।
विंशतिः पञ्च च स्पर्शास्त्रिषष्टिरिति कीर्तिताः ॥"

इति । स्वरानुनासिक्यकृतस्तु भेदो न संख्यातो लौकिकप्रयोगे तदनादरात् ।

पदस्वरूपमाह —**वर्णसंघातः पद**मिति । नियतानुपूर्वीकाणां वर्णानां समूहोऽर्थविशेषसङ्केतितः पदमित्युच्यते । तच्चतुर्विधं नामादिभेदादित्याह—**तदि**ति । नामादिस्वरूपमाह — **तत्रे**ति । तेषु नामादिषु मध्ये, सत्त्वाभिधायि जातिगुणद्रव्यवाचकं, **नाम** इत्युच्यते । अविशिष्टलिङ्गं स्त्रीपुन्नपुंसकरूपलिङ्गविशेषशून्यं क्रियावाचकम् **आख्यातम्** । क्रियाविशेषकाः क्रियागतप्रकर्षादिविशेषद्योतकाः, प्रादयः प्र परा अप सम् अनु इत्यादयः **उपसर्गाः** । अव्ययाः लिङ्गवचनविभक्तिभेदरहिताः, चादयः च वा ह इत्यादयः, **निपाताः** ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पदसमूहो वाक्यमर्थपरिसमाप्तौ । एकपदावरस्त्रिपदपरः परपदार्थानुरोधेन वर्गः कार्यः । लेखपरिसंहरणार्थ इतिशब्दो वाचिकमस्येति च ।

वाक्यस्वरूपमाह—**पदे**त्यादि । पदसमूहः पदानां सङ्घातो वाक्यम् इत्युच्यते, अर्थपरिसमाप्तौ अर्थस्य पर्यवसाने सति तेन पदसमूहेन चेदेको विशिष्टार्थो नैराकाङ्क्षेण बुद्धौ प्रतिष्ठितो भवतीत्यर्थः । समासकरणविषयमाह—**एके**त्यादि । वर्गः समासः, परपदार्थानुरोधेन कार्यः परं यत् पदं समासघटकादेकस्मात् पदाद् अन्यत् समासघटकं पदं तस्य अर्थानुरोधेन अर्थमनुसृत्य कार्यः अर्थस्य समासघटकपदान्तरार्थेन सहैकीभावयोग्यतामभिलक्ष्य कार्य इत्यर्थः । पदयोः पदानां वा सति सामर्थ्ये समासः कार्यो नान्यथेत्यभिप्रायः । स च कथम्भूतः कार्यः, एकपदावरस्त्रिपदपरः समस्यमानपदातिरेकेणैकं पदम् अवरं निकृष्टं यस्मिन् स तथाभूतः अर्थाद् द्विपदावरः त्रीणि पदानि पराणि उत्कृष्टानि यस्मिन् स तथाभूतश्च कार्यः, त्र्यधिकपदसमासस्तु न कार्यो माधुर्याद्युक्तगुणहानात् । यदाहुः—

"माधुर्यमभिवाञ्छन्तः प्रसादं च सुमेधसः ।
समासवन्ति भूयांसि न पदानि प्रयुञ्जते ॥"

इति । **अपरा व्याख्या** — एकपदावरस्त्रिपदपरः इत्यनयोर्यथोक्त एवार्थः, विशेष्यस्तु पदसमूहः, स च सामर्थ्यात् समासलक्षणः । तावता च दीर्घसमासप्रतिषेधस्योक्तस्य सिद्धिः । 'परपदार्थानुरोधेन वर्गः कार्यः' इत्यनेन तु अर्थान्तरं संगृह्यते । तद्यथा—'वर्गो विरामोऽवसानं विच्छेद इति पर्यायाः । वर्गः अर्थविश्रान्तिचिह्नं सुखप्रतिपत्त्यर्थं क्रियमाणं, परपदार्थानुरोधेन परपदार्थानुसारेण, कार्यः । अनुपरोधेनेति पाठे परपदार्थानुपघातेन कार्यः । यथा— 'पुराणं मानवो धर्मः स्वको वेदश्चिकित्सितम् । आज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः ॥' इत्यस्मिन् श्लोके चत्वारीत्यत्र विरामचिह्नस्य करणे परपदार्थेन नोपरोधः, 'चत्वारि न' इत्यत्र करणे तु स्फुट एव सः इति । लेखपरिसमाप्तिचिह्नमाह — **लेखे**त्यादि । अन्ते इतिशब्दलेखनं 'वाचिकमस्ये'ति लेखनं वा लेखसमाप्तिसूचनप्रयोजनकमित्यर्थः । तत्र लेखनीयार्थस्य निरवशेषतायामितिशब्दः सावशेषतायां 'वाचिकमस्य' इत्युक्तिः । वाचिकमस्येति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निन्दा प्रशंसा पृच्छा च तथाख्यानमथार्थना ।
प्रत्याख्यानमुपालम्भः प्रतिषेधोऽथ चोदना ॥
सान्त्वमभ्यवपत्तिश्च भर्त्सनानुनयौ तथा ।
एतेष्वर्थाः प्रवर्तन्ते त्रयोदशसु लेखजाः ॥

तत्राभिजनशरीरकर्मणां दोषवचनं निन्दा । गुणवचनमेतेषामेव प्रशंसा । कथमेतदिति पृच्छा । एवम् इत्याख्यानम् । देहीत्यर्थना । न प्रयच्छामीति प्रत्याख्यानम् । अननुरूपं भवत इत्युपालम्भः । मा कार्षीः इति प्रतिषेधः । इदं क्रियताम् इति चोदना । योऽहं स भवान्, मम यद् द्रव्यं तद् भवतः इत्युपग्रहः सान्त्वम् । व्यसनसाहाय्यमभ्यवपत्तिः । सदोषमायतिप्रदर्शनमभिभर्त्सनम् ।

लेखनं च 'वाचिकमस्य लेखहरमुखाच्छ्रोतव्यम्' इत्यादिरीत्या लेखनमिति बोद्धव्यम् ।

अथ लेखनीयतया सम्भावितान् अर्थान् श्लोकाभ्यामुद्दिशति—**निन्दे**-त्यादि । निन्दाप्रशंसादित्रयोदशकविषयतया त्रयोदशविधा लेखार्था इत्यर्थः ॥

निन्दादिकं क्रमेण व्याचष्टे—**तत्रे**त्यादि । अभिजनशरीरकर्मणां दोषवचनं प्रकृतिकुटिला वैश्वामित्रा इत्यभिजनदोषवचनं कुष्ठितो व्याधित इति शरीरदोषवचनं गोघ्नो ब्रह्महेति कर्मदोषवचनं, सेयं **निन्दा** त्रिप्रकारा । तद्वैपरीत्येन तेषामेवाभिजनादीनां गुणवचनं **प्रशंसा** । कथमेतत् करणीयमिति कर्तव्यजिज्ञासा **पृच्छा** । एवमेतत् करणीयमित्युपदेशः पृष्टेन क्रियमाण **आख्यानं** । सन्ध्यादिनिमित्तं किञ्चित् कोशदण्डादिकं देहीति याचन**मर्थना** । अर्थितस्य न प्रयच्छामीति वचनं **प्रत्याख्यानम्** । अननुरूपं भवत इदं कार्यमित्युक्ति**रुपालम्भः** । मा कार्षीरित्यकार्यप्रवृत्तेर्वारणमाप्तभावात् क्रियमाणं **प्रतिषेधः** । इदं क्रियतां सन्धानं विग्रहणं वास्मिन् देशकाल इति प्रेरणा **चोदना** । योऽहं स भवान्, मम यद् द्रव्यं तद् भवत इति स्वशरीरसम्बोध्यशरीरयोः स्वद्रव्यसम्बोध्यद्रव्ययोश्चाभेदवचनभङ्ग्यानुकूलनं **सान्त्वम्** । व्यसने रिपूपप्लवादौ साह्यकरण**मभ्यवपत्तिः** । अनित्थंकुर्वाणमाचिरात् त्वां घातयेयं, बद्ध्वा वा कारागृहे निवेशयेयमित्येवमनर्थदोषयुक्तमुत्तरकालकथनमभिभर्त्सनमित्युच्यते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनुनयस्त्रिविधोऽर्थकृतावतिक्रमे पुरुषादिव्यसने चेति ।
प्रज्ञापनाज्ञापरिदानलेखास्तथा परीहारनिसृष्टिलेखौ ।
प्रावृत्तिकश्च प्रतिलेख एव सर्वत्रगश्चेति हि शासनानि ।
अनेन विज्ञापितमेवमाह तद् दीयतां चेद्यदि तत्त्वमस्ति ।
राज्ञः समीपे वरकारमाह प्रज्ञापनैषा विविधोपदिष्टा ॥

भर्तुराज्ञा भवेद् यत्र निग्रहानुग्रहौ प्रति ।
विशेषेण तु भृत्येषु तदाज्ञालेखलक्षणम् ॥
यथार्हगुणसंयुक्ता पूजा यत्रोपलक्ष्यते ।
अध्याधौ परिदाने वा भवतस्तावुपग्रहौ ॥

अनुनय इति । अर्थकृतावित्यादयो निमित्तसप्तम्यः । अर्थकरणनिमित्तोऽतिक्रमनिमित्तः पुरुषादिव्यसननिमित्त इति त्रिप्रकारोऽनुनयः । तत्र सामवायिकादिकार्यमवश्यकरणीयमकुर्वाणं प्रति तत्करणार्थं मित्रेण क्रियमाणोऽनुनय आद्यः । स्ववाक्यातिक्रमकुपितं प्रति कोपप्रशमनाय क्रियमाणोऽनुनयो द्वितीयः । पितृभ्रातृपुत्रमित्रामात्यमरणादिव्यसनेष्ववश्यानुग्राह्यं पूर्वमननुगृह्य पश्चात् कार्यवशात् तं प्रति क्रियमाणोऽनुनयस्तृतीयः ।

भूयोऽप्यष्टौ शासनभेदान् श्लोकेनोद्दिशति — **प्रज्ञापने**त्यादि ॥

श्लोकैरेव तेषां विवरणमारभमाणः प्रथमं प्रज्ञापनलेखं व्याचष्टे — **अनेने**ति । प्रज्ञापना नाम महामात्रादीन् प्रति तदीयगूढपुरुषैः क्रियमाणा तन्मित्रामित्रराजपुरुषवृत्तान्तस्यावेदना । एषा विविधा बहुप्रकारा उपदिष्टा ।ताममित्रविषयां पूर्वार्धेन प्रदर्शयति—अनेन राजानुचरेण देवदत्तनाम्ना विज्ञापितं राजान्तिके 'महामात्रेण कुतश्चिन्निधिरधिगत आत्मसात्कृत' इति । विज्ञापितश्च राजानेन प्रकारेणाह — 'यदि महामात्रः स्वयं तं निधिं न प्रयच्छति तदाहमेव तं द्विगुणमाहारयिष्यामी'ति । तत्त्वमस्ति चेद्यदि तद् दीयतां यदि निधिद्रव्याधिगमः सत्यः तर्हि तद् दीयतां राज्ञे इत्यर्थः । मित्रविषयां तृतीयपादेन दर्शयति — राज्ञः समीपे वरकारम् आह कल्याणं कर्म त्वया क्रियमाणं निवेदयति, अर्थाद् देवदत्तादिः । इह चेत्पदयदिपदयोः सहप्रयोगोऽपिशब्दचशब्दयोरिव द्रष्टव्यः ॥

सामान्यतो यस्मिन्कस्मिंश्चिज्जने विषये विशेषेण पुनर्भृत्येषु विषये निग्रहमनुग्रहं वाधिकुर्वती भर्तुराज्ञा यस्मिन् लेखे, स आज्ञालेख इत्याह — **भर्तु**रित्यादि ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जातेर्विशेषेषु पुरेषु चैव ग्रामेषु देशेषु च तेषु तेषु ।
अनुग्रहो यो नृपतेर्निदेशात् तज्ज्ञः परीहार इति व्यवस्येत् ॥
निसृष्टिस्थापना कार्यकरणे वचने तथा ।
एष वाचिकलेखः स्याद् भवेन्नैसृष्टिकोऽपि वा ॥

परिदानलेखमाह — **यथार्हेत्यादि** । यत्र यस्मिन् लेखे, यथार्हगुणसंयुक्ता उत्तममध्यमाधमसम्बोध्यतारतम्यानुसारिणी, पूजा 'धार्मिकस्य गुणवतस्तवेदमसदृशं दुःखमुपनतं, किं कुर्मः, क्षन्तव्यमेव विवेकिभिरीदृशं कथञ्चिद्' इत्युक्तिरूपः शोककाले, 'स्वनियोगसविशेषानुष्ठानस्यापर्याप्तमपीदमस्माभिर्यत्किञ्चित् पारितोषिकं दीयमानं स्वीकरोतु भवानि'त्युक्तिरूपः स्वामिपरितोषकाले, स्वामिबहुमानः, उपलक्ष्यते, स परिदानलेख इति विधेयाध्याहारः, तस्यैव लक्षणीयतया क्रमप्राप्तत्वात् । तस्य विषयद्वैविध्येन द्वैविध्यं सूचयन्नाह — **अपीति** । तौ परिदानलेखौ, अप्याधौ परिदाने वा, अपिवाशब्दौ समुच्चयार्थौ, आधिर्बन्धुमरणनिमित्ता भृत्यानां मनोव्यथा परिदानं परिरक्षणं भृत्यविषयदयाविष्करणमिति यावत्, आधौ च परिदाने च, उपग्रहौ स्वीकारहेतू स्वतातिशयप्रतिपत्तिहेतू, भवतः ॥

परिहारलेखमाह — **जातेरिति** । अमुकस्य कालस्यामुकब्राह्मणेभ्यः करो न ग्राह्य इत्येवंप्रकारो यो जातिविशेषविषयोऽनुग्रहः, अमीषु नगरेषु वणिग्भ्यः शुल्कममुकस्य कालस्य न ग्राह्यमित्येवंविधो यः पुरविषयः, नवागतकुटुम्बिभ्यः इयतः कालस्य न ग्राह्यः कर इत्येवंप्रायो यो ग्रामविषयः, न कोऽपि राजभागधेयोऽमुकदेशे कालस्यैतावतो ग्राह्य इत्येवञ्जातीयो यो देशविषयः, स सर्वविधोऽप्यनुग्रहो राजशासनात् प्रवृत्तः परीहारसंज्ञित इति लेखप्रकाराभिज्ञो जानीयादिति श्लोकार्थः । तत्रानुग्रहः कश्चित् कराग्रहणरूपः, कश्चित् स्वयं धनदानरूपः, कश्चिदुभयरूप इति त्रिप्रकारो वेदितव्यः ॥

निसृष्टिलेखमाह — **निसृष्टीत्यादि** । कार्यकरणे तथा वचने, निसृष्टिस्थापना कस्यचिदाप्तपुरुषस्य प्रामाण्याख्यानम् 'अमुकस्य क्रिया ममैव क्रिया अमुकस्य वचनं ममैव वचनमि'त्येवं रूपं, निसृष्टिलेख इति लक्ष्यस्याध्याहारः क्रमप्राप्तत्वात् । एतस्य प्रकारद्वयमाह — एष निसृष्टिलेखः, वाचिकलेखः स्यात् वचनप्रमाणीकरणाख्यायी सन् वाचिक इति वक्तुमर्हः, नैसृष्टिकोऽपि वा भवेत् क्रियाप्रमाणीकरणाख्यायी सन् नैसृष्टिक इति वक्तुमर्हः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विविधां दैवसंयुक्तां तत्त्वजां चैव मानुषीम् ।
द्विविधां तां व्यवस्यन्ति प्रवृत्तिं शासनं प्रति ॥
दृष्ट्वा लेखं यथातत्त्वं ततः प्रत्यनुभाष्य च ।
प्रतिलेखो भवेत् कार्यो यथा राजवचस्तथा ॥

यत्रेश्वरांश्चाधिकृतांश्च राजा रक्षोपकारौ पथिकार्थमाह ।
सर्वत्रगो नाम भवेत् स मार्गे देशे च सर्वत्र च वेदितव्यः ॥

उपायाः सामोपप्रदानभेददण्डाः ।

तत्र साम पञ्चविधं—गुणसङ्कीर्तनं सम्बन्धोपाख्यानं परस्परोपकारसन्दर्शनमायतिप्रदर्शनमात्मोपनिधानमिति ।

प्रावृत्तिकमाह—**विविधामिति** । विविधाम् अनेकप्रकारां, दैवसंयुक्तां यथाकालवृष्टिपातसुभिक्षाद्यनुकूलदैवफलसिद्धिसम्बद्धाम् अग्निवात्योपप्लवादिदुर्दैवफलसिद्धिसम्बद्धां च, तत्त्वजां पारमार्थिकीम्, मानुषीं चैव यातव्यसमुच्छेदादिरूपां परचक्रचोरादिजनितराज्योपद्रवादिरूपां च, तां प्रवृत्तिं प्रावृत्तिकव्यपदेशनिमित्तभूतां वार्तां, शासनं प्रति लेखविषये, द्विविधां व्यवस्यन्ति शुभाशुभात्मना द्विप्रकारां निश्चिन्वन्ति । प्रवृत्तिद्वैविध्यवचनभङ्ग्या चानया तन्निवेदनफलकस्य प्रावृत्तिकलेखस्य द्वैविध्यमभिहितं बोद्धव्यम् ॥

प्रतिलेखमाह—**दृष्ट्वेति** । लेखं परस्मादागतं, यथातत्त्वं दृष्ट्वा यथावस्थितपदपदार्थानतिक्रमेण पूर्वं स्वयं वाचनया विज्ञाय, ततः प्रत्यनुभाष्य च पश्चाद् राज्ञः सकाशेऽनुवाच्य च, यथा राजवचः राज्ञ उत्तरवचनं भवति, तथा प्रतिलेखः कार्यो भवेत् ॥

यत्र लेखे राजा ईश्वरान् दुर्गराष्ट्रान्तपालादीन् समाहर्तृप्रशास्तृप्रभृतीनधिकृतांश्च पथिकानां पथि सहायदानलक्षणां रक्षां भक्तयवसेन्धनादिदानलक्षणमुपकारं चाज्ञापयति, स लेखः राज्ञो देशान्तरसञ्चारणे स्वनिवासदेशे सर्वस्मिंश्च काले लेखनार्हत्वान्नाम्ना सर्वत्रगो भवेदित्याह—**यत्रेश्वरांश्चेत्यादि** ॥

शासनाधीनत्वं सन्धिविग्रहयोरुक्तमधस्तात् । सन्धिविग्रहानुष्ठानस्य उपायप्रयोगसापेक्षत्वात् तेष्वपि व्युत्पत्तिः शासनलेखकस्यापेक्षितेति कृत्वा तान् दर्शयति—**उपाया इत्यादि** ।

तत्र साम्नः पञ्च प्रभेदानुद्दिशति—**तत्र सामेत्यादि** ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्राभिजनशरीरकर्मप्रकृतिश्रुतद्रव्यादीनां गुणागुणग्रहणं प्रशंसा स्तुतिर्गुणसङ्कीर्तनम् ।

ज्ञातियौनमौखस्रौवकुलहृदयमित्रसङ्कीर्तनं सम्बन्धोपाख्यानम् ।

स्वपक्षपरपक्षयोरन्योन्योपकारसङ्कीर्तनं परस्परोपकारसन्दर्शनम् ।

अस्मिन्नेवं कृत इदमावयोर्भवतीत्याशाजननमायतिप्रदर्शनम् ।

योऽहं स भवान्, यन्मम द्रव्यं तद् भवता स्वकृत्येषु प्रयोज्यताम् इत्यात्मोपनिधानमिति ।

उपप्रदानमर्थोपकारः ।

तत्र प्रथमं सामप्रभेदं व्याचष्टे—**तत्राभिजनेत्यादि** । अभिजनः कुलं, शरीरं कर्म च प्रसिद्धे, प्रकृतिः स्वभावः, श्रुतं शास्त्रजनितः संस्कारः, द्रव्यं रथगजतुरगादिपरिग्रहः, आदिपदेन वयोरूपादिग्रहणम् । अभिजनादीनामेषां गुणग्रहणं गुणस्य वस्तुसतः स्वरूपाख्यानं, गुणागुणग्रहणमिति पाठे गुणागुणयोर्वस्तुसतोः स्वरूपाख्यानं, प्रशंसा सश्लाघमाख्यानं, स्तुतिरविद्यमानगुणकीर्तनं च, गुणसङ्कीर्तनं नाम भवति ।

सम्बन्धोपाख्यानं व्याचष्टे—**ज्ञातीत्यादि** । ज्ञातिः समानकुलोत्पन्नः, यौनो योनिकृतः सम्बन्धो विवाहाख्यः, मौखो मुखकृतः सम्बन्धो वाक्सम्बन्धः शिष्याचार्यभावलक्षणः, स्रौवः स्रुवनामकयज्ञपात्रविशेषकृतः सम्बन्धो याज्ययाजकभावरूपः, कुलं पूर्वपुरुषपरम्परा, हृदयं मनोनिबन्धः, मित्रम् उपकारकं, ज्ञात्यादीनां सप्तानां सङ्कीर्तनं सम्बन्धोपाख्यानमित्युच्यते ।

स्वपक्षेत्यादि । स्वपक्षपरपक्षयोः, अन्योन्योपकारसङ्कीर्तनं परस्परोपकारो यथा स्यात् तथा कथनं, परस्परोपकारसन्दर्शनं नाम सामभेदः ।

अस्मिन्निति । अस्मिन् कार्ये, एवं कृते अनेन प्रकारेणानुष्ठिते सति, आवयोरिदं भवति तव च मम चैतत् फलं भविष्यति इत्याशाजननम्, आयतिप्रदर्शनं नाम ।

योऽहमिति । योऽहं स भवान् आवामभिन्नौ, तस्माद्, मम यद् द्रव्यं भूमिहिरण्याद्यस्ति, तद् भवता स्वकृत्येषु प्रयोज्यतां स्वीयद्रव्यनिर्विशेषमुपयुज्यताम्, इतीदृशम्, आत्मोपनिधानं नाम पञ्चमः सामप्रभेदः ।

उपप्रदानाख्यं द्वितीयमुपायं व्याचष्टे—**उपेत्यादि** । अर्थोपकारः भूमिहिरण्यादिरूपार्थदानेनोपकारकरणम्, उपप्रदानम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शङ्काजननं निर्भर्त्सनं च भेदः ।

वधः परिक्लेशोऽर्थहरणं दण्ड इति ।

अकान्तिर्व्याघातः पुनरुक्तमपशब्दः संप्लव इति लेखदोषाः ।

तत्र कालपत्त्रकमचारुविषमविरागाक्षरत्वमकान्तिः ।

पूर्वेण पश्चिमस्यानुपपत्तिर्व्याघातः ।

उक्तस्याविशेषेण द्वितीयमुच्चारणं पुनरुक्तम् ।

लिङ्गवचनकालकारकाणामन्यथाप्रयोगोऽपशब्दः ।

अवर्गे वर्गकरणं वर्गे चावर्गक्रिया गुणविपर्यासः संप्लव इति ।

तृतीयमुपायं व्याचष्टे — शङ्केत्यादि । मित्रेष्वेकस्यापकाराधानेनान्येषां हृदि 'अस्मानप्यसावुच्छेत्स्यती'ति शङ्काया अपरागस्पर्धाहेतोरुत्पादनमेको भेदः, 'त्वामविधेयमभिघातयिष्यामी'त्येवम्प्रकारं निर्भर्त्सनमपरो भेदः ।

दण्डं व्याचष्टे — **वध** इत्यादि । वधो व्यापादनं, परिक्लेशो बन्धनताडनादिभिर्दुःखोत्पादनम्, अर्थहरणं धनापहारः, इदं त्रयं दण्डः । इतिशब्दः समाप्तौ, लेखगुणाख्यानं परिसमाप्तमित्यर्थः ।

अथ लेखदोषानाह — **अकान्ति**रित्यादि ।

तत्रेति । तत्र लेखदोषेषु पञ्चसूद्दिष्टेषु मध्ये, कालपत्त्रकं काले मषीप्रसरणात् स्वभावतो वा मलिने पत्त्रे लिखितम्, अकान्तिः तदाख्यो दोषः । अचारुविषमविरागाक्षरत्वम् अचारूणि असुन्दराणि विषमाणि अनियतस्थौल्यसौक्ष्म्याणि विरागाणि शुद्धोदकप्रायमषीलिखितानि चाक्षराणि यस्मिंस्तस्य भावस्तत्त्वं च, अकान्तिः । एवमस्य दोषस्याधारप्रयुक्तत्वेनाधेयप्रयुक्तत्वेन च द्वैविध्यं दर्शितम् ।

व्याघातमाह — **पूर्वेणे**त्यादि । पूर्वेणार्थेनोत्तरस्यानुपपत्तिर्विरोधः, व्याघातः, यथा 'प्रणम्याज्ञापयती'ति । इह हि प्रणामाज्ञापनयोर्विरोधः प्रतीतः ।

पुनरुक्तमाह — **उक्तस्ये**त्यादि । तद्यथा — पूज्यो मान्य इत्यादिलेखनम् ।

अपशब्दं व्याचष्टे — **लिङ्गे**त्यादि । स्त्रीलिङ्गे प्रयोक्तव्ये पुन्नपुंसकप्रयोगो लिङ्गस्यान्यथाप्रयोगः, एकवचने द्विबहुवचनप्रयोगो वचनस्यान्यथाप्रयोगः, वर्तमाने भूतभविष्यत्प्रयोगः कालस्यान्यथाप्रयोगः, कर्मकारके कर्तृकरणादिकारकप्रयोगः कारकस्यान्यथाप्रयोगः । लिङ्गादीनामेवञ्जातीयोऽन्यथाप्रयोगोऽपशब्द इत्युच्यते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वशास्त्राण्यनुक्रम्य प्रयोगमुपलभ्य च ।
कौटल्येन नरेन्द्रार्थे शासनस्य विधिः कृतः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
दशमोऽध्यायः शासनाधिकारः,
आदितः एकत्रिंशः ॥

संप्लवमाह—अवर्ग इति । वर्गो यतिश्छेद इति पर्यायाः, अवर्गे वर्गायोग्ये वर्गकरणं, वर्गे वर्गयोग्ये अवर्गक्रिया च इति द्वयं, गुणविपर्यासः गुणानामर्थकसादिलेखगुणानां वैपरीत्यं च, संप्लवो नाम नाम्ना भवति ।

अध्यायान्ते श्लोकमाह—सर्वेत्यादि । कौटल्येन, सर्वशास्त्राणि बार्हस्पत्यादीनि, अनुक्रम्य ज्ञात्वा, प्रयोगमुपलभ्य च शास्त्रानुष्ठानं दृष्ट्वा च, नरेन्द्रार्थे राज्ञः कृते प्रयोजनाय, शासनस्य विधिः, कृत उपदिष्टः । शास्त्रलोकदृष्टस्यापि सतः शासनविधेरिह कौटल्यकृतत्ववचनं कौटल्येन कात्स्न्र्यसौष्ठवातिशययोगसम्पादनादिति बोद्धव्यम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
दशमोऽध्यायः शासनाधिकारः,
आदित एकत्रिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

२९. प्रक. कोशप्रवेश्यरत्नपरीक्षा।

कोशाध्यक्षः कोशप्रवेश्यं रत्नं सारं फल्गु कुप्यं वा तज्जातकरणाधिष्ठितः प्रतिगृह्णीयात् ।

ताम्रपर्णिकं, पाण्ड्यकवाटकं, पाशिक्यं, कौलेयं, चौर्णेयं, माहेन्द्रं, कार्दमिकं, स्रौतसीयं, ह्रादीयं, हैमवतं च मौक्तिकम् ।

कोशप्रवेश्यरत्नपरीक्षेति सूत्रम् । कोशो भाण्डागारं तत्प्रवेशनार्हाणां रत्नानां माणिक्यमुक्ताप्रवालादीनां, रत्नग्रहणेन संग्राह्यद्रव्योपलक्षणात् सारफल्गुकुप्यानां च, परीक्षात्रोपदिश्यत इति सूत्रार्थः ।

'कोशपूर्वाः सर्वारम्भाः' इति प्रक्रान्तायाः कोशप्रकृतेः समाहर्तृसन्निधातृव्यापारैरुत्पादनं रक्षणं च प्रागभिहितं, स्वरूपलक्षणं त्वनुक्तमिदानीमभिधीयत इति सङ्गतिः ।

कोशाध्यक्ष इति । कोशाध्यक्षः भाण्डागाराधिकृतः, कोशप्रवेश्यं रत्नं मणिमुक्तादिकं, सारं चन्दनागुरुप्रभृतिकं, फल्गु पट्टदुकूलजातीयं, कुप्यं कुप्याध्यक्षप्रकरणोक्तं सारदारुवेणुवल्कादिकम् आयुधागाराध्यक्षप्रकरणोक्तं यन्त्रायुधावरणादिकं च, वाशब्दः समुच्चये, तज्जातकरणाधिष्ठितः तेषु रत्नादिषु जातास्तज्जातास्तत्सम्बद्धव्यवहारैकवृत्तय इत्यर्थः तज्जातैः करणैः कायस्थैश्च अधिष्ठितः समन्वितः सन्, प्रतिगृह्णीयात् ।

अभ्यर्हितत्वान्मौक्तिकस्य परीक्षां प्रथममाह — **ताम्रपर्णिक**मिति । मौक्तिकं, ताम्रपर्णिकं ताम्रपर्णी नाम पाण्ड्येषु प्रसिद्धा नदी तस्याः समुद्रसङ्गमप्रदेशे समुत्पन्नं, पाण्ड्यकवाटकं मलयकोटिपर्वतोत्पन्नं, पाशिक्यं पाटलिपुत्रान्तिकगतायां पाशिकाख्यायां नद्यामुत्पन्नं, कौलेयं सिंहलद्वीपे मयूरग्रामे कुला नाम नदी तस्यामुत्पन्नं, चौर्णेयं केरलेषु मुरचिनामकपत्तनसमीपे चूर्णी नाम नदी तस्यामुत्पन्नं, माहेन्द्रं महेन्द्रपर्वताभ्यर्णाम्भोधिसम्भवं, कार्दमिकं कर्दमा नाम पारसीकेषु नदी तस्यामुत्पन्नं, स्रौतसीयं बर्बरकूले स्रौतसी नाम नदी तस्यामुत्पन्नं, ह्रादीयं बर्बरकूले समुद्रैकदेशे श्रीघण्टो नाम ह्रदः तस्मिन्नुत्पन्नं, हैमवतं च हिमालयसम्भवं च, भवति । इत्थं मौक्तिकस्योत्पत्तिक्षेत्राणि दश भवन्ति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शङ्खः शुक्तिः प्रकीर्णकं च योनयः ।

मसूरकं त्रिपुटकं कूर्मकमर्धचन्द्रकं कञ्चुकितं यमकं कर्तकं खरकं सिक्थकं कामण्डलुकं श्यावं नीलं दुर्विद्धं चाप्रशस्तम् ।

स्थूलं वृत्तं निस्तलं भ्राजिष्णु श्वेतं गुरु स्निग्धं देशविद्धं च प्रशस्तम् ।

शीर्षकमुपशीर्षकं प्रकाण्डकमवघाटकं तरलप्रतिबन्धं चेति यष्टि-प्रभेदाः ।

मौक्तिकस्य योनीस्तिस्र आह— **शङ्ख** इत्यादि । शङ्खः शुक्तिश्च जलजौ प्रसिद्धौ । प्रकीर्णकं गजकुम्भादिकम् । आहुश्च—

"करका वारिधाराश्च मलयाचन्दनोदकम् ।
शङ्खशुक्तिनिपीतं यन्मौक्तिकं तत् प्रजायते ॥"
"सूकरमृगेन्द्रदंष्ट्रोद्भवानि करिकुम्भजातानि ।
वंशाभोगभुजङ्गोत्तमाङ्गजानि प्रकीर्णानि ॥"

इति ।

अथ मौक्तिकस्य त्रयोदश दोषानाह— **मसूरकमिति** । मसूरकं तदाख्यधान्यविशेषाकारं, त्रिपुटकं तदाख्यधान्याकारं, कूर्मकं तदाकारम्, अर्धचन्द्रकम् अर्धचन्द्राकृति, कञ्चुकितं पटलितं, यमकं युग्मकं, कर्तकं छिन्नकं, खरकम् अश्लक्ष्णं, सिक्थकं सिक्थाकारबिन्दुयुक्तं, कामण्डलुकं कमण्डल्वाकारं, श्यावं कपिशवर्णं, नीलं नीलवर्णं, दुर्विद्धम् अस्थानविद्धम्, ईदृशं मौक्तिकम् अप्रशस्तम् । गुणात् प्राग् दोषवचनं दुष्टस्यात्यन्तानुपादेयत्वद्योतनार्थम् ।

मौक्तिकस्याष्टौ गुणानाह— **स्थूलमिति** । स्थूलं पृथु, वृत्तं चारुपरिमण्डलं, निस्तलं तलरहितं मसृणभूम्यनवस्थायि, भ्राजिष्णु दीप्तिमत्, श्वेतं धवलं, गुरु अलघु, स्निग्धम् अरूक्षं, देशविद्धं च यथास्थानविद्धं च, मौक्तिकं प्रशस्तम् । एषु यस्यकस्यचित् पूर्वोक्तदोषाभावरूपतया सिद्धस्यापीह शब्दतो ग्रहणं स्थूलत्वादिनिर्विशेषं गुणत्वं द्योतयितुम् ।

अथ पञ्च यष्टिभेदानाह— **शीर्षकमिति** । मौक्तिकं महदेकं मध्ये पार्श्वयोस्तु सर्वाणि तनूनि समानि यस्याः सा यष्टिः शीर्षकमित्युच्यते । उपशीर्षकं नाम महदेकं मौक्तिकं मध्ये तत्पार्श्वयोस्तु सममल्पपरिमाणमेकैकमित्येवंक्रमेणानेकैस्त्रिकैः समैर्ग्रथिता यष्टिः । प्रधानमेकं मध्ये तत्पार्श्वयोर्द्वे द्वे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यष्टीनामष्टसहस्रमिन्द्रच्छन्दः। ततोऽर्धं विजयच्छन्दः। शतं देवच्छन्दः। चतुष्षष्टिरर्धहारः। चतुष्पञ्चाशद् रश्मिकलापः। द्वात्रिंशद् गुच्छः। सप्तविंशतिर्नक्षत्रमाला। चतुर्विंशतिरर्धगुच्छः। विंशतिर्माणवकः। ततोऽर्धमर्धमाणवकः। एत एव मणिमध्यास्तन्माणवका भवन्ति। एकशीर्षकः शुद्धो हारः। तद्वच्छेषाः। मणिमध्योऽर्धमाणव-

---

इत्येवंक्रमेणानेकैः पञ्चकैर्ग्रथिता यष्टिः प्रकाण्डकम्। प्रधानमेकं महन्मौक्तिकं मध्ये कृत्वा पार्श्वयोः क्रमकृशोत्तरोत्तरमौक्तिकैर्ग्रथिता यष्टिरवघाटकाख्या। तरलप्रतिबन्धं नाम समप्रमाणमौक्तिकगुम्फिता यष्टिः। चशब्दः समुच्चये। इति यष्टिप्रभेदाः यष्टीनां सराणां प्रभेदाः।

शीर्षकादीनां पञ्चानां यष्टीनां प्रत्येकं संख्यानियमप्रयुक्तानेकादश भेदानाह— **यष्टीनामिति**। यष्टीनां शीर्षकादिलक्षणानामुक्तानाम्, अष्टसहस्रम् अष्टोत्तरं सहस्रम्, इन्द्रच्छन्दः तदाख्यं भूषणमुच्यते, शीर्षकेन्द्रच्छन्द उपशीर्षकेन्द्रच्छन्द इत्यादिप्रकारैर्व्यपदिश्यत इत्यर्थः। एवमुत्तरत्रापि बोद्धव्यम्। ततोऽर्धं चतुरुत्तरा पञ्चशती, विजयच्छन्दः। शतं देवच्छन्दः शतयष्टिकं देवच्छन्दाख्यम्। एकाशीत्युत्तरैर्यष्टीनामष्टभिः शतैर्युक्तो देवच्छन्द इति क्वचिद् व्याख्यातम्। **चतुष्षष्टिरित्यादिकम् अर्धमाणवक** इत्येवमन्तमुत्तानार्थम्। **एत एवेति**। उक्ता एवेन्द्रच्छन्दादयो, मणिमध्या माणिक्यमध्याः सन्तः, तन्माणवका भवन्ति इन्द्रच्छन्दाद्युपपदमाणवकाः भवन्ति, इन्द्रच्छन्दमाणवको विजयच्छन्दमाणवक इत्येवमादिसंज्ञायुक्ता भवन्तीत्यर्थः। **एके-त्यादि**। एकशीर्षकः शुद्धो हारः एकानि केवलान्युपशीर्षकादिलक्षणास्पृष्टानि शीर्षकाणि शीर्षकाख्याः यथोक्तसंख्या यष्टयो यस्य स तथाभूतः अर्थाद् इन्द्रच्छन्दादिर्विशेष्यः शुद्धहाराख्यो भवति, इन्द्रच्छन्दशीर्षकशुद्धहारो विजयच्छन्दशीर्षकशुद्धहारो देवच्छन्दशीर्षकशुद्धहारोऽर्धहारशीर्षकशुद्धहारो रश्मिकलापशीर्षकशुद्धहार इत्यादिरीत्या व्यवहार्यो भवतीत्यर्थः। शीर्षकविषयेऽभिहितं शुद्धहारव्यपदेशमुपशीर्षकादावतिदिशति — **तद्वदिति**। तद्वद् शीर्षकवत्, शेषा उपशीर्षकादयः, बोद्धव्या इति शेषः। एतदुक्तं भवति— एकशीर्षकवद् एकोपशीर्षक एकप्रकाण्डक एकावघाटक एकतरलप्रतिबन्ध इत्यपरे चत्वारः शुद्धहारा इन्द्रच्छन्दोपशीर्षकशुद्धहारो विजयच्छन्दोपशीर्षकशुद्धहार इत्यादिक्रमेण प्रत्येकमुपगृहीतेन्द्रच्छन्दविजयच्छन्दादिसंज्ञाङ्का ऊह-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कस्त्रिफलकः फलकहारः पञ्चफलको वा । सूत्रमेकावली शुद्धा । सैव मणिमध्या यष्टिः । हेममणिचित्रा रत्नावली । हेममणिमुक्तान्तरोऽपवर्तकः । सुवर्णसूत्रान्तरं सोपानकम् । मणिमध्यं वा मणिसोपानकम् ।

तेन शिरोहस्तपादकटीकलापजालकविकल्पा व्याख्याताः ।

मणिः कौटो मालेयकः पारसमुद्रकश्च ।

नीया इति। **मणिमध्य** इति। मणिर्मरतकादिर्मध्ये यस्य स मणिमध्यः, अर्धमाणवकः पूर्वोक्तो दशयष्टिः, त्रिफलकः पञ्चफलको वा त्रिभिः पञ्चभिर्वा स्वर्णफलकैर्युक्तो भवन्, फलकहारः फलकहारसंज्ञो भवति, स च द्विप्रकारः। **सूत्रमिति** । शुद्धा मणिहीना, एकावली एकः सरः शीर्षकाद्यन्यतमलक्षणः, सूत्रं तदाख्या भवति । **सैवेति** । सैव एकावल्येव, मणिमध्या सती, यष्टिः यष्टिसंज्ञा। **हेमेत्यादि**। हेममणिचित्रा हेममयैर्मणिभिराहितवैचित्र्या यष्टिः, रत्नावली तदाख्या। **हेममणिमुक्तेत्यादि** । हेममणिमुक्तान्तरः हेममणिमुक्ताः पूर्वं हेमगुलिका ततः पद्मरागादिरत्नं ततो मौक्तिकमित्येवंक्रमगुम्फिताः अन्तरे मध्ये यस्य स तथाभूतः, अपवर्तकः तदाख्यः। **सुवर्णेत्यादि**। सुवर्णसूत्रान्तरं सुवर्णसूत्रम् अप्रत्युप्तमणिकं केवलस्वर्णफलकम् अन्तरे मध्ये यस्य तत् तथाभूतं, सोपानकं तत्संज्ञम् । **मणीत्यादि**। मणिमध्यं मणिसोपानकं मणियुक्तं प्रत्युप्तमणिकं मध्यं मध्यसुवर्णफलकं यस्य तत् तथाभूतं मणिसोपानकाख्यम् ।

तेनेति । तेन यथोक्तेन शीर्षकादिकण्ठाभरणप्रकारेण, शिरोहस्तपादकटीकलापजालकविकल्पाः शिरआदिचतुष्टयस्य कलापजालकविकल्पाः कलापः सरः जालकं सरसमूहः तयोर्विकल्पाः प्रकाराः, व्याख्याताः उक्तप्राया इत्यर्थः। अत्रायं सङ्ग्रहश्लोकः श्रीभट्टस्वामिनः —

"अष्टौ गुणास्त्रिधा योनिर्दश सम्पत्तिभूमयः ।
त्रयोदशैव मुक्तानां दोषा हाराश्च विंशतिः ॥" इति ।

इति मौक्तिकप्रकरणम् ।

अथ मणीनां गुणादीन् वक्तुमुपक्रमते— **मणिरिति** । मणिः, कौटः कोटिर्मलयसागरान्तरं तत्रभवः, मलयैकदेशः कर्णीवनाख्यो माला तस्यां जातो मालेयकः, पारसमुद्रः सिंहलद्वीपस्थो रोहणाद्रिः तज्जः पारसमुद्रकः, इति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सौगन्धिकः पद्मरागः अनवद्यरागः पारिजातपुष्पकः बालसूर्यकः।

वैडूर्यः — उत्पलवर्णः शिरीषपुष्पक उदकवर्णो वंशरागः शुकपत्रवर्णः पुष्यरागो गोमूत्रको गोमेदकः।

नीलावलीय इन्द्रनीलः कलायपुष्पको महानीलो जाम्बवाभो जीमूतप्रभो नन्दकः स्रवन्मध्यः।

शुद्धस्फटिकः मूलाटवर्णः शीतवृष्टिः सूर्यकान्तश्चेति मणयः।

त्रिविध इत्यर्थः। एवं च मणीनां योनयस्तिस्र इत्युक्तं भवति। प्रायिकं चैतत् स्फटिकवैदूर्यमरतकादीनां विन्ध्यविदूरदर्दरादिषूत्पत्तिदर्शनादित्याहुः। श्लोकं चोदाहरन्ति —

''विन्ध्यो विदूरशैलो मलयो विन्ध्योपलक्षणोद्देशः।
स्त्रीराज्यं चेति पुनस्तस्याकरभूमयोऽभिहिताः॥'' इति।

मणिषु पञ्चप्रकारां माणिक्यजातिमाह — **सौगन्धिक** इति। सौगन्धिकः तदाख्यकुसुमवद् ईषन्नैल्यरूषितरक्तवर्णः, पद्मरागः पद्मवर्णः, अनवद्यरागः अनवद्यं कुङ्कुमं तद्वर्णः, पारिजातपुष्पकः पारिजातकुसुमवर्णः, बालसूर्यकः उदयमानसूर्यारुणः।

अष्टप्रकारां वैदूर्यजातिमाह — **वैडूर्य** इति। वैडूर्य इत्यधिकारः। उत्पलवर्णः कोकनदशोणः, शिरीषपुष्पकः शिरीषपुष्पवर्णः, उदकवर्णः उदकवत् स्वच्छवर्णः, वंशरागः वेणुपत्रवर्णः, शुकपत्रवर्णः शुकपक्षच्छविः, पुष्यरागो हरिद्रापिञ्जर इति स्वामी, गोमूत्रकः गोमूत्रच्छायः, गोमेदकः गोमेदो गोरोचना तद्वर्णः।

अष्टविधामिन्द्रनीलजातिमाह — **नीले**त्यादि। नीलावलीयः शुक्ल एव नीलराजितरङ्गितः, इन्द्रनीलः मयूरबर्हवर्णः, कलायपुष्पकः कलायो धान्यभेदः तत्पुष्पसमच्छविः, महानीलः भ्रमरवर्णः, जाम्बवाभः जम्बूफलवर्णः, जीमूतप्रभः मेघवर्णः, नन्दकः अन्तःशुक्लो बहिर्नीलः, स्रवन्मध्यः स्रवज्जलाकाररश्मिप्रसरः।

चतुर्विधां स्फटिकजातिमाह — **शुद्धे**त्यादि। शुद्धस्फटिकः अत्यन्तशुक्लः, मूलाटवर्णः उद्धृतस्नेहदधिच्छायः, शीतवृष्टिः चन्द्रकान्तः यश्चन्द्रकिरणस्पर्शे द्रवति, सूर्यकान्तः यः सूर्यकरसम्पर्केऽग्निं वमति। चशब्दः समुच्चये। इति मणयः मणिभेदाः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षडश्रश्चतुरश्रो वृत्तो वा, तीव्ररागः संस्थानवानच्छः स्निग्धो गुरुरर्चिष्मानन्तर्गतप्रभः प्रभानुलेपी चेति मणिगुणाः ।

मन्दरागप्रभः सशर्करः पुष्पच्छिद्रः खण्डो दुर्विद्धो लेखाकीर्ण इति दोषाः ।

आर्याश्चात्राचार्यैरुदाहृताः —

"शशरुधिरजपाबन्धूकसन्निभाः पारिजातपुष्पाभाः ।
तरुणतरणित्विषो वा त एव खलु पद्मरागाः स्युः ॥
शुकबर्हवारिसैन्धवशिरीषकुसुमप्रभं हरिद्राभम् ।
मार्जारनयननैल्यं वंशच्छदकान्ति वैदूर्यम् ॥
बर्हिणचन्द्रकवर्णा भ्रमराभाः पक्वजम्ब्वाभाः ।
सूर्यांशुतापयोगात् कृच्छ्रालोका महानीलाः ॥
मन्दरमथनायासितवासुकिजविषोद्भवा मरतकस्य ।
प्रथमोत्पत्तिः कथिता केचिद् भुजगाण्डजेति जगुः ॥
गरुडच्छदप्रकाशं कदलीदलवंशपत्रवर्णं वा ।
परिपक्वकलमकणिशानुकारि वा मरतकं गदितम् ॥"

इति ।

केचित् पुनः सौगन्धिकशब्दस्य माणिक्यपर्यायतां वदन्तः सौगन्धिक इति वैदूर्याधिकारवद् माणिक्याधिकारस्तस्य प्रभेदाः पद्मरागादयश्चत्वार इति, उत्पलवर्णादयो नीलावलीयान्ता वैदूर्यस्य नव प्रभेदा इति, इन्द्रनील इत्यधिकारः कलायपुष्पकादयः स्रवन्मध्यान्तास्तस्य षट् प्रभेदा इति, शुद्धस्फटिकादयश्चत्वारः स्फटिकप्रभेदा इति च व्याचक्षत इत्याह स्वामी ।

अथैकादश मणिगुणानाह—**षडश्र** इति । षडश्रः षट्कोटिः, चतुरश्रश्चतुष्कोटिः, वृत्तः चारुपरिमण्डलः, तीव्ररागः अत्यन्तभास्वरः, संस्थानवान् भूषणप्रतिवापयोग्यावयवसन्निवेशः, अच्छः निर्मलः, स्निग्धः मसृणः, गुरुः भारवान्, अर्चिष्मान् दीप्तिमान्, अन्तर्गतप्रभः मध्यभागेऽपि प्रभातरलः, प्रभया स्वीयया सन्निकृष्टमनुलिम्पतीति प्रभानुलेपी, चेति समुच्चये ।

सप्त मणिदोषानाह— **मन्देत्यादि** । मन्दरागप्रभः मन्दरागो वर्णरहितः मन्दप्रभो द्युतिहीनः, सशर्करः पुलकितः, पुष्पच्छिद्रः बिन्दुगर्भः, खण्डः दीर्णः, दुर्विद्धः अस्थानविद्धः, लेखाकीर्णः राजियुक्तः, इति दोषाः । अत्र भट्टस्वामिना बार्हस्पत्यौ द्वौ श्लोकावुदाहृतौ—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विमलकः सस्यकोऽञ्जनमूलकः पित्तकः सुलभको लोहिताक्षो मृगाश्मको ज्योतीरसको मैलेयक आहिच्छत्रकः कूर्पः प्रतिकूर्पः सुगन्धिकूर्पः क्षीरपकः शुक्तिचूर्णकः शिलाप्रवालकः पुलकः शुक्रपुलकः इत्यन्तरजातयः।

शेषाः काचमणयः।

सभाराष्ट्रकं मध्यमराष्ट्रकं कास्तीरराष्ट्रकं श्रीकटनकं मणिमन्तकमिन्द्रवानकं च वज्रम्।

"पुष्पच्छिद्रोऽथ दुर्विद्धः शर्करानुगतस्तथा।
मन्दरागप्रभश्चैव जातिभेदाः प्रकीर्तिताः॥
प्रान्तश्च वासवृत्तश्च वलितास्यः (क) शान्वितः।
कृष्णिकश्च विशीर्णश्च नहि शास्त्रे प्रशस्यते॥" इति।

अथावान्तरजातिमणीनाह—विमलक इति। विमलकः श्वेतहरितः, सस्यको नीलः, अञ्जनमूलकः नीलश्यामः, पित्तको गोपित्तवर्णः, सुलभकः शुक्लः, लोहिताक्षः पर्यन्तरक्तः कृष्णमध्यः, मृगाश्मकः सितासितः, ज्योतीरसकः शुक्ललोहितः, मैलेयकः हिङ्गुलकच्छायः, आहिच्छत्रकः मन्दरागः, कूर्पः शर्करिलः, प्रतिकूर्पः सिक्थकरुचिः, सुगन्धिकूर्पः मुद्गवर्णः, क्षीरपको दुग्धवर्णः, शुक्तिचूर्णको नैकवर्णः, शिलाप्रवालकः प्रवालवर्णः, पुलकः कृष्णगर्भः, शुक्रपुलकः शुक्लगर्भः, इत्यन्तरजातयः अनेन प्रकारेणाष्टादशावान्तरजातिमणयो बोद्धव्याः। त एते प्रशस्ताः।

अप्रशस्तानाह—शेषा इति। शेषाः उक्तेभ्योऽन्ये, काचमणयः अधममणयः। अत्र सङ्ग्रहश्लोकं पठन्ति—

"पञ्चविंशतिभेदानां गुणास्त्वेकादश स्मृताः।
सप्त दोषा मणीनां तु दशाष्टौ च विजातयः॥" इति।

अथ वज्रमणेराकरयोनिवर्णगुणदोषा वर्ण्यन्ते। तत्राकरानाह—सभेत्यादि। वज्रं हीरः, सभाराष्ट्रकं वैदर्भकं, मध्यमराष्ट्रकं कोसलोत्पन्नं, कास्तीरराष्ट्रकं कास्तीरराष्ट्रजं, श्रीकटनकं श्रीकटनपर्वतभवं, मणिमन्तकम् उत्तरापथवर्तिमणिमन्तकाख्यपर्वतजम्, इन्द्रवानकं कालिङ्गकं, चः समुच्चये। एवं समाराष्ट्रादयो वज्रस्य षडाकरा उक्ताः। एतच्चोपलक्षणमन्यत्रापि वज्रस्योत्पत्तिदर्शनादिति ज्ञेयम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

खनिः स्रोतः प्रकीर्णकं च योनयः ।

मार्जाराक्षकं च शिरीषपुष्पकं गोमूत्रकं गोमेदकं शुद्धस्फटिकं मूलाटीपुष्पकवर्णं मणिवर्णानामन्यतमवर्णमिति वज्रवर्णाः ।

स्थूलं स्निग्धं गुरु प्रहारसहं समकोटिकं भाजनलेखि तर्कुभ्रामि भ्राजिष्णु च प्रशस्तम् ।

नष्टकोणं निरश्रि पार्श्वापवृत्तं च अप्रशस्तम् ।

वज्रस्य त्रिविधां योनिमाह — **खनिरिति** । खनिः खन्यमानो भूप्रदेशविशेषः, स्रोतः जलप्रवाहविशेषः, प्रकीर्णकं गजदन्तमूलादि ।

वज्रस्य वर्णानाह — **मार्जारेत्यादि** । मार्जाराक्षकं मार्जारनेत्रच्छायम् । शेषं व्याख्यातचरम् । मार्जारनेत्रादिपुष्पकान्तसवर्णत्वं प्रायिकत्वात् पृथगभिधाय विरलदर्शनं मण्यन्तरसाधारणं वर्णान्तरमतिदिशति — **मणिवर्णानामन्यतमवर्णमिति** । इति वज्रवर्णाः ।

अष्टौ गुणानाह — **स्थूलमिति** । स्थूलादित्रिकमवगतार्थम् । प्रहारसहं शिलापुत्रकप्रहारेणाप्यभेद्यं, समकोटिकं समास्तुल्याः कोटयो यस्य तत्, भाजनलेखि सोदकमसृणकांस्यपात्रीनिवेशितं वज्रं परिचाल्यमानं सत् पात्रे लेखोत्पादकं, तर्कुभ्रामि तर्कुर्भ्रमियन्त्रं तद्वद् भ्रमणशीलं, भ्राजिष्णु अतिमात्रदीप्तिकं, चः समुच्चये, प्रशस्तम् उत्तमं वज्रम् । श्लोकाश्चात्र भवन्ति —

"तर्कुभ्रामि स्निग्धं समकोटि महद् गुरु प्रहारसहम् ।
तमति च भाजनलेखि प्रशस्ततमं वज्रमुद्दिष्टम् ॥
क्षिप्तमग्नौ च यद् वज्रं वर्णान्यत्वं न गच्छति ।
शाणे वा घृष्यमाणं च निकषे वा विरज्यते ॥
वृत्तिकैराहतं यच्च विपत्तिं नैव गच्छति ।
रागवर्णसमायुक्तं वही रश्मिसमन्वितम् ॥
गुरुस्नेहयुतं चैव गुणैरेभिः समन्वितम् ।
एतद् विशिष्टं वज्राणां रत्नाधिपतिकीर्तितम् ॥
नष्टकोणं निरश्रीकं पार्श्वयातं च वर्जयेत् ।" इति ।

अधमं त्रिविधमाह — **नष्टेत्यादि** । नष्टकोणं शिखरशून्यं, निरश्रि अश्रिरहितं, पार्श्वापवृत्तम् एकपार्श्वनिस्सृतम् । अन्ये तु दोषाः यथोक्तगुणवैपरीत्यात्मानः स्वयमूहनीयाः । यदाहुः —

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रवालकम् आलकन्दकं वैवर्णिकं च रक्तं पद्मरागं च करटगर्भिणिकावर्जमिति ।

चन्दनं—सातनं रक्तं भूमिगन्धि । गोशीर्षकं कालताम्रं मत्स्यगन्धि । हरिचन्दनं शुकपत्रवर्णमाम्रगन्धि । तार्णसं च । ग्रामेरुकं रक्तं रक्तकालं वा बस्तमूत्रगन्धि । दैवसभेयं रक्तं पद्मगन्धि । जावकं च ।

"विरूपान् मन्दरागांश्च निष्प्रभान् क्रूरदर्शनान् ।
दग्धांश्चोद्धारिणश्चैव वज्रान्छत्रुषु निक्षिपेत् ॥"

इति ।

इति वज्रनिरूपणम् ।

अथ प्रवालमाह—प्रवालकमिति । प्रवालकम्, आलकन्दकम् अलकन्दो नाम बर्बरकूले समुद्रैकदेशस्तत्र भवं, वैवर्णिकं विवर्णो नाम यवनद्वीपे समुद्रैकदेशस्तत्रोत्पन्नं च, इति द्वियोनिकम् । रक्तं पद्मरागं चेति द्विवर्णकम् । करटगर्भिणिकावर्जमिति द्विदोषत्ववचनं, करटं क्रिमिजग्धं गर्भिणिकां स्थूलमध्यं च वर्जयित्वान्यत् प्रवालकमुपादेयमित्यर्थः । इतिशब्दः समाप्तौ, रत्नपरीक्षा समाप्तेत्यर्थः ।

इति प्रवालनिरूपणम् ।

अथ सारेषु निरूपणीयेषु प्रथमं सारमुख्यं चन्दनमाह—चन्दनमिति । चन्दनम् अधिक्रियत इत्यर्थः । तस्य सातनादय उत्पत्तिभूमयः षोडश, रक्तादयो वर्णा नव, भूमिगन्धादयो गन्धाः षट्, लघुत्वादयो गुणा एकादश । त एतेऽभिधीयन्ते । सातनमिति । सातनं सातनदेशभवं, रक्तं रक्तवर्णं, भूमिगन्धि नवसिक्तभूसमानगन्धम् । गोशीर्षकं तद्देशजं, कालताम्रं कृष्णशोणं, मत्स्यगन्धि मत्स्यतुल्यगन्धं, रक्तकरवीरतुल्यगन्धीति स्वामी । हरिचन्दनं हरिदेशजं चन्दनं, शुकपत्रवर्णम्, आम्रगन्धि चूतफलतुल्यगन्धि । तार्णसं च तृणसाख्यनदीनिकटभवं चन्दनं, चकारात् शुकपत्रवर्णम् आम्रगन्धि च । ग्रामेरुकं ग्रामेरुभवं, रक्तं रक्तकालं वा, बस्तमूत्रगन्धि अजमूत्रगन्धि, बस्तशब्दः कस्तूरीमृगवचन इत्यन्ये । दैवसभेयं देवसभायां भवं, रक्तं, पद्मगन्धि । सातनादयः षोडश मलयैकदेशाः । जावकं च जावक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जोङ्गकं रक्तं रक्तकालं वा स्निग्धम्। तौरूपं च। मालेयकं पाण्डुरक्तम्। कुचन्दनं कालवर्णकं गोमूत्रगन्धि। कालपर्वतकं रूक्षमगुरुकालं रक्तं रक्तकालं वा। कोशकारपर्वतकं कालं कालचित्रं वा। शीतोदकीयं पद्माभं कालस्निग्धं वा। नागपर्वतकं रूक्षं शैवलवर्णं वा। शाकलं कपिलमिति।

लघु स्निग्धमश्यानं सर्पिःस्नेहलेपि गन्धसुखं त्वगनुसार्यनुल्बणमविराग्युष्णसहं दाहग्राहि सुखस्पर्शनमिति चन्दनगुणाः।

देशभवं च, रक्तं पद्मगन्धि चेत्यनुषज्यते। जोङ्गकं, रक्तं रक्तकालं वा, स्निग्धं स्नेहगुणयुक्तं, गन्धान्तरानुक्त्यात्रापि पद्मगन्धीति सम्बध्यते। तौरूपं च, जोङ्गकमिव रक्तं रक्तकालं वा स्निग्धं पद्मगन्धि चेत्यर्थः। जावकादित्रिकं कामरूपजं बोद्धव्यम्। मालेयकं, पाण्डुरक्तं, पूर्ववत् पद्मगन्धि च। एवञ्च दैवसभेयादिमालेयकान्तपञ्चकस्य पद्मगन्धित्वमुक्तं भवति। कुचन्दनं, कालवर्णकं कृष्णं, गोमूत्रगन्धि गोमूत्रं हि परिणामे सुगन्धि, अपरे तु गोमूत्रं नीलोत्पलमिति सम्प्रदाय इत्याहुः। कालपर्वतकं तद्देशभवं, रूक्षं खरम्, अगुरुकालम् अगुरुवत् कृष्णं, रक्तं, रक्तकालं वा कृष्णारुणं वा। पूर्वोक्तन्यायेनात्र गोमूत्रगन्धीति सम्बन्धनीयम्। केषुचिदादर्शेषु 'कुचन्दनं कालरूक्षमगुरुकालं रक्तं रक्तकालं वा कालपर्वतकमनवद्यवर्णं वा' इति पाठो दृश्यते स गन्धानुक्तेरशुद्धः प्रतिभाति। तत्रानवद्यवर्णमित्यस्य कुङ्कुमवर्णमित्यर्थः, शेषं तु सुबोधम्। कोशकारपर्वतकं तदाख्यदेशभवं, कालं, कालचित्रं वा कृष्णकर्बुरं वा। शीतोदकीयं शीतोदकदेशभवं, पद्माभं पद्मवर्णं, कालस्निग्धं वा। नागपवर्तकं तदाख्यदेशजं, रूक्षं खरं, शैवलवर्णं जलनीलीवर्णम्। शाकलं शाकलदेशोद्भवं, कपिलं कडारवर्णम्। इह कालपर्वतकादीनां शाकलान्तानां कुचन्दनवद् गोमूत्रगन्धित्वं द्रष्टव्यम्।

एवं जातिवर्णगन्धा उक्ताः। गुणानाह—लघ्वित्यादि। लघु अभारिकं, स्निग्धं मसृणम्, अश्यानं चिरशोषि, सर्पिःस्नेहलेपि घृतमिव देहं स्नेहेन लिम्पति यत् तथाभूतं, गन्धसुखं गन्धेन मोदजनकं, त्वगनुसारि त्वचमनुप्रविश्य सुखकरम्, अनुल्बणं सूक्ष्मत्वादस्फुटम्, अविरागि द्रव्यान्तरमिश्रणे स्वेदाद्युपघाते चाविकृतवर्णगन्धम्, उष्णसहं स्वलिप्ताङ्गस्योष्णसंवेदनप्रतिबन्धि, दाहमादि सन्तापहरं, सुखस्पर्शनं स्पर्शे नवनीतवत् सुखाक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अगुरु—जोङ्गकं कालं कालचित्रं मण्डलचित्रं वा । श्यामं दोङ्गकम् । पारसमुद्रकं चित्ररूपम् । उशीरगन्धि नवमालिकागन्धि वेति ।

गुरु स्निग्धं पेशलगन्धि निर्हारि अग्निसहमसंप्लुतधूमं समगन्धं विमर्दसहमित्यगुरुगुणाः ।

तैलपर्णिकं—अशोकग्रामिकं मांसवर्णं पद्मगन्धि । जोङ्गकं रक्तपीतकमुत्पलगन्धि गोमूत्रगन्धि वा । ग्रामेरुकं स्निग्धं गोमूत्रगन्धि ।

हम् । इति चन्दनगुणाः अनेन प्रकारेणैकादश चन्दनस्य गुणा विज्ञेयाः । अत्र सङ्ग्रहश्लोकं पठन्ति —

"षड् गन्धा नवधा वर्णो गुणाश्चैकादश स्मृताः ।
चन्दनानां समासेन षोडशोत्पत्तिभूमयः ॥" इति ।

अथागुरुजातिवर्णगन्धगुणानाह—अगुर्वित्यादि । अगुर्वित्यधिकारः । जोङ्गकं तदाख्यमगुरु त्रिविधं, कालं कृष्णं, कालचित्रं कृष्णगौररेखामिश्रं, मण्डलचित्रं कृष्णगौरबिन्दुचित्रमिति स्वामी, वाशब्दः समुच्चये । दोङ्गकं तदाख्यं, श्यामम् । जोङ्गकदोङ्गके कामरूपभवे । पारसमुद्रकं सिंहलद्वीपोत्पन्नं, चित्ररूपं नानावर्णम् । गन्धमाह— उशीरगन्धि नवमालिकागन्धि वेति । गन्धद्वैविध्यमनेनोक्तम् ।

अगुरुणो जातिवर्णगन्धानुक्त्वा गुणानाह — गुर्विति । गुरु भारिकं, स्निग्धम् अपरुषं, पेशलगन्धि हृद्यगन्धं, निर्हारि दूरप्रसृत्वरगन्धम्, अग्निसहम् अग्निना क्षिप्रं न दह्यते, असंप्लुतधूमम् अव्याकुलधूमं, समगन्धं दह्यमानमादिमध्यान्तेष्वेकरूपगन्धं, विमर्दसहं वस्त्रादिनिर्माजनेऽप्यक्षीयमाणगन्धमित्यर्थः । इति अगुरुगुणाः । तदेवम् —

"उत्पत्तिभूमयस्तिस्रः कृष्णो वर्णः प्रधानतः ।
द्वावेवागुरुणो गन्धौ गुणास्तस्याष्ट कीर्तिताः ॥"

इति सङ्ग्रहश्लोकः ।

अथ तैलपर्णिकस्य योन्यादिकमाह — तैलपर्णिकमित्यादि । तैलपर्णिकमित्यधिकारः । अशोकग्रामिकम् अशोकग्रामे कामरूपवर्तिनि भवं, मांसवर्णं हरिणमांसपेशीवर्णमिति स्वामी, पद्मगन्धि । जोङ्गकं कामरूपस्थे जोङ्गाख्ये प्रदेशे भवं, रक्तपीतकं मनश्शिलावर्णम्, उत्पलगन्धि गोमूत्रगन्धि वा भवति । ग्रामेरुकं कामरूपवर्तिनि ग्रामेरुसंज्ञे ग्रामे भवं, स्निग्धं, गोमूत्रगन्धि,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सौवर्णकुड्यकं रक्तपीतं मातुलुङ्गगन्धि । पूर्णकद्वीपकं पद्मगन्धि नवनीतगन्धि चेति ।

भद्रश्रीयं — पारलौहित्यकं जातीवर्णम् । आन्तरवत्यमुशीरवर्णम् । उभयं कुष्ठगन्धि चेति ।

कालेयकः — स्वर्णभूमिजः स्निग्धपीतकः । औत्तरपर्वतको रक्तपीतकः । इति साराः ।

पिण्डक्राथधूमसहमविरागि योगानुविधायि च । चन्दनागुरुवच्च तेषां गुणाः ।

जोङ्गकवद् रक्तपीतवर्णम् । सौवर्णकुड्यकं सुवर्णकुड्यो नाम ग्रामः कामरूपगः तत्र जातं, रक्तपीतं, मातुलुङ्गगन्धि । पूर्णकद्वीपकं पूर्णकद्वीपः कामरूपेष्वेव तत्र भवं, पद्मगन्धि, नवनीतगन्धि वा, वर्णतस्तु रक्तपीतम् ।

भद्रश्रीयस्य योन्यादिकमाह — भद्रश्रीयमित्यादि । भद्रश्रीयं चन्दनविशेषः । भद्रश्रीयपदार्थे 'केचित् कर्पूरमित्याहुस्तक्कोलमिति चापरे । श्रीवासकं तथा केचित् केचिल्लोहितचन्दनम् ॥' इति विप्रतिपत्तयः स्वामिनोक्ताः । पारलौहित्यकं कामरूपे लौहित्याख्यनदपारभवं, जातीवर्णं जातीकुसुमवर्णम् । आन्तरवत्यं कामरूपेष्वेवान्तरवत्याख्यनदीतीरे जातम्, उशीरवर्णं लामज्जच्छायम् । उभयं पारलौहित्यकादिद्विकं, कुष्ठगन्धि च पारिभाव्याख्यौषधगन्धि च । इतिशब्दः भद्रश्रीयनिरूपणसमाप्तौ ।

कालेयकस्य योन्यादिकमाह — कालेयक इति । कालेयको नाम काष्ठविशेषः, स स्वर्णभूमिजः सुवर्णभूमिर्भूप्रदेशस्तत्रोत्पन्नः, स्निग्धपीतकः मसृणः पीतवर्णश्च । औत्तरपर्वतकः हैमवतः, रक्तपीतकः मनश्शिलावर्णः । इति उक्तैः प्रकारैः, साराः चन्दनादिकालेयकान्ताः सारपदार्था निरूपिता इत्यर्थः ।

अथ तैलपर्णिकादीनां त्रयाणां गुणमाह—पिण्डेत्यादि । पिण्डक्राथधूमसहं पिण्डं पेषणादिना पिण्डीकरणं क्राथम् अग्निना क्वथनं धूमं धूपनं च सहत इति तथाभूतं, पेषणक्वथनधूपनेष्वविसंवादिगन्धमित्यर्थः, अविरागि द्रव्यान्तरमिश्रणेन कालान्तरेण वा निर्विकारस्वभावं, योगानुविधायि च गन्धयुक्त्यनुकूलं च । तैलपर्णिकादित्रिकं तु विशेष्यं गम्यम् । उक्ताः पिण्डसहत्वादयो न केवलं तैलपर्णिकादीनां गुणाः, किन्तु चन्दनागुरुवच्च तेषां गुणा भव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कान्तनावकं प्रैयकं चौत्तरपर्वतकं चर्म। कान्तनावकं मयूरग्रीवाभम्। प्रैयकं नीलपीतं श्वेतं लेखाबिन्दुचित्रम्। तदुभयमष्टाङ्गुलायामम्।

बिसी महाबिसी च द्वादशग्रामीये। अव्यक्तरूपा दुहिलिका चित्रा वा बिसी। परुषा श्वेतप्राया महाबिसी। द्वादशाङ्गुलायाममुभयम्।

श्यामिका कालिका कदली चन्द्रोत्तरा शाकुला चारोहजाः। कपिला बिन्दुचित्रा वा श्यामिका। कालिका कपिला कपोतवर्णा वा। तदुभयमष्टाङ्गुलायामम्। परुषा कदली हस्तायता। सैव चन्द्रचित्रा

न्तीत्याह — चन्दनागुरुवच्च तेषां गुणा इति। चन्दनवद् गुणाः एकादश लघुत्वादयः, अगुरुवद् गुणा अष्टौ गुरुत्वादयः।

इति सारनिरूपणम्।

अथ फल्गुषु निरूपणीयेषु प्रथमं पञ्चदशप्रकारा चर्मजातिर्निरूप्यते— कान्तनावकमित्यादिना इति चर्मजातय इत्यन्तेन। तत्रादौ प्रकारद्वयमुद्दिशति — कान्तनावकमिति। कान्तनावकं तदाख्यदेशभवं, प्रैयकं च तदाख्यदेशभवं च, औत्तरपर्वतकं हैमवतं, चर्म। एवञ्च कान्तनावकप्रैयकाख्यौ हिमवत एवैकदेशौ बोद्धव्यौ। तत्र कान्तनावकं, मयूरग्रीवाभमित्येकविधम्। प्रैयकं तु, नीलपीतं, श्वेतं, लेखाबिन्दुचित्रं लेखाभिः कृतवैचित्र्यं बिन्दुभिः कृतवैचित्र्यं चेति चतुर्विधम्। तदुभयं कान्तनावकं प्रैयकं च, अष्टाङ्गुलायामम्।

बिसीति। बिसी महाबिसी च इत्येते चर्मणी, द्वादशग्रामीये हिमालयस्थेषु द्वादशम्लेच्छग्रामेषु भवे। तत्र बिस्याः स्वरूपमाह—अव्यक्तेत्यादि। बिसी, अव्यक्तरूपा सरटविशेषवद् बहुवर्णप्रतिभासयोगादनिर्धारितैकवर्णा, दुहिलिका लोमशा, दुहिलितिकेति क्वापि पाठः, चित्रा वा, भवति। महाबिसी परुषा खरस्पर्शा, श्वेतप्राया धवलवर्णभूयिष्ठा। उभयं बिसी महाबिसीति द्वयं, द्वादशाङ्गुलायामम्।

आरोहाख्यहिमवत्प्रदेशभवान् श्यामिकाकालिकादीन् पञ्च भेदान् उद्दिशति — श्यामिकेत्यादि। श्यामिका, कपिला कडारवर्णा, बिन्दुचित्रा वा, भवति। कालिका, कपिला, कपोतवर्णा वा, भवति। तदुभयं श्यामिकादिद्वयम्, अष्टाङ्गुलायामम्। कदली, परुषा कर्कशस्पर्शा, हस्तायता चतु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चन्द्रोत्तरा । कदलीत्रिभागा शाकुला कोठमण्डलचित्रा कृतकर्णिका-जिनचित्रा चेति ।

सामूरं चीनसी सामूली च बाह्ववेयाः । षट्त्रिंशदङ्गुलमञ्जन-वर्णं सामूरम् । चीनसी रक्तकाली पाण्डुकाली वा । सामूली गोधूम-वर्णेति ।

सातिना नलतूला वृत्तपुच्छा च औद्राः । सातिना कृष्णा । नलतूला नलतूलवर्णा । कपिला वृत्तपुच्छा च । इति चर्मजातयः ।

चर्मणां मृदु स्निग्धं बहुलरोम च श्रेष्ठम् ।

विंशत्यङ्गुलदीर्घा । वर्णस्त्वस्याः कालिकावत् । सैव कदली, चन्द्रचित्रा चन्द्रा-कारमण्डलयुक्ता, चन्द्रोत्तरा नाम भवति । प्रमाणं त्वस्याः कदलीवत् । शा-कुला, कदलीत्रिभागा कदल्यपेक्षया त्रिगुणपरिमाणा त्रिहस्तायामेत्यर्थ इत्येके, कदलीप्रमाणतृतीयांशप्रमाणा अष्टाङ्गुलायतेत्यर्थ इत्यपरे, कोठमण्डलचित्रा रक्तमण्डलयुक्ता, कृतकर्णिकाजिनचित्रा कृतैः स्वभावकृतैः कर्णिकाजिनैश्च-र्मग्रन्थिभिः चित्रा जनितशोभा । चशब्दः समुच्चये । इतिशब्द आरोहज-समाप्तौ ।

त्रिप्रकारां बाह्ववेयजातिमाह — सामूरमित्यादि । बाह्ववः हिमवत एक-देशः तत्र भवाश्चर्मजातयो बाह्ववेयाः । ढप्रत्ययान्तश्चायम् । षट्त्रिंशादित्यादि चीनसीसामूल्योः प्रमाणं सामूरवत् षट्त्रिंशदङ्गुलं द्रष्टव्यम् । इतिशब्दः समाप्तौ ।

इत्थं मूषिकादिस्थलचरचर्माण्यभिधाय जलचरचर्माण्याह — साति-नेति । सातिना नलतूला वृत्तपुच्छा च इति त्रिविधाः, औद्राः उद्रो जलमा-र्जारस्तस्येमे त्वग्भेदा इत्यर्थः । सातिना, कृष्णा कृष्णवर्णा । नलतूला नल-तूलवर्णा नलतूलो नलाख्यतृणविशेषस्य पक्ष्म तस्येव वर्णो यस्याः सा । वृत्त-पुच्छा, कपिला कडारवर्णा । इति चर्मजातयः उक्तेन प्रकारेण चर्मजातयो-ऽनुक्ता अपि यथाप्रसिद्धि बोद्धव्या इत्यर्थः ।

चर्मगुणांस्त्रीनाह — चर्मणामित्यादि । चर्मणामिति निर्धारणे षष्ठी । शेषं स्पष्टम् ।

इति चर्मनिरूपणम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शुद्धं शुद्धरक्तं पक्षरक्तं च आविकम् । खचितं वानचित्रं खण्डसङ्घात्यं तन्तुविच्छिन्नं च ।

कम्बलः केचलकः कलमितिका सौमितिका तुरगास्तरणं वर्णकं तलिच्छकं वारवाणः परिस्तोमः समन्तभद्रकं च आविकम् ।

पिच्छिलमार्द्रमिव च सूक्ष्मं मृदु च श्रेष्ठम् ।

अष्टप्रोतिसङ्घात्या कृष्णा भिङ्गिसी वर्षवारणम्, अपसारक इति नैपालकम् ।

अथाविकं सप्तदशप्रकारं निरूपयिष्यन् प्रथमं रागभेदेन त्रिविधमाह — शुद्धमिति । अवयो मेषा नाम लोमोपकारिणः पशवः तल्लोमभवम् आविकम् । अधिकारश्चायम् । शुद्धं शुक्लं, शुद्धरक्तं सर्वारुणं, पक्षरक्तं च एकदेशारुणं च, भवति । क्रियाभेदेन चतुर्विधमाह — खचितमिति । खचितं सूचिवानकर्मनिष्पादितं, वानचित्रं वानकर्मणा कृतवैचित्र्यं, खण्डसङ्घात्यं खचितानामुतानां वा बहूनां खण्डानां सङ्घातेन निष्पादितं, तन्तुविच्छिन्नं च अनुतविसृष्टैस्तन्तुभिर्मध्ये कृतविच्छेदं जालकोपयोगि च ।

संस्थानकृतान् दश भेदानाह — कम्बल इति । कम्बलः प्रसिद्धः, केचलकः वन्याशिरस्त्राणं, कौचपक इत्यपपाठः । कलमितिका गजोपर्यास्तरणं, कुलमितिकेति क्वचित् पाठः । सौमितिका कलमितिकैव कृष्णवर्णा गजपर्याणोपर्यास्तरणं, तुरगास्तरणं प्रसिद्धं, वर्णकं वर्णकम्बलः, तलिच्छकं कम्बलविशेषः, तल्लिक्थकमित्यपि पाठः । वारवाणः कन्चुकः, परिस्तोमः कम्बलभेदो विस्तारचित्रः, यो विस्तृतवदवभासते निर्माणवैचित्र्यात् स इति व्याचक्षते, कुथ इति त्वेके । समन्तभद्रकं सन्नाहपट्टः, गजादिजघनत्राणमित्यपरे । चशब्दः समुच्चये । इहाविकाधिकारे पुनराविकमिति वचनं वैचित्र्यार्थम् ।

गुणानाह — पिच्छिलमिति । पिच्छिलमिव श्लक्ष्णमिव भासमानम्, आर्द्रमिव च भासमानं, सूक्ष्मं, मृदु च, श्रेष्ठं भवति ।

अष्टेत्यादि । अष्टप्रोतिसङ्घात्या प्रोतय एव प्रोतयः खण्डाः तत्सङ्घातनिष्पन्ना, सा कृष्णा कृष्णवर्णा, वर्षवारणं वृष्टिरोधसाधनभूता च, भिङ्गिसी तदाख्यः कम्बलभेदः एकः, अपसारकः काण्डपट इत्यपरः । अनयोर्भेदयोर्गुणात् प्रागनभिधानं गुणासम्बन्धद्योतनार्थम् । इति नैपालकम् अनेन प्रका-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्पुटिका चतुराश्रिका लम्बरा कटवानकं प्रावरकः सत्तलिकेति मृगरोम ।

वाङ्गकं श्वेतं स्निग्धं दुकूलं, पौण्ड्रकं श्यामं मणिस्निग्धं, सौवर्णकुड्यकं सूर्यवर्णम् । मणिस्निग्धोदकवानं चतुरश्रवानं व्यामिश्रवानं च ।

एतेषामेकांशुकमध्यर्धद्वित्रिचतुरंशुकमिति ।

रेण नेपालदेशभवमाविकं निरूपितमित्यर्थः । नेपालग्रहणाच्च वक्ष्यमाणं मृगरोमादिकमन्यदेशजं सूचितम् ।

षड्विधं मृगरोमजमाह—**सम्पुटिके**ति । सम्पुटिका जङ्घात्राणं सुक्थणाभिधानमिति क्वचिट्टीकादर्शे लिखितं, सन्थनमित्यन्यत्र लिखितं दृश्यते । चतुराश्रिका दशारहिता नवाङ्गुलिचिह्नितकोणा । लम्बरा प्रच्छदपटविशेषः । कटवानकं स एव स्थूलसूत्रो भाष्पक इति तद्देशीयानां प्रसिद्ध इति स्वामी । प्रावरकः पूर्वोक्त एवान्यतरतोदशो रोमावर्तक इति तद्देशप्रसिद्ध इति स्वामी । सत्तलिका तूलिकाख्य आस्तरणविशेष इति स्वामी । इति मृगरोम अनेन प्रकारेण मृगरोमजमुक्तम् ।

अथ त्रिप्रकारं दुकूलमाह—**वाङ्गक**मित्यादि । वाङ्गकं वङ्गदेशभवं, दुकूलं, श्वेतं, स्निग्धं मसृणम् पौण्ड्रकं पुण्ड्रदेशभवं, श्यामं, मणिस्निग्धं मरतकस्निग्धम् । सौवर्णकुड्यकं कामरूपस्थे सुवर्णकुड्याख्ये प्रदेशे भवं, सूर्यवर्णम् उद्यदादित्यद्युति । दुकूलस्य वानमपि त्रिप्रकारमाह — **मणी**त्यादि । मणिस्निग्धोदकवानं नाम दुकूलस्य साधनद्रव्यं जलेमार्द्रीकृत्य मणिबन्धेनावघृष्य धानं, चतुरश्रवानं वर्णान्तरासंसृष्टं शुद्धं वानं, व्यामिश्रवानं कार्पासकतन्तुमिश्रितैः कौशेयकतन्तुभिर्वानम्, अथवा वर्णान्तरसंसृष्टवानम् । चः समुच्चये ।

एतेषामिति । एतेषां दुकूलानां मध्ये, एकांशुकं तानवानयोरेकतन्तुकम्, अर्थात् प्रशस्तं सूक्ष्मत्वात् । अध्यर्धद्वित्रिचतुरंशुकम् अध्यर्धांशुकं द्व्यंशुकं त्र्यंशुकं चतुरंशुकं च, अर्थादपकृष्टमुत्तरोत्तरं स्थूलत्वात् । तत्र यदेकगुणं तन्यते द्विगुणमूयते द्विगुणं वा तन्यते एकगुणमूयते तदध्यर्धांशुकम् । यद् द्विगुणं तन्यते द्विगुणमूयते तद् द्व्यंशुकम् । यत् त्रिगुणं तन्यते त्रिगुणमूयते तत् त्र्यंशुकम् । यच्चतुर्गुणं तन्यते चतुर्गुणमूयते तच्चतुरंशुकम् । इतिशब्दो दुकूलनिरूपणसमाप्तौ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेन काशिकं पौण्ड्रकं च क्षौमं व्याख्यातम् ।

मागधिका पौण्ड्रिका सौवर्णकुड्यका च पत्त्रोर्णाः । नागवृक्षो लिकुचो बकुलो वटश्च योनयः । पीतिका नागवृक्षिका, गोधूमवर्णा लैकुची, श्वेता वाकुली, शेषा नवनीतवर्णा ।

तासां सौवर्णकुड्यका श्रेष्ठा । तया कौशेयं चीनपट्टाश्च चीनभूमिजा व्याख्याताः ।

माधुरमापरान्तकं कालिङ्गकं काशिकं वाङ्गकं वात्सकं माहिषकं च कार्पासिकं श्रेष्ठमिति ।

तेनेति । तेन दुकूलगताध्यर्धांशुकत्वादिनिरूपणेन, काशिकं काशिदेशभवं, पौण्ड्रकं च पुण्ड्रदेशजं च, क्षौमं व्याख्यातं क्षौममेव निरूपितम् अध्यर्धांशुकद्व्यंशुकादिरूपं स्थूलं दुकूलमेव हि क्षौममिति व्यपदिश्यत इत्यभिप्रायः ।

मगधपुण्ड्रकसुवर्णकुड्यकाख्यदेशत्रयभवां नागकेसरडहुमद्यगन्धन्यग्रोधाख्यवृक्षचतुष्टययोनिं पत्त्रोर्णामाह — मागधिकेति । पत्त्रोर्णाः वृक्षपत्रेषु क्रिमिलालाकृता ऊर्णाः पट्टसूत्रस्य योनयः । तासां योनिभेदनिमित्तं गुणभेदमाह — पीतिकेत्यादि । नागवृक्षिका पीतिका नागवृक्षयोनिः पीतवर्णा । लैकुची लिकुचयोनिः । वाकुली वकुलयोनिः । शेषा वटयोनिः ।

मागधिकादीनां पत्त्रोर्णानां मध्ये श्रेष्ठामाह — तासामित्यादि । तयेति । तया पत्त्रोर्णया, कौशेयं कोशकारभवं, चीनभूमिजाश्चीनपट्टाश्च चीनदेशभवा वस्त्रविशेषाश्च, व्याख्याताः योनितो वर्णतश्च निर्दिष्टाः, तेऽपि पत्त्रोर्णावन्नागवृक्षादियोनयः पीतकादिवर्णाश्चेत्यभिप्रायः ।

कार्पासिकमाह — माधुरमिति । माधुरं मधुरा पाण्ड्यराजधानी तया पाण्ड्यदेशलक्षणात् पाण्ड्यदेशजमित्यर्थः, आपरान्तकम् अपरान्तः कोङ्कणदेशस्तत्प्रभवं, कालिङ्गकं कलिङ्गभवं, काशिकं काशिजं, वाङ्गकं वङ्गजं, वात्सकं वत्सविषयोद्भवं, माहिषकं माहिष्मती कुन्तलदेशराजधानी तया देश लक्षणात् तद्देशभवमित्यर्थः, यद्वा महिषकदेशोत्पन्नं, चः समुच्चये, कार्पासिकं पाण्ड्यादिदेशसप्तकभवं कार्पासतन्तुजं वस्त्रं, श्रेष्ठम् । इतिशब्दः फल्गुसमाप्तौ ।

इति फल्गुनिरूपणम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतः परेषां रत्नानां प्रमाणं मूल्यलक्षणम् ।
जातिं रूपं च जानीयान्निधानं नवकर्म च ॥
पुराणप्रतिसंस्कारं कर्मगुह्यमुपस्करान् ।
देशकालपरीभोगं हिंस्राणां च प्रतिक्रियाम् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकादशोऽध्यायः कोशप्रवेश्यरत्नपरीक्षा,
आदितो द्वात्रिंशः ॥

अध्यायान्ते श्लोकावाह—अत इति, पुराणेत्यादि च । अतः अस्मादुक्तात् मौक्तिकादिकार्पासिकान्तात् सप्तदशकात्, परेषामन्येषां, रत्नानां रत्नप्रभृतीनां, प्रमाणं माषकाङ्गुलादिकं तुलामानपौतवदेशकालमानप्रकरणयोर्वक्ष्यमाणं, मूल्यलक्षणं मूल्यं लक्षणं च, तत्र मूल्यं —

"द्वे शते यद् धृतं रत्नं तण्डुलानां प्रमाणतः ।
शतद्वयं सहस्राणां तस्य मूल्यं प्रकीर्तितम् ॥"

इत्युक्तरूपं, लक्षणं प्राशस्त्यं यथा मौक्तिकानां स्थूलनिस्तलादि, अथवा लक्षणं —

"क्षीरकुम्भे मणिः क्षिप्तो यो रञ्जयति तेजसा ।
शुक्लत्वं चोद्धृतो याति तं शुद्धमिति निर्दिशेत् ॥"

इत्युक्तजातीयं, जातिं मुक्तादीनां ताम्रपर्णिकत्वादिकं, रूपं वर्णं षडश्रचतुरश्रादिकं वा, निधानं निधीयमानवस्त्वेकान्तगोपनानुकूलं निधानप्रकारं, नवकर्म च आकरोद्धृतमात्रस्य शोधनवेधनघर्षणादिकं, पुराणप्रतिसंस्कारं पुराणस्य असम्भोगातिभोगादिभिर्विवर्णितस्य बन्धच्युतस्य श्लथबन्धस्य वा नवीकरणं, यदाह —

"अतिभोगादसम्भोगाद् धूमाग्निस्वेदघर्षणात् ।
भूम्यम्बुलवणैश्चापि मुक्तावर्णो विरज्यते ॥"

इति, कर्मगुह्यं कर्मरहस्यं रत्नादीनां वर्णापचारणरञ्जनघर्षणादिकम्, उपस्करान् शाणादीनि रत्नादिकर्मोपकरणानि, देशकालपरिभोगमिति समाहारद्वन्द्वः, तत्र देशकालौ रत्नादीनामुत्पत्तिक्रयविक्रयानुकूलौ, परिभोग उपयोगः शीतयोर्देशकालयोर्मृगरोमजमुपयोज्यम् उष्णयोः कार्पासिकमित्येवंरूपः, हिं-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्त्राणां क्षौमाद्युपघातकानां मूषिकादीनां, प्रतिक्रियां मार्जारोत्सर्गादिना प्रतिविधानं कृमिमूर्षिकादिजग्धानां वस्त्रादीनां सीवनादिना संस्करणं च, जानीयात्, अर्थात् कोशाध्यक्षः ।

एषोऽत्र भट्टस्वामिनः सर्वसङ्ग्रहः —

"मौक्तिकं मणयो वज्रं प्रवालं च समासतः ।
रत्नं चतुर्विधं प्रोक्तं साराः पञ्चविधा मताः ॥
चन्दनागुरुणी श्रेष्ठे मध्यमं तैलपर्णिकम् ।
भद्रश्रीयं च जानीयात् कालेयकमथेतरत् ॥
चर्माविमृगरोमाणि दुकूलं क्षौमजातयः ।
कार्पासिकं च पत्त्रोर्णं कौशेयं फल्गु चाष्टधा ॥
कुप्यं कुप्यायुधाध्यक्षप्रोक्तमित्यत्र नोदितम् ।
मुक्ताफलाद्यशेषास्तु भेदाः सप्तदशोदिताः ॥" इति ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकादशोऽध्यायः कोशप्रवेश्यरत्नपरीक्षा,
आदितो द्वात्रिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३०. प्रक. आकरकर्मान्तप्रवर्तनम् ।

आकराध्यक्षः शुल्बधातुशास्त्ररसपाकमणिरागज्ञस्तज्ज्ञसखो वा तज्जातकर्मकरोपकरणसम्पन्नः किट्टमूषाङ्गारभस्मालिङ्गं वाकरं भूतपूर्वमभूतपूर्वं वा भूमिप्रस्तररसधातुमत्यर्थवर्णगौरवमुग्रगन्धरसं परीक्षेत ।

आकरकर्मान्तप्रवर्तनमिति सूत्रम् । आकरेषु सुवर्णाद्युत्पत्तिस्थानेषु कर्मान्ताः तदुपलम्भानुकूलाः क्रियाः आकरकर्मान्ताः तेषां प्रवर्तनमनुष्ठापनमाकरकर्मान्तप्रवर्तनं, तदिहाभिधीयत इति सूत्रार्थः ।

'गुप्तपुत्रदारानाकरकर्मान्तेषु वासयेदि'ति पूर्वमुक्तम् । आकरकर्मान्तास्तु नोक्ताः, त इदानीमुच्यन्त इति सङ्गतिः ।

आकराध्यक्ष इति । शुल्बधातुशास्त्ररसपाकमणिरागज्ञः शुल्बशास्त्रं भूसिराविज्ञानं शाकलादि, अथवा शुल्वं ताम्रं तस्य ताम्ररजतहेमता येनोपदिश्यन्ते तच्छुल्वशास्त्रं, कनकपञ्चाशीक्रियावादशुल्बशास्त्रमिति स्वामी, धातुशास्त्रं धातुभ्यः सर्जिकागन्धकादियुक्त्या सत्त्वपातनोपदेशकं धातुकौटल्यादिशास्त्रं, रसः रसबन्धविज्ञानं 'रसोपनिषदाख्यमि'ति स्वामी, पाकः कनकादीनां वर्णोत्कर्षणाद्यनुकूलमग्निपचनकर्म, मणिरागः मणीनां वर्णभेदोत्पादनकर्म, एषु शुल्बशास्त्रादिषु ज्ञः कोविदः, तज्ज्ञसखो वा शुल्बशास्त्राद्यभिज्ञसहायश्च, तज्जातकर्मकरोपकरणसम्पन्नः तज्जातैस्तन्नित्योद्योगिभिः कर्मकरैः उपकरणैश्च खनित्रभस्त्रासन्दंशशाणयन्त्रादिभिः सम्पन्न उपेतः, आकराध्यक्षः, किट्टमूषाङ्गारभस्मलिङ्गं किट्टं लोहमलं मूषा आवर्तनभाण्डम् अङ्गारो भस्म च लिङ्गं भूतपूर्वत्वचिह्नं यस्य तं तथाभूतं, भूतपूर्वं पूर्वप्रवृत्ताविच्छिन्नम्, आकरं, परीक्षेत उक्तलिङ्गदर्शनेन जानीयात् । भूमिप्रस्तररसधातुं भूमिर्मृत्तिका प्रस्तरः पाषाणः रसः सलिलपारतादिः भूमिप्रस्तररसात्मकाः धातवः सत्त्वप्रकृतयो यस्मिंस्तं भूमिधातुकं प्रस्तरधातुकं रसधातुकं चेत्यर्थः, अत्यर्थवर्णगौरवं वर्णोत्कर्षयुक्तं भारोत्कर्षयुक्तं च, उग्रगन्धरसं तीव्रगन्धयुक्तं तीव्ररसयुक्तं च, अभूतपूर्वम् आकरं वा परीक्षेत नवमाकरं च परीक्षेत, किमाकरगता धातवः उत्कृष्टसत्त्वा उतापकृष्टसत्त्वा आहो मध्यमसत्त्वा इति तदीयवर्णगुरुत्वगन्धरसानां दर्शनतोलनाघ्राणास्वादनैर्निश्चिनुयादित्यभिप्रायः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पर्वतानामभिज्ञातोद्देशानां बिलगुहोपत्यकालयनगूढखातेष्वन्तःप्रस्यन्दिनो जम्बूचूततालफलपक्वहरिद्राभेदहरितालक्षौद्रहिङ्गुलकपुण्डरीकशुकमयूरपत्रवर्णाः सवर्णोदकौषधिपर्यन्ताश्चिक्कणा विशदा भारिकाश्च रसाः काञ्चनिकाः ।

अप्सु निष्ठ्यूतास्तैलवद्विसर्पिणः पङ्कमलग्राहिणश्च ताम्ररूप्ययोः शतादुपरि वेद्धारः ।

भूमिप्रस्तररसधातुषु रसः परनिर्दिष्टोऽप्यव्यभिचरितफलरूपसुवर्णयोनित्वेन महाफलत्वादल्पायासत्वाच्चाभ्यर्हित इति कृत्वा तमेव पञ्चप्रकारं प्रथमं निरूपयति — **पर्वतानामिति** । अभिज्ञातोद्देशानाम् अभिज्ञाताः पूर्वभूपपरिज्ञाताः आकरविद्याधीता वा उद्देशाः येषां तथाभूतानां, पर्वतानां, बिलगुहोपत्यकालयनगूढखातेषु बिलं भूविवरं गुहा देवखातगृहम् उपत्यका शैलासन्नभूमिः लयनं शिलाटङ्कनकर्मनिर्मितं गृहं गूढखातं महाशिलापिहितद्वारं बिलम् इत्येतेषु पञ्चसु, अन्तःप्रस्यन्दिनः मध्यप्रस्राविणः, जम्बूचूततालफलपक्वहरिद्राभेदहरितालक्षौद्रहिङ्गुलकपुण्डरीकशुकमयूरपत्रवर्णाः जम्बूफलादित्रिकं प्रसिद्धं पक्वहरिद्राभेदः शोधितहरिद्राभङ्गः हरितालं धातुभेदः क्षौद्रं मधु हिङ्गुलको रागद्रव्यविशेषः पुण्डरीकं सिताम्बुजं शुकमयूरपत्रे शुकपक्षमयूरपक्षौ जम्बूफलादीनां दशानां वर्ण इव वर्णो येषां ते तथाभूताः, सवर्णोदकौषधिपर्यन्ताः सवर्णोदकः स्ववर्णसमानवर्णजलः सवर्णौषधिः स्ववर्णसमानवर्णौषधिश्च पर्यन्तः परिसरप्रदेशो येषां ते तथाभूताः, चिक्कणाः स्पृष्टहस्तसङ्गिनः, विशदाः शुचयः, भारिकाश्च गुरवश्च, रसाः, काञ्चनिकाः काञ्चनं सुवर्णं तत्प्रयोजनाः ।

तेषामेव लक्षणान्तरमाह — **अप्स्विति** । अप्सु निष्ठ्यूता जले क्षिप्ताः, तैलवद्विसर्पिणः जले तैलवद् विसर्पणशीलाः, पङ्कमलग्राहिणश्च जलगतं पङ्कमादाय कतकवदधोगत्वराश्च, यथोक्ताः काञ्चनिकाः रसाः, ताम्ररूप्ययोरुपरि वेद्धारः ताम्रस्य रूप्यस्य चोपरि क्षिप्ताः सन्तः जात्यन्तरापादकाः सुवर्णत्वापादका इत्यर्थः । वेध्यवेद्ध्रोः योगपरिमाणमाह — **शतादिति** । शतमासाद्य, ल्यब्लोपे पञ्चमी, तच्च शतं ताम्ररूप्ययोर्वेध्ययोः पलशतं वेद्धुस्तु रसस्य परिमाणम् एकपलात्मकं विशेषाकथनात्, तथाच ताम्रपलशते रूप्यपलशते वा काञ्चनिकरसो वेधशास्त्रविधिनैकपलः क्षिप्तस्तत्सर्वं स्वर्णीकरोती-

---

१. 'दगुडहरितालमनःशिलाक्षौ' ग. पाठः.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्प्रतिरूपकमुग्रगन्धरसं शिलाजतु विद्यात् ।

पीतकास्ताम्रकास्ताम्रपीतका वा भूमिप्रस्तरधातवो भिन्ना नीलराजीमन्तो मुद्गमाषकृसरवर्णा वा दधिबिन्दुपिण्डचित्रा हरिद्राहरीतकीपद्मपत्रशैवलयकृत्प्लीहानवद्यवर्णा भिन्नाश्चुञ्चुवालुकालेखाबिन्दुस्वस्तिकवन्तः सगुलिका अर्चिष्मन्तस्ताप्यमाना न भिद्यन्ते बहुफेनधूमाश्च सुवर्णधातवः प्रतीवापार्थास्ताम्ररूप्यवेधनाः ।

त्युक्तं भवति । इह वेद्धार इति 'विध विधान' इत्यस्मात् तृच्, विधानं च रूपान्तरापादनलक्षणं विवक्षितमिति बोद्धव्यम् ।

तत्समरूपगन्धरसे शिलाजतुनि तद्भ्रमापनोदनार्थमाह — **तत्प्रतिरूपकमिति** । तत्प्रतिरूपकं तस्य काञ्चनिकरसस्य प्रतिरूपकं सदृशरूपं समानवर्णम्, उग्रगन्धरसं तद्वदुग्रगन्धमुग्ररसं च रसवस्तु, शिलाजतु तत्संज्ञं द्रव्यान्तरं, विद्याद् उपयोगादिना परीक्ष्य निश्चिनुयात् । अथवा रूपगन्धरसमात्रसाम्योक्त्या तैलवद्विसर्पित्वपङ्कमलग्राहित्वयोरभावस्य द्योतनात् तेनैव शिलाजतुत्वमवधारयेदित्यर्थः ।

अथ त्रिविधान् भूमिप्रस्तरधातूनाह — **पीतका** इति । पीतकाः केवलपीताः, ताम्रकाः केवलताम्राः, ताम्रपीतकाः उक्तोभयमिश्राः, वेति विकल्पे, एवं त्रिविधाः, भूमिप्रस्तरधातवः भूमिधातवः प्रस्तरधातवश्च, भिन्ना नीलराजीमन्तः विदारिता मध्ये नीलरेखायुक्ताः, मुद्गमाषकृसरवर्णा वा मुद्गमाषतिलौदनसवर्णाः, वेति विकल्पे । दधिबिन्दुपिण्डचित्राः दधिबिन्दुचित्राः दधिकणाकारैः सूक्ष्मैर्बिन्दुभिराकीर्णाः दधिपिण्डचित्राश्च दधिपिण्डसदृशैः स्थूलबिन्दुभिराकीर्णाश्च, हरिद्राहरीतकीपद्मपत्रशैवलयकृत्प्लीहानवद्यवर्णाः हरिद्रा रजनी हरीतकी पथ्या पद्मपत्रं पद्मदलं शैवलं जलनीली यकृत् कालखण्डाख्यो मांसविशेषः प्लीहा गुल्मः अनवद्यं कुङ्कुमम् एषामिव वर्णो येषां ते तथाविधाः । भिन्नेषु विशेषमाह — भिन्नाः सन्तः, चुञ्चुवालुकालेखाबिन्दुस्वस्तिकवन्तः चुञ्चुवालुका सूक्ष्मवालुकेति स्वामी तद्वन्तः लेखा राजयः तद्वन्तः बिन्दुमन्तः स्वस्तिकस्त्रिकोणरेखाविशेषस्तद्वन्तः, सगुलिकाः गुटिकाकारशर्करोपेताः, अर्चिष्मन्तो दीप्तिमन्तः । परीक्षान्तरमाह — ताप्यमानाः सन्तः न भिद्यन्ते न स्फुटन्ति । कीदृशास्तर्हि भवन्तीत्यत्राह — बहुफेनधूमाः बहुफेनाः बहुधूमाश्च भवन्ति । चशब्दः समुच्चये । एवंलक्षणाः भूमिप्रस्तरधातवः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शङ्खकर्पूरस्फटिकनवनीतकपोतपारावतविमलकमयूरग्रीवावर्णाः सस्यकगोमेदकगुडमत्स्यण्डिकावर्णाः कोविदारपद्मपाटलीकलायक्षौमातसीपुष्पवर्णाः ससीसाः साञ्जना विस्रा भिन्नाः श्वेताभाः कृष्णाः कृष्णाभाः श्वेताः सर्वे वा लेखाबिन्दुचित्रा मृदवो ध्मायमाना न स्फुटन्ति बहुफेनधूमाश्च रूप्यधातवः ।

सर्वधातूनां गौरववृद्धौ सत्त्ववृद्धिः । तेषामशुद्धा मूढगर्भा वा तीक्ष्णमूत्रक्षारभाविता राजवृक्षवटपीलुगोपित्तरोचनामाहिषखरकरभमूत्र-

---

प्रतीवापार्थाः प्रतीवापो नाम वेधनद्रव्यस्यावर्तमाने ताम्रे रूप्ये वा चूर्णीकृत्य प्रक्षेपः तदर्थास्तत्प्रयोजनाः, ताम्ररूप्यवेधनाः ताम्रस्य रूप्यस्य वा स्वर्णत्वापादकाः, अत एव सुवर्णधातवः सुवर्णहेतुभूता धातव इत्युच्यन्त इत्यर्थः ।

रूप्यधातूनाह—शङ्खेत्यादि । रूप्यधातवः रूप्यहेतवो धातवः, शङ्खवर्णकर्पूरवर्णादयोऽष्टौ सस्यकवर्णगोमेदकवर्णादयश्चत्वारः कोविदारवर्णपद्मवर्णादयः षडित्येवमष्टादशप्रकाराः । तत्र कपोतः आरण्यः कलरवः, पारावतो ग्राम्यः, विमलकः श्वेतरक्तो मणिः । सस्यको नीलमणिः, गुडः पिण्डशर्करा, मत्स्यण्डिका शर्करा । कोविदारस्ताम्रपुष्पाख्यो वृक्षः, पाटली अमोघाख्या, कलायः सतीनकः, क्षौमं क्षुमाभेदः, अतसी उमाख्या । शेषं प्रसिद्धम् । ससीसाः योगेष्टाख्यलोहानुविद्धाः, साञ्जनाः सीसकवच्छुक्लवर्णमञ्जनमिति स्वामी तदनुविद्धाः, विस्राः दुर्गन्धाः, भिन्नाः खण्डिताश्चेत्, श्वेताभाः कृष्णाः श्वेतवर्णाः सन्तो मध्ये कृष्णवर्णाः, कृष्णाभाः श्वेताः कृष्णवर्णाः सन्तो मध्ये श्वेतवर्णाः, सर्वे वा वेति विकल्पे शङ्खादिवर्णा अष्टादशविधा अपि, लेखाबिन्दुचित्राः स्ववर्णभिन्नवर्णाभिर्लेखाभिर्बिन्दुभिश्च चित्राः, मृदवः, ध्मायमाना न स्फुटन्ति ताप्यमाना न भिद्यन्ते, बहुफेनधूमाश्च भवन्ति ।

सर्वधातूनामिति । सर्वधातूनां सर्वेषामुक्तानां वक्ष्यमाणानां च धातूनां, गौरववृद्धौ गुरुत्वोत्कर्षे सति, सत्त्ववृद्धिः सत्त्वं धातुगतः सारः तस्य वृद्धिः, भवति । अशुद्धानामनभिव्यक्तसत्त्वानां च धातूनां शोधनप्रकारमाह—तेषामिति । तेषां धातूनां मध्ये, अशुद्धाः अशुद्धद्रव्यान्तरसंसर्गादुष्टाः, मूढगर्भा वा स्वदोषादेवाप्रकाशमानसत्त्वा वा धातवः, तीक्ष्णमूत्रक्षारभाविताः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लण्डपिण्डबद्धास्तत्प्रतीवापास्तदवलेपा वा विशुद्धाः स्रवन्ति ।

यवमाषतिलपलाशपीलुक्षारैर्गोक्षीराजक्षीरैर्वा कदलीवज्रकन्दप्रतीवापो मार्दवकरः ।

मधु मधुकमजापयः सतैलं घृतगुडकिण्वयुतं सकन्दलीकम् ।
यदपि शतसहस्रधा विभिन्नं भवति मृदु त्रिभिरेव तन्निषेकैः ॥

गोदन्तशृङ्गप्रतीवापो मृदुस्तम्भनः ।

तीक्ष्णमूत्रं नरमूत्रमित्येके गजाश्वगोगर्दभच्छागमूत्रमित्यपरे इति स्वामी तीक्ष्णक्षारः कदल्यपामार्गादिभस्म ताभ्यां भाविताः असकृत् सेचनादिना संस्कृताः, राजवृक्षवटपीलुगोपित्तरोचनामहिषखरकरभमूत्रलण्डपिण्डबद्धाः राजवृक्षः शम्याकः वटः प्रसिद्धः पीलुर्गुडफलाख्यो वृक्षः गोपित्तरोचना गोपित्तं गोरोचना च महिषखरकरभमूत्रलण्डं सैरिभगर्दभबालोष्ट्राणां मूत्रपुरीषम् एतैः पिण्डबद्धाः राजवृक्षादिकल्कैर्महिषादिमूत्रलण्डेन च सह मिश्रितैरुक्ततीक्ष्णमूत्रक्षारभावितस्यात्मनश्चूर्णैर्बद्धपिण्डा इत्यर्थः, तत्प्रतीवापाः राजवृक्षादिचूर्णकृतप्रतीवापाः, तदवलेपा वा तच्चूर्णकृतोपलेपा वा सन्तः, विशुद्धाः द्रव्यान्तरसंसर्गजदोषनिर्मुक्ताः, स्रवन्ति मूढगर्भतापहानेन सत्त्वमुद्गिरन्ति ।

यवमाषतिलपलाशपीलुभस्मभिर्गोक्षीराजक्षीरैश्च सम्मिश्रिताभ्यां कदलीकन्दवनसूरणकन्दाभ्यां प्रतीवापात् स्वर्णरूप्ययोर्मार्दवमुपजायत इत्याह—यवमाषेत्यादि । इह वेत्यन्तस्य विशुद्धाः स्रवन्तीत्यनेन सम्बन्धं मत्वा यवक्षारादिभिः साधनैः पूर्ववत् पिण्डबन्धनादिविधया वा धातवो विशुद्धाः स्रवन्तीत्यर्थं केचिद् वर्णयन्ति ।

मृदूकारप्रकारान्तरं श्लोकेनाह—मधुमधुकमिति । सतैलं, घृतगुडकिण्वयुतं सर्पिश्शर्करासुराबीजसहितं, सकन्दलीकं कच्छजझाटभेदयुक्तं, यत्, मधु क्षौद्रं, मधुकं यष्ट्याख्यम्, अजापयः छागीक्षीरं च, त्रिभिरेव, तन्निषेकैः निषेको नाम स्वर्णादावौषधकल्कनिक्षेपः मध्वाद्यष्टककल्कनिक्षेपैः, शतसहस्रधा विभिन्नमपि नानाप्रकारकाठिन्ययुक्तमपि स्वर्णादिकं, मृदु भवति ॥

मार्दवापायकरमाह—गोदन्तेत्यादि । गोदन्तशृङ्गप्रतीवापः गोर्दन्तशृङ्गचूर्णयोर्द्रुतसुवर्णाद्युपरि प्रक्षेपः, मृदुस्तम्भनः मार्दवविलोपनो भवति । इति स्वर्णरूप्यधातुप्रकरणम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भारिकः स्निग्धो मृदुश्च प्रस्तरधातुर्भूमिभागो वा पिङ्गलो हरितः पाटलो लोहितो वा ताम्रधातुः ।

काकमेचकः कपोतरोचनावर्णः श्वेतराजिनद्धो वा विस्रः सीसधातुः ।

ऊषरकर्बुरः पक्कलोष्टवर्णो वा त्रपुधातुः ।

कुरुम्बः पाण्डुरोहितः सिन्दुवारपुष्पवर्णो वा तीक्ष्णधातुः ।

काकाण्डभुजपत्रवर्णो वा वैकृन्तकधातुः ।

अच्छः स्निग्धः सप्रभो घोषवान् शीततीव्रस्तनुरागश्च मणिधातुः ।

अथ ताम्रधातुमाह— **भारिक** इति । भारिकः गुरुः, स्निग्धो मसृणः, मृदुश्च, प्रस्तरधातुः पाषाणधातुः, भूमिभागो वा भूमिधातुर्वा, ताम्रधातुः ताम्रयोनिर्भवति । तस्य चतुर्विधान् वर्णानाह — पिङ्गलः कपिलः, हरितो नीलः, पाटल ईषद्रक्तः, लोहितो वा रक्तो वा ।

सीसधातुमाह—**काकेत्यादि** । काकमेचकः काक इव कृष्णः, कपोतरोचनावर्णः कपोतवर्णो गोरोचनावर्णश्च, श्वेतराजिनद्धः धवललेखाबहुलः, विस्रो वा दुर्गन्धो वा, सीसधातुः सीससंज्ञलोहयोनिर्धातुर्भवति ।

त्रपुसंज्ञस्य शुक्लसीसस्य योनिं धातुमाह— **ऊषरेत्यादि** । ऊषरकर्बुरः ऊषरदेशवदापाण्डुः, पक्कलोष्टवर्णो वा, त्रपुधातुः ।

अयोधातुमाह —**कुरुम्ब** इति । कुरुम्बः श्लक्ष्णपाषाणप्रायः इति स्वामी, पाण्डुरोहितः श्वेतरक्तः, सिन्दुवारपुष्पवर्णो निर्गुण्डीपुष्पवर्णः, वेति विकल्पे, तीक्ष्णधातुः तीक्ष्णम् अयः तद्योनिर्धातुर्भवति ।

वैकृन्तकधातुमाह—**काकाण्डेत्यादि** । काकाण्डभुजपत्रवर्णो वा काकाण्डवर्णो भूर्जपत्रवर्णो वा, क्वचिद् भूर्जेत्येव पाठः । काण्डेति पाठे काण्डो वृक्षजातिविशेष इति व्याख्येयम् । वैकृन्तकधातुः वैकृन्तकाख्यलोहविशेषयोनिर्धातुः । कांस्यादिकं तु तमरकादियुक्तताम्रादिनिष्पाद्यमिति तस्य न धात्वन्तरमस्ति । एवं लोहधातवः सप्ताभिहिताः ।

अथ मणिधातूनाह — **अच्छ** इति । अच्छो बिम्बग्राही, स्निग्धो मसृणः, सप्रभः सद्युतिः, घोषवान् अग्नितापने टङ्कच्छेदने च महाशब्दः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धातुसमुत्थं तज्जातकर्मान्तेषु प्रयोजयेत् ।

कृतभाण्डव्यवहारमेकमुखम्, अत्ययं चान्यत्रकर्तृक्रेतृविक्रेतॄणां स्थापयेत् ।

आकरिकमपहरन्तमष्टगुणं दापयेदन्यत्र रत्नेभ्यः ।

स्तेनमनिसृष्टोपजीविनं च बद्धा कर्म कारयेद्, दण्डोपकारिणं च ।

शीततीव्रः अतिशीतस्वभावः अग्नेरपनयने क्षिप्रशीतो वा, तनुरागः अल्परागः, मणिधातुः मणियोनिर्धातुर्भवति । इयमत्र संग्रहार्या —

"कनकं रूप्यं ताम्रं सीसं त्रपु तीक्ष्णकं च वैकृन्तम् ।
मणयोऽष्टौ निर्दिष्टा अष्टानां धातवोऽप्यष्टौ ॥" इति ।

इत्थं धातुपरीक्षामुपदिश्य तत्कर्मान्तप्रवर्तनमधिकृत्याह — **धातुसमुत्थमिति ।** धातुसमुत्थितमित्यपि पाठः । धातुभ्यः स्वल्पधनव्ययवत्नेन प्रथममुत्पन्नं स्वर्णादिद्रव्यं, तज्जातकर्मान्तेषु धातुसम्बद्धकर्मस्थानेषु स्वर्णरूप्याद्याकरेषु, प्रयोजयेत् विनियुञ्जीत बहुतरोत्पत्त्यर्थम् । विनियोज्यस्य धातुसमुत्थत्ववचनं पूर्वपूर्वसम्यक्प्रवृत्तिफलोपलम्भे सत्येवोत्तरोत्तरप्रवृत्तिः कार्येति द्योतयितुम् ।

कृतेत्यादि । कृतभाण्डव्यवहारं घटितसुवर्णादिभाण्डविक्रयम्, एकमुखम् एकद्वारकमेकविक्रयस्थानकं, स्थापयेत् प्रख्यापयेत् । अन्यत्रकर्तृक्रेतृविक्रेतॄणां स्थापितान्यदेशे भाण्डक्रियाक्रयविक्रयकारिणाम्, अत्ययं च दण्डं च 'पञ्चविंशतिपणमत्ययं चान्यत्रकर्तृक्रेतृविक्रेतृपरीक्षितृभ्य' इति लक्षणाध्यक्षोक्तं, स्थापयेत् । दण्ड इह द्रव्यसारतारतम्यापेक्षः शुल्काध्यक्ष-धर्मस्थीय-कण्टकशोधनोक्तोऽपराधानुरूपः कल्पनीयः प्रमाणाकथनादिति केचित् ।

आकरिकमिति । अपहरन्तम् आकराद् द्रव्यं हरन्तं, आकरिकम् आकरकर्मकरम्, अष्टगुणम् अपहृतद्रव्याष्टगुणमत्ययं दापयेत् । तत्रापवादमाह — अन्यत्र रत्नेभ्य इति । रत्नापहारे तु नायं दण्डः, किन्तु घातो वक्ष्यते ।

स्तेनमिति । स्तेनम् आकरिकमनाकरिकं वा चोरम्, अनिसृष्टोपजीविनं च विना राजानुमतिं धातुवादविद्यया वृत्तिं वर्तयन्तं च, बद्ध्वा निगडितं कृत्वा, बद्धमिति पाठेऽप्ययमेवार्थः, कर्म आकरव्यापारं, कारयेत् । दण्डोपकारिणं च महापराधेषु प्राड्विवाकनिर्णीतो देहदण्डप्रतिनिधिर्धनदण्डो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्ययक्रियाभारिकमाकरं भागेन प्रक्रयेण वा दद्यात्, लाघविकमात्मना कारयेत् ।

लोहाध्यक्षः ताम्रसीसत्रपुवैकृन्तकारकूटवृत्तकंसताललोहकर्मान्तान् कारयेत्, लोहभाण्डव्यवहारं च ।

लक्षणाध्यक्षः चतुर्भागताम्रं रूप्यरूपं तीक्ष्णत्रपुसीसाञ्जनानामन्यतममाषबीजयुक्तं कारयेत् पणम्, अर्धपणं पादमष्टभागमिति ।

देहपीडापरिहारार्थत्वादपराधिनं प्रति उपकारो भवतीति दण्डोपकारः स उच्यते तद्वन्तं च अर्थाददत्तदण्डं, बद्ध्वा कर्म कारयेत् ।

व्ययक्रियेत्यादि । व्ययक्रियाभारिकं व्ययक्रिययोर्भारिकं गुरुं गुरुधनव्ययसाध्यं गुरुप्रयत्नसाध्यं चेत्यर्थः, आकरं, भागेन दद्याद् व्ययलाभभागव्यवस्थया परेषां प्रतिपादयेत् । प्रक्रयेण वा दद्यात् अस्याकरस्यैतावत् सुवर्णादिकं राजार्थे देयमिति परिपण्य वा परेषां दद्यात् । लाघविकं लघुव्ययसाध्यं लघुश्रमसाध्यं चाकरम्, आत्मना कारयेत् स्वयं व्यापारयेत् ।

अथावान्तराध्यक्षव्यापारमाह — **लोहाध्यक्ष** इति । लोहाध्यक्षः सुवर्णरूप्ययोर्वक्ष्यमाणत्वात् तदतिरिक्तं ताम्रादिकमिह लोहः तदध्यक्षः, ताम्रसीसत्रपुवैकृन्तकारकूटवृत्तकंसताललोहकर्मान्तान् आरकूटो रीतिः वृत्तं तदाख्यो लोहः कंसो घोषाख्यः तालः कांस्यं सातिशयनादयुक्तं वाद्योपयोगि लोहः कालायसं ताम्रादीनां कर्मान्तान् तद्भाण्डघटनकर्माणि, कारयेत् । लोहभाण्डव्यवहारं च ताम्रादिनिर्मितभाण्डक्रयविक्रयव्यवहारं च कारयेत् ।

अथ पण्यव्यवहारार्थं लक्षणाध्यक्षव्यापारमाह—**लक्षणे**त्यादि । लक्षणाध्यक्षः लक्षणं पणमाषकादिरूपनिर्माणं तदध्यक्षः टङ्कशालाध्यक्ष इति यावत् । पणव्यवहारश्च रूप्यरूपश्चतुर्विधः ताम्ररूपश्चतुर्विधः इत्यष्टविधे तस्मिन् रूप्यरूपः चतुर्भागताम्रमित्यादिना, ताम्ररूपश्च पादाजीवमित्यादिना व्युत्पाद्यते । षोडशमाषको हि पणः प्रसिद्धः, तस्य चतुर्भागश्चत्वारो माषाः तत्प्रमाणं ताम्रं यस्य तथाविधं, तीक्ष्णत्रपुसीसाञ्जनानामन्यतममाषबीजयुक्तं तीक्ष्णं कालायसं त्रपु रङ्गं सीसं योगेष्टाख्यम् अञ्जनं रसाञ्जनम् एषां चतुर्णामन्यतमस्य माषप्रमाणेन बीजेन निर्माणार्थेन युक्तम्, अर्थात् परिशिष्टैकादशमाषपरिमाणरूप्यकं, रूप्यरूपं रूप्यांशभूम्ना रूप्यमयं, पणं पणसंज्ञं नाणकविशेषं, कारयेत् । इति उक्तेन प्रकारेण, अर्धपणं पादम् अष्टभागं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पादाजीवं ताम्ररूपं माषकमर्धमाषकं काकणीमर्धकाकणीमिति ।

रूपदर्शकः पणयात्रां व्यवहारिकीं कोशप्रवेश्यां च स्थापयेत् । रूपिकमष्टकं शतं, पञ्चकं शतं व्याजीं, पारीक्षिकमष्टभागिकं शतम् । पञ्चविंशतिपणमत्ययं चान्यत्र कर्तृक्रेतृविक्रेतृपरीक्षितृभ्यः ।

कारयेत् पणोक्तताम्राद्यर्धप्रमाणयोगेनार्धपणाख्यं तच्चतुर्भागप्रमाणयोगेन पादपणं तदष्टभागप्रमाणयोगेनाष्टभागाख्यं च निर्मापयेदित्यर्थः । प्रकारान्तरार्थो वा इतिशब्दः इति कारयेदिति योज्यः, त्रिपादकादिकं प्रकारान्तरमपि व्यवहारानुगुणं निर्मापयेदित्यर्थः । पादाजीवं रूप्यरूपचतुर्भागव्यवहार्यं, ताम्ररूपं ताम्रांशभूम्ना ताम्रमयं रूपं, माषकं माषकाख्यं कारयेत् । ताम्रस्यैकादश धान्यमाषाः रूप्यस्य चत्वारस्तीक्ष्णाद्यन्यतमस्यैक इति योगप्रमाणेन रूप्यरूपपणवत् षोडशधान्यमाषप्रमाणकोऽयं ताम्ररूपमाषको द्रष्टव्यः । एवं माषकोक्तताम्राद्यर्धप्रमाणयोगेनार्धमाषकं तच्चतुर्भागप्रमाणयोगेन काकणीं, तदष्टभागप्रमाणयोगेनार्धकाकणीं च कारयेत् ।

रूपदर्शक इति । रूपदर्शकः रूपपरीक्षकः, पणयात्रां पणदानादानप्रस्थानं, व्यवहारिकीं व्यवहारप्रयोजनां, कोशप्रवेश्यां च कोशप्रवेशनयोग्यां च, स्थापयेद् ईदृशी पणयात्रा व्यवहारार्था ईदृशी कोशप्रवेशनार्थेति तत्सारासारभावपर्यालोचनया व्यवस्थापयेत् । इयं राजकर्तृका पणयात्रा । जानपदकारितायां तस्यां राजभाव्यमाह — **रूपिकामित्यादि** । अष्टास्योपदा दीयते अष्टकं पञ्चास्योपदा दीयते पञ्चकम् । अष्टकं शतं पणशतेऽष्टपणग्रहणं रूपिकसंज्ञं, पणशते पञ्चपणग्रहणं व्याजीसंज्ञं, पणशतेऽष्टभागग्रहणं पारीक्षिकसंज्ञम् । रूपिकं व्याजीं पारीक्षिकं च यथोक्तलक्षणं स्थापयेद् व्यवस्थापयेत् । तत्र रूपिकं कर्मकरभृतिः, व्याजी राजभागः, पारीक्षिकं परीक्षकभृतिरिति बोद्धव्यम् । पञ्चविंशतिपणम्, अत्ययं च दण्डं च स्थापयेद्, अर्थादपराधे सति । स चापराधः सन्निहिताष्टभागिकपदानुकर्षणेनाष्टभागभवं दण्डमिति व्याख्यानादष्टभागापहारलक्षणो द्रष्टव्यः । अनया दिशा चतुर्भागाद्यपहारे दण्डद्वैगुण्यादिकमुन्नेयम् । केष्वपराधिषु विषयेऽयं दण्ड इत्याकाङ्क्षायामाह — **अन्यत्र कर्तृक्रेतृविक्रेतृपरीक्षितृभ्य** इति । ये करणक्रयणादावधिकृतास्तदतिरिक्तेषु विषये । ते च जानपदा अध्यक्षपुरुषकर्मकरा वेत्यवसेयम् । अन्यत्रकर्त्रादीनां त्वपराधे द्रव्यसारासारतापेक्षो दण्डः प्रागुक्त एव ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

खन्यध्यक्षः शङ्खवज्रमणिमुक्ताप्रवालक्षारकर्मान्तान् कारयेत् पणनव्यवहारं च ।

लवणाध्यक्षः पाकमुक्तं लवणभागं प्रक्रयं च यथाकालं सङ्गृह्णीयाद्, विक्रयाच्च मूल्यं रूपं व्याजीं च ।

आगन्तुलवणं षड्भागं दद्यात् । दत्तभागविभागस्य विक्रयः । पञ्चकं शतं व्याजीं, रूपं, रूपिकं च । क्रेता शुल्कं, राजपण्यच्छेदानु-

---

भट्टस्वामी त्वाह — 'तेषां खन्यत्रकर्त्रादीनामुक्त एव दण्डः "कूटकुरूपकं कुर्वतः कारयतो निपातयतो वा सहस्रदण्ड" इति' इति । ईदृशं मूलवाक्यं मृग्यम् ।

अथ खन्यध्यक्षव्यापारमाह — **खन्यध्यक्ष** इत्यादि । खन्यध्यक्षः स्वर्णरत्नाद्याकराधिकारी, शङ्खवज्रमणिमुक्ताप्रवालक्षारकर्मान्तान् शङ्खानां कर्मान्तान् पाटनघर्षणादिक्रियाः वज्रमणिमुक्ताप्रवालानां कर्मान्तान् खननशोधनरञ्जनादिक्रियाः क्षाराणां कर्मान्तान् यवक्षारादीनाम् उत्पादनादिक्रियाश्च, कारयेत् । पणनव्यवहारं च शङ्खादिक्रयविक्रयव्यवहारं च कारयेत् ।

लवणाध्यक्षव्यापारमाह—**लवणे**त्यादि । लवणाध्यक्षः, पाकमुक्तं परिणतं निष्पन्नं, लवणभागं भागार्पिताकरलभ्यं लवणस्य भागं, प्रक्रयं च प्रक्रयः परिपणः अमुकाकरस्यैतावल्लवणं देयमिति परिभाष्यार्पितादाकराल्लभ्यं चेत्यर्थः, यथाकालं क्लृप्तकालानतिक्रमेण, संगृह्णीयात् । तदिदं राजपण्यं वणिग्भिर्विक्रेतव्यम् । **विक्रयाच्चे**ति । विक्रयाच्च तद्विक्रयलब्धद्रव्याच्च, मूल्यं पण्यमूल्यं, रूपं पारीक्षिकमष्टभागिकलक्षणं, व्याजीं च पुनर्मीयमानोनतापरिहारार्थमधिकतया गृह्यमाणां मानव्याजीं च, संगृह्णीयादिति वर्तते ।

इत्थं राजपण्यसम्बद्धमभिधायागन्तुकपण्यसम्बद्धमाह— **आगन्तुलवणमि**ति । आगन्तुलवणं परदेशागतं लवणम्, अर्थात् तद्विक्रेता, षड्भागं दद्यात् षष्ठं भागं राज्ञे दद्यात् । दत्तभागविभागस्य दत्तो राज्ञेऽर्पितः भागः षड्भागो विभागो मानव्याजी च येन तस्यागन्तुलवणव्यवहारिणः, विक्रयो भवति । विक्रये इति सप्तम्यन्तपाठस्तु श्रेयान् उत्तरग्रन्थेनैकवाक्यत्वस्य स्वरसतो लाभात् । न केवलं षड्भाग-मानव्याज्योर्द्वयोरेव दानं, किन्त्वन्येषामपि त्रयाणां तद् भवतीत्याह — **पञ्चक**मित्यादि । पणशते पणपञ्चकलक्षणां व्याजीं, पारीक्षिकं शतस्याष्टभागिकलक्षणं रूपशब्दवाच्यं, पणशते पणाष्टक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपं च वैधरणं दद्यात् । अन्यत्रक्रेता षट्छतमत्ययं च ।

विलवणमुत्तमं दण्डं दद्यात्, अनिसृष्टोपजीवी च अन्यत्र वानप्रस्थेभ्यः । श्रोत्रियास्तपस्विनो विष्टयश्च भक्तलवणं हरेयुः ।

अतोऽन्यो लवणक्षारवर्गः शुल्कं दद्यात् ।

एवं मूल्यं विभागं च व्याजीं परिघमत्ययम् ।
शुल्कं वैधरणं दण्डं रूपं रूपिकमेव च ॥

खनिभ्यो द्वादशविधं धातुं पण्यं च संहरेत् ।
एवं सर्वेषु पण्येषु स्थापयेन्मुखसङ्ग्रहम् ॥

लक्षणं रूपिकसंज्ञं च, दद्यादित्यनुषज्यते । **क्रेतेति** । क्रेता शुल्कं दद्यात्, नतु विक्रेता । राजपण्यच्छेदानुरूपं राजपण्याद् विक्रीयमाणाद् यश्छेदः यावन्नष्टं तदनुरूपं, वैधरणं वैधरणशब्दितं छिन्नपूरणं च दद्यात् । अन्यत्रक्रेता विद्यमाने राजपण्येऽन्यतो लवणं क्रीणानः, षट्छतम्, अत्ययं च दण्डं च, दद्यात् ।

विलवणमिति । विलवणं विड(कृतकलवण)मृदादिमिश्रं लवणम्, अर्थात् तथाविधलवणव्यवहर्ता, उत्तमं दण्डम् उत्तमसाहसं, दद्यात् । अनिसृष्टोपजीवी च यो राजाननुमत एव लवणमुत्पाद्योपजीवति स च, उत्तमं दण्डं दद्यात् । तत्रापवादमाह — वानप्रस्थेभ्योऽन्यत्र वानप्रस्थान् विहाय । तेषां त्वनिसृष्टोपजीविनां न दण्ड इत्यर्थः । **श्रोत्रिया इति** । श्रोत्रियाः वेदाध्यायिनः, तपस्विनः दीनाः, विष्टयः हठकारितकर्मकारिणश्च, भक्तलवणम् अन्नाभ्यवहारमात्रपर्याप्तं लवणं, हरेयुः विनैव शुल्कं नयेयुः ।

अत इति । अतोऽन्यः उक्तादितरः, लवणक्षारवर्गः 'सैन्धव-सामुद्र-विड-यवक्षार-सौवर्चलोद्भिदजा लवणवर्गः' इति 'फाणित-गुड-मत्स्यण्डिका-खण्ड-शर्कराः क्षारवर्गः' इति च कोष्ठागाराध्यक्षे वक्ष्यमाणो लवणवर्गः क्षारवर्गश्च, अर्थात् तत्कर्ता, शुल्कं दद्यात् शुल्कमेव दद्यान्न तु व्याज्यादिकमित्यर्थः ।

अथ श्लोकानाह — **एवमित्यादि** । एवम् उक्तप्रकारेण, खनिभ्यः, मूल्यं प्रतीतं, विभागं षड्भागं, व्याजीं पञ्चकं शतं मानव्याजीत्युभयविधां, परिघं पारीक्षिकं धातुसमुत्थितानां तज्जातकर्मान्तेषु प्रयोगात् सिद्धं लाभविशेषं वा, अत्ययम् आश्रावितं दमं, शुल्कं प्रतीतं, वैधरणं छिन्नपूरणं, दण्डम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आकरप्रभवः कोशः कोशाद् दण्डः प्रजायते ।
पृथिवी कोशदण्डाभ्यां प्राप्यते कोशभूषणा ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वादशोऽध्यायः आकरकर्मान्तप्रवर्तनम्,
आदितः त्रयस्त्रिंशः ॥

अश्रावितं दत्तं, रूपं रूप्यरूपं ताम्ररूपमिति द्विविधं, रूपिकम् अष्टकं शतं, धातुं सुवर्णरूप्यादिधातुं, पण्यं विक्रेयं च, द्वादशविधम् उक्तद्वादशप्रकारम् उपादानं, संहरेत् समुत्पादयेत् । एवं, सर्वेषु पण्येषु पणनयोग्येषु मध्ये, मुखसंग्रहं मुखमिव मुखं प्रधानं सारस्तस्य संग्रहं, स्थापयेत् ॥

आकरस्य सर्वार्थसाधकतामध्यायान्तिमश्लोकेन दर्शयति — आकरे- त्यादिना ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वादशोऽध्यायः आकरकर्मान्तप्रवर्तनम्,
आदितस्त्रयस्त्रिंशः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३१. प्रक. अक्षशालायां सुवर्णाध्यक्षः ।

सुवर्णाध्यक्षः सुवर्णरजतकर्मान्तानामसम्बन्धावेशनचतुश्शालामेकद्वारामक्षशालां कारयेत् । विशिखामध्ये सौवर्णिकं शिल्पवन्तमभिजातं प्रात्ययिकं च स्थापयेत् ।

जाम्बूनदं शातकुम्भं हाटकं वैणवं शृङ्गिशुक्तिजं, जातरूपं रसविद्धमाकरोद्गतं च सुवर्णम् ।

अक्षशालायां सुवर्णाध्यक्ष इति सूत्रम् । अक्षशालायां सुवर्णरूप्यादिनिर्माणशालायां, नियुक्तः सुवर्णाध्यक्षः अर्थात् तस्य व्यापार इहाभिधीयत इति तदर्थः । प्रक्रान्तायां कोशप्रकृतौ प्रधानभूतस्य सुवर्णादेरुत्पत्तिः समनन्तराध्याययोरुक्ता । तस्यावस्थान-जाति-वर्ण-गुणशोधन-दोषपरीक्षण-परिकर्मादिकथनपूर्वमर्जनं रक्षणं चेदानीमभिधीयते ।

सुवर्णाध्यक्ष इति । सुवर्णाध्यक्षः, सुवर्णरजतकर्मान्तानां सुवर्णरजतसम्बद्धानामलङ्कारादिघटनक्रियाणाम् , अक्षशालाम् अवस्थानभूतां शालां, कारयेत् । सुवर्णादिपरिकर्मस्थानमक्षशालेत्यभिधीयते । तां कीदृशीम् , असम्बन्धावेशनचतुश्शालाम् असम्बन्धानि परस्परानुपश्लिष्टानि आवेशनानि शिल्पकर्मस्थानभूतानि चतुश्शालानि पृथक् पृथक् चतस्रश्चतस्रः शाला यस्यां ताम् । असम्बाधावेशनेति पाठेऽप्ययमेवार्थः । एकद्वारां रक्षासौकर्यार्थं द्वारेणैकेन युक्तां च । विशिखामध्ये रथ्यामध्ये, सौवर्णिकं पौरजानपदानां रूप्यसुवर्णक्रयविक्रयकर्माधिकारिणं, स्थापयेत् । कथम्भूतं, शिल्पवन्तं क्षेपणादिवक्ष्यमाणकर्मनिपुणम् , अभिजातं कुलीनं, प्रात्ययिकम् उपधाशुद्धम् । चकाराज्जानपदत्वादिगुणयुक्तम् । सौवर्णिकस्य व्यापारः सौवर्णिकप्रचारे वक्ष्यते । तस्यात्र निर्देशः सुवर्णाध्यक्षाधीनत्वज्ञापनाय राजधनपौरजानपदधनानां रक्षाविधानतुल्यत्वज्ञापनाय च ।

अथ पञ्चविधं पञ्चवर्णं त्रियोनिं सुवर्णमाह — **जाम्बूनदमिति** । सुवर्णं, जाम्बूनदं मेरुप्रभवजम्बूनदीसमुद्भूतं जम्बूफलरसवर्णं, शातकुम्भं शतकुम्भपर्वतोत्पन्नं पद्मकिञ्जल्कवर्णं, हाटकं हाटकाकरोत्पन्नम् अम्लानाख्यकुरण्डककुसुमसवर्णं, वैणवं वेणुपर्वतजं कर्णिकारपुष्पवर्णं, शृङ्गिशुक्तिजं सुवर्णभूमिजमिति भाषाटीका, तच्च मनश्शिलावर्णम् । इति पञ्चप्रकारस्य पञ्चवर्णस्य सुवर्णस्य त्रिविधामुत्पत्तिमाह — **जातरूपमिति** । जातरूपं स्वतः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

किञ्जल्कवर्णं मृदु स्निग्धमनादि भ्राजिष्णु च श्रेष्ठं, रक्तपीतकं मध्यमं, रक्तमवरं श्रेष्ठानाम् ।

पाण्डु श्वेतं चाप्राप्तकम् । तद् येनाप्राप्तकं तच्चतुर्गुणेन सीसेन शोधयेत्, सीसान्वयेन भिद्यमानं शुष्कपटलैर्ध्मापयेत्, रूक्षत्वाद् भिद्यमानं तैलगोमये निषेचयेत् ।

आकरोद्गतं सीसान्वयेन भिद्यमानं पाकपत्राणि कृत्वा गण्डिकासु कुट्टयेत्, कन्दलीवज्रकन्दकल्के वा निषेचयेत् ।

तुत्थोद्गतं गौडिकं काम्बुकं चाक्रवालिकं च रूप्यम् । श्वेतं

सुवर्णमेवोत्पन्नं, रसविद्धं रसयोगेन काञ्चनीकृतम्, आकरोद्गतं च आकरगतमृत्पाषाणादिभ्यः पातितं च । क्रियावादोत्पन्नमित्यपि केचित् । तत्पक्षे चतुर्योनित्वं बोध्यम् । अत्रायं भट्टस्वामिनः श्लोकः—

"हेम्नः पञ्चप्रकारस्य त्रियोनेः पञ्च वर्णकाः ।
जम्बूकोकनदाम्लानकर्णिकारमनश्शिलाः ॥" इति ।

गुणानाह— **किञ्जल्केत्यादि** । किञ्जल्कवर्णं, मृदु तप्तमतप्तं चारूक्षं, स्निग्धम् अखरम्, अनादि नादरहितम्, अनुनादीति पाठे दीर्घनादं, भ्राजिष्णु भास्वरं च, सुवर्णं श्रेष्ठम् उत्तमोत्तमं भवति । रक्तपीतकं लोहितहारिद्रवर्णं मध्यमं श्रेष्ठानामेव मध्ये भवति । रक्तम् अवरम् उत्तमाधमं भवति ।

अथ शोधनप्रकारमाह—**पाण्डुश्वेतमिति** । पाण्डु हरिणवर्णं, श्वेतं सितं च, अप्राप्तकं तत्संज्ञं द्रव्यान्तरयोगेनोत्तमवर्णतामप्राप्तमिति कृत्वा । तत् तथाविधं स्वर्णं, येनाप्राप्तकं येनापद्रव्येणाशुद्धतां गतं, तच्चतुर्गुणेन सीसेन, शोधयेद् आवर्तयेद् आ सीसक्षयात् । सीसान्वयेन सीसानुवेधेन, भिद्यमानं वियुज्यमानं, शुष्कपटलैः शुष्कारण्यगोमयैः, ध्मापयेत् । रूक्षत्वाद् भिद्यमानं, तैलगोमये तैले गोमये च, निषेचयेत् पुनःपुनरावर्त्य प्रक्षिपेत् ।

आकरोद्गतस्य शोधने विशेषमाह—**आकरोद्गतमिति** । आकरोद्गतं सुवर्णं, सीसान्वयेन भिद्यमानं, पाकपत्राणि कृशपत्राणि, कृत्वा, गण्डिकासु काष्ठफलकेषु, कुट्टयेत् अर्थात् काष्ठेन । अथवा, कन्दलीवज्रकन्दकल्के कन्दली वल्लिभेदः वज्रं श्रीबेरं कन्दं पद्ममूलम् एतद्योगसिद्धे कषाये, निषेचयेत् ।

रूप्यं चतुर्विधमाह—**तुत्थोद्गतमिति** । तुत्थोद्गतं तुत्थपर्वतजं जातिकुसुमाभं, गौडिकं कामरूपजं तगरकुसुमवर्णं, काम्बुकं कम्बुपर्वतोत्पन्नं, चाक्रवालिकं चक्रवालाकरोद्भूतं तदुभयं कुन्दपुष्पाभम् इति चतुर्धा रूप्यं श्रेष्ठम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्निग्धं मृदु च श्रेष्ठम् । विपर्यये स्फोटनं च दुष्टम् । तत् सीसचतुर्भागेन शोधयेत् ।

उद्गतचूलिकमच्छं भ्राजिष्णु दधिवर्णं च शुद्धम् ।

शुद्धस्यैको हारिद्रस्य सुवर्णो वर्णकः । ततः शुल्बकाकण्युत्तरापसारिता आ चतुस्सीमान्तादिति षोडश वर्णकाः ।

सुवर्णं पूर्वं निकष्य पश्चाद् वर्णिकां निकषयेत् । समरागलेखमनि-

---

तस्य श्वैत्यं स्निग्धत्वं मार्दवमिति त्रीन् गुणानाह— **श्वेतमित्यादि** । दोषानाह— **विपर्यय इति** । विपर्यये दुष्टम् उक्तगुणवैपरीत्ये दोषाः कृष्णत्वरूक्षत्वखरत्वरूपाः, स्फोटनं च दुष्टं भिद्यमानत्वं च दोष इत्याहत्य चत्वारो दोषाः । शुद्धिमाह— तद् दुष्टं रजतं, सीसचतुर्भागेन रजतप्रमाणचतुर्भागेन सीसेन, शोधयेत् ।

शुद्धस्य लक्षणमाह — **उद्गतचूलिकमित्यादि** । उत्थितबुद्बुदं, स्वच्छं, रुचिमत्, दधिप्रभं च शुद्धम् ।

अथ शुद्धसुवर्णस्य षोडश वर्णकानाह— **शुद्धस्येति** । शुद्धस्य स्वभावशुद्धस्य यथोक्तविधिशोधितस्य वा, हारिद्रस्य हरिद्राभङ्गभासुरस्य सुवर्णस्य, सुवर्णः षोडशमाषप्रमाणः एको वर्णकः शुद्धो भवति । ततः तस्मिन् वर्णके, शुल्बकाकणी शुल्बस्य ताम्रस्य काकणी माषचतुर्भागः, प्रक्षिप्तेति शेषः, उत्तरा अधिका सुवर्णकाकणी, अपसारिता तस्माद् वर्णकाद् अपनीता च, भवति । आ कुतः इमे काकणीप्रक्षेपापसारणे इत्यत्राह— आ चतुस्सीमान्तात् आ चतुर्माषावधेः आ षोडशकाकण्यवधेरित्यर्थः । इति एकादिषोडशान्तानां शुल्बकाकणीनां वर्णके मिश्रणं स्वर्णकाकणीनां वर्णकादपनयनं चेत्यनया रीत्या, षोडश वर्णकाः, मिश्राः सम्पद्यन्त इति शेषः । त एते शुद्धवर्णकेन सह सप्तदश भवन्ति । इह चतुरित्यनेन काकणीग्रहणे वर्णकषोडशत्वासिद्ध्या तत्सिद्धये षोडशपर्यन्तकाकण्यपेक्षणात् सामर्थ्याच्चतुर्माषग्रहणं विज्ञेयम् ।

निकषच्छेदतापलक्षणां त्रिविधां वर्णकपरीक्षामाह — **सुवर्णमिति** । सुवर्णं परीक्ष्यं, पूर्वं प्रथमं, निकष्य निकषे घर्षणेन दत्तरेखं कृत्वा, पश्चाद्, वर्णिकां, तद्वर्णकपरीक्षार्थं निकषयेत् । निरुपाधिकं निकषितमाह— **समरागेत्यादि** । समरागलेखं तुल्यरागया रेखया युक्तम्, अनिम्नोन्नते देशे निकषो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

म्नोन्नते देशे निकषितम् । परिमृदितं परिलीढं नखान्तराद्वा गैरिकेणावचूर्णितमुपधिं विद्यात् । जातिहिङ्गुलकेन पुष्पकासीसेन वा गोमूत्रभावितेन दिग्धेनाग्रहस्तेन संस्पृष्टं सुवर्णं श्वेतीभवति ।

सकेसरः स्निग्धो मृदुर्भ्राजिष्णुश्च निकषरागः श्रेष्ठः ।

कालिङ्गकस्तापीपाषाणो वा मुद्गवर्णो निकषः श्रेष्ठः । समरागी विक्रयक्रयहितः । हस्तिच्छविकः सहरितः प्रतिरागी विक्रयहितः । स्थिरः परुषो विषमवर्णश्चाप्रतिरागी क्रयहितः ।

छेदश्चिक्कणः समवर्णः श्लक्ष्णो मृदुर्भ्राजिष्णुश्च श्रेष्ठः ।

पलप्रदेशे, निकषितं, न्याय्यं भवतीति शेषः । व्याजनिकषितमाह — **परिमृदितमित्यादि** । परिमृदितं गाढनिकषितं वर्णकोत्कर्षार्थं विक्रेता करोति । परिलीढम् अगाढनिकषितं वर्णापकर्षार्थं क्रेता करोति, हस्तेनोन्मृष्टलीढमिति स्वामी । नखान्तराद् गैरिकेण नखान्तरनिहितेन पीतधातुना, अवचूर्णितं प्रक्षिप्तचूर्णम् उत्कर्षार्थं विक्रेता तत्पक्ष्यो वा परीक्षकः करोति । इति त्रिविधम् उपधिं विद्यात् । उपधिमन्यमाह — **जातीत्यादि** । गोमूत्रभावितेन जातिहिङ्गुलकेन हंसपादाख्यहिङ्गुलकविशेषेण, पुष्पकासीसेन वा किञ्चित्पीतवर्णेन हरितालेन वा, दिग्धेन लिप्तेन, अग्रहस्तेन, संस्पृष्टं, सुवर्णं, श्वेतीभवति हीनवर्णं भवति । अयं क्रेतृप्रयोज्यो व्याजः ।

गुणानाह — **सकेसर इति** । सकेसरः बहुलकेसरः, स्निग्धो, मृदुः भ्राजिष्णुश्च, निकषरागः निकषरेखावर्णः, श्रेष्ठः ।

निकषगुणमाह — **कालिङ्गक इति** । कालिङ्गकः कलिङ्गदेशे महेन्द्रपर्वतादुत्पन्नः पाषाणः, तापीपाषाणो वा, तापी नाम आरट्टदेशवाहिनी नदी तद्गतः पाषाणो वा, मुद्गवर्णो निकषः श्रेष्ठः । समरागी यथास्थितवर्णग्राही, विक्रयक्रयहितः क्रेतृविक्रेत्रोरुभयोरप्यनुकूलः । हस्तिच्छविकः गजचर्मवत् खरशुष्कः, सहरितः हरितवर्णयुक्तः, प्रतिरागी अपकृष्टस्यापि सुवर्णस्य रागोत्कर्षप्रदर्शकः, विक्रयहितः विक्रेतुरनुकूलः । स्थिरः दृढः, परुषः खरः, विषमवर्णः नानावर्णश्च, अप्रतिरागी उत्कृष्टस्यापि सुवर्णस्य यथास्थितरागाप्रदर्शकः निकषः, क्रयहितः क्रेतुरनुकूलः ।

निकषमुक्त्वा छेदमाह — **छेद इति** । छेदः छिन्नः स्वर्णखण्डः । चिक्कणः स्निग्धः, समवर्णः बहिरन्तश्च तुल्यवर्णः, श्लक्ष्णः मसृणः, मृदुः भ्राजिष्णुश्च श्रेष्ठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तापे बहिरन्तश्च समः किञ्जल्कवर्णः कुरण्डकपुष्पवर्णो वा श्रेष्ठः। श्यावो नीलश्चाप्राप्तकः।

तुलाप्रतिमानं पौतवाध्यक्षे वक्ष्यामः। तेनोपदेशेन रूप्यसुवर्णं दद्यादाददीत च।

अक्षशालामनायुक्तो नोपगच्छेत्। अभिगच्छन् उच्छेद्यः। आयुक्तो वा सरूप्यस्वर्णस्तेनैव जीयेत। विचितवस्त्रहस्तगुह्याः काञ्चनपृषतत्वष्टृतपनीयकारवो ध्मायकचरकपांसुधावकाः प्रविशेयुर्निष्कसेयुश्च। सर्वं चैषामुपकरणमनिष्ठिताश्च प्रयोगास्तत्रैवावतिष्ठेरन्। गृहीतं सुवर्णं धृतं च प्रयोगं करणमध्ये दद्यात्। सायं प्रातश्च लक्षितं कर्तृकारयितृमुद्राभ्यां निदध्यात्।

अथ तापमाह—ताप इति। अग्नितापितः स्वर्णभागः, बहिरन्तश्च समः समानवर्णः, तापनात् पूर्वं पश्चाच्च किञ्जल्कवर्णः, कुरण्डकपुष्पवर्णो वा अम्लानकुसुमवर्णो वा, श्रेष्ठः। श्यावः कपिशः, नीलश्च, अप्राप्तकः तत्संज्ञः अशुद्ध इति यावत्।

अथ रूप्यसुवर्णयोरुन्मानविध्यपेक्षायामाह — तुलेत्यादि। तुलाप्रतिमानं तुलापरिच्छेदविधिं, पौतवाध्यक्षे तुलामानपौतवप्रकरणे, वक्ष्यामः। इयमनागतावेक्षणरूपा तन्त्रयुक्तिः। तेनोपदेशेन तत्प्रकरणोक्तमानविधिना, रूप्यसुवर्णं, दद्याद्, आददीत च गृह्णीयाच्च।

पालनविधिमाह — **अक्षशालामिति**। अक्षशालाम्, अनायुक्तः अनधिकृतः, नोपगच्छेत्। अभिगच्छन् वारितोऽप्यभिमुखं गच्छन्, उच्छेद्यः हृतसर्वस्वः कर्तव्यः। आयुक्तो वा नियुक्तोऽपि वा, सरूप्यस्वर्णः रूप्यस्वर्णसहितो, गच्छन्, तेनैव रूप्येण स्वर्णेन च, जीयेत दण्ड्येत। **विचितेत्यादि**। विचितवस्त्रहस्तगुह्याः वस्त्रं हस्तो गुह्यं च विचितं रूप्यस्वर्णयुक्तं न वेति परीक्षितं येषां ते तथाविधाः भूत्वा, काञ्चनपृषतत्वष्टृतपनीयकारवः काञ्चनकारवः रसवेधस्वर्णीकरणशिल्पिनः पृषतकारवो गुलिकादिसूक्ष्मशिल्पकारिणः त्वष्टृकारवः पट्टपात्रादिशिल्पिनः तपनीयकारवः नानाजातीयभूषणशिल्पिनश्च, ध्मायकचरकपांसुधावकाः भस्त्राध्मायकाः परिचारकाः धूलिशोधकाश्च, प्रविशेयुः अक्षशालां निष्कसेयुश्च ततो निर्गच्छेयुश्च। **सर्वं चेति**। एषां कारुप्रभृतीनां, सर्वम् उपकरणम्, अनिष्ठिताः प्रयोगाश्च असमाप्तानि शिल्पानि च, तत्रैव अवतिष्ठेरन् अक्षशालातो बहिर्न नीयेरन्। **गृहीतमिति**। गृहीतं भाण्डागाराद्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षेपणो गुणः क्षुद्रकमिति कर्माणि । क्षेपणः काचार्पणादीनि । गुणः सूत्रवानादीनि । घनं सुषिरं पृषतादियुक्तं क्षुद्रकमिति ।

अर्पयेत् काचकर्मणः पञ्चभागं काञ्चनं दशभागं कटुमानम् । ताम्रपादयुक्तं रूप्यं रूप्यपादयुक्तं वा सुवर्णं संस्कृतकं तस्माद् रक्षेत् ।

पृषतकाचकर्मणः त्रयो हि भागाः परिभाण्डं द्वौ वास्तुकम् । चत्वारो वा वास्तुकं त्रयः परिभाण्डम् ।

आत्मनोपात्तं सुवर्णं, प्रयोगं च यत्र सुवर्णं प्रयुक्तं तं पदार्थं च, करणमध्ये धृतं दद्यात् करणानां राजलेखकानां स्वस्वपुस्तकेष्वर्थं लिखतां साक्षिभूतानां मध्ये तुलाधृतं कृत्वा प्रत्यर्पयेत्, अर्थात् सुवर्णाध्यक्षः । सायं प्रातश्च दैनन्दिनव्यापारस्यावसाने प्रारम्भे च, कर्तृकारयितृमुद्राभ्यां लक्षितं कर्तृकारयित्रोः सौवर्णिकसुवर्णाध्यक्षयोर्मुद्राभ्यां चिह्नितं, स्थापयेत्, सुवर्णम् । करणमध्य इत्येव ।

अथ कर्म त्रिधा विभज्य व्याचष्टे—**क्षेपण** इत्यादि । क्षेपणः तदाख्यं कर्म, काचार्पणादीनि मणिसंयोजनादीनि । गुणः तत्कर्म, सूत्रवानादीनि कटिसूत्रग्रथनादीनि । क्षुद्रकं सूक्ष्मपरिकर्म, घनं कटकाङ्गुलीयकादि सुषिरं सरन्ध्रं स्थालभृङ्गारादि, पृषतादियुक्तं पृषतो गुटिका आदिपदात् पत्रभङ्गादि तद्युक्तम् । इतिशब्दः प्रकारान्तरसंग्रहार्थः ।

अर्पयेदिति । काचकर्मणः मणिसंयोजनस्य विधिरुच्यत इति वाक्यशेषः । पञ्चभागं मणेः पञ्चमं भागं तलभागं काञ्चनम् अर्पयेद् आधारसुवर्णे प्रवेशयेत् । दशभागं काञ्चनप्रवेशितस्य भागस्यार्धं, कटुमानम् अर्पयेत् मणिदार्ढ्यार्थो वास्तुकोपरिसुवर्णपट्टिकाबन्धः कटुमानमित्युच्यते । तत्र प्रवेशयेदित्यर्थः । रत्नार्पणाधारबन्धे रूप्यमये ताम्रपादयोजनेन तावद्रूप्यहरणं, सुवर्णमये रूप्यपादयोजनेन तावत्सुवर्णहरणं च पश्यतोहरैः सुकरं यतः, तस्मात् कारणाद् आधारबन्धो द्रव्यान्तरमिश्रणाद् यत्नेन रक्षणीय इत्युपदिशति—**ताम्रपादेत्यादि** । संस्कृतकं, यथोक्तमिश्रणाशुद्धमपि रूप्यं सुवर्णं वा शुद्धसदृशं प्रतिभायादित्यर्थः ।

शुद्धकाचकर्मविधिमुक्त्वा मिश्रकाचकर्मविधिमाह—**पृषतेत्यादि** । पृषतकाचकर्मणः गुटिकामिश्रकाचकर्मणि क्रियमाणे, तदर्थं सुवर्णं पञ्चधा विभज्य त्रयो भागाः, परिभाण्डं पद्मस्वस्तिकाद्याकारं पृषतमणिप्रतिवापस्थानं भवति, द्वौ वास्तुकं द्वौ भागौ आधारपीठबन्धः । इत्येकः प्रकारः । यदि मणयः स्थूलास्तदा विधिमाह—**चत्वारो वेत्यादि** ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वष्टृकर्मणः। शुल्बभाण्डं समसुवर्णेन संयूहयेत्। रूप्यभाण्डं घनं घनसुषिरं वा सुवर्णार्धेन अवलेपयेत्। चतुर्भागसुवर्णं वालुकाहिङ्गुलकस्य रसेन चूर्णेन वा वासयेत्।

तपनीयं ज्येष्ठं सुवर्णं सुरागं, समसीसातिक्रान्तं पाकपत्रपक्वं सैन्धविकयोज्ज्वालितं नीलपीतश्वेतहरितशुकपोतवर्णानां प्रकृतिर्भवति। तीक्ष्णं चास्य मयूरग्रीवाभं श्वेतभङ्गं चिमिचिमायितं पीतचूर्णितं काकणिकः सुवर्णरागः।

त्वष्टृकर्माह— त्वष्टृत्यादि। त्वष्टृकर्मणः ताम्ररजतनिर्मितघनपत्रादिकर्मणः विधिरुच्यत इति शेषः। शुल्बभाण्डं ताम्रभाण्डं, समसुवर्णेन संयूहयेत् ताम्रपलतुल्यपलेन सुवर्णेन दृढपत्रीकृतेन संयोजयेत्। रूप्यभाण्डं, घनम् अङ्गुलीयककङ्कणादि, घनसुषिरं वा स्थालीकलशभृङ्गारादिकं वा, सुवर्णार्धेन अवलेपयेत् रूप्यपलशतकृतं भाण्डं पञ्चाशता सुवर्णपलैस्तनुपत्रीकृतैरेव श्लेषयेत्। अवलेपविधिमुक्त्वा वासनाविधिमाह— **चतुर्भागसुवर्णमिति**। रूप्यभाण्डमिति वर्तते। अयमर्थः— रूप्यपलशतकृतं भाण्डं पञ्चविंशतिपलसुवर्णेन चूर्णीकृतेन वालुकाहिङ्गुलकचूर्णमिश्रेण पारतयुक्तेन तुषाग्निद्रवीकृतेन वासयेत्। एवं तावत् सुवर्णस्य समस्यार्धस्य चतुर्भागस्य च योजनेन त्रिप्रकारं त्वष्टृकर्म व्युत्पादितम्।

तपनीयकर्माह — **तपनीयमित्यादि**। तपनीयम् अलङ्कारार्थं घटनीयं कनकं, ज्येष्ठम् उत्तमं सप्तदशवर्णकं षोडशवर्णकं वा, सुवर्णं किञ्जल्काद्यन्यतमवर्णं, सुरागं स्निग्धभ्राजिष्णुरागं, नीलपीतादीनां पञ्चानां प्रकृतिः कारणं भवति। अनेवम्भूताशुद्धस्वर्णविषये आह — **समसीसेत्यादिना**। समसीसातिक्रान्तं तत्तुल्यमानसीसशोधितं, पाकपत्रपक्वं तनुपत्रात्मकं कृत्वारण्यगोमयदग्धं, सैन्धविकया सौराष्ट्रमृत्तिकया सह उज्ज्वालितम्, इत्थं शोधनेन संस्कृतं, नीलादीनां प्रकृतिर्भवति। **तीक्ष्णं चेति**। अस्य तपनीयस्य, तीक्ष्णं तदाख्यो लोहविशेषश्च, प्रकृतिर्भवतीत्यनुवर्तते, अर्थान्नीलादीनां पञ्चानाम्। कीदृशं तीक्ष्णं मयूरग्रीवाभं, श्वेतभङ्गं छेदे शुक्लं, चिमिचिमायितम् अत्यन्तभास्वरम्, ईदृशं तीक्ष्णं, पीतचूर्णितं तप्तचूर्णीकृतं स्वर्णे प्रक्षिप्तमित्यार्थम्। कियति स्वर्णे कियत् तीक्ष्णं रञ्जनार्थं प्रक्षेप्तव्यमित्यत्राह — **काकणिक इति**। सुवर्णरागः षोडशमाषप्रमाणस्य सुवर्णस्य रागो रञ्जकस्तीक्ष्णांशः, काकणिकः काकणी माषचतुर्भागस्तत्प्रमाणकः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तारमुपशुद्धं वा। अस्थितुत्थे चतुः, समसीसे चतुः, शुष्कतुत्थे चतुः, कपाले त्रिर्गोमये द्विः, एवं सप्तदशतुत्थातिक्रान्तं सैन्धविकयोज्ज्वालितम्। एतस्मात् काकण्युत्तरापसारिता। आ द्विमाषादिति सुवर्णे देयं, पश्चाद् रागयोगः। श्वेततारं भवति।

त्रयोंऽशाः तपनीयस्य द्वात्रिंशद्भागश्वेततारमूर्छितं तत् श्वेतलोहितकं भवति। ताम्रं पीतकं करोति।

स्वर्णानन्तरं रूप्यमाह — तारमित्यादि। उपशुद्धम् अत्यन्तशुद्धं, तारं रजतं, वाशब्दो विकल्पे। नीलादीनां प्रकृतिर्भवतीत्यनुवर्तते। तारस्याशुद्धस्य शोधनप्रकारमाह—अस्थितुत्थ इति। अस्थितुत्थे अस्थिचूर्णयुक्तमृत्तिकानिर्मितायां मूषायां, चतुः चतुर्वारान्, आवर्तितम्, एवं समसीसे मृत्तिकासीससमप्रमाणनिर्मिते तुत्थे चतुः, शुष्कतुत्थे 'शुष्कतुत्थः कटुशर्करामूषा' इति भट्टस्वामी, तस्यां चतुः, कपाले शुद्धमृत्तिकामूषायां त्रिः, गोमये गोमयकृतमूषायां द्विः, एवं सप्तदशतुत्थातिक्रान्तं सप्तदशमूषावर्तितं, पश्चात्, सैन्धविकया लवणयुक्तसौराष्ट्रमृत्तिकया सह, उज्ज्वालितम् उज्ज्वलनसंस्कृतं, शुद्धमित्यार्थम्। एतस्मात् काकणी उक्तरीत्या शोधिताद् रूप्यात् काकणी, सुवर्णे प्रक्षिप्ता, उत्तरा अपसारिता अधिका सुवर्णकाकणी अपनीता भवति। इति आ द्विमाषात् सुवर्णे देयम् एवं सुवर्णकाकण्यपनयनपूर्वकरूप्यकाकणीप्रक्षेपोपचयक्रमेण अष्टकाकण्यधिकः सुवर्णे रूप्यप्रक्षेपः कर्तव्यः। पश्चाद्, रागयोगः रागयोगार्थो यथोक्ततीक्ष्णकाकणीप्रक्षेपः। श्वेततारं भवति एवं करणे स्वर्णं श्वेततारसमप्रभं संपद्यते। केचित्तु श्वेततारं रागार्थं भवतीति व्याचक्षते।

रागयोगमाह — त्रयोंऽशा इत्यादि। एवं स्वामी व्याचष्टे — सामान्यसुवर्णाद् द्वात्रिंशद्धा विभक्ताद् अंशत्रयमपनीय, तपनीयस्य यथोक्तप्रकारशोधिततपनीयस्य, त्रयोंऽशाः सामान्यस्वर्णे प्रक्षिप्यन्त इति शेषः। तत् स्वर्णं, द्वात्रिंशद्भागश्वेततारमूर्छितं द्वात्रिंशद्भागिकेन श्वेतरजतेन सहावर्तितं सत्, श्वेतलोहितकं भवति श्वेतलोहितात्मकवर्णद्वयसम्भिन्नं भवति। ताम्रं कर्तृ, पीतकं पीतवर्णं करोति, अर्थात् तदेव सामान्यस्वर्णं कर्म। इहापि पूर्ववत् 'त्रयोंऽशा' इत्यादि योजनीयं, श्वेततारस्थाने च ताम्रम्। तथाच तत् स्वर्णं द्वात्रिंशद्भागिकताम्रेण सहावर्तितं सत् पीतवर्णं जायत इत्युक्तं भवति। भाषाटीका त्वन्यथा व्याचष्टे — द्वात्रिंशति भागेषु त्रयोंऽशास्तपनीयस्य, शेषास्तु रजत-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तपनीयमुज्ज्वाल्य रागत्रिभागं दद्यात् । पीतरागं भवति ।

श्वेततारभागौ द्वावेकस्तपनीयस्य मुद्गवर्णं करोति ।

कालायसस्यार्धभागाभ्यक्तं कृष्णं भवति । प्रतिलेपिना रसेन द्विगुणाभ्यक्तं तपनीयं शुकपत्रवर्णं भवति । तस्यारम्भे रागविशेषेषु प्रतिवर्णिकां गृह्णीयात् ।

तीक्ष्णताम्रसंस्कारं च बुध्येत । तस्माद् वज्रमणिमुक्ताप्रवालरूपाणामपनेयिमानं च रूप्यसुवर्णभाण्डबन्धप्रमाणानि चेति ।

स्येत्येवं मिश्रयित्वावर्तने कृते तच्छ्वेतलोहितवर्णं भवति । एवं द्वात्रिंशद्भागात्मके ताम्रे शुद्धसुवर्णस्य त्रीन् भागान् योजयित्वावर्तने कृते तत् पीतरागं भवतीति ।

तपनीयमुज्ज्वाल्येति । तपनीयं सामान्यस्वर्णं, सैन्धविकयोज्ज्वाल्य, रागत्रिभागं शोधितस्वर्णत्रिभागं, दद्यात् । पीतरागं भवति तथाकरणे तत् सामान्यस्वर्णं पीतरागं पीतरक्तं भवति । अपरा व्याख्या—तपनीयं शोधितसुवर्णं सैन्धविकयोज्ज्वाल्य तत्र रागत्रिभागं ताम्रत्रिभागं दद्यात् । तत् पीतरागं भवतीति ।

द्विगुणशुद्धरूप्ययुक्तं शुद्धसुवर्णमावर्तितं मुद्गवर्णं भवतीत्याह—**श्वेततारभागावित्यादि** । पश्चाद्रागयोग इति सर्वशेषो द्रष्टव्यः ।

कालायसस्येति । कालायसस्य तीक्ष्णस्य, अर्धभागाभ्यक्तम् अर्धभागेन रागार्थस्य तीक्ष्णस्य प्रमाणं तृतीयांश उक्तः तदर्धभागेन अर्थात् षड्भागेन अभ्यक्तमनुलिप्तं न त्वावर्तितं, तपनीयं, कृष्णम् अञ्जनवर्णं, भवति । प्रतिलेपिना द्रवीकृतेन कालायसेन, रसेन पारतयुक्तेन, द्विगुणाभ्यक्तं द्विगुणमनुलिप्तं, तपनीयं, शुकपत्रवर्णं भवति । **तस्येति** । तस्य नीलादेरुक्तस्य, आरम्भे, रागविशेषेषु शुद्धाशुद्धस्वर्णरजतरूपेषु रञ्जकभेदेषु विषये, प्रतिवर्णिकां तारतम्यपरिच्छेदार्थं, गृह्णीयात् ।

रञ्जनार्थतीक्ष्णताम्रयोः शुद्धिपरिज्ञानापेक्षायामाह—**तीक्ष्णेत्यादि** । तीक्ष्णताम्रयोः संस्कारं शोधनं, बुध्येत धातुशोधनशास्त्राज्जानीयात् । तस्मात् सुवर्णरजतादिशुद्धिप्रकारज्ञानस्य यो हेतुः कारुहरणशङ्कारूपस्तेनैव हेतुनेत्यर्थः, वज्रमणिमुक्ताप्रवालरूपाणाम्, अपनेयिमानं च असारहीरमाणिक्यादिप्रक्षेपेण सारहीरमाणिक्यादिपरिवर्तनादिकं हरणप्रकारं च, रूप्यसुवर्णभाण्डबन्धप्रमा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समरागं समद्वन्द्वमसक्तपृषतं स्थिरम् ।
सुप्रमृष्टमसंपीतं विभक्तं धारणे सुखम् ॥
अभिनीतं प्रभायुक्तं संस्थानमधुरं समम् ।
मनोनेत्राभिरामं च तपनीयगुणाः स्मृताः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोदशोऽध्यायः अक्षशालायां सुवर्णाध्यक्षः,
आदितश्चतुस्त्रिंशः ॥

णानि च रूप्यसुवर्णाभरणादीनां संव्यूहनादीनि च 'शुल्बभाण्डं समसुवर्णेन संयूहयेत्' इत्यादिनोक्तानि, बुध्येतेति सम्बध्यते । इतिशब्दः प्रकारे ।

अध्यायान्ते श्लोकद्वयं तपनीयगुणचतुर्दशकप्रतिपादकमाह — **समरागमित्यादि** । समरागं समवर्णिकं, समद्वन्द्वं तोलनतो वर्णतश्च स्वसमानद्वितीयम्, असक्तपृषतम् असंसक्तगुटिकं, स्थिरम् अविसंवादि, सुप्रमृष्टं पूर्वोक्तविधिना सैन्धविकया सम्यगुज्ज्वालितम्, अप्रमृष्टमिति पाठे अकृत्रिमच्छायम्, असम्पीतं छायोत्कर्षार्थं पायितं न भवति, विभक्तं सुविभक्तावयवं, धारणे सुखम् आमुञ्चताम् अदुःखकरम्, अभिनीतम् अनुद्धर्णं, प्रभायुक्तं द्युतिमत्, संस्थानमधुरम् आकृतिरमणीयं, समम् अनिम्नोन्नतप्रदेशं, मनोनेत्राभिरामं मनोहरं दृष्टिसुखं च, तपनीयगुणाः स्वर्णाभरणगुणाः ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोदशोऽध्यायः अक्षशालायां सुवर्णाध्यक्षः,
आदितः चतुस्त्रिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३२. प्रक. विशिखायां सौवर्णिकप्रचारः ।

सौवर्णिकः पौरजानपदानां रूप्यसुवर्णमावेशनिभिः कारयेत् । निर्दिष्टकालकार्यं च कर्म कुर्युः, अनिर्दिष्टकालं कार्यापदेशम् ।

कालातिपातने पादहीनं वेतनं तद्द्विगुणश्च दण्डः । कार्यस्यान्यथाकरणे वेतननाशः तद्द्विगुणश्च दण्डः ।

यथावर्णप्रमाणं निक्षेपं गृह्णीयुस्तथाविधमेवार्पयेयुः, कालान्तरादपि च तथाविधमेव प्रतिगृह्णीयुरन्यत्र क्षीणपरिशीर्णाभ्याम् ।

विशिखायां सौवर्णिकप्रचार इति सूत्रम् । विशिखायां विशिखेह सौवर्णिकविपणिः तस्यां, सौवार्णिकप्रचारः सौवर्णिकस्य सुवर्णे नियुक्तस्य प्रचारो व्यापारः, सोऽभिधीयत इत्यर्थः । पूर्वाध्याये शिल्पवत्त्वाभिजात्यप्रात्ययिकत्वादिगुणयुक्तं विशिखायां सौवर्णिकं कुर्यादित्युक्तम् । तस्य व्यापारस्तु नोक्तः । स इहोच्यत इति सम्बन्धः ।

सौवर्णिक इति । सौवर्णिकः, पौरजानपदानां पुरवासिनां बहिर्विषयवासिनां च, रूप्यसुवर्णं रूप्याशिल्पं सुवर्णाशिल्पं च, आवेशनिभिः शिल्पिशालीयैः सुवर्णकारादिभिः, कारयेत् । निर्दिष्टकालकार्यं च कर्म कुर्युः इयता कालेनेदृशं कटकाङ्गदादि निर्मायार्पणीयम् एतावच्च वेतनमिति परिभाषणपूर्वं शिल्पं कुर्युः, अर्थादावेशनिनः । कार्यापदेशम् अनिर्दिष्टकालमिति निर्मातव्यवस्तुगौरवनिमित्तं तु अपरिभाषितकालमपि कर्म कुर्युः ।

कालातिपातन इति । परिभाषितकालातिक्रमे, पादहीनं परिभाषितचतुर्भागहीनं, वेतनं भवति, तद्द्विगुणः गृह्यमाणवेतनद्विगुणः दण्डश्च भवति । कार्यस्यान्यथाकरणे कटकं परिभाष्य केयूरादिकरणे, वेतननाशः, तद्द्विगुणः नष्टवेतनद्विगुणः, दण्डश्च भवति । कण्टकशोधने कारुकरक्षणे कारूणां सर्वेषां दण्ड उक्तः, सुवर्णकारूणां त्विह दण्डकथन विशेषज्ञापनार्थं — कार्वन्तरदण्डवत् सुवर्णकारुदण्डं प्रशास्तारः केवला न कुर्युः किन्तु सौवर्णिकसहिता एव कुर्युरिति ।

यथावर्णेत्यादि । निक्षेपं घटनीयरूप्यसुवर्णादि, यथावर्णप्रमाणं यद्वर्णिकं यत्प्रमाणं च, गृह्णीयुः, तथाविधमेव तत्प्रकारमेव न तु लेशतोऽपि वर्णप्रमाणयोर्हीनम्, अर्पयेयुः कारवः । कालान्तरादपि चेति ग्रहीतुः कारुकस्य दीर्घप्रवासादिना मरणादिना वा निमित्तेन तत्पुत्रादिहस्तादपि च, तथाविधमेव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आवेशनिभिः सुवर्णपुद्गललक्षणप्रयोगेषु तत्तज्जानीयात् ।

तप्तकलधौतकयोः काकणिकः सुवर्णे क्षयो देयः । तीक्ष्णकाकणी रूप्यद्विगुणा रागप्रक्षेपस्तस्य षड्भागः क्षयः ।

वर्णहीने माषावरे पूर्वः साहसदण्डः, प्रमाणहीने मध्यमः, तुलाप्रतिमानोपधावुत्तमः, कृतभाण्डोपधौ च ।

प्रतिगृह्णीयुः स्वार्पितवर्णप्रमाणकमेव निक्षेपं प्रतिगृह्णीयुः, न तु तदभ्यधिकवर्णप्रमाणकं कालातिपातदोषापदेशेन प्रार्थयेयुः, न वा पुत्रादीनां वेतनहानिर्दण्डो वेत्यभिप्रायः । अपरा व्याख्या — कालान्तरादपि देशविभ्रमादिनिमित्ते कालातिपाते जातेऽपि, तथाविधमेव यथानिक्षिप्तमघटितमेव, अर्पयेयुः कारवः, निक्षेपकाश्च प्रतिगृह्णीयुरिति । तत्रापवादमाह —क्षीणपरिशीर्णाभ्यामन्यत्र उपभोगघृष्टं प्रच्युतावयवं च निक्षेपमपहाय । क्षीणपरिशीर्णयोस्तु दण्डो दाप्य एव ।

आवेशनिभिरिति । सुवर्णपुद्गललक्षणप्रयोगेषु सुवर्णं किञ्जल्कवर्णादिः पुद्गलम् आभरणभृङ्गारादि लक्षणं मुद्रा एतेषां स्वर्णादिसम्बन्धिनां प्रयोगेषु व्यवहारेषु हरणोपायानुष्ठानेषु वा, तत्तत् छलमच्छलं च ज्ञेयं सर्वं वस्तुतत्त्वम्, आवेशनिभिर्जानीयात् शिल्पिद्वारेण विद्यात्, सौवर्णिकः ।

'अन्यत्र क्षीणपरिशीर्णाभ्यामि'त्युक्तस्य प्रतिप्रसवमाह — तप्तेत्यादि । तप्तकलधौतकयोः अशुद्धस्वर्णरजतयोर्विषये, सुवर्णे काकणिकः षोडशमाषके माषचतुर्भागप्रमाणः, क्षयो देयः निक्षेपं घटितं तावन्मात्रन्यूनमेव निक्षेपकः प्रतिगृह्णीयात् । तीक्ष्णकाकणी कालायसकाकणी, रूप्याद्विगुणा रजतकाकणीद्वययुक्ता, रागप्रक्षेपः रागार्थं षोडशमाषकस्वर्णे प्रक्षेप्तव्येत्यर्थः । तस्य षड्भागः प्रक्षिप्तकाकणीत्रयस्य षड्भागः अर्थादर्धकाकणिकः, क्षयः देयो भवति ।

अथ दण्डमाह —वर्णेत्यादि । माषावरे वर्णहीने माषप्रमाणे सुवर्णे उत्कृष्टवर्णहानिं नीते सति, पूर्वः साहसदण्डः । माषावरे प्रमाणहीने प्रतिमानहानिं नीते सति, मध्यमः साहसदण्डः । तुलाप्रतिमानोपधौ न केवलं माषमात्रप्रतिमानहानिः, किन्तु हापितप्रतिमानस्य पूरणकैतवमपि यत्र प्रयुज्यते तादृशे विषय इत्यर्थः, उत्तमः साहसदण्डः । कृतभाण्डोपधौ च माषावरविषये घटितरूपपरिवर्तनादिकैतवे च, उत्तमः साहसदण्डः । अनया दिशा द्विमाषत्रिमाषादिविषयहान्यादौ तत्तद्दण्डद्वैगुण्यत्रैगुण्यादिकमूह्यम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सौवर्णिकेनादृष्टमन्यत्र वा प्रयोगं कारयतो द्वादशपणो दण्डः, कर्तुर्द्विगुणः, सापसारश्चेत्। अनपसारः कण्टकशोधनाय नीयेत। कर्तुश्च द्विशतो दण्डः पणच्छेदनं वा।

तुलाप्रतिमानभाण्डं पौतवहस्तात् क्रीणीयुः। अन्यथा द्वादशपणो दण्डः।

घनं घनसुषिरं संयूह्यमवलेप्यं सङ्घात्यं वासितकं च कारुकर्म।

तुलाविषममपसारणं विस्रावणं पेटकः पिङ्कश्चेति हरणोपायाः।

सन्नामिन्युत्कीर्णिका भिन्नमस्तकोपकण्ठी कुशिक्या सकटुकक्ष्या।

सौवर्णिकेनाननुमतं विशिखायाम्, अनुमतमपि वा विशिखातोऽन्यत्रालङ्कारादिनिर्माणं कारयतः कर्तुश्च दण्डमाह — **सौवर्णिकेनेत्यादि**। सापसारश्चेदिति कारयिता यदि सापसारस्तदायं दण्ड इत्यर्थः। अपसारोऽपसरणं तच्च स्वर्णादेः स्वामिशुद्धागमप्रतिपादनेन चोरशङ्काकलङ्कादात्मव्यावृत्तिः, तद्वान् सापसारः। अनपसारविषये त्वाह — **अनपसार इति**। अनपसारश्चेत् कारयिता, कण्टकशोधनाय वाक्यकर्मानुयोगादिना शुद्धाशुद्धत्वनिर्णयाय, नीयेत प्रदेष्टृसन्निधिम्। कर्तुश्च स्वर्णकारादेरनपसारस्य, द्विशतो दण्डो भवति। तस्य द्विशतपणदण्डदानासामर्थ्ये त्वाह— **पणच्छेदनं वेति**। पणच्छेदनं पणनसाधनपञ्चाङ्गुलिच्छेदनम्।

तुलाप्रतिमानेत्यादि। तुलाप्रतिमानभाण्डं तुलाप्रतिमानसाधनं माषद्विमाषादिकम्, उपलक्षणात् प्रस्थद्रोणादिकं मानसाधनं च, पौतवहस्तात् वक्ष्यमाणपौतवाध्यक्षसकाशात्, क्रीणीयुः क्रीत्वा तेन व्यवहरेयुः सुवर्णकारादयः। तुलामानभाण्डमिति पाठे तुलाभाण्डं माषद्विमाषादिकं मानभाण्डं प्रस्थद्रोणादिकं चेति व्याख्येयम्। अन्यथा स्वयं निर्माणेऽन्यतः क्रयणे वा, द्वादशपणो दण्डः।

अथ हरणोपायद्वारभूतं कारोः कर्म षट्प्रकारमाह — **घनमित्यादि**। घनम् अङ्गुलीयकादि, घनसुषिरं भृङ्गारादि, संयूह्यं स्थूलपत्रयोजनम्, अवलेप्यं लघुपत्रयोजनं, सङ्घात्यं कटिसूत्रादि, वासितकं रसादिना वासितम्।

तेषु कर्मसु प्रयोज्यान् पञ्च हरणोपायान् नामत उद्दिशति — **तुलेत्यादि**।

तत्र तुलाविषममाह— **सन्नामिनीत्यादि**। सन्नामिनी मृदुलोहनिर्मिता यथाकामसंनाम्या, उत्कीर्णिका तीक्ष्णचूर्णेन पारतेन वा पूरिताभ्यन्तरसुषिरा,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पारिवेल्ल्ययस्कान्ता च दुष्टतुलाः।

रूप्यस्य द्वौ भागावेकः शुल्बस्य त्रिपुटकम्। तेनाकरोद्गतमपसार्यते तत् त्रिपुटकापसारितं, शुल्बेन शुल्बापसारितं, वेल्लकेन वेल्लकापसारितं, शुल्बार्धसारेण हेम्ना हेमापसारितम्।

मूकमूषा पूतिकिट्टः करटकमुखं नाली सन्दंशो जोङ्गनी सुवर्चिका लवणं तदेव सुवर्णमित्यपसारणमार्गाः। पूर्वप्रणिहिता वा पिण्डवालुका मूषाभेदादग्निष्ठा उद्ध्रियन्ते।

भिन्नमस्तका सरन्ध्राग्रा सा हि वाताभिमुखं धृता वातेन नामिता भवतीति, उपकण्ठी ग्रन्थिबहुला, कुशिक्या शिक्यं तोल्यवस्तुनिवेशाधारः तत् कुत्सितं यस्याः सा, सकटुकक्ष्या अप्रवणसूत्रा, पारिवेल्ली परिवेल्लः परिचलनं तद्वती, अयस्कान्ता अयस्कान्ताख्यलोहनिर्मिता, सा हि यतः स्वर्णं ततो याति। चः समुच्चये। अष्टावेता दुष्टतुलाः। इत्थं सम्भाविताष्टविधदुष्टतुलं तुलाविषमम्।

अथापसारणमुच्यते। तत्र यदसारद्रव्यं प्रक्षिप्य सारद्रव्यमपसार्यतेऽपह्रियते तदपद्रव्यं चतुर्विधमादावाह—**रूप्यस्येति**। द्वौ रूप्यस्य भागौ एकः शुल्बस्य भाग इति भागत्रयमिदं मेलयित्वावर्तितं, त्रिपुटकं तत्संज्ञम्। तेन त्रिपुटकेन प्रक्षिप्तेन, आकरोद्गतं शुद्धम्, अपसार्यते आकर एवाशुद्धमिदमुत्पन्नमिति व्यपदिश्यापह्रियते, तत् तथाविधमपसारणसाधनं, त्रिपुटकापसारितं तदाख्यमपद्रव्यमेकम्। शुल्बेन ताम्रप्रक्षेपेण अपसार्यते तथापह्रियते, तत् शुल्बापसारितं तदाख्यम् अपसारणसाधनं द्वितीयम्। वेल्लकेन तीक्ष्णलोहं रूप्यं च समभागमावर्तितं वेल्लकमिति प्रसिद्धं तेन साधनेन प्रक्षिप्तेन, अपसार्यते, तद् वेल्लकापसारितं तृतीयम्। शुल्बार्धसारेण ताम्रसमभागयोगावर्तितेन, हेम्ना साधनेन, अपसार्यते तथापह्रियते, तत् तथाविधं साधनं, हेमापसारितं तत्संज्ञं चतुर्थम्।

अथापद्रव्यप्रक्षेपेण सारद्रव्यापहरणस्य मार्गानाह—**मूकमूषेत्यादि**। मूकमूषा ससम्पुटार्धमूषा, पूतिकिट्टो लोहमलं, करटकमुखं काकमुखं कर्तरीमुखं वा, नाली प्रसिद्धा, सन्दंशः कङ्कमुखं, जोङ्गनी लोहकटिका, सुवर्चिका क्षारविशेषः, लवणं प्रसिद्धम्। तदेव सुवर्णमिति तादृशं हीनवर्णकमेवाकरोद्गतं सुवर्णमिति मिथ्यावादः, अपसारणमार्गाः त एते सुवर्णापहरणोपायाः। अय-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पश्चाद्बन्धने आचितकपत्रपरीक्षायां वा रूप्यरूपेण परिवर्तनं विस्रावणम्, पिण्डवालुकानां लोहपिण्डवालुकाभिर्वा ।

गाढश्चाभ्युद्धार्यश्च पेटकः संयूह्यावलेप्यसङ्घात्येषु क्रियते । सीसरूपं सुवर्णपत्रेणावलिप्तमभ्यन्तरमष्टकेन बद्धं गाढपेटकः । स एव पटलसम्पुटेष्वभ्युद्धार्यः । पत्रमाश्लिष्टं यमकपत्रं वात्रलेप्येषु क्रियते ।

मर्थः — आकरोद्गते मूकमूषायामावर्त्यमाने शुद्धसुवर्णे लोहमलहरणव्याजेन सुवर्चिकालवणक्षेपव्याजेन च त्रिपुटकादिकमपद्रव्यं प्रक्षिप्य करटमुखादिना साधनेन शुद्धसुवर्णमपहरन्ति सुवर्णकाराः कृतकच्छायमीदृशमेव सुवर्णमाकरादुद्गतमिति वदन्त इति । हरणोपायविकल्पमाह — **पूर्वप्रणिहिता वेति** । पूर्वप्रणिहिताः पूर्वमेवाग्नौ प्रक्षिप्ताः, पिण्डवालुका वा अपसारणमार्गा इति सम्बध्यते । द्रव्यधात्वनुगमपरिगृहीततच्छायाः सूक्ष्मवालुकाः द्रवीभूतेन रूप्येण सुवर्णेन वा सम्पर्कात् पिण्डतां प्रतिपन्नाः पिण्डवालुकाः । उपायीभावप्रकारमाह — **मूषाभेदादग्निष्ठा उद्ध्रियन्त इति** । पूर्वमेवाग्निप्रक्षिप्तपिण्डवालुकाप्रमाणं सारद्रव्यमपहृत्य मूषा भिन्नेत्यपदेशेन तत्सम्पृक्तास्ता एव पिण्डवालुकास्तत्स्वामिसमक्षमग्नेरुद्ध्रियन्त इत्यर्थः ।

विस्रावणमाह — **पश्चादित्यादि** । पश्चाद्बन्धने पूर्वं निर्मितस्य उत्तरकालसन्धानप्रसङ्गे, आचितकपत्रपरीक्षायां वा प्रचुरघटितपत्रपरीक्षाप्रसक्तौ वा, रूप्यरूपेण परिवर्तनं रजतभाण्डप्रक्षेपेण सुवर्णमयस्य विनिमानं, विस्रावणम् । इत्येको विस्रावणप्रकारः । अपरमाह—**पिण्डेत्यादि** । पिण्डवालुकानां सुवर्णाकरसम्भूतानां, लोहपिण्डवालुकाभिः लोहाकरसम्भूताभिर्वालुकाभिः परिवर्तनं वा विस्रावणम् ।

पेटकमाह — **गाढश्चेति** । पेटकः संश्लेषः, पिटधातोः संश्लेषणार्थत्वात्, स गाढश्च अभ्युद्धार्यश्चेति द्विविधः, संयूह्यावलेप्यसङ्घात्येषु संयूह्यादिषु त्रिषु पूर्वोक्तेषु कर्मसु विषये, क्रियते अनुष्ठीयते । सीसरूपं सीसपत्रं, सुवर्णपत्रेण, अवलिप्तम् आच्छादितम्, अभ्यन्तरम् आच्छादिताच्छादकयोरन्तरालम्, अष्टकेन बद्धं जतुसर्जरसादिना पटलसम्पुटेषु दृढसंश्लेषणार्थं बद्धं, यदि भवतीति शेषः । गाढपेटकः अर्थात् स एष बन्धो गाढपेटकाख्यः । **स एवेति** । स एव पेटकः, पटलसम्पुटेषु अभ्युद्धार्यः अष्टकबन्धरहितत्वादभ्युद्धर्तुं शक्य इति सोऽभ्युद्धार्यपेटकः । स एष द्रव्यापद्रव्ययोः समप्रविभागिके संयूहने

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शुल्बं तारं वा गर्भः पत्राणाम् । सङ्घात्येषु क्रियते शुल्बरूपं सुवर्णपत्रसंहतं प्रमृष्टं सुपार्श्वम् । तदेव यमकपत्रसंहतं प्रमृष्टम् । ताम्रताररूपं चोत्तरवर्णकः ।

तदुभयं तापनिकषाभ्यां निश्शब्दोल्लेखनाभ्यां वा विद्यात् । अभ्युद्धार्यं बदराम्ले लवणोदके वा सादयन्ति । इति पेटकः ।

घनसुषिरे वा रूपे सुवर्णमृन्मालुकाहिङ्गुलुककल्को वा तप्तोऽवतिष्ठते । दृढवास्तुके वा रूपे वालुकामिश्रजतुगान्धारपङ्को वा तप्तोऽव-

---

हरणप्रकारः । अथ सारार्धभागेषु लेप्येषु हरणप्रकारमाह — **पत्रामात** । पत्रं सुवर्णपत्रम्, आश्लिष्टम् एकपार्श्वयोजितं, यमकपत्रं वा उभयपार्श्वयोजितं वा अवलेप्येषु, क्रियते । बहिःपत्रमुक्त्वा गर्भपत्रमाह—शुल्बं तारं वा, पत्राणां सुवर्णपत्राणां, गर्भः क्रियते । सङ्घात्यविषयं विधिमाह— **सङ्घात्येष्विति** । सङ्घात्येषु विषये, शुल्बरूपं ताम्रभाण्डं, सुवर्णपत्रसंहतम् एकपार्श्वे सुवर्णपत्रच्छादितं, प्रमृष्टं प्रकर्षेणोज्ज्वलितं, सुपार्श्वं शोभनैकपार्श्वं, क्रियते । तदेव शुल्बरूपं, यमकपत्रसंहतम् उभयपार्श्वयोः सुवर्णपत्रावच्छादितं, प्रमृष्टं, क्रियते । पूर्वस्य सुपार्श्वमिति संज्ञा समनन्तरस्य प्रमृष्टमिति संज्ञेत्येके । **ताम्रताररूपं च उत्तरवर्णक** इति । न केवलं सुवर्णपत्रं यथोक्तमवच्छादनार्थमुपयुज्यते, किन्तु ताम्रभाण्डरजतभाण्डे अपीत्यर्थः । ताभ्यां पुनरौचित्यात् कृष्णायसादिभाण्डमवच्छाद्यं भवतीत्यवगन्तव्यम् ।

पेटकस्य परीक्षामाह — **तदुभयमिति** । तदुभयं गाढपेटकम् अभ्युद्धार्यपेटकं च, तापनिकषाभ्याम् अग्नितापननिकषघर्षणाभ्यां, निश्शब्दोल्लेखनाभ्यां वा निश्शब्दं शब्दहीनं छेदनम् उल्लेखनं तीक्ष्णमुखलेखनं ताभ्यां वा, विद्यात् । अभ्युद्धार्ये विशेषमाह —अभ्युद्धार्यं, बदराम्ले कर्कन्धूफलरसे, लवणोदके वा, सादयन्ति निवेशयन्ति । तथा करणे लोहितवर्णः सञ्जायत इति भाषाटीका । इति पेटकः व्याख्यात इति शेषः ।

पञ्चविधं पिङ्कं तत्परीक्षणं चाह —घनेत्यादि । घनसुषिरे रूपे घने सुषिरवति च भाण्डे कटकादलङ्कारे, सुवर्णमृन्मालुकाहिङ्गुलुककल्को वा सुवर्णमृत् सुवर्णमालुका च धातुविशेषौ हिङ्गुलुको जातिहिङ्गुलकः एतेषां मिलितानां कल्कः, तप्तः तापयित्वा प्रक्षिप्तः, अवतिष्ठते अवस्थितो भवति । अतस्तद्योजनेन तावत् स्वर्णमपह्रियत इत्यर्थः । अन्यदपद्रव्यमाह — **दृढवास्तुके रूपे वा दृढ-**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तिष्ठते । तयोस्तापनमवध्वंसनं वा शुद्धिः । सपरिभाण्डे वा रूपे लवणमुल्कया कटुशर्करया तप्तमवतिष्ठते । तस्य क्राथनं शुद्धिः । अभ्रपटलमष्टकेन द्विगुणवास्तुके वा रूपे बध्यते । तस्यापिहितकाचकस्योदके निमज्जत एकदेशः सीदति । पटलान्तरेषु वा सूच्या भिद्यते । मणयो रूप्यं सुवर्णं वा घनसुषिराणां पिङ्कः । तस्य तापनमवध्वंसनं वा शुद्धिः । इति पिङ्कः ।

तस्माद् वज्रमणिमुक्ताप्रवालरूपाणां जातिरूपवर्णप्रमाणपुद्गललक्षणान्युपलभेत ।

पीठबन्धे अलङ्कारे वा, वालुकामिश्रः पिण्डवालुकायुक्तः जतुगान्धारपङ्कः लाक्षासिन्दूरपङ्कः, तप्तोऽवतिष्ठते । तत्र शुद्धिमाह — तयोः घनसुषिर-दृढवास्तुकयोर्विषये, तापनं दाहः, अवध्वंसनं वा ताडनं वा, शुद्धिः शोधनोपायः । सपरिभाण्डे रूपे पृषतमणिबन्धे, लवणम्, उल्कया ज्वालया, कटुशर्करया तप्तं मृदुपाषाणविशेषेण सह तप्तम्, अवतिष्ठते । तस्य, क्राथनम् अर्थाद् बदराम्लोदके, शुद्धिः शुद्धिहेतुः । पिङ्कस्य प्रकारान्तरमाह— अभ्रेत्यादि । अभ्रपटलं काचमणिः, अष्टकेन द्विगुणवास्तुके लाक्षादिना द्विगुणावगाढबन्धे, रूपे, बध्यते सम्बध्यते अवतिष्ठत इत्यर्थः । तत्परीक्षामाह — तस्येति । तस्य प्रत्युप्तमणेरन्तरवच्छादितकाचस्य सुवर्णाभरणस्य, उदके निमज्जतः परीक्षार्थं बदराम्लोदके प्रक्षिप्तस्य, एकदेशः सीदति अभ्रपटलरहितोऽवयवो गुरुत्वादधो गच्छति । अर्थादेकदेशान्तरमभ्रपटलयुक्तं लघुत्वादधो न गच्छति । अभ्रपटलातिरिक्तताभ्रपटलादिविषये तु सूच्या भेदनमेव शुद्धिज्ञानोपाय इत्याह — पटलान्तरेष्विति । पुनः पिङ्कस्य घनसुषिराभरणविषये त्रीन् प्रकारानाह— मणय इति । घनसुषिराणां घनसुषिराभरणविषये, मणयः पिङ्कः काचमणयो जात्यमणिहरणोपायः, रूप्यं पिङ्कः रजतं सुवर्णहरणोपायः, सुवर्णं पिङ्कः अशुद्धं स्वर्णं शुद्धस्वर्णहरणोपायः । तत्र शोधनप्रकारमाह—तस्येत्यादि । इति पिङ्कः व्याख्यात इति शेषः ।

तस्मादिति । उच्चावचहरणोपायसम्भवात्, वज्रमणिमुक्ताप्रवालरूपाणां वज्रादिरूपाणां चतुर्णां, जातिरूपवर्णप्रमाणपुद्गललक्षणानि जातिरुत्पत्तिः रूपमाकारः वर्णो रागः प्रमाणं माषकादिपरिमाणं पुद्गलमाभरणं लक्षणं लक्ष्म, एतानि, उपलभेत विद्यात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृतभाण्डपरीक्षायां पुराणभाण्डप्रतिसंस्कारे वा चत्वारो हरणोपायाः—परिकुट्टनमवच्छेदनमुल्लेखनं परिमर्दनं वा। पेटकापदेशेन पृषतं गुणं पिटकां वा यत् परिशातयन्ति तत् परिकुट्टनम्। यद् द्विगुणवास्तुकानां वा रूपे सीसरूपं प्रक्षिप्य अभ्यन्तरमवच्छिन्दन्ति तदवच्छेदनम्। यद् घनानां तीक्ष्णेनोल्लिखन्ति तदुल्लेखनम् । हरितालमनःशिलाहिङ्गुलकचूर्णानामन्यतमेन कुरुविन्दचूर्णेन वा वस्त्रं संयूह्य यत् परिमृद्नन्ति तत् परिमर्दनम् । तेन सौवर्णराजतानि भाण्डानि क्षीयन्ते । न चैषां किञ्चिदवरुग्णं भवति ।

भग्नखण्डघृष्टानां संयूह्यानां सदृशेनानुमानं कुर्यात् । अव-

इदानीं कृतभाण्डपरीक्षणविषयं परिकुट्टनादिकं हरणोपायचतुष्टयमाह—कृतेत्यादि । पुराणभाण्डप्रतिसंस्कारे वा जीर्णभाण्डनवीकरणे वा । परिकुट्टनादिकं लक्षयति—पेटकेत्यादि । पेटकापदेशेन पूर्वोक्तपेटकपरीक्षणव्याजेन, पृषतं क्षुद्रगुटिकां, गुणं कटकाद्यंशमल्पं, पिटकां वा बृहदंशं वा, यत् परिशातयन्ति पातयन्ति, तत् परिकुट्टनं तदाख्यम् । द्विगुणवास्तुकानां बहुपत्रपुटघटितानां, रूपे भाण्डे, सीसरूपं सीसपत्रं सुवर्णानुलिप्तं, प्रक्षिप्य अभ्यन्तरं सुवर्णपत्रं, यदवच्छिन्दन्ति अवच्छिद्यापहरन्ति, तदवच्छेदनं नाम। घनानां घननिर्मितानां, रूप इति वर्तते, तीक्ष्णेन निशितशस्त्रेण, यदुल्लिखन्ति, तद् उल्लेखनम् । हरितालमनःशिलाहिङ्गुलकानाम् अन्यतमचूर्णेन वा, कुरुविन्दाख्यपाषाणविशेषचूर्णेन च, वस्त्रं, संयूह्य मिश्रयित्वा, यत् परिमृद्नन्ति यत् परिघर्षयन्ति, तत् परिमर्दनं तदाख्यम्। तेन परिमर्दनेन, सौवर्णराजतानि भाण्डानि, क्षीयन्ते प्रमाणहानिं प्राप्नुवन्ति। एषां भाण्डानाम्, अवरुग्णं भङ्गः, किञ्चिद् न च भवति मनागपि न भवति च । सोऽयं विनैव भाण्डभङ्गमपहरणोपायः ।

परिकुट्टनादिकृतं वर्णकणिकादिपातनम् एतावदिति कथं निर्णेतव्यं तत्राह—भग्नेत्यादि । संयूह्यानां दृढपत्रघटितभाण्डानां, भग्नखण्डघृष्टानां भग्नं परिकुट्टनशातितं खण्डमवच्छेदनहृतं घृष्टमुल्लेखनपरिमर्दनकर्मोपहृतम् एषां भग्नादीनां, सदृशेनानुमानं कुर्यात् सजातीयावयवप्रमाणेन लिङ्गेनानुमितिं कुर्यात्, भग्नस्यावयवस्याभग्नावयवप्रमाणेन खण्डस्याखण्डावयवप्रमाणेन घृष्टस्याघृष्टावयवप्रमाणेन चेयत्तां निश्चिनुयादित्यर्थः । अवलेप्यानामिति । अव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लेप्यानां यावदुत्पाटितं तावदुत्पाट्यानुमानं कुर्यात् । विरूपाणां वा । तापनमुदकपेषणं च बहुशः कुर्यात् ।

अवक्षेपः प्रतिमानमग्निर्गण्डिका भण्डिकाधिकरणी पिञ्छः सूत्रं चेल्लम् बोल्लनं शिर उत्सङ्गो मक्षिका स्वकायेक्षा दृतिरुदकशरावमग्निष्ठमिति काचं विद्यात् ।

राजतानां विस्रं मलग्राहि परुषं प्रस्तीतं विवर्णं वा दुष्टमिति विद्यात् ।

लेप्यानां तनुपत्रघटितभाण्डानां, यावदुत्पाटितं तावदुत्पाट्यानुमानं कुर्यात् यावानंशोऽवच्छिद्य गृहीतस्तावन्तमपरमंशमवच्छिद्य तत्प्रतिमानेनापहृतांशमानं निश्चिनुयात् । विरूपाणामिति । विरूपाणां वा प्रचुरापद्रव्यमिश्रणेन हीनवर्णकतामापादितानां सुवर्णभाण्डानां च, सदृशेनानुमानं कुर्यादित्यनुवर्तते, प्रतिमिततदीयैकांशस्य शुद्धीकरणेन वर्णहानीयत्तां विज्ञाय तत्सादृश्येन शेषांशानां वर्णहानीयत्तामभ्यूहेदित्यर्थः । शोधनप्रकारमाह—तापनमिति । तापनं पत्रीकृत्याग्नौ दहनम्, उदकपेषणं च तसमुदके प्रक्षिप्य चुक्रिकायोजनेन कुट्टनं च, बहुशो बहुकृत्वः, कुर्याद् यावद् वैवर्ण्यमपैति तावदित्यार्थम् । इयत्तानिर्णयफलं तु 'वर्णहीने माषकावरे पूर्वः साहसदण्ड' इत्यादि पूर्वोक्तदण्डविधानम् ।

पूर्वोक्ताकरोद्भवापसारणमार्गातिरेकिणोऽवक्षेपादीन् सप्तदश हरणोपायानाह— अवक्षेप इति । अवक्षेपः हस्तलाघवेन सारमपहृत्यापद्रव्यप्रक्षेपः, प्रतिमानं तद्विनिमयादि, अग्निः अग्निमध्ये हरणप्रयोगः, गण्डिका काष्ठाधिकरणी रत्नप्रतिवापाधारकाष्ठं, भण्डिका उपस्काराधारः स्वर्णद्रवनिषेकसाधनम् , अधिकरणी अयस्पात्रविशेषः, पिञ्छः मयूरबर्हः, सूत्रं सुवर्णतुलातन्तुः, चेलं वस्त्रं, बोल्लनं कथाव्याजेन द्रष्टृचित्तव्याक्षेपकरणं, चेलबोल्लनमिति समस्तपाठे वस्त्रपटलिका, शिरः शीर्षकण्डूयनादि, उत्सङ्गः अङ्कः उपलक्षणाद् गुह्यप्रदेशश्च, मक्षिका मक्षिकानिवारणव्याजेन निर्यासद्रवलिप्तस्वाङ्गसंश्लेषणं, स्वकायेक्षा स्वेदादिदर्शनव्याजः, दृतिः ध्मानभस्त्रा, उदकशरावं जलपात्रम् , अग्निष्ठम् अग्निप्रक्षिप्तमपद्रव्यम् , इति एवम्प्रकारं, काचम् अपहरणोपायं, विद्यात् ।

राजतानां पञ्च दुष्टिचिह्नान्याह — राजतानामित्यादि । राजतत्वया पूर्वोक्तस्य स्वर्णविषयत्वं सूचितम् । विस्रं सीसादिसंसर्गदुर्गन्धि । मल-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं नवं च जीर्णं च विरूपं चापि भाण्डकम्।
परीक्षेतात्ययं चैषां यथोद्दिष्टं प्रकल्पयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्दशोऽध्यायः विशिखायां सौवर्णिकप्रचारः,
आदितः पञ्चत्रिंशः ॥

ग्राहि मलिनम्। परुषं खरस्पर्शम्। प्रस्तीतं कठिनम्। विवर्णम् अपद्रव्यामिश्रणोपहृतनिजप्रभम्। एतच्छोधनप्रकारस्तु 'अस्थितुत्थे चतुः समसीसे चतुः' इत्यादिना पूर्वाध्याये दर्शित एव।

अध्यायान्ते श्लोकमाह — एवमित्यादि। विरूपम् अपद्रव्यमिश्रणदूषितम्। अत्ययं दण्डम्। यथोद्दिष्टं 'वर्णहीने माषकावरे' इत्यादिना विहितप्रकारम्। प्रकल्पयेत् प्रकर्षेण कल्पयेत् अवश्यं प्रयुञ्जीतेत्यर्थः। उदाहृतौ चात्र भट्टस्वामिना बार्हस्पत्यौ श्लोकौ—

"अचोराश्चोरधर्माणो वणिजः कारवस्तथा।
तस्मात् तेषु न विश्वासः कर्तव्यो भूतिमिच्छता ॥

प्रकाशतस्करानेतान् परद्रव्यापहारिणः।
शिल्पिनो वणिजश्चैव राजा दण्डेन वारयेत् ॥" इति ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्दशोऽध्यायः विशिखायां सौवर्णिकप्रचारः,
आदितः पञ्चत्रिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३३. प्रक. कोष्ठागाराध्यक्षः ।

कोष्ठागाराध्यक्षः सीताराष्ट्रक्रयिमपरिवर्तकप्रामित्यकापमित्यक-सिंहनिकान्यजातव्ययप्रत्यायोपस्थानान्युपलभेत ।

सीताध्यक्षोपनीतः सस्यवर्णकः सीता ।

पिण्डकरः, षड्भागः, सेनाभक्तं, बलिः, करः, उत्सङ्गः, पार्श्वं, पारिहीणिकम्, औपायनिकं, कौष्ठेयकं च राष्ट्रम् ।

कोष्ठागाराध्यक्ष इति सूत्रम् । कोष्ठमुदरं तेन तदर्थानि धान्यस्नेह-क्षारलवणादीन्यभ्यवहार्यद्रव्याणि लक्ष्यन्ते, तेषामगारं संग्रहसंगोपनस्थानं तस्य अध्यक्षः कोष्ठागाराध्यक्षः अर्थात् तद्व्यापारः स इहाभिधीयत इति सूत्रार्थः ।

प्रक्रान्तायाः कोशप्रकृतेराकरकर्मान्तप्रवर्तनादिनोत्पादनरक्षणादिकमुक्तम् । शरीरस्थितिहेतुतया प्रधानस्य धान्यादेरुत्पादनरक्षणव्ययप्रकारादिकं तु नोक्तम् । तदिहोपदिश्यत इति सम्बन्धः । यद्वा 'सन्निधाता कोशगृहं कोष्ठागारं पण्यगृहं कुप्यगृहमायुधागारं बन्धनागारं च कारयेद्' इति कोष्ठागारकरणं पूर्वमुक्तम् । तदध्यक्षव्यापारस्त्वनभिहित इदानीमभिधीयत इति सङ्गतिः ।

तमाह — कोष्ठागारेत्यादि । कोष्ठागाराध्यक्षः, सीतादीनि सीता राष्ट्रं क्रयिमं परिवर्तकः प्रामित्यकम् आपमित्यकं सिंहनिका अन्यजातः व्ययप्रत्यायः उपस्थानमित्येतान् दश पदार्थान् उपलभेत चिन्तयेत् ।

तान् यथोद्देशं विवृणोति — **सीताध्यक्षोपनीत** इत्यादि । सीताध्यक्षेण धान्यकरग्रहणकर्माधिकृतेन उपनीतः कोष्ठागारे प्रवेशितः, सस्यवर्णकः धान्यजातिः, सीता तदाख्या । कोष्ठागाराध्यक्षस्तां शुद्धामन्यूनां च गृह्णीयात् ।

राष्ट्रमाह — पिण्डेत्यादि । पिण्डकरः तत्तद्ग्रामदेयतया क्लृप्तः करसमुदायः, षड्भागः षडिति चतुर्थादिभागस्याप्युपलक्षणं तेन षड्भागचतुर्भागादिरूपस्तत्तद्देशसिद्धो राजभाग इत्यर्थः, सेनाभक्तं सेनासन्नाहनकाले यथादेशप्रसिद्धं स्नेहतण्डुललवणादि राजदेयमिति स्वामी, सैनिकानां तण्डुलहिरण्यादिदानसमये राजार्थे तैर्दीयमानः स्नेहतण्डुलाद्यंश इति भाषाटीका । बलिः षड्भागातिरिक्तः यथादेशप्रसिद्धो दशविंशतिबन्धादिकः यं भिक्षाभक्तं वदन्ति, करः फलवृक्षादिसम्बद्धं राजदेयम्, उत्सङ्गो राज्ञे पुत्रजन्माद्युत्सवावसरेषु पौरजानपदैर्दत्तं शालाकमध्वादि, पार्श्वम् उचितकरादधिकग्रहणं योगवृत्ताधिकरणस्य द्वितीये कोशाभिसंहरणाध्याये वक्ष्यमाणं, पारिहीणिकं चतु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धान्यमूल्यं कोशनिर्हारः प्रयोगप्रत्यादानं च क्रयिमम् ।

सस्यवर्णानामर्घान्तरेण विनिमयः परिवर्तकः ।

सस्ययाचनमन्यतः प्रामित्यकम् ।

तदेव प्रतिदानार्थमापमित्यकम् ।

कुट्टकरोचकसक्तुशुक्तपिष्टकर्म तज्जीवनेषु तैलपीडनमौरभ्रचाक्रिकेष्विक्षूणां च क्षारकर्म सिंहनिका ।

ष्पदविनाशितसस्यदण्डलभ्यम्, औपायनिकम् उपायनार्थं कौशेयादिकं, कौष्ठेयकं च राजस्थापिततटाकारामाद्युत्पन्नं च, इत्येवं दशप्रकारं राष्ट्रम् । पूर्वे समाहर्तृसमुदयप्रस्थापनाध्याये राष्ट्रान्तर्गतो बलिरुक्तः पार्श्वपारिहीणिकानि चान्यजातान्तर्गतान्युक्तानि । तेषामिह पुनःपाठः समाहर्त्रुत्पादितानामपि कोष्ठागारप्रवेश्यतां ज्ञापयितुम् ।

धान्यमूल्यमिति । धान्यमूल्यं धान्यविक्रयहिरण्यं, कोशनिर्हारः हिरण्येन धान्यक्रयः, प्रयोगप्रत्यादानं वृद्धिप्रयुक्तधान्यप्रवेशनम्, इत्येवं त्रिप्रकारं क्रयिमम् ।

परिवर्तकमाह — **सस्येत्यादि** । सस्यवर्णानां सस्यजातीयानाम्, अर्घान्तरेण विनिमयः एकेन शालिप्रस्थेन चतुःप्रस्थकोद्रवग्रहणमित्येवञ्जातीयो विनिमयः, परिवर्तकः तदाख्यः ।

प्रामित्यकमाह — **सस्येत्यादि** । अन्यतः मित्रादेः, सस्ययाचनम् अप्रतिदानार्थं, प्रामित्यकं तत्संज्ञम् ।

आपमित्यकमाह — **तदेवेति** । अन्यतः सस्ययाचनमेव, प्रतिदानार्थं सवृद्धिकप्रत्यर्पणार्थम्, आपमित्यकं तत्संज्ञम् ।

कुट्टककर्मादिपञ्चकजीविभ्यस्तैलपीडनजीविभ्य इक्षुक्षारकर्मजीविभ्यश्च यदुपादीयते तत् सिंहनिकाख्यमित्याह— **कुट्टकेत्यादि** । कुट्टकादीनां पञ्चानां द्वन्द्वः । कर्मशब्दश्च तेषु प्रत्येकमभिसम्बध्यते । कुट्टककर्म अवघातः, रोचककर्म मुद्गमाषादिविदलनं, सक्तुकर्म घरट्टादिना यवादिचूर्णीकरणं, शुक्तकर्म इक्षुरसादिसन्धानं, पिष्टकर्म गोधूमपेषणादि । कुट्टकादिकर्म, तज्जीवनेषु कुट्टकादिकर्मोपजीविषु विषये तत्कर्मोपजीवनार्थं तेभ्यः शुल्कं यद् गृह्यते तदित्यर्थः, तैलपीडनं तिलेभ्यो यन्त्रनिष्पीडितेभ्यस्तैलोत्पादनकर्म, औरभ्रचाक्रिकेषु औरभ्रेषु यज्ञियोरभ्रसंज्ञपनकर्मकरेषु तैलिषु विषये तदुपजीवनेष्वित्यनुव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नष्टप्रस्मृतादिरन्यजातः ।

विक्षेपव्याधितान्तरारम्भशेषं च व्ययप्रत्यायः ।

तुलामानान्तरं हस्तपूरणमुत्करो व्याजी पर्युषितं प्राजितं चोपस्थानमिति ।

धान्यस्नेहक्षारलवणानाम् ।

धान्यकल्पं सीताध्यक्षे वक्ष्यामः । सर्पिस्तैलवसामज्जानः स्नेहाः ।

र्तनात् तैलपीडनकर्मोपजीवनार्थं तेभ्यो यद् गृह्यते तदित्यर्थः, इक्षूणां क्षारकर्म च फाणितगुडखण्डादिकर्म च तत्कर्मोपजीविभ्यो यदुपादीयते तच्चेत्यर्थः । संहनिकेति तु व्याख्यापाठः सुष्ठु ।

अन्यजातमाह—नष्टेत्यादि । नष्टप्रस्मृतादिः नष्टमपगतं प्रस्मृतं विस्मृतं चेति द्वयम् । आदिपदादायुक्तदण्डादिर्ग्राह्यः ।

व्ययप्रत्यायमाह — विक्षेपेत्यादि । विक्षेपशेषं किञ्चित्कार्यसाधनाय प्रेषितस्य सैन्यस्यार्थे व्ययिताद् धनादवशिष्टं, व्याधितशेषं भेषजशालाव्ययितावशिष्टम्, अन्तरारम्भशेषं दुर्गप्रासादादिपरिकर्मार्थे निर्गतस्य धनस्य लघुपरिव्ययकरणाच्छेषम् ।

उपस्थानमाह — तुलेत्यादि । तुलामानान्तरं तुलामानभेदः तुलामानाभ्यामधिकाभ्यां गृहीत्वा हीनाभ्यां दानादुत्पन्नं, हस्तपूरणं कराभ्यां प्रस्थादौ धान्यस्य यत्नप्रवेशनं प्रस्थाग्रे कराभ्यां धान्यधारणं वा, हस्तप्रपूरणमिति पाठे हस्तश्लथीकाराङ्गुलिविरलीकरणादिना व्रीह्यादिमेयधान्यानां पूगीफलादिगण्यपण्यानां च प्रच्यावनम्, उत्करः धान्यादिराशिः शालाकादिर्वा, गणनमानदेशयोर्गण्यमेयवस्तुविक्षेपणं वा, व्याजी षोडशभागादि पुनर्मानन्यूनतापरिहारायाधिकतया गृह्यमाणं, पर्युषितं गतवत्सरशेषं, प्राजितं च पुष्पताम्बूलादिकं च स्वनैपुण्योत्पादितम्, उपस्थानं तदाख्यम् । इतिशब्द उद्दिष्टसीतादिपदार्थविवरणोपसंहारार्थः ।

धान्येत्यादि । धान्यस्नेहक्षारलवणानामित्यधिकार आध्यायपरिसमाप्तेः ।

तत्र धान्यकल्पः सीताध्याये वक्ष्यत इत्याह—धान्यकल्पमित्यादि । इयमनागतावेक्षणलक्षणा तन्त्रयुक्तिः । सर्पिरित्यादि । सर्पिस्तैलं वसा मज्जेत्येते चत्वारः स्नेहाः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

फाणितगुडमत्स्यण्डिकाखण्डशर्कराः क्षारवर्गः।

सैन्धवसामुद्रबिडयवक्षारसौवर्चलोद्भेदजा लवणवर्गः।

क्षौद्रं मार्द्वीकं च मधु।

इक्षुरसगुलमधुफाणितजाम्बवपनसानामन्यतमो मेषशृङ्गीपिप्पलीक्वाथाभिषुतो मासिकः षाण्मासिकः सांवत्सरिको वा चिद्भिटोर्वारुकेक्षुकाण्डाम्रफलामलकावसुतः शुद्धो वा शुक्तवर्गः।

वृक्षाम्लकरमर्दाम्रविदलामलकमातुलुङ्गकोलबदरसौवीरकपरूषकादिः फलाम्लवर्गः।

दधिधान्याम्लादिर्द्रवाम्लवर्गः।

इक्षुविकारभेदाः फाणितादयः क्षारवर्ग इत्याह — फाणितेत्यादि। गुडखण्डशर्करयोर्मध्यमावस्था मत्स्यण्डिका।

सैन्धवादिषट्प्रकारं लवणवर्गमाह — सैन्धवेत्यादि। उद्भेदज ऊषरलवणमिति स्वामी।

क्षौद्रमिति। क्षौद्रं क्षुद्राभिः सञ्चितम्। मार्द्वीकं मृद्वीकानां रसः। इति द्विविधं मधु।

शुक्तवर्गमाह — इक्षुरसेत्यादि। इक्षुरसो, गुलः, मधु, फाणितं च प्रसिद्धं जाम्बवपनसौ जम्बूफलरसः पनसफलरसश्च, एषां षण्णाम्, अन्यतमः, मेषशृङ्गीपिप्पलीक्वाथाभिषुतः मेषविषाणाख्याया मागध्याख्यायाश्चौषधेः कषायेण मिश्रः, मासिकः षाण्मासिकः सांवत्सरिको वा मासषण्मासादिकालपरिवासेन क्रमादधममध्यमोत्तमभेदं प्रतिपन्नः, चिद्भिटादिपञ्चकरसैर्व्यस्तैः समस्तैर्मिश्रितः, शुद्धो वा चिद्भिटाद्यमिश्रितो वा, शुक्तवर्गः आसववर्गः। चिद्भिटं वल्लीफलविशेषः, तदेव कटुकसुर्वारुकम्।

फलाम्लवर्गमाह — वृक्षाम्लेत्यादि। वृक्षाम्लं तिन्तिडीकं, करमर्दः वशपर्यायः, आम्रामलके प्रसिद्धे, विदलं दाडिमं, मातुलुङ्गं दाडिमभेदः, कोलं क्षुद्रबदरं, बदरं स्थूलबदरं, सौवीरकं स्वादुबदरं, परूषकं मध्यदेशादिप्रसिद्धं मधुराम्लफलम्, आदिग्रहणं जम्बीराद्यर्थम्। यथोक्ताकारः फलाम्लवर्गः।

दधीत्यादि। दधि प्रसिद्धं, धान्याम्लं काञ्जिकम्। आदिपदात् तक्रादिग्रहणम्। इत्ययं द्रवाम्लवर्गः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पिप्पलीमरिचशृङ्गिबेराजाजीकिराततिक्तगौरसर्षपकुस्तुम्बुरुचोरकदमनकमरुवकशिग्रुकाण्डादिः कटुकवर्गः ।

शुष्कमत्स्यमांसकन्दमूलफलशाकादि च शाकवर्गः ।

ततोऽर्धमापदर्थं जानपदानां स्थापयेत् । अर्धमुपयुञ्जीत । नवेन चानवं शोधयेत् ।

क्षुण्णघृष्टपिष्टभृष्टानामार्द्रशुष्कसिद्धानां च धान्यानां वृद्धिक्षयप्रमाणानि प्रत्यक्षीकुर्वीत ।

कोद्रवव्रीहीणामर्धं सारः, शालीनामष्टभागोनः, त्रिभागोनो

पिप्पलीत्यादि । पिप्पल्यादित्रिकं प्रसिद्धं, अजाजी जीरकः, किराततिक्तः भूनिम्बाख्य ओषधिविशेषः, गौरसर्षपः सिद्धार्थः, कुस्तुम्बुरु धान्याख्यं, चोरकः शतपुष्पानुकारी गुच्छ इति स्वामी, दमनकं कान्ताख्यं, मरुवकः पिण्डीतकः, शिग्रुकाण्डः शोभाञ्जनकाण्डः, आदिग्रहणं राजसर्षपाद्यर्थम् । इत्येवञ्जातीयः कटुकवर्गः ।

शुष्केत्यादि । शुष्कशब्दो मत्स्यमांसयोः प्रत्येकं सम्बध्यते । शुष्कमत्स्यः शुष्कमीनः, शुष्कमांसं वल्लूरं, कन्दः सूरणादिः, मूलं शतमूलीप्रभृति, फलं वार्ताकादि, शाकं वास्तुकादि, आदिग्रहणान्माषविकारादिपरिग्रहः । इत्ययं शाकवर्गः ।

तत इति । ततोऽर्धं स्नेहादिवर्गेभ्यः पूर्वोक्तेभ्योऽर्धं, जानपदानाम्, आपदर्थं दुर्भिक्षाद्यापत्समयोपयोगार्थं, स्थापयेत् । अर्धम्, उपयुञ्जीत राजमहानसाद्यर्थे विनियुञ्जीत । नवेन चानवं शोधयेत् नवं प्राक्षिप्य पुराणं कालक्षमं निचितमुपयुञ्जीत ।

धान्यानां क्षोदघर्षणाद्यवस्थासु सत्सु वृद्धिक्षयाववश्यम्भाविनौ तत्तत्कर्मकरेभ्योऽनुमन्तव्यौ । अतस्तयोरियत्तानिश्चयं सकृत्प्रत्यक्षीकरणेन कोष्ठागाराध्यक्षोऽधिगच्छेदित्याह — **क्षुण्णे**त्यादि । क्षुण्णं सकृदवहतं, घृष्टं फलीकृतं, पिष्टं श्लक्ष्णचूर्णितं, भृष्टं भ्राष्ट्रपक्वम् , आर्द्रं तिमितं, शुष्कं कृतशोषणं, सिद्धं राद्धम् । सोऽयं धान्यानां सारमात्राया अल्पत्वानल्पत्वतारतम्ये क्षयवृद्धीयत्तापरिज्ञानार्थो विशेषविधिरुक्तः ।

सामान्यतस्तु तदियत्ताविषयं विधिमुपदेष्टुमाह — **कोद्रवे**त्यादि । कोद्रवव्रीहीणामर्धं सारः कोद्रवाणां व्रीहीणां च तत्प्रस्थद्वयस्यैकस्तण्डुलप्रस्थः सारः फलति, शेषस्तु क्षय इत्यर्थः । शालीनां कलमाख्यव्रीहिभेदानाम् , अष्ट-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वरकाणाम् । प्रियङ्गूणामर्धं सारो नवभागवृद्धिश्च । उदारकस्तुल्यः । यवा गोधूमाश्च क्षुण्णाः ।

तिला यवा मुद्गमाषाश्च घृष्टाः । पञ्चभागवृद्धिर्गोधूमः सक्तवश्च । पादोना कलायचमसी । मुद्गमाषाणामर्धपादोना । शैम्बानामर्धं सारः । त्रिभागोनो मसूराणाम् ।

पिष्टमामं कुल्माषश्चाध्यर्धगुणः । द्विगुणो यावकः । पुलाकः पिष्टं च सिद्धम् ।

कोद्रववरकोदारकप्रियङ्गूणां त्रिगुणमन्नं चतुर्गुणं व्रीहीणाम्

भागोनः प्रकृत्यष्टमांशन्यूनः, अर्धं सार इति वर्तते । तेन शालीनां प्रस्थाष्टकस्य प्रस्थत्रयं सारो भवति । वरकाणां धान्यभेदानां, त्रिभागोनः प्रस्थत्रये प्रस्थद्वयं सारो भवति । प्रियङ्गूणां कङ्गूनाम्, अर्धं सारः नवभागवृद्धिश्च अष्टसु प्रस्थेषु प्रस्थपञ्चकं तण्डुलानां भवति । उदारकः तृणकोलकः, तुल्यः प्रियङ्गुतुल्यसारः अनवहतावस्थाप्रमाणतुल्यसारो वा भवति । तत्राद्यः शुष्कावघाते, सजलावघाते पर इति विवेकः । यवाः, गोधूमाश्च, क्षुण्णाः सजलावहताः, तुल्याः अनवहतावस्थाप्रमाणतुल्यसाराः ।

क्षुण्णानुक्त्वा घृष्टानाह— **तिला** इत्यादि । घृष्टाः दलिताः, तिलाः, यवाः, मुद्गमाषाश्च, तुल्या इति वर्तते, अघृष्टावस्थातुल्यप्रमाणाः । गोधूमः, पञ्चभागवृद्धिः पञ्चभागेन वर्धते । सक्तवश्च भृष्टयवजाः, पञ्चभागवृद्धयः । कलायचमसी कलायश्चणभेदः तस्य चमसी श्लक्ष्णचूर्णं, पादोना कलायप्रस्थचतुष्टयस्य तच्चूर्णं प्रस्थत्रयप्रमाणं भवति । मुद्गमाषाणाम् मुद्गानां माषाणां च चमसी, अर्धपादोनाष्टभागेन ऊना भवति । शैम्बानां कुलत्थादिकोशीधान्यानाम्, अर्धं, सारः वितुषांशो भवति । मसूराणां चणविशेषाणां, त्रिभागोनः सारः प्रस्थत्रयदलने प्रस्थद्वयं सारो भवति ।

पिष्टमाह — **पिष्टमिति** । आमं पिष्टम् अपक्वं गोधूमादि, कुल्माषश्च मुद्गमाषादिश्च, अध्यर्धगुणः कुडुबचतुष्टये कुडुबषट्कं भवति । यावकः वितुषीकृतो यवः, द्विगुणः चूर्णीकृतो द्वैगुण्यं प्राप्नोति । पुलाकः अर्धसिद्धस्तण्डुलः, पिष्टं च गोधूमादितण्डुलचूर्णं च, सिद्धं राद्धं सत्, द्विगुणं भवति ।

सिद्धमाह — **कोद्रववरकेत्यादि** । कोद्रवादिचतुष्टयान्नं तत्तत्तण्डुलात् त्रिगुणं, व्रीह्यन्नं चतुर्गुणं, शाल्यन्नं पञ्चगुणं च वर्धते इत्यर्थः । अष्टगुणं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्चगुणं शालीनाम् । तिमितमपरान्नं द्विगुणमर्धाधिकं विरूढानाम् ।

पञ्चभागवृद्धिर्भृष्टानाम् । कलायो द्विगुणः, लाजा भरुजाश्च ।

षट्कं तैलमतसीनाम् । निम्बकुशाम्रकपित्थादीनां पञ्चभागः । चतुर्भागिकास्तिलकुसुम्भमधूकेङ्गुदीस्नेहाः ।

कार्पासक्षौमाणां पञ्चपले पलसूत्रम् ।

पञ्चद्रोणे शालीनां द्वादशाढकं तण्डुलानां कलभभोजनम्, एकादशकं व्यालानां, दशकमौपवाह्यानां, नवकं सान्नाह्यानाम्, अष्टकं

शालीनामिति भाषाटीकायां पाठो भाति । तिमितमिति । तिमितं लवनाद्यवसरे केदारादावार्द्रीकृतव्रीह्याद्यन्नम्, अपरान्नश्च अपरिणतव्रीह्याद्यन्नं च, द्विगुणं भवति । विरूढानाम् अङ्कुरितानां व्रीह्यादीनाम्, अर्धादन्नम्, अर्धाधिकम् अर्धाधिकद्विगुणं भवति । अपरा व्याख्या—तिमितम् आर्द्रीकृतम्, अपरान्नं फलाढकीचणकादि, द्विगुणं भवति । चणकादीनामेव विरूढानाम् अङ्कुरितानाम्, अर्धाधिकम् अर्धमधिकमार्द्रीकृताद् भवति इति ।

भृष्टमाह — पञ्चभागेत्यादि । भृष्टानां कृतभर्जनानां तेषामेवावरान्नानां, पञ्चभागवृद्धिः प्रस्थपञ्चकं भृष्टं प्रस्थषट्कं भवति । कलायश्चणभेदो भृष्टः द्विगुणः । लाजाः व्रीह्यादयो, भरुजा यवाश्च, भृष्टाः द्विगुणाः ।

तैलमाह — षट्कं तैलमतसीनामिति । षट्सु अतसीबीजप्रस्थेषु एकस्तैलप्रस्थो भवति । निम्बकुशाम्रकपित्थादीनां पञ्चभागः निम्बबीजादीनां प्रस्थपञ्चके एकप्रस्थः स्नेहो भवति । आदिग्रहणमेरण्डादिपरिग्रहार्थम् । तिलकुसुम्भमधूकेङ्गुदीस्नेहाः चतुर्भागिकाः तिलकुसुम्भबीजादीनां प्रस्थचतुष्टये एकः स्नेहप्रस्थो भवति ।

सूत्रमाह — कार्पासेत्यादि । क्षौमो वल्कविशेषः । कार्पासपलपञ्चकस्य क्षौमपलपञ्चकस्य च एकपलं सूत्रं भवति ।

अथ भक्तोपयोगाय तण्डुलादीनां व्यवस्थाविशेषानाह — **पञ्चद्रोण** इत्यादि । शालीनां विंशत्याढकात्मके पञ्चद्रोणे तण्डुलानां द्वादशाढकं यथा निष्पद्येत, तथावहननेनिष्पादितास्तत्तण्डुलाः, कलभभोजनं कलभानां बालगजानां भोजनार्थे विनियोज्याः । व्यालानां दुष्टगजानाम्, एकादशकं शाल्याढकविंशतावेकादशाढकक्रमेण निष्पन्नास्तण्डुलाः, भोजनार्थे विनियोज्या इत्यार्थम् । एवमुत्तरेष्वपि । औपवाह्यानां राजवाह्यानां, दशकं दशाढकं विंशतौ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पत्तीनां, सप्तकं मुख्यानां, षट्कं देवीकुमाराणाम्, पञ्चकं राज्ञाम् । अखण्डपरिशुद्धानां वा तण्डुलानां प्रस्थः ।

चतुर्भागः सूपः, सूपषोडशो लवणस्यांशः, चतुर्भागः सर्पिषः तैलस्य वा, एकमार्यभक्तम् । प्रस्थषड्भागः सूपः, अर्धस्नेहमवराणाम् । पादोनं स्त्रीणाम् । अर्धं बालानाम् ।

मांसपलविंशत्या स्नेहार्धकुडुबः, पलिको लवणस्यांशः, क्षार-

दशाढकक्रमेण साधितास्तण्डुलाः, विनियोज्याः । सान्नाह्यानां समरोचितानां, नवकं नवाढकं विंशतौ नवाढकक्रमनिष्पन्नास्तण्डुलाः । पत्तीनां पदातीनाम्, अष्टकम् अष्टाढकम् अष्टाढकक्रमनिष्पन्नास्तण्डुलाः । मुख्यानां भटप्रधानानां, सप्तकं सप्ताढकं सप्ताढकक्रमनिष्पन्नास्तण्डुलाः । देवीकुमाराणां राजपत्नीनां राजपुत्राणां च, षट्कं षडाढकं षडाढकक्रमनिष्पन्नास्तण्डुलाः । सेयं पूर्वाभ्यः प्रतिपत्तिभ्य उत्तमा प्रतिपत्तिः । राज्ञां पुनरितोऽप्युत्तमामाह — **राज्ञामिति** । राज्ञां, पञ्चकं पञ्चाढकं शालिविंशत्याढके पञ्चाढकक्रमनिष्पन्नास्तण्डुलाः भोजनार्थे विनियोज्याः । तदेवमष्टौ वर्णिकास्तण्डुलानां भक्तोपयोगिन्य उक्ताः । राजभोजने पक्षान्तरमाह — **अखण्डेत्यादि** । वाशब्दः पक्षान्तरे । अखण्डपरिशुद्धानाम् अक्षतावयवानां फलीकरणविवेचनसंशोधितानां च, तण्डुलानां, प्रस्थः आढकचतुर्भागः शाल्यशीतिप्रस्थादवहननादिसंस्कृताद् यथोक्तगुणैकतण्डुलप्रस्थग्रहणक्रमेण सम्पन्नस्तण्डुल इत्यर्थः ।

चतुर्भाग इति । सूपः चतुर्भागः प्रस्थस्य प्रकृतत्वात् तच्चतुर्थांशः । सूपषोडशः सूपस्य षोडशांशप्रमाणः, लवणस्यांशः । सर्पिषस्तैलस्य वा, चतुर्भागः सूपचतुर्थभागः । **एकमार्यभक्तमिति** । तदिदमेकं मध्यमप्रतिपत्तिकस्य पुरुषस्य भोजनं भवति । अवरभोजनमाह— **प्रस्थेत्यादि** । अवराणां निकृष्टानां, प्रस्थषड्भागः सूपः । अर्धस्नेहं अर्धं सूपार्धभागः स्नेहस्तैलादिः यस्य तत् । लवणं तु समानमेव । भोजनस्यान्यपदार्थतामभिप्रेत्य नपुंसकनिर्देशः । **पादोनं स्त्रीणामिति** । पादन्यूनमार्यपुरुषभक्तमार्यस्त्रीणाम्, अवरपुरुषभक्तमवरस्त्रीणां च यथायथं बोध्यम् । **अर्धं बालानामिति** । पूर्ववद् यथायथमार्यबालानामवरबालानां च ।

मांससंस्कारे योजनीयानां स्नेहादीनां परिमाणव्यवस्थामाह — **मांसपलेत्यादि** । मांसपलविंशत्या सह, स्नेहार्धकुडुबः स्नेहस्य अर्धकुडुबः प्रस्थाष्ट-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पलयोगः, द्विधरणिकः कटुकयोगः, दध्नश्चार्धप्रस्थः ।

तेनोत्तरं व्याख्यातम् । शाकानामध्यर्धगुणः, शुष्काणां द्विगुणः, स चैव योगः ।

हस्त्यश्वयोस्तदध्यक्षे विधाप्रमाणं वक्ष्यामः । बलीवर्दानां माषद्रोणं यवानां वा पुलाकः । शेषमश्वविधानम् । विशेषो — घाणपिण्याकतुला कणकुण्डकं दशाढकं वा ।

द्विगुणं महिषोष्ट्राणाम् । अर्धद्रोणं खरपृषतरोहितानाम् । आढ-

भागः, योज्यः । लवणस्यांशः, पलिकः पलमितः । क्षारपलयोगः क्षारस्य सुवर्चिकायवक्षारादेः पलयोगः लवणाभावे । कटुकयोगः कटुकानां पिप्पलीमरिचशृङ्गवेराणां योगः, द्विधरणिकः धरणद्वयमानः । धरणप्रमाणं तु 'अष्टाशीतिगौरसर्षपा रूप्यमाषकः, ते षोडश धरणमि'ति पौतवाध्यक्षे वक्ष्यते । दध्नश्च, अर्धप्रस्थः प्रस्थस्यार्धं कुडुबद्वयं भवति ।

तेनेति । तेन उक्तयोगमानेन, उत्तरम् अधिकं मांसपलत्रिंशच्चत्वारिंशदादीनां स्नेहादियोगमानमर्धगुणद्विगुण्यादिरूपं, व्याख्यातं विवृतप्रायम् उन्नेतुं शक्यमित्यर्थः । शाकानां वास्तुकादीनां, स चैव मांसोक्त एव, अध्यर्धगुणः सार्धगुणो, योगः । यथा—शाकपलविंशत्या पादोनकुडुबः स्नेहः अध्यर्धपलिकं लवणम् अध्यर्धपलिकं क्षारमित्यादि । शुष्काणां मांसानां शाकानां च, द्विगुणः स्नेहः मांसविषये कुडुबपरिमाणः शाकविषयेऽध्यर्धकुडुबपरिमाण इत्यादिः ।

हस्त्यश्वयोरिति । हस्त्यश्वयोः, विधाप्रमाणं तण्डुलादिमानं, तदध्यक्षे तयोरध्यक्षे हस्त्यध्यक्षे अश्वाध्यक्षे च, वक्ष्यामः । इतीयमनागतावेक्षणरूपा तन्त्रयुक्तिः । बलीवर्दानाम् उक्ष्णां, माषद्रोणं, यवानां वा पुलाकः अर्धसिद्धस्तण्डुलः, अर्थाद् द्रोणपरिमाणः । शेषम्, अश्वविधानम् अश्वस्योक्तं विधानं ग्राह्यम् । विशेष इति । विशेषः अश्वापेक्षया विशेष एषामुच्यत इत्यर्थः । घाणपिण्याकतुला शुष्कस्य तिलकल्कस्य पलशतं, दशाढकं, कणकुण्डकं वा तण्डुलानां सूक्ष्मांशमिश्रमलं वा ।

द्विगुणमित्यादि । उक्तं बलीवर्दविधानं द्विगुणं माषद्विद्रोणं यवपुलाकद्विद्रोणं वा महिषाणामुष्ट्राणां च भवति । अर्धद्रोणं माषाणां यवपुलाकानां वा आढकद्वयं, खरपृषतरोहितानां गर्दभानां बिन्दुचित्रमृगाणां रोहितमृगाणां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्रमेणकुरङ्गाणाम् । अर्धाढकमजैलकवराहाणां द्विगुणं वा कणकुण्डकम् । प्रस्थौदनः शुनाम् । हंसक्रौञ्चमयूराणामर्धप्रस्थः । शेषाणामतो मृगपशुपक्षिव्यालानामेकभक्तादनुमानं ग्राहयेत् ।

अङ्गारांस्तुषान् लोहकर्मान्तभित्तिलेप्यानां हारयेत् । कणिकाः दासकर्मकरसूपकाराणाम् । अतोऽन्यदौदनिकापूपिकेभ्यः प्रयच्छेत् ।

तुलामानभाण्डं रोचनीदृषन्मुसलोलूखलकुट्टकरोचकयन्त्रपत्रकशूर्पचालनिकाकण्डोलीपिटकसम्मार्जन्यश्चोपकरणानि ।

च। आढकं प्रस्थचतुष्टयम्, एणकुरङ्गाणां एणानां कुरङ्गाणां च मृगभेदानाम्। अर्धाढकं प्रस्थद्वयम्, अजैलकवराहाणाम् । अत्र पक्षान्तरमाह — द्विगुणम् उक्तार्धाढकाद् द्विगुणमेकाढकं, कणकुण्डकं वा । प्रस्थौदनः प्रस्थपरिमितमन्नं शुनाम् । हंसक्रौञ्चमयूराणाम्, अर्धप्रस्थः द्विकुडुबमन्नम् । शेषाणामिति । अतः उक्तेभ्यः, शेषाणां मृगपशुपक्षिव्यालानाम्, एकभक्ताद् एकदिवसभुक्तपरीक्षणाद्, अनुमानं शेषदिवसभक्तेयत्तानिश्चयं, ग्राहयेत् कारयेत् ।

पाककर्मणि निष्पन्नानामङ्गाराणाम् अवघातनिष्पलितानां तुषाणां च विनियोगमाह — **अङ्गारानित्यादि** । अङ्गारान् तुषांश्च, लोहकर्मान्तभित्तिलेप्यानां हारयेत् लोहकर्मान्तार्थे भित्तिलेप्यकर्मार्थे च सञ्चिनुयात् । भस्मादिसंग्रहस्याप्येतदुपलक्षणम् । भस्माद्यपि हि केदारादौ दोहदाद्यर्थे विनियुज्यते । कणिकाः तण्डुलकणान्, दासकर्मकरसूपकाराणां, प्रयच्छेद् भक्तार्थे । अतोऽन्यद् दासादिदत्तशेषम्, औदनिकापूपिकेभ्यः सामान्यान्नपाचकेभ्यः अपूपकर्मकरेभ्यश्च, प्रयच्छेत् तत्कर्मविनियोगार्थे ।

उपकरणान्याह — **तुलेत्यादि** । तुलामानभाण्डं तुलाभाण्डं मानभाण्डं च पौतवाध्यक्षे वक्ष्यमाणं, रोचन्यादिद्वादशकं च उपकरणानि । तत्र रोचनी दलनयन्त्रं, दृषत् पेषणी, मुसलोलूखले प्रतीते, कुट्टकरोचकयन्त्रे कुट्टकयन्त्रं रोचकयन्त्रं च आद्यमुष्ट्रग्रीवाकारं तण्डुलादिकुट्टनसाधनं द्वितीयं तु पेषणयन्त्रं, 'तच्च त्रिविधं मनुष्यप्रावर्तितं बलीवर्दप्रावर्तितं सलिलप्रावर्तितं चेति' इति भट्टस्वामी । पत्रकं दारुमय आवपनभेदः, शूर्पं प्रस्फोटनं, चालनिका तितउः, कण्डोली वंशदलादिनिर्मितं भाण्डं, पिटकः पेटारिका, संमार्जनी शोधनी।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मार्जकारक्षकधारकमायकमापकदायकदापकशलाकाप्रतिग्राहक-दासकर्मकरवर्गश्च विष्टिः ।

उच्चैर्धान्यस्य निक्षेपो मूताः क्षारस्य संहताः ।
मृत्काष्ठकोष्ठाः स्नेहस्य पृथिवी लवणस्य च ॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चदशोऽध्यायः कोष्ठागाराध्यक्षः,
आदितः षट्त्रिंशः ॥

कर्मकरानाह — मार्जकेत्यादि । मार्जकः भूमिसंस्कारकः, आरक्षकः कोष्ठागाररक्षी, धारकस्तुलोन्माता, मायको धान्यमाता, मापकस्तदधिष्ठाता, दायको दाता, दापकस्तदधिष्ठाता, शलाकाप्रतिग्राहको सारयष्ट्यादिप्रतिग्राही, दासः क्रीतः, कर्मकरस्तादात्विकभृतिभुक्, वर्ग उक्तजातीयगण आहितकादिः, विष्टिरिति त एते मार्जकादयो विष्टिसंज्ञिताः ।

अध्यायान्ते श्लोकमाह — उच्चैरित्यादि । धान्यस्य, उच्चैरुपरि, निक्षेपः भूमिस्पर्शो यथा न भवेत् तथा निक्षेपस्थानम् । क्षारस्य गुडफाणितादेः, संहताः सान्द्रघटिताः, मूताः तृणादिबन्धाः, निक्षेपः गोपनस्थानम् । स्नेहस्य घृततैलादेः, मृत्काष्ठकोष्ठाः मृत्कोष्ठाः कुम्भादयः काष्ठकोष्ठाः दारुकोष्ठाश्च मधूच्छिष्टजतुरसाद्यनुलिप्ताः, निक्षेपः । लवणस्य, पृथिवी भूमिः पार्थिवो घटादिर्वा, निक्षेपः । चकाराद् अनुक्तमन्यदपि निक्षेपस्थानमुक्तानाम्, अनुक्तानां शाकशुक्तादीनां निवेशस्थानं च यथार्हं कार्यमिति सूचयति ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चदशोऽध्यायः कोष्ठागाराध्यक्षः,
आदितः षट्त्रिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३४. प्रक. पण्याध्यक्षः ।

पण्याध्यक्षः स्थलजलजानां नानाविधानां पण्यानां स्थलपथवारिपथोपयातानां सारफल्ग्वर्घान्तरं प्रियाप्रियतां च विद्यात् । तथा विक्षेपसंक्षेपक्रयविक्रयप्रयोगकालान् ।

यच्च पण्यं प्रचुरं स्यात् तदेकीकृत्यार्घमारोपयेत् । प्राप्तेऽर्घे वार्घान्तरं कारयेत् ।

स्वभूमिजानां राजपण्यानामेकमुखं व्यवहारं स्थापयेत्, पर-

पण्याध्यक्ष इति सूत्रम् । पण्यं विक्रेयं राजद्रव्यं तस्य विक्रये क्रये च नियुक्तः पण्याध्यक्ष इति सूत्रार्थः । सन्निधातृनिचयकर्माभिहितम् । निचितस्य राजपण्यस्य क्रयविक्रयव्यवहार इदानीमुच्यत इति सम्बन्धः । अथवा 'सन्निधाता कोशगृहं पण्यगृहं कोष्ठागारमि'त्यादिना पण्यगृहकरणमुक्तम् । तदध्यक्षस्तदध्यक्षव्यापारो वा नोक्तः । स इहोच्यत इति सम्बन्धः । ननु च पण्याध्यक्षकर्म नाम वाणिज्यम् । तच्च कृषिपाशुपाल्यसहपाठात् सीताध्यक्षगोध्यक्षाभ्यामनन्तरं वक्तुमुचितम् । सत्यम् । किन्तु तस्येह कोष्ठागाराध्यक्षानन्तर्येण वचनं कोष्ठागाराध्यक्षस्यापि स्वव्यापाराः क्रयिमपरिवर्तकप्रामित्यकादयः पण्याध्यक्षापेक्षयानुष्ठेया इति ज्ञापनार्थम् ।

पण्याध्यक्ष इति । पण्याध्यक्षः, स्थलजलजानां स्थलजानां कुङ्कुमादीनां जलजानां मुक्ताप्रवालादीनां च, नानाविधानां पृथग् बहुप्रकाराणां, स्थलपथवारिपथोपयातानां, पण्यानां, सारफल्ग्वर्घान्तरं सारस्य बहुमूल्यस्य फल्गुनोऽल्पमूल्यस्य च अर्घान्तरं मूल्यतारतम्यं, प्रियाप्रियतां च प्रियतां शीघ्रविक्रयताम् अप्रियतां मन्दविक्रयतां च, विद्यात् । तथा, विक्षेपादिप्रयोगकालान् विक्षेपः संक्षिप्तद्रव्यविस्तारः संक्षेपः विक्षिप्तद्रव्यसंक्षेपः क्रयः पण्यसंग्रहः विक्रयः संगृहीतपण्यव्ययः इत्येतेषां प्रयोगकालान् अनुष्ठानाननुष्ठानकालान्, विद्यादिति सम्बध्यते ।

यच्चेति । यत् पण्यं कुङ्कुमादि, प्रचुरं प्राज्यं, स्यात्, तद् एकीकृत्य तत् सर्वमेकत्रगतं कृत्वा, अर्घम्, आरोपयेत् आरूढमधिकं स्थापयेत् । प्राप्तेऽर्घे वा न्यायलभ्येऽर्घेऽधिगते वा सति, अर्घान्तरम् अर्घभेदमारोपिताल्लघुं, कारयेत् ।

स्वभूमीत्यादि । स्वभूमिजानां स्वविषयोद्भवानां, राजपण्यानाम्, एकमुखम् एकस्थानं, व्यवहारं विक्रयं, स्थापयेद्, राजा । परभूमिजानां पर-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भूमिजानामनेकमुखम् । उभयं च प्रजानामनुग्रहेण विक्रापयेत् । स्थूलमपि च लाभं प्रजानामौपघातिकं वारयेत् । अजस्रपण्यानां कालोपरोधं सङ्कुलदोषं वा नोत्पादयेत् ।

बहुमुखं वा राजपण्यं वैदेहकाः कृतार्घं विक्रीणीरन् । छेदानुरूपं च वैधरणं दद्युः ।

षोडशभागो मानव्याजी । विंशतिभागस्तुलामानम् । गण्यपण्यानामेकादशभागः ।

परभूमिजं पण्यमनुग्रहेणावाहयेत् । नाविकसार्थवाहेभ्यश्च परिहारमायतिक्षमं दद्यात् । अनभियोगश्चार्थेष्वागन्तूनामन्यत्र सभ्योपकारिभ्यः ।

विषयोपनीतानाम्, अनेकमुखं, स्थापयेत् । उभयं च स्वभूमिजं परभूमिजं च, जानाम् , अनुग्रहेण अनुपपीडया, विक्रापयेत्, अर्थात् पण्याध्यक्षः । स्थूलं प्रभूतमपि, लाभं, प्रजानाम् , औपघातिकम् उपघातः पीडा तत्पर्यवसायिनं, वारयेत् । अजस्रपण्यानां क्षीरशाकादीनां, कालोपरोधं कालविक्रयप्रतिषेधं, संकुलदोषं वा शाकादिषु कैश्चिदानीतचरेष्वविक्रीतेष्वन्यैः शाकाद्यानयनं वा, नोत्पादयेत् ।

बह्वित्यादि । वैदेहकाः वणिजः, कृतार्घं व्यवस्थापितमूल्यं, राजपण्यं, बहुमुखं वा बहुषु स्थलेषु वा, विक्रीणीरन् । **छेदानुरूपं च वैधरणमिति** । यदि विक्रये कश्चिच्छेदोऽर्घहानिर्भवेत् तदनुरूपं छेदतुल्यमानं, वैधरणं दद्युः । छेदप्रतिनिधेर्वैधरणमिति संज्ञा ।

वणिग्भ्य उपादेयां राजोपदामाह—**षोडशेत्यादि** । षोडशभागो मानव्याजी मेयद्रव्यषोडशांशो मानव्याजीसंज्ञः । स राज्ञे देयः । तुलामानं विंशतिभागः तोलनीयद्रव्ये पलशते पञ्चपलमितं, राज्ञे देयम् । गण्यपण्यानां क्रमुकफलादीनाम् , एकादशभागः, राज्ञे देयः । सर्वेयं व्याजी क्रेतृग्राह्येति केचित् ।

परेत्यादि । परभूमिजं पण्यम् , अनुग्रहेण अन्तपालाटविकराजवल्लभाद्युपद्रववारणेन व्याजीमोक्षेण च, आवाहयेत् आनाययेत् । नाविकसार्थवाहेभ्यश्च जलपथवाहकवणिग्भ्यश्च, परिहारम् आदेयमोक्षम् , आयतिक्षमम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पण्याधिष्ठातारः पण्यमूल्यमेकमुखं काष्ठद्रोण्यामेकच्छिद्रापिधानायां निदध्युः । अह्नश्चाष्टमे भागे पण्याध्यक्षस्यार्पयेयुः — इदं विक्रीतमिदं शेषमिति । तुलामानभाण्डकं चार्पयेयुः । इति स्वविषये व्याख्यातम् ।

परविषये तु — पण्यप्रतिपण्ययोरर्घं मूल्यं च आगमय्य शुल्कवर्तन्यातिवाहिकगुल्मतरदेयभक्तभाटकव्ययशुद्धमुदयं पश्येत् । असत्युदये भाण्डनिर्वहणेन पण्यप्रतिपण्यार्घेण वा लाभं पश्येत् । ततः

उत्तरकालाबाधकं, दद्यात् । अनभियोगश्च उत्तमर्णकर्तृकाभियोगप्रतिषेधश्च, अर्थेषु ऋणादिषु विषये, आगन्तूनां देशान्तरागतानां, तद्विषये अभियोगं विनैव ऋणदानं व्यवस्थाप्यमिति भावः । अत्रापवादमाह—अन्यत्र सभ्योपकारिभ्यः तदुपकारिकर्मकरानपहाय । तेषां तु परस्पराभियोगो भवत्येव ।

पण्याधिष्ठातार इति । राजपण्यविक्रेतारः, पण्यमूल्यं पण्यविक्रयागतं धनम्, एकमुखम् एकस्थानागतं, काष्ठद्रोण्यां दारुपेटिकायाम्, एकच्छिद्रापिधानायाम् एकद्वाराच्छादनायां, निदध्युः निक्षिपेयुः । अह्नश्च, अष्टमे चरमे, भागे, उपलक्षणात् क्रयसमयावसाने वा, पण्याध्यक्षस्य, अर्पयेयुः । किं कृत्वा, इदं विक्रीतम् इदं शेषामिति एतावद् विक्रीतम् एतावद् विक्रेयमवशिष्यत इति बोधयित्वा । तुलामानभाण्डकं तुलाप्रस्थकुडुवादिकं च, अर्पयेयुः, पण्याध्यक्षस्य । **इति स्वविषये व्याख्यातमिति** । एवं स्वदेशे पण्यपणनविधिर्विवृतः ।

परविषये त्विति । व्याख्यायत इति शेषः । **पण्येत्यादि** । पण्यप्रतिपण्ययोः स्वपण्यपरविषयपण्ययोः, अर्घं समन्यूनाधिकं, मूल्यं च भाण्डोपस्कारादिमूल्यं च, आगमय्य विज्ञाय, शुल्कादिव्ययशुद्धं शुल्कादिव्ययशोधितावशेषम्, उदयं लाभं, पश्येत् समीक्षेत, सति लाभदर्शने स्वपण्यं परविषये प्रेषयेदित्यभिप्रायः । तत्र शुल्कं शुल्काध्यक्षोक्तं, देयशब्दस्य वर्तन्यादिभिः प्रत्येकमभिसम्बन्धः । वर्तनीदेयम् अन्तपालदेयम्, आतिवाहिकदेयं मार्गातिवाहनसहायभूतायुधीयदेयं, गुल्मदेयं वनस्थानिकदेयं, तरदेयं नद्याद्युत्तारकनाविकादिदेयं, भक्तं भोजनं कर्मकरबलीवर्दादिभृतिश्च, भाटकः प्रसेवकादिग्रहणार्थः प्रक्रयः । भागेति स्वपपाठ इति भाति । **असतीति** । असत्युदये लाभादर्शने, भाण्डनिर्वहणेन स्वपण्यस्य परदेशनयनेन लाभकालप्रतीक्षापूर्वक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सारपादेन स्थलव्यवहारमध्वना क्षेमेण प्रयोजयेत् । अटव्यन्तपालपुरराष्ट्रमुख्यैश्च प्रतिसंसर्गं गच्छेदनुग्रहार्थम् ।

आपदि सारमात्मानं वा मोक्षयेत् । आत्मनो वा भूमिमप्राप्तः सर्वदेयविशुद्धं व्यवहरेत् ।

वारिपथे च यानभाटकपथ्यदनपण्यप्रतिपण्यार्घप्रमाणयात्राकालभयप्रतीकारपण्यपत्तनचारित्राण्युपलभेत ।

विक्रयद्वारेण, लाभं पश्येत् । वा अथवा, पण्यप्रतिपण्यार्घेण स्वपण्यस्य प्रतिपण्यार्घकरणेन स्वपण्यदानपूर्वकप्रियपण्यान्तरग्रहणेनेत्यर्थः, लाभं पश्येत् । **तत** इति । ततः लाभदर्शनानन्तरं, सारपादेन समीक्षितलाभचतुर्थांशव्ययेन, स्थलव्यवहारं सुलभापायो जलपथ इति कृत्वा स्थलपथव्यवहारं, क्षेमेणाध्वना स्थलपथेनापि चोराद्युपद्रवरहितेन, प्रयोजयेत् । अटव्यन्तपालपुरराष्ट्रमुख्यैश्च अटवीपालान्तपालपुरमुख्यराष्ट्रमुख्यैश्च सह, प्रतिसंसर्गं सोपदानं संगतं, गच्छेद्, अनुग्रहार्थं तदानुकूल्यार्थम् ।

आपदीति । आपदि चोरोपरोधे, सारं रत्नादिद्रव्यम्, आत्मानं वा स्वशरीरं च, मोक्षयेत् रक्षेत् । इदं च सति सम्भवे । उभयमोक्षणासौकर्ये तु सारपरित्यागेनात्मैव मोक्षणीयः । यदाहुः—

"शरीरमर्थाद् गोप्तव्यं राजगुह्यभयार्दितम् ।
वित्तहीनोऽल्पवित्तो वा जीवन् भद्राणि पश्यति ॥"

इति । **आत्मनो वेति** । आत्मनो वा भूमिमप्राप्तः स्वपण्यविक्रयभूमिभूतात् परविषयात् स्वविषयमप्रत्यागतः, परविषयवासकाले कृत्स्नेऽपीत्यर्थः, सर्वदेयविशुद्धं व्यवहरेत् शुल्कादिनिखिलदेयाप्रदानापराधविधुरं विक्रयव्यवहारं कुर्यात्, स्वल्पप्रत्याशया सर्वनाशो मा भूदिति ।

वारिपथे चेति । जलपथे च, यानभाटकादीनि, उपलभेत ज्ञात्वा तदनुरोधेन व्यवहरेत् । तत्र यानभाटकः नाविकभृतिः, पथ्यदनं मार्गभक्तं, पण्यप्रतिपण्यार्घप्रमाणं पण्यप्रतिपण्ययोरर्घतारतम्यं, यात्राकालः यात्रार्हऋतुविशेषलक्षणो गतागतापेक्षितकालेयत्ता वा, भयप्रतीकारः सम्भाविततस्करादिभयप्रतिविधिः, पण्यपत्तनचारित्रं स्वपण्यविक्रयस्थानभूतपरकीयपत्तनसमुदाचारः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नदीपथे च विज्ञाय व्यवहारं चरित्रतः ।
यतो लाभस्ततो गच्छेदलाभं परिवर्जयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
षोडशोऽध्यायः पण्याध्यक्षः,
आदितः सप्तत्रिंशः ॥

अध्यायान्ते श्लोकमाह — **नदीपथे** चेति । नदीपथे च न केवलं समुद्रमार्गे किन्तु नदीमार्गेऽपि, व्यवहारं वाणिज्यं, चरित्रतः तत्तद्देशाचारानुरोधेन, विज्ञाय, यतो येन पथा, लाभः, ततो गच्छेत् । अलाभम् अल्पलाभं क्षयव्ययप्रवासादिमहाक्लेशाननुरूपलाभं जलपथं, परिवर्जयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
षोडशोऽध्यायः पण्याध्यक्षः,
आदितः सप्तत्रिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३५. प्रक. कुप्याध्यक्षः।

कुप्याध्यक्षो द्रव्यवनपालैः कुप्यमानाययेत् । द्रव्यवनकर्मान्तांश्च प्रयोजयेत् । द्रव्यवनाच्छिदां च देयमत्ययं च स्थापयेदन्यत्रापद्भ्यः ।

कुप्यवर्गः — शाकतिनिशधन्वनार्जुनमधूकतिलकसालशिंशपारिमेदराजादनशिरीषखदिरसरलतालसर्जाश्वकर्णसोमवल्ककशाम्रप्रियकधवादिः सारदारुवर्गः ।

कुप्याध्यक्ष इति सूत्रम् । कुप्यं सारदारुवेणुवल्लिवल्कादि, तत्र नियुक्तः कुप्याध्यक्षः, अर्थात् तस्य व्यापारः कुप्यविषय इहोच्यत इति सूत्रार्थः । कोशप्रवेश्यरत्नपरीक्षायां रत्नसारफल्गुकुप्यान्युपक्रम्य रत्नसारफल्गुप्रतिग्रहणमुक्तं, कुप्यस्य त्वनुक्तमिहोच्यत इति सम्बन्धः । अथवा 'सन्निधाता कोशगृहमि'त्यादिना कुप्यगृहविधानं पूर्वमुक्तं, तदध्यक्षव्यापारस्त्वधुनोच्यत इति ।

कुप्याध्यक्ष इत्यादि । कुप्याध्यक्षः, द्रव्यवनपालैः वार्क्षवनरक्षिभिः, कुप्यं सारदार्वादि, आनाययेद् आवाहयेत् । द्रव्यवनकर्मान्तांश्च दारुनिर्मेयान् गृहशकटादिकान्, प्रयोजयेत् कारयेत् । द्रव्यवनच्छिदां च द्रव्यवनच्छेदोपजीविनां च वृक्षमर्मज्ञानां, देयं छेदनीयशिरश्शाखास्कन्धमूलभागभेदेन छेदनदुर्गतारणाद्यर्थं प्रदेयं वेतनं, स्थापयेद् एतावदिति व्यवस्थापयेत् । अत्ययं च दण्डं चाननुज्ञातच्छेदने, स्थापयेत् । किं सर्वदा, नेत्याह — अन्यत्रापद्भ्य इति । शकटयुगभङ्गादिविपत्प्राप्तौ तु कालविलम्बासहयुगयोजनाद्यर्थे अननुज्ञातच्छेदनं नापराधः ।

कुप्यवर्ग इति । वक्ष्यत इति शेषः । अयं चाधिकारः । तत्र शाकाद्येकविंशतिः सारदारुवर्ग इत्याह — शाकतिनिशेत्यादि । शाकः पृथुच्छदाख्यो वृक्षः, तिनिशो नेमी, धन्वनः धनुर्वृक्षः, अर्जुनः ककुभः, मधूकः मधुद्रुमः, तिलकः क्षुरकः, सालः कार्ष्यकाख्यः, शिंशपा तीक्ष्णधूमाख्या, अरिमेदः विट्खदिरः पूतिखदिराख्यः, राजादनः फलाध्यक्षाख्यः, शिरीषः कपीतनः, खदिरस्तिक्तसाराख्यः, सरलः पूतिकाष्ठाख्यः तालः तृणद्रुमः, सर्जः पीतसालकः, अश्वकर्णः सर्जभेदः, सोमवल्कः सितखदिरः, कशः लोमशपुच्छको नकुलवृक्षभेदः, आम्रश्चूतः, प्रियकः गौरसर्जः, धवः धुरन्धराख्यः, आदिग्रहणमनुक्तसंग्रहार्थम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उटजचिमियचापवेणुवंशसातीनकण्टकभाल्लूकादिर्वेणुवर्गः ।

वेत्रशीकवल्लीवाशीश्यामलतानागलतादिर्वल्लीवर्गः ।

मालतीमूर्वार्कशणगवेधुकातस्यादिर्वल्कवर्गः ।

मुञ्जबल्वजादि रज्जुभाण्डम् । तालीतालभूर्जानां पत्रम् । किंशुककुसुम्भकुङ्कुमानां पुष्पम् ।

कन्दमूलफलादिरौषधवर्गः ।

कालकूटवत्सनाभहालाहलमेषशृङ्गमुस्ताकुष्ठमहाविषवेल्लितकगौ-

वेणुवर्गमाह — **उटजेत्यादि** । उटजो महासुषिरस्तनुकण्टकः कर्कशपृष्ठः, चिमियो निस्सुषिरो मृदुत्वक्कः, चापः स्वल्पसुषिरोऽतिखरश्च, वेणुर्निष्कण्टकश्चापयोग्यः, वंशो दीर्घपर्वकः सरन्ध्रः सकण्टकश्च, सातीनकण्टकौ वेणुभेदौ, भाल्लूकः स्थूलदीर्घो महाप्रमाणो निष्कण्टकः ।

वल्लीवर्गमाह — **वेत्रेत्यादि** । वेत्रं प्रसिद्धं, शीकवल्ली हंसवल्लीति देशविशेषप्रसिद्धा, वाशी अर्जुनपुष्पसमानपुष्पा, श्यामलता त्रिपुटीसदृशी, नागलता नागजिह्वा ।

वल्कवर्गमाह — **मालतीत्यादि** । मालती माहुलानीति देशविशेषप्रसिद्धा, मूर्वा मरुलिति द्रविडप्रसिद्धा, अर्कः शणोऽतसी च प्रतीताः, गवेधुका नागबला ।

रज्जुभाण्डादिकमाह — **मुञ्जेत्यादि** । मुञ्जबल्वजादि मुञ्जः शरः बल्बजास्तृणविशेषः इत्येवमादि, रज्जुनिर्माणसाधनम् । तालीत्यादि । तालीतालभूर्जाः प्रसिद्धाः तेषां पत्रं लेख्योपयोगि । किंशुककुसुम्भकुङ्कुमानां, पुष्पं वस्त्रादिरञ्जनसाधनम् ।

ओषधिवर्गमाह — **कन्दमूलेत्यादि** । कन्दाः सूरणादयः मूलान्युशीरादीनि फलानि आमलकहरीतक्यादीनि एतदादिः ओषधिवर्गः ।

विषवर्गमाह — **कालकूटेत्यादि** । कालकूटोऽश्वत्थपत्राकृतिपत्रो वृक्षः पर्वान्तराच्छुष्कमार्द्रं च निर्यासमुद्गिरति । वत्सस्येव नाभिरस्य वत्सनाभः, निर्गुण्डीसदृशपत्रं सूचीपत्रं नीलपल्लवं गोस्तनाकृतिफलं हालाहलं, मेषशृङ्गमुत्पलमुकुलाकारं, मुस्ता द्विविधा मुस्ताकारा खण्डशर्करोपमा च, शङ्खपाण्डरा चेति स्वामी, कुष्ठं कुष्ठसमानकन्दं, महाविषं मांसवर्णं स्तनचूचुकाकारं,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रार्द्रबालकमार्कटहैमवतकालिङ्गकदारदकाङ्कोलसारकोष्ट्रकादीनि विषाणि ।

सर्पाः कीटाश्च । त एव कुम्भगताः । विषवर्गः ।

गोधासेरकद्वीपिशिंशुमारसिंहव्याघ्रहस्तिमहिषचमरसृमरखड्गगोमृगगवयानां चर्मास्थिपित्तस्नाय्वस्थि(?)दन्तशृङ्गखुरपुच्छानि, अन्येषां वापि मृगपशुपक्षिव्यालानाम् ।

कालायसताम्रवृत्तकांस्यसीसत्रपुवैकृन्तकारकूटानि लोहानि ।

वेल्लितकं मूलजं कृष्णरक्तं, गौरार्द्रं कन्दजं कृष्णं, बालकं पिप्पल्याकारं, मार्कटं कीपिमाकारं, हैमवतं हिमवदुत्पन्नं दीर्घपत्रं, कालिङ्गकं कालिङ्गभवं यवाकृति, दारदकं दरदप्रभवं पत्रविषम्, अङ्कोलसारकम् अङ्कोलवृक्षजं विषम्, उष्ट्रकम् उष्ट्रमेढ्राकारम्, इत्येवं षोडश, आदिग्रहणादनुक्तानामेकोनसप्ततिप्रकाराणां ग्रहणम् । तदेवं स्थावराणि विषाणि पञ्चाशीतिर्भवन्ति दशाश्रयाणि । तथाच भट्टस्वामिनः श्लोकः —

"त्वक्कन्दपत्रपुष्पाणि फलं निर्यास एव च ।
मूलं सारस्तथा धातुर्बीजं चेति दशाश्रयाः ॥
अव्यक्तरसगन्धानि तीक्ष्णान्येकरसानि च ।
पञ्चाशीतिर्विषाण्येवमुपदिष्टानि तत्त्वतः ॥" इति ।

जङ्गमविषाणि द्विविधान्याह — **सर्पाः कीटाश्चेति** । सर्पाः कृष्णसर्पादयः, कीटाः चित्रभेककौण्डिन्यकादयः । उभये चैते प्रत्येकं द्विविधाः संस्कृतासंस्कृतभेदेन । तत्रासंस्कृताः स्वभावस्थिताः । संस्कृतांस्त्वाह — **त एवेति** । त एव सर्पाः कीटाश्च, कुम्भगताः औपनिषदोक्तविधानेन संस्कृत्य कुम्भे त्रपुघटे संयोजिताः । स एष विषवर्गः ।

अथ चर्मादिवर्गानाह — **गोधासेरकेत्यादि** । सेरकः गौरत्वग् गोधाभेदः, द्वीपी चित्रकायः, सृमरः शरभः, अन्ये प्रसिद्धाः, एषां चर्मादीनि कुप्याधिकारात् कुप्यसंज्ञानि संग्राह्याणि च भवन्ति । अन्येषां वापि अनुक्तानामपि मृगपशुपक्षिव्यालानां, चर्मादीनि यथोपयोगं संग्राह्याणि ।

लोहान्याह — **कालायसेत्यादि** । आकरकर्मान्तप्रवर्तनप्रकरणे पूर्वमुक्तानामपि लोहानामिह पुनः पाठः कुप्यसंज्ञार्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विदलमृत्तिकामयं भाण्डम् ।

अङ्गारतुषभस्मानि मृगपशुपक्षिव्यालवाटाः काष्ठतृणवाटाश्चेति ।

बहिरन्तश्च कर्मान्ता विभक्ताः सर्वभाण्डिकाः ।
आजीवपुररक्षार्थाः कार्याः कुप्योपजीविना ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तदशोऽध्यायः कुप्याध्यक्षः,
आदितोऽष्टात्रिंशः ॥

भाण्डमाह — विदलेत्यादि । भाण्डं, विदलमृत्तिकामयं विदलमयं वंशवेत्रादिमयं पिटकफलकादि मृत्तिकामयं कुलालभाण्डं घटशरावादि ।

अङ्गारेत्यादि । अङ्गारतुषभस्मानि, मृगपशुपक्षिव्यालवाटाः मृगादीनां वाटाः स्थानानि, काष्ठतृणवाटाश्च काष्ठतृणानां समूहाश्च, कुप्यसंज्ञास्तेऽपि संग्राह्याः ।

अध्यायान्ते श्लोकमाह — बहिरिति । बहिः द्रव्यवननिकटप्रदेशे जनपदे च, अन्तश्च दुर्गाभ्यन्तरे च, कर्मान्ताः शकटादिघटनरूपाः, विभक्ताः असंकीर्णाः पृथगवस्थानाः, सर्वभाण्डिकाः सर्वविधभाण्डसम्बद्धाः, आजीवपुररक्षार्थाः आजीवार्थाः जीविकाप्रयोजनाः हलमुसलशकटादयः पुररक्षार्थाः यन्त्रायुधादयश्च, कार्याः कारयितव्याः, कुप्योपजीविना तत्तत्कुप्यशिल्पाजीवेन प्रयोज्यकर्त्रा कुप्याध्यक्षेण प्रयोजकेन ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तदशोऽध्यायः कुप्याध्यक्षः,
आदितोऽष्टात्रिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३६. प्रक. आयुधागाराध्यक्षः ।

आयुधागाराध्यक्षः साङ्ग्रामिकं दौर्गकर्मिकं परपुराभिघातिकं यन्त्रमायुधमावरणमुपकरणं च तज्जातकारुशिल्पिभिः कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कारयेत् । स्वभूमौ च स्थापयेत् । स्थानपरिवर्तनमातपप्रवातप्रदानं च बहुशः कुर्यात् । ऊष्मोपस्नेहक्रिमिभिरुपहन्यमानमन्यथा स्थापयेत् । जातिरूपलक्षणप्रमाणागममूल्यनिक्षेपैश्चोपलभेत ।

सर्वतोभद्रजामदग्न्यबहुमुखविश्वासघातिसङ्घाटियानकपर्जन्यकबाहूर्ध्वबाह्वर्धबाहूनि स्थितयन्त्राणि ।

आयुधागाराध्यक्ष इति सूत्रम् । आयुधशालाध्यक्षव्यापारोऽभिधीयत इति सूत्रार्थः । कुप्यप्रसङ्गात् तदन्तर्गतायुधप्रस्तावसङ्गतिः । अथवा सन्निधातुरायुधागारकरणं पूर्वमुक्तं, तदध्यक्षस्त्वनुक्त इहाभिधीयत इति सङ्गतिः ।

आयुधागारेत्यादि । आयुधागाराध्यक्षः, साङ्ग्रामिकं सङ्ग्रामप्रयोजनकं, दौर्गकर्मिकं दुर्गकर्म स्वदुर्गरक्षणं तत्साधकं, परपुराभिघातिकं शत्रुदुर्गविध्वंसनानुकूलं, यन्त्रं सर्वतोभद्रजामदग्न्यादि, चक्रयन्त्रमिति मूलपाठश्चिन्त्यः । आयुधं शक्तिचापादि, आवरणं लोहजालादि, उपकरणं च युग्यादि च, तज्जातकारुशिल्पिभिः तज्जातैस्तत्कर्मसमर्थैः कारुभिः स्थूलकर्मकारिभिः शिल्पिभिः सूक्ष्मकर्मकारिभिश्च, तैः कीदृशैः, कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कृतकर्मप्रमाणकालवेतना कर्मप्रमाणं कर्तव्ययन्त्रायुधादीनां सङ्ख्यासंस्थानादिमानं कालोऽवधिः वेतनं भृतिरित्येतानि कृतानि परिभाषितानि यस्यां सा तथाभूता फलनिष्पत्तिर्यन्त्रादिनिष्पत्तिर्येषां तैस्तथाभूतैः, कारयेत् । **स्वभूमौ च स्थापयेदिति** । कारितानि च तानि स्वायत्ते स्थाने निवेश्य रक्षेत् । **स्थान**परिवर्तनं स्थानात् स्थानान्तरनिवेशनम्, आतपप्रवातप्रदानम् आतपवातविसारणं च, तेषां बहुशः असकृत् त्रिचतुर्दिवसात्यासं, कुर्यात् । ऊष्मोपस्नेहक्रिमिभिः घर्मप्रस्वेदघुणकादिभिः, उपहन्यमानम्, अन्यथा प्रकारान्तरेणानुपघातहेतुना, स्थापयेत् । **जातीत्यादि** । जात्यादिभिश्च उपलभेत तानि विजानीयात् । तत्र जातिः स्वभावः पाटनादिः, रूपमृजुवक्रतादि, लक्षणं शास्त्रोक्तमुत्तमादिचिह्नं, प्रमाणं मानोन्मानतो दैर्घ्यविस्तारादिपरिच्छेदः, आगमः यतो लब्धं सः, मूल्यम् अर्घः, निक्षेपः कोशभस्त्रादिः ।

यन्त्राण्याह — **सर्वतोभद्रेत्यादि** । अत्र स्वामी व्याचष्टे — "तत्र

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्चालिकदेवदण्डसूकरिकामुसलयष्टिहस्तिवारकतालवृन्तमुद्गरद्रुघणगदास्पृक्तलाकुद्दालास्फोटिमोद्घाटिमोत्पाटिमशतघ्नीत्रिशूलचक्राणि चलयन्त्राणि ।

सर्वतोभद्रं शकटचक्रप्रमाणं तीक्ष्णनेमि कुड्यास्थितगन्धर्वहस्तस्थं भ्रमणात् सर्वतः पाषाणान् क्षिपति । अपरे तु सिद्धभूमिकायन्त्राख्यं लघुतरपाषाणक्षेपणमाचक्षते । जामदग्न्यं मध्यरन्ध्रविनिहितमहाशरं यन्त्रम् । बहुमुखं प्राकारोत्सेधाधिगतश्चक्रसन्निविष्टश्चर्मावृतस्त्रिचतुस्तलो धानुष्काधिष्ठानं च अट्टालको भवति, तत्र स्थिता धन्विनो नराः सर्वतः शरान् क्षिपन्ति । विश्वासघाति तिर्यगवस्थितो नगरस्य बहिःपरिघो यन्त्रविश्लेषणेन हन्ति । सङ्घाटि दीर्घकाष्ठसङ्घटितमट्टालकादिप्रदीपनार्थमग्नियन्त्रम् । यानकं चक्रारूढं दण्डायतं फलककोष्ठि । पर्जन्यकमग्निप्रशमनार्थमुदकयन्त्रम्, अन्ये तु—पञ्चाशद्धस्तायतं बहिः प्राकारस्य सन्ततं यन्त्रविश्लेषणेन समीपगतं व्यापादयतीत्याचक्षते । विश्वासघातिनोऽस्य च विशेषः — तत् प्रच्छन्नं लघुतरं च भवति, एतत्तु तद्विपरीतमिति । बाहुयन्त्रं पर्जन्यकार्धप्रमाणं स्तम्भद्वयं परस्पराभिमुखं यन्त्रविश्लेषणेन मारयति । ऊर्ध्वबाहु ऊर्ध्वस्थितः पर्जन्यकप्रमाणो महास्तम्भः समीपगतान् यन्त्रविश्लेषणेन हन्ति । अर्धबाहु पूर्वस्यैवार्धप्रमाणम् । इत्येवमेतानि दश स्थितयन्त्राणि" इति ।

चलयन्त्राण्याह — **पञ्चालिकेत्यादि** । पञ्चालिकं तीक्ष्णमुखनिरन्तरसारदारुफलकं प्राकाराद् बहिरुदकमध्ये शत्रुमार्गनिरोधार्थं क्रियते । देवदण्डः कीलरहितः महास्तम्भः प्रतीतरोचाभिधान इति स्वामी । स प्राकारस्योपरि स्थाप्यते । सूकरिका सूत्रचर्ममयी कार्पासोर्णादिपूर्णमध्या महाभस्त्रा प्रमाणतो गोपुराट्टालकदेवपथादीनां प्रच्छादनी बाह्यपाषाणनिवारणाय क्रियत इति केचित् । 'वेणुमयी चर्मावृता सूकराकारा प्राकारग्रहणनिवारणाय क्रियत इत्यन्ये' इति स्वामी । मुसलयष्टिः खादिरः शूलः । हस्तिवारको 'द्विमुखस्त्रिमुखो वेति केचित् । हस्त्याघाताय हस्तिपरिघ इत्यपरे' इति स्वामी । तालवृन्तं वातचक्रम् । मुद्गरः प्रसिद्धः । द्रुघणो मुद्गराकारः । गदा लगुडी । स्पृक्तला गदैव कण्टकानिचिता । कुद्दालः खनित्रम् । आस्फोटिमं चर्मावृतं चतुःस्तम्भं मृत्पाषाणक्षेपणयन्त्रम् । उद्घाटिमं मुद्गराकृतिरेव यन्त्रभेदः । उत्पाटिमं स्तम्भाद्युत्पाटनं श्येनयन्त्रम् । शतघ्नी स्थूलदीर्घकीलाचितो महास्तम्भः पर्यन्ताहितशकटचक्रः प्राकारोपरि क्रियते । त्रिशूलचक्रे प्रसिद्धे । इत्येतानि सप्तदश चलयन्त्राणि । श्लोकश्चात्र भट्टस्वामिनः —

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शक्तिप्रासकुन्तहाटकभिण्डिपालशूलतोमरवराहकर्णकणयकर्पण-त्रासिकादीनि च हलमुखानि ।

तालचापदारवशार्ङ्गाणि कार्मुककोदण्डद्रूणा धनूंषि ।

"व्यथितं भ्रामितं चैव भारयुक्तं च कारयेत् ।
पीडनाद् भ्रमणाद् भारात् त्रिधा यन्त्रं प्रवर्तते ॥" इति ।

आयुधान्याह — शक्तिप्रासेत्यादि । शक्तिः सर्वलोहमयं करवीरपत्राकृतिमुखम् अधस्ताद् गोस्तनाकारं चतुर्हस्तदीर्घमायुधं, प्रासश्चतुर्विंशत्यङ्गुलो द्विपीठः सर्वलोहमयः काष्ठगर्भश्च, कुन्तः —

"हस्ताः सप्तोत्तमः कुन्तः षड्ढस्तैश्चैव मध्यमः ।
कनिष्ठः पञ्चहस्तैस्तु कुन्तमानं प्रकीर्तितम् ॥"

इत्युक्तलक्षणः, हाटकं त्रिकण्टकं कुन्ततुल्यप्रमाणं, भिण्डिपालः कुन्त एव पृथुफलः, शूलम् एकमुखमनियतहस्तप्रमाणं, तोमरः शराकृतिशिखः —

"चतुर्हस्तः कनिष्ठस्तु चत्वारोऽर्धं च मध्यमः ।
उत्तमः पञ्चहस्तस्तु प्रमाणात् तोमरो भवेत् ॥"

इत्यभिहितत्रिभेदः, वराहकर्णः प्रास एव वराहकर्णाकृतिमुखः, कणयः सर्वलोहमय उभयतस्त्रिकण्टकाकारमुखो मध्यमुष्टिः,

"कनिष्ठो विंशतिः स्यात् तदङ्गुलानां प्रमाणतः ।
द्वाविंशतिर्मध्यमः स्याच्चतुर्विंशतिरुत्तमः ॥"

इत्युक्तप्रकारत्रयः, कर्पणः तोमरतुल्यमानो हस्तक्षेप्यः पक्षयुक्तः शरः —

"कनीयः सप्तकर्षं तु द्विपलं मध्यमं भवेत् ।
उत्तमं नवकर्षं तु कर्पणस्य पलं भवेत् ॥"

इत्युक्तत्रिप्रकारपलप्रमाणः, त्रासिका सर्वलोहमयी प्रासप्रमाणा चूडोपेता, इत्येवञ्जातीयान्यायुधानि, हलमुखानि तीक्ष्णाग्रत्वात् ।

धनूंष्याह — तालेत्यादि । तालचापदारवशार्ङ्गाणि तालं तालमयं चापं वेणुविशेषमयं दारवं धन्वनादिसारवृक्षदारुनिर्मितं शार्ङ्गं विषाणमयम् इत्येवं चतुष्प्रकृतीनि, धनूंषि भवन्ति । तानि च कार्मुककोदण्डद्रूणाः आकृतिक्रियादिभेदात् कार्मुकादिसंज्ञानि भवन्ति । तत्र कार्मुककोदण्डयोः प्रमाणलक्षणादिकं धनुर्वेदादवगन्तव्यं, 'द्रूणस्तु लोकप्रतीत' इति स्वामी ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मूर्वार्कशणगवेधुवेणुस्नायूनि ज्याः ।

वेणुशरशलाकादण्डासननाराचाश्च इषवः । तेषां मुखानि छेदनभेदनताडनान्यायसास्थिदारवाणि ।

निस्त्रिंशमण्डलाग्रासियष्टयः खड्गाः । खड्गमहिषवारणविषाणदारुवेणुमूलानि त्सरवः ।

परशुकुठारपट्टसखनित्रकुद्दालक्रकचकाण्डच्छेदनाः क्षुरकल्पाः[1] ।

यन्त्रगोष्पणमुष्टिपाषाणरोचनीदृषदश्चायुधानि ।

ज्या आह— **मूर्वेत्यादि** । स्नायुर्वायुवाहिनी नाडी । शेषं प्रतीतम् । तत्र वेणुविदलज्या कोदण्डस्यैव, अन्ययोस्त्वन्या इति स्वामी ।

इषूनाह — **वेण्वित्यादि** । तत्र वेणुरुटजचिमियादिः, शरो जात्यशराख्यः स्तम्बः, शलाका सारदारुमयी, दण्डासनोऽर्धनाराचः, नाराचः सर्वलोहमयः । चकारो भ्रमरद्रोणमक्षिकादिसंग्रहार्थ इति स्वामी । इषुकर्माण्याह — **तेषामिति** । तेषाम् इषूणां, मुखानि अग्राणि, छेदनानि कर्तनानि, भेदनानि सशोणिताभिघातदायकानि. ताडनानि अशोणितप्रहारदायकानि च भवन्ति । मुखानां प्रकृतिमाह — **आयसास्थिदारवाणी**ति । आयसानि अस्थिमयानि दारवाणि सारदारुमयानि च ।

खड्गानाह — **निस्त्रिंशेत्यादि** । तत्र निस्त्रिंशो वक्राग्रः, मण्डलाग्रः ऋजुवृत्ताकाराग्रः, असियष्टिस्तनुदीर्घाकृतिः । त्सरुप्रकृतीराह — **खड्गेत्यादि** । खड्गो गण्डकमृगः, महिषः सैरिभः, वारणो गजः इत्येतेषां विषाणानि शृङ्गाणि दारूणि सारदारूणि वेणुमूलानि वंशमूलानि च, त्सरवः खड्गमुष्टयः ।

क्षुरकल्पानाह — **परशुकुठारेत्यादि** । तत्र परशुः सर्वलोहमयश्चतुर्विंशत्यङ्गुलः, पट्टस उभयान्तत्रिशूलः, क्रकचः करपत्रं, काण्डच्छेदनः काण्डासिकः, शेषं प्रतीतम् ।

यन्त्रेत्यादि । पाषाणशब्दस्य यन्त्रादिषु प्रत्येकं संबन्धः, यन्त्रपाषाणो यन्त्रक्षेप्यपाषाणः, गोष्पणपाषाणो गोष्पणाख्ययष्टिविशेषक्षेप्यः पाषाणः, गावणेति भाषापाठः साधुतरः । मुष्टिपाषाणो मुष्टिक्षेप्यः पाषाणः, रोचनी दलनयन्त्रशिला, दृषद् महाशिला । चकारः समुच्चयार्थः । इत्येतानि आयुधानि ।

---

1. 'लक्रकचा' ख. पाठः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लोहजालजालिकापट्टकवचसूत्रकङ्कटशिंशुमारकखड्गिधेनुकहस्तिगोचर्मखुरशृङ्गसङ्घातं वर्माणि । शिरस्त्राणकण्ठत्राणकूर्पासकञ्चुकवारवाणपट्टनागोदरिकाः । पेटीचर्महस्तिकर्णतालमूलधमनिकाकवाटकिटिकाप्रतिहतवलाहकान्ताश्चावरणानि ।

हस्तिरथवाजिनां योग्याभाण्डमालङ्कारिकं सन्नाहकल्पनाश्चोपकरणानि । ऐन्द्रजालिकमौपनिषदिकं च कर्म ।

वर्माण्याह—**लोहजाले**त्यादि । लोहशब्दो जालादिषु चतुर्षु प्रत्येकं सम्बध्यते । लोहजालं सशिरस्त्राणा प्रावरणी, लोहजालिका मुण्डसन्नाहः, लोहपट्टो विबाहुसन्नाहः, लोहकवचं बाहुरहितं वक्षःपृष्ठमात्रावरणं, सूत्रकङ्कटः कार्पासादिसूत्रमयः सन्नाहः, शिंशुमारकादीनां पञ्चानां चर्मखुरशृङ्गसङ्घातश्च चतुरशिल्पिघटितानि त्वक्शफविषाणानि च, वर्माणि भवन्ति । तत्र शिंशुमारकः अम्बुकपिनामा जलचरः, खड्गी खड्गमृगः, धेनुको गोसदृशो गवय इति व्याख्येयं, सेरकपाठस्तु धेनुकस्थाने भाषाटीकायामुपलभ्यते । हस्ती गजः, गौर्वृषभः । **शिरस्त्राणे**त्यादि । शिरस्त्राणादयः सप्त च वर्माणि । तत्र शिरस्त्राणं शिरोमात्रावरणं, कण्ठत्राणं कण्ठमात्रावरणं, कूर्पासः अर्धबाहुकः, कञ्चुको जानुपर्यन्तः, वारवाणो गुल्फपर्यन्तः, पट्टो विबाहुरलोहमयः, नागोदरिका कराङ्गुलित्राणम् , इत्येतानि देहधार्याणि । करधार्याण्यावरणान्याह—**पेटी**त्यादि । पेट्यादयो नव । तत्र पेटी काष्ठवल्लीमयं खेटकं, चर्म चर्मफलकं, हस्तिकर्णः अवकुण्ठनफलकं, तालमूलं काष्ठनिर्मितं खेटकं, धमनिका सूत्रमयी, कवाटं काष्ठमयफलकभेदः, किटिका चर्मवेणुविदलमयी, अप्रतिहतः हस्तवारकाख्यः, वलाहकान्तः अप्रतिहत एव पर्यन्तबद्धलोहपट्टः, चः समुच्चये ।

उपकरणान्याह—**हस्ती**त्यादि । हस्तिरथवाजिनां, योग्याभाण्डं शिक्षापरिकरभूतं कशाङ्कुशादिकम् , आलङ्कारिकम् अलङ्कारप्रयोजनकं पताकाक्षुरप्रमालादिकं, सन्नाहकल्पनाश्च वर्मतोमरशरीरावारकादयश्च, उपकरणानि । उपकरणान्तरमाह—**ऐन्द्रे**त्यादि । ऐन्द्रजालिकं कर्म अल्पसैन्यस्य बहुसैन्यत्वप्रदर्शनमनग्नावग्निप्रदर्शनमित्येवञ्जातीयं मायिकम् , औपनिषदिकं च औपनिषदकाधिकरणोक्तं विषधूमाम्बुदूषणप्रलम्भनादिप्रयोगतत्प्रतिक्रियालक्षणं, चकारादनुक्तमन्यच्च, कर्म, उपकरणपदानुवर्तनादुपकरणसंज्ञम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कर्मान्तानां च,

इच्छामारम्भनिष्पत्तिं प्रयोगं व्याजमुद्दयम् ।
क्षयव्ययौ च जानीयात् कुप्यानामायुधेश्वरः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टादशोऽध्यायः आयुधागाराध्यक्षः,
आदित एकोनचत्वारिंशः ॥

कर्मान्तानां चेति वक्ष्यमाणश्लोकान्वयि । श्लोकमाह—**इच्छामिति**। कुप्यानां कर्मान्तानां गतप्रकृताध्यायद्वयोक्तद्रव्यसम्बन्धिनां व्यापाराणां विषये, इच्छां राजरुचिम्, आरम्भनिष्पत्तिम् आरम्भसहितां निष्पत्तिं, राजेच्छानुसारेणोपक्रममर्थसिद्धिं चेत्यर्थः। प्रयोगम् उपयोगं, व्याजं दोषं, व्याजिमिति पाठे राजपण्यविक्रयेऽन्तरग्राह्यम्, उद्दयं लाभम्। उन्नयमिति भाषापाठश्च श्रेयान् । क्षयव्ययौ च क्षयं साधनच्छेदं व्ययं कर्मकरादिभक्तादिपरिव्ययं च, जानीयात् पर्यालोचयेत्, आयुधेश्वरः आयुधागाराध्यक्षः । इदं कुप्याध्यक्षस्याप्युपलक्षणम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टादशोऽध्यायः आयुधागाराध्यक्षः,
आदित एकोनचत्वारिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३७. प्रक. तुलामानपौतवम् ।

पौतवाध्यक्षः पौतवकर्मान्तान् कारयेत् ।

धान्यमाषा दश सुवर्णमाषकः । पञ्च वा गुञ्जाः । ते षोडश सुवर्णः कर्षो वा । चतुष्कर्षं पलम् ।

अष्टाशीतिर्गौरसर्षपा रूप्यमाषकः । ते षोडश धरणम् । शैम्ब्यानि वा विंशतिः ।

विंशतितण्डुलं वज्रधरणम् ।

अर्धमाषकः, माषकः, द्वौ, चत्वारः, अष्टौ माषकाः, सुवर्णो, द्वौ, चत्वारः, अष्टौ सुवर्णाः, दश, विंशतिः, त्रिंशत्, चत्वारिंशत्, शतमिति ।

तुलामानपौतवमिति सूत्रम् । तुलाया उन्मानसाधनस्य मानस्य प्रस्थकुडुबादेश्च पौतवम् पोतुर्मानभाण्डशोधकः तस्य कर्म अकृतकरणं कृतशोधनं चेहाभिधीयत इति सूत्रार्थः । तुलाप्रतिमानं 'पौतवाध्यक्षे वक्ष्याम' इत्युक्तं सुवर्णाध्यक्षे । तदेतत् कुप्याङ्गत्वात् कुप्यानन्तरमभिधीयत इति सङ्गतिः ।

पौतवेत्यादि । पौतवाध्यक्षः पौतवाधिकृतः, पौतवकर्मान्तान् तुलाकुडुवादिघटनकर्माणि, कारयेत् ।

अभ्यर्हितत्वात् प्रथमं सुवर्णस्य प्रतिमानमाह—**धान्येत्यादि** । धान्यमाषाः दश सुवर्णमाषकः धान्यमाषदशकप्रतिमानं सुवर्णं माषकसंज्ञम् । पञ्च वा गुञ्जाः गुञ्जापञ्चकं वा, माषक इत्यनुवर्तनान्माषकसंज्ञम् । ते षोडश सुवर्णः कर्षो वा माषषोडशकं सुवर्णसंज्ञं भवति कर्षसंज्ञं वा । चतुष्कर्षं पलमिति चत्वारः कर्षाः पलाख्याः ।

रूप्यस्य प्रतिमानमाह— **अष्टाशीतिरिति** । अष्टाशीतिः गौरसर्षपाः रूप्यमाषकः रूप्यस्यैको माषकः । ते रूप्यमाषकाः, षोडश, धरणं धरणाख्याः । शैम्ब्यानि विंशतिर्वा शिम्बिफलविंशतिर्वा धरणम् ।

वज्राख्यस्य रत्नस्य प्रतिमानमाह— **विंशतीत्यादि** । विंशतितण्डुलं मध्यमाखण्डव्रीहितण्डुलप्रमाणं, वज्रधरणं भवति ।

प्रतिमानसंख्या आह — **अर्धमाषक** इति । अर्धमाषकः, माषकः, द्वौ माषकौ, चत्वारः माषकाः, अष्टौ माषकाः । सुवर्णः, द्वौ सुवर्णौ, चत्वारः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेन धरणानि व्याख्यातानि ।

प्रतिमानान्ययोमयानि मागधमेकलशैलमयानि, यानि वा नोदकप्रदेहाभ्यां वृद्धिं गच्छेयुरुष्णेन वा ह्रासम् ।

षडङ्गुलादूर्ध्वमष्टाङ्गुलोत्तराः दश तुलाः कारयेल्लोहपलादूर्ध्वमेकपलोत्तराः । यन्त्रमुभयतः शिक्यं वा ।

पञ्चत्रिंशत्पललोहां द्विसप्तत्यङ्गुलायामां समवृत्तां कारयेत् ।

सुवर्णाः, अष्टौ सुवर्णाः, दश विंशतिः त्रिंशत् चत्वारिंशत् शतम् इति चतुर्दश भवन्ति ।

सुवर्णोक्तं प्रतिमानविधिं रूप्येष्वतिदिशति — तेनेति । तेन सुवर्णप्रतिमानकथनेन, धरणानि व्याख्यातानि रूप्यधरणानामपि धरणं द्वे चत्वारि अष्टौ दश विंशतिः त्रिंशत् चत्वारिंशत् शतमित्येवं प्रतिमानसंख्या योज्या इत्यर्थः । एवं धरणग्रहणेन रूप्यमाषकाणामप्युपलक्षणाद् अर्धमाषको माषको द्वौ चत्वार इत्यादयः शतान्तसंख्यास्तत्राप्यूहनीयाः ।

कीदृशानि प्रतिमानानीत्यत्राह — प्रतिमानानीति । प्रतिमानानि, अयोमयानि लोहमयानि, मागधमेकलशैलमयानि मगधदेशोत्पन्नशिलामयानि मेकलापरनामकाटवीराज्योद्भवशिलामयानि च भवन्ति । पक्षान्तरमाह — शङ्खशुक्तिप्रभृतीनि यानि, उदकप्रदेहाभ्यां जलार्द्रीकरणमललेपाभ्यां, वृद्धिम् आधिक्यम्, उष्णेन, ह्रासं वा न्यूनतां वा, न गच्छेयुः, तन्मयानि वा भवन्ति । तन्मयानीत्येतच्च यत्पदसामर्थ्यलभ्यम् ।

दशविधास्तुला आह — षडङ्गुलादिति । षडङ्गुलात् षडङ्गुलायामात् प्रभृति, ऊर्ध्वम्, अष्टाङ्गुलोत्तराः अष्टाष्टाङ्गुलाधिकायामाः, दश तुलाः दशप्रकारास्तुलाः, कारयेत् । कियल्लोहपरिमाणाः, लोहपलादूर्ध्वमेकपलोत्तराः एकलोहपलात् प्रभृति एकैकलोहपलाधिकाः । तत्र प्रथमा षडङ्गुलायामा लोहपलप्रमाणा, द्वितीया चतुर्दशाङ्गुलायामा लोहपलद्वयप्रमाणा, तृतीया द्वाविंशत्यङ्गुलायामा त्रिपललोहा च भवतीत्यनेन क्रमेणाष्टसप्तत्यङ्गुला दशपललोहा च दशमी तुला भवति । यन्त्रमुभयतः तुलायन्त्रस्योभयोः पार्श्वयोः, शिक्यं कारयेत् मेयमानयोर्युगपद्धारणार्थम् । वाशब्दादेकतः शिक्यं वा, तयोः पर्यायधारणसम्भवात् । ता एताः सुवर्णरूप्यतुलाः ।

तदन्यतुलामाह — पञ्चत्रिंशदित्यादि । पञ्चत्रिंशत्पललोहां पञ्चत्रिंशत्पलप्रमाणलोहनिर्मितां, द्विसप्तत्यङ्गुलायामां त्रिहस्तदीर्घां, समवृत्तां तदा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तस्याः पञ्चपलिकं मण्डलं बद्ध्वा समकरणं कारयेत्। ततः कर्षोत्तरं पलं, पलोत्तरं दशपलं, द्वादश पञ्चदश विंशतिरिति पदानि कारयेत्। तत आ शताद् दशोत्तरं कारयेत्। अक्षेषु नद्ध्रीपिनद्धं कारयेत्।

द्विगुणलोहां तुलामतः षण्णवत्यङ्गुलायामां परिमाणीं कारयेत्। तस्याः शतपदादूर्ध्वं विंशतिः, पञ्चाशत्, शतमिति पदानि कारयेत्।

विंशतितौलिको भारः।

दशधरणिकं पलम्। तत्पलशतमायमानी।

पञ्चपलावरा व्यावहारिकी भाजन्यन्तःपुरभाजनी च।

ल्यां वर्तुलतयान्वितार्थां, कारयेत्। तस्याः, पञ्चपलिकं, मण्डलं चेलं, बद्ध्वा, समकरणम् अनुन्नतानवनतोभयान्तचिह्नं, कारयेत्। ततः समचिह्नात् परतः, कर्षोत्तरं पलं कर्षोऽर्धपलं पादोनपलं पलमिति, कारयेत्। ततः पलोत्तरं दशपलम् एकं पलं द्वे त्रीणि चत्वारि पञ्च षट् सप्ताष्ट नव दशेति, ततः द्वादश पञ्चदश विंशतिरिति षोडश पदानि रेखाः, कारयेत्। तत इति। ततः विंशतेरुपरि, आ शतात् शतमभिव्याप्य, दशोत्तरं दशदशाधिकं त्रिंशच्चत्वारिंशत् पञ्चाशदित्यादिकं, कारयेत्। अक्षेषु पञ्चमदशमपञ्चदशादिषु, नद्ध्रीपिनद्धं वरत्राबन्धं वरत्राकाररेखाबन्धं, कारयेद् विशेषार्थम्। स्वामिटीकादर्शे तु नान्दीपिनद्धं स्वस्तिकमिति दृश्यते।

परिमाणीसंज्ञां तुलामाह — **द्विगुणेत्यादि**। अतः समवृत्तायाः, द्विगुणलोहां सप्ततिपललोहां, षण्णवत्यङ्गुलायामां चतुर्हस्तदीर्घां, परिमाणीं, कारयेत्। तस्याः शतपदादूर्ध्वं समवृत्तादर्शितदिशा कर्षादिक्रमेण कृताच्छतपदात् परतः, विंशतिः, तदूर्ध्वं पञ्चाशत्, तदूर्ध्वं शतम्, अर्थाच्छतद्वयम् इति पदानि कारयेत्।

विंशतीत्यादि। विंशतितौलिकः तुला नाम पलशतं विंशतितुलाप्रमाणः, भारः तत्संज्ञः।

अथ पूर्वोक्तात् सुवर्णपलादधिकं पलविशेषं सुवर्णरूप्यातिरिक्तद्रव्यपरिच्छेदोपयोगिनमाह — **दशधरणिकमिति**। दशधरणिकं पूर्वोक्तधरणदशकपरिमाणं, पलम्। तत्पलशतं तेषां दशधरणिकानां पलानां शतम्, आयमानी आय एव मीयते अनयेति व्युत्पत्तेरायमानीसंज्ञा तुला।

अन्यास्तिस्रस्तुला आह — **पञ्चपलावरेति**। सप्तपर्णवदिह वीप्सालोपौ। पञ्चभिः पञ्चभिः पलैः अवरा पूर्वपूर्वापेक्षया यथोत्तरं न्यूना पञ्चपला-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तासामर्धधरणावरं पलम् । द्विपलावरमुत्तरलोहम् । षडङ्गुलावराश्चायामाः ।

पूर्वयोः पञ्चपलिकः प्रयामो मांसलोहलवणमणिवर्जम् ।

काष्ठतुला अष्टहस्ता पदवती प्रतिमानवती मयूरपदाधिष्ठाना ।

काष्ठपञ्चविंशतिपलं तण्डुलप्रस्थसाधनम् । एष प्रदेशो बह्वल्पयोः ।

वरा तुला, व्यावहारिकी तदाख्या क्रयविक्रयोपयोगिनी, भाजनी तदाख्या भृत्यदेयार्था, अन्तःपुरभाजनी तदाख्या देवीकुमारादिदेयार्था च भवति । तत्र प्रथमा आयमानीतः पञ्चपलन्यूना पञ्चनवतिपला, द्वितीया व्यावहारिकीतस्तावन्न्यूना नवतिपला, तृतीया भाजनीतस्तावन्न्यूना पञ्चाशीतिपलेति विवेकः ।

व्यावहारिक्यादीनामपि पलादिमाने परस्परविशेषमाह — **तासामि**त्यादि । तासां व्यावहारिक्यादीनाम्, अर्धधरणावरम् अर्धेनार्धेन धरणेन **पूर्वपूर्वा**पेक्षया न्यूनं, पलं भवति । तद्यथा — दशधरणिकादायमानीपलादर्धोनं सार्धनवधरणिकं पलं व्यावहारिक्याः, ततोऽर्धोनं नवधरणिकं भाजन्याः, ततोऽर्धोनं सार्धाष्टधरणिकमन्तःपुरभाजन्या इति । द्विपलावरं द्वाभ्यां द्वाभ्यां पलाभ्यां पूर्वपूर्वतो न्यूनम्, उत्तरलोहम् उत्तरासां लोहं भवति । षडङ्गुलावराश्च षट्षडङ्गुलन्यूनाश्च, आयामाः दैर्घ्याणि भवन्ति, अर्थादुत्तरासाम् । तद्यथा — पञ्चत्रिंशत्पललोहा द्विसप्तत्यङ्गुलायामा च यद्यायमानी, तदा त्रयस्त्रिंशत्पललोहा षट्षष्ट्यङ्गुलायामा च व्यावहारिकी भवति, एकत्रिंशत्पललोहा षष्ट्यङ्गुलायामा च भाजनी, एकोनत्रिंशत्पललोहा चतुष्पञ्चाशदङ्गुलायामा चान्तःपुरभाजनीति ।

प्रयाममाह—**पूर्वयो**रिति । पूर्वयोः परिमाण्यायमान्योः, पञ्चपलिकः प्रयामः पलशते पञ्चपलमधिकदेयं भवति । मांसलोहलवणमणिवर्जं मांसलोहादीन् वर्जयित्वा, तेषां तु न प्रयामः ।

काष्ठतुलामाह — **काष्ठे**त्यादि । काष्ठतुला सारदारुप्रकृतिस्तुला, अष्टहस्ता, पदवती एकद्वित्र्यादिपदरेखोपेता, प्रतिमानवती प्रमाणपाषाणयुक्ता, मयूरपदाधिष्ठाना मयूरपदौ तदाकारस्तम्भौ अधिष्ठानमाधारो यस्यास्तादृशी, मयूरपदाधिष्ठितेति पाठे मयूरपदाश्रितेत्यर्थः । कर्तव्या ।

काष्ठपञ्चविंशतीत्यादि । काष्ठपञ्चविंशतिपलम् इन्धनपलपञ्चविंशतिः, तण्डुलप्रस्थसाधनं प्रस्थमिततण्डुलपाकनिष्पादकं भवति । **एष प्रदेशो बह्वल्पयो**रिति । प्रस्थाधिकतण्डुलस्य प्रस्थन्यूनतण्डुलस्य चायमेव पाकापेक्षितकाष्ठ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति तुलाप्रतिमानं व्याख्यातम् ।

अथ धान्यमाषद्विपलशतं द्रोणमायमानम् । सप्ताशीतिपलशतमर्धपलं च व्यावहारिकम् । पञ्चसप्ततिपलशतं भाजनीयम् । द्विषष्टिपलशतमर्धपलं चान्तःपुरभाजनीयम् ।

तेषामाढकप्रस्थकुडुबाश्चतुर्भागावराः ।

षोडशद्रोणा खारी, विंशतिद्रोणिकः कुम्भः, कुम्भैर्दशभिर्वहः ।

शुष्कसारदारुमयं समं चतुर्भागशिखं मानं कारयेत् । अन्तःशिखं वा । रसस्य तु ।

मानव्यवस्थापनमार्गः । एतच्च कोष्ठागाराध्यक्षशेषम् असारस्याप्यमितो व्ययो न कर्तव्यः किमुत सारस्येति सामान्यज्ञापनद्वारेण प्राकरणिकेषु मानेष्ववधानोपदेशार्थं द्रष्टव्यम् ।

इति तुलेत्यादि । इति उक्तप्रकारेण, तुलाप्रतिमानं व्यारूयातं तुलाः षोडशविधाः प्रतिमानानि च चतुर्दशविधानि निरूपितानि ।

अथ द्रोणाढकादिनिरूपणमारभते — **अथेत्यादि** । धान्यमाषद्विपलशतं तुलाद्वयमितधान्यमाषपूरणीयम्, आयमानं नाम द्रोणम् । **सप्ताशीतिपलशतमर्धपलं चेति** । अर्थादायमानद्रोणादर्धत्रयोदशभिः पलैर्न्यूनं, व्यावहारिकं नाम द्रोणं भवति । **पञ्चसप्ततिपलशतमिति** । अर्थाद् व्यावहारिकद्रोणादर्धत्रयोदशपलैर्न्यूनं, भाजनीयं नाम द्रोणं भवति । **द्विषष्टिपलशतमर्धपलं चेति** । अर्थाद् भाजनीयद्रोणाद् अर्धत्रयोदशपलैर्न्यूनम्, अन्तःपुरभाजनीयं नाम द्रोणं भवति । इति चतुर्विधं द्रोणम् ।

तेषामिति । तेषां चतुर्णां द्रोणानाम्, आढकप्रस्थकुडुबाः, चतुर्भागावराः क्रमेण चतुर्भागाः अवराः स्वस्वपूर्वचतुर्भागात्मका अत एव स्वस्वपूर्वतो निकृष्टाश्चेत्यर्थः । एतदुक्तं भवति — द्रोणचतुर्भाग आढक आढकचतुर्भागः प्रस्थः प्रस्थचतुर्भागः कुडुब इति ।

द्रोणादुत्कृष्टान् मानविशेषानाह — **षोडशेत्यादि** । षोडशद्रोणमिता खारी, विंशतिद्रोणमितः कुम्भः, दशकुम्भमितो वहः ।

मानसाधनान्याह — **शुष्केत्यादि** । शुष्कसारदारुमयं, समं तुल्यमूलाग्रं चतुर्भागशिखं शिखा मुखोपरितनावकाशः आ मुखाद् भागत्रयवतः शिखायां मेयचतुर्भागो यथा तिष्ठेत् तथा कृतशिखं, मानं, कारयेत् । अन्त-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुरायाः पुष्पफलयोः तुषाङ्गाराणां सुधायाश्च शिखामानं द्विगुणोत्तरा वृद्धिः ।

सपादपणो द्रोणमूल्यम् । आढकस्य पादोनः । षण्माषकाः प्रस्थस्य । माषकः कुडुबस्य ।

द्विगुणं रसादीनां मानमूल्यम् ।

विंशतिपणाः प्रतिमानस्य । तुलामूल्यं त्रिभागः ।

चतुर्मासिकं प्रातिवेधनिकं कारयेत् । अप्रतिविद्धस्यात्ययः सपादः सप्तविंशतिपणः । प्रातिवेधनिकं काकणिकमहरहः पौतवाध्यक्षाय दद्युः ।

शिखं वा अन्तर्गता आमूलमुखान्तावकाशान्तःप्रविष्टा शिखा पूर्वोक्तश्चतुर्भागावकाशो यस्य तत् तथाभूतं वा, मानं कारयेत् । धान्यादिमाने चायं विकल्पः । **रसस्य त्विति** । अन्तश्शिखमित्यनुवर्तते । तत्र तुशब्दोऽवधारणार्थः सम्बध्यते । तदयमर्थः—रसस्य घृततैलादेरन्तश्शिखमेव मानं भवतीति ।

सुराया इत्यादि । सुरादीनां षण्णां शिखामानम् अस्ति । किन्तु द्विगुणोत्तरा वृद्धिः द्विगुणाधिका तस्य वृद्धिः । धान्यादिषु शिखामानं यदुक्तं चतुर्भागात्मकं तदिह द्वैगुण्यं यातीत्यर्थः । अतश्च सुरादीनां प्रस्थः पञ्चभिरेव कुडुबैर्भवति, न तु धान्यानामिव चतुर्भिः । तत्रापि सुरायाः बहिश्शिखासम्भवाभावात् प्रस्थोऽन्तश्शिखोऽर्थादन्तःप्रविष्टपञ्चकुडुबः कार्यः ।

तुलामानभाण्डस्य मूल्यमाह — **सपादपण** इत्यादि । **माषकः कुडुबस्येत्ये**तदन्तमतिरोहितार्थम् ।

द्विगुणमिति । रसादीनां घृततैलादीनां, द्विगुणं सपादपणादिपूर्वोक्तद्विगुणमर्धतृतीयपणादिकं, द्रोणादिमूल्यं भवति । धान्यमानापेक्षया रसादिमानानामन्तश्शिखत्वेन रूपपृथुत्वात् श्लक्ष्णतरदारुघटितत्वाच्च मूल्यद्वैगुण्योपपत्तिः ।

विंशतीत्यादि । प्रतिमानस्य चतुर्दशविधप्रतिमानसमुदायस्य, विंशतिपणाः, मूल्यम् । **तुलामूल्यमित्यादि** । तुलामूल्यम् अनन्तरोक्तस्य विंशतिपणात्मकस्य प्रतिमानमूल्यस्य त्रिभागः ।

चतुरित्यादि । चतुर्मासिकं चतुर्षु चतुर्षु मासेषु भवं, प्रतिवेधनमेव प्रातिवेधनिकं परिशोधनं, विनयादित्वाट्ठक् । कारयेत् । **अप्रतिविद्धस्येति** । अप्रतिविद्धस्य अपरिशोधितस्य तुलामानस्य, व्यवहारे, अत्ययो दण्डः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वात्रिंशद्भागस्तप्तव्याजी सर्पिषश्चतुष्षष्टिभागस्तैलस्य । पञ्चाशद्भागो मानस्रावो द्रवाणाम् ।

कुडुबार्धचतुरष्टभागानि मानानि कारयेत् ।
कुडुबाश्चतुरशीतिर्वारकः सर्पिषो मतः ।
चतुष्षष्टिस्तु तैलस्य पादश्च घटिकानयोः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनविंशोऽध्यायः तुलामानपौतवम्,
आदितश्चत्वारिंशः ॥

सपादः सप्तविंशतिपणः । **प्रातिवेधनिकमिति** । प्रातिवेधनिकं परिशोधननिमित्तं, काकणिकम् , अहरहः प्रतिदिनं, पौतवाध्यक्षाय, दद्युः, दिवसस्यैका काकणीति क्रमेण मासचतुष्टयस्य सविंशति काकणीनां शतं शोधनकाले तुलामानव्यवहारिणोऽर्पयेयुरित्यर्थः ।

रसादिप्रसङ्गाद् घृतादिगतं किञ्चिदाह — **द्वात्रिंशदित्यादि** । सर्पिषः घृतस्य विलापितस्य क्रीयमाणस्य, द्वात्रिंशद्भागः अधिकतया ग्राह्य इति वाक्यशेषः । तप्तव्याजी स तप्तव्याजीसंज्ञः । तैलस्य, चतुःषष्टिभागः ग्राह्यः । **पञ्चाशद्भाग** इति । पञ्चाशद्भागो मानस्रावः तदाख्यो, द्रवाणां ग्राह्यः । द्रवसामान्यविषयोऽयं मानस्रावः सर्पिस्तैलयोर्यथोक्तव्याज्या सह समुच्चीयत इत्याहुः ।

कुडुबादीनामल्पपरिमाणानां मानसाधनान्याह — **कुडुबार्धेत्यादि** । प्रस्थचतुर्भागः कुडुब उक्तः । तस्य मानसाधनं कुडुबं कुडुबार्धं कुडुबचतुर्भागं कुडुबाष्टभागम् इत्येतानि मानानि, कारयेत् निर्मापयेत् ।

अध्यायान्ते श्लोकमाह — **कुडुबा इत्यादि** । सर्पिषः, चतुरशीतिः कुडुबाः यत्र मान्ति, स वारकस्तत्संज्ञः, मतः । तैलस्य तु, चतुःषष्टिः कुडुवाः यत्र मान्ति, स वारकः । अनयोः सर्पिर्वारकतैलवारकयोः, पादः चतुर्भागः, घटिका सर्पिर्घटिकाख्या तैलघटिकाख्या च, मता ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनविंशोऽध्यायस्तुलामानपौतवम् ,
आदितश्चत्वारिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३८. प्रक. देशकालमानम् ।

मानाध्यक्षो देशकालमानं विद्यात् ।

अष्टौ परमाणवो रथचक्रविप्रुट् । ता अष्टौ लिक्षा । ता अष्टौ यूकामध्यः । ते अष्टौ यवमध्यः । अष्टौ यवमध्याः अङ्गुलम् ।

मध्यमस्य पुरुषस्य मध्यमाया अङ्गुल्या मध्यप्रकर्षो वाङ्गुलम् ।

चतुरङ्गुलो धनुर्ग्रहः । अष्टाङ्गुला धनुर्मुष्टिः ।

देशकालमानमिति सूत्रम् । देशो भूमिस्तद्विकारः प्राकारस्तम्भादिः कालस्त्रुटिलवादिः तयोर्मानमिति सूत्रार्थः । 'द्वादशहस्तादूर्ध्वमोजं युग्मं वा आ चतुर्विंशतिहस्ताद्' इति दुर्गविधाने, 'चतुर्दण्डान्तरा रथ्याः' 'पञ्चारत्नयो रथपथः' इति दुर्गनिवेशेऽन्यत्र च हस्तदण्डारत्न्यादीनां व्यवहारः कृतः । तेषां प्रमाणं तु नोक्तम् । तथा 'पूर्वे दिवसस्याष्टभागे रक्षाविधानमायव्ययौ च शृणुयाद्' इत्येवं राजप्रणिधौ कालविभाग उक्तः । तस्य मानं तु नोक्तम् । तदुभयमिह मानप्रसङ्गादुच्यत इति सङ्गतिः ।

मानाध्यक्ष इति । मानाध्यक्षः पौतवाध्यक्षः, देशकालमानं, विधात् वक्ष्यमाणप्रकारेण जानीयात् ।

अष्टाविति । अष्टौ, परमाणवः अतीन्द्रिया अणवः संहताः, रथचक्रविप्रुट् रथचक्रोत्थापितं चक्षुर्ग्राह्यमेकं रजो भवति ! ता विप्रुषः, अष्टौ, लिक्षा । ता अष्टौ लिक्षाः, यूकामध्यः । ते यूकामध्याः, अष्टौ, यवमध्यः । अष्टौ यवमध्याः अङ्गुलमेकम् ।

अङ्गुलस्य प्रकारान्तरमाह— **मध्यमस्ये**त्यादि । अङ्गुलशतोत्सेधोऽर्धनवत्यङ्गुलपरिणाहो मध्यमः पुरुषः इति स्वामी । मध्यमस्य पुरुषस्य, मध्यमायाः अङ्गुल्याः हस्तमध्यमाङ्गुल्याः, मध्यप्रकर्षो मध्यप्रदेशपृथुत्वातिशयो वा, अङ्गुलम् ।

चतुरङ्गुल इति । चत्वार्यङ्गुलानि, धनुर्ग्रहः धनुर्ग्रहसंज्ञानि । **अष्टाङ्गुले**ति । धनुर्ग्रहद्विगुणा धनुर्मुष्टिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वादशाङ्गुला वितस्तिः छायापौरुषं च । चतुर्दशाङ्गुलं शमः शलः परिरयः पदं च । द्विवितस्तिररत्निः प्राजापत्यो हस्तः ।

सधनुर्ग्रहः पौतवविवीतमानम् । सधनुर्मुष्टिः किष्कुः कंसो वा ।

द्विचत्वारिंशदङ्गुलस्तक्ष्णः क्राकचिककिष्कुः स्कन्धावारदुर्गराजपरिग्रहमानम् । चतुष्पञ्चाशदङ्गुलः कुप्यवनहस्तः ।

चतुरशीत्यङ्गुलो व्यामो रज्जुमानं खातपौरुषं च ।

चतुररत्निर्दण्डो धनुर्नालिका पौरुषं च ।

गार्हपत्यमष्टशताङ्गुलं धनुः पथिप्राकारमानम् । पौरुषं च अग्निचित्यानाम् ।

द्वादशेत्यादि । द्वादशाङ्गुला वितस्तिः तदाख्या । छायापौरुषं चेति छायापौरुषं शङ्कुप्रमाणं, तदपि द्वादशाङ्गुलमित्यर्थः । चतुर्दशेत्यादि । चतुर्दशाङ्गुलं शमसंज्ञं शलसंज्ञं परिरयसंज्ञं पदसंज्ञं च । द्विवितस्तिरिति । चतुर्विंशत्यङ्गुलोऽरत्निः । स प्राजापत्यो विश्वकर्मसम्मतो हस्तः ।

सधनुर्ग्रह इति । धनुर्ग्रहयुक्तः चतुरङ्गुलाधिकः प्राजापत्यः अर्थादष्टाविंशत्यङ्गुलमानं पौतवविवीतमानं काष्ठतुलादेः पथ्यर्थक्षेत्रादेश्च हस्तमानं भवति । सधनुर्मुष्टिरिति । अष्टाङ्गुलाधिकः प्राजापत्यः किष्कुसंज्ञः कंससंज्ञो वा ।

द्विचत्वारिंशदित्यादि । द्विचत्वारिंशदङ्गुलः हस्तः, तक्ष्णः वर्धकेः कर्मणि, क्राकचिककिष्कुः करपत्रकर्ममानोपयोगी किष्कुः, स्कन्धावारदुर्गराजपरिग्रहमानं स्कन्धावारादीनां च मानं, भवति । चतुष्पञ्चाशदित्यादि । चतुष्पञ्चाशदङ्गुलः, कुप्यवनहस्तः द्रव्यवनकर्ममानहस्तः ।

चतुरशीतीत्यादि । चतुरशीत्यङ्गुलः हस्तः, व्यामः, स च रज्जुमानं, खातपौरुषं च कूपादेः पुरुषमानं च भवति ।

चतुररत्निरिति । चः संज्ञासमुच्चये । चतुररत्निप्रमाणस्य दण्डः धनुः नालिका पौरुषम् इति चतस्रः संज्ञाः ।

गार्हपत्यमिति । गृहपतिर्विश्वकर्मा तद्दृष्टं गार्हपत्यम्, अष्टशताङ्गुलं, धनुः तदाख्यम् । तच्च पथिप्राकारमानम् अध्वमानं प्राकारमानं च भवति । पौरुषं चेति । पुरुषमानम्, अग्निचित्यानाम् अग्निचयनविशेषाणाम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

षट्कंसो दण्डो ब्रह्मदेयातिथ्यमानम्। दशदण्डा रज्जुः। द्विरज्जुकः परिदेशः। त्रिरज्जुकं निवर्तनम्।

एकतो द्विदण्डाधिको बाहुः। द्विधनुस्सहस्रं गोरुतम्। चतुर्गोरुतं योजनम्। इति देशमानम्।

कालमानमत ऊर्ध्वम्। तुटो लवो निमेषः काष्ठा कला नालिका मुहूर्तः पूर्वापरभागौ दिवसो रात्रिः पक्षो मास ऋतुरयनं संवत्सरो युगमिति कालाः।

निमेषचतुर्भागस्तुटः।
द्वौ तुटौ लवः।
द्वौ लवौ निमेषः।
पञ्च निमेषाः काष्ठा।
त्रिंशत् काष्ठाः कला।
चत्वारिंशत् कला नाडिका।

षट्कंस इत्यादि। कंसषट्कप्रमाणः अर्थात् प्राजापत्यहस्ताष्टकप्रमाणः, दण्डः। सः ब्रह्मदेयातिथ्यमानं ब्रह्मदेयानाम् आतिथ्यानां च मानं भवति। ब्रह्मदेयानि ऋत्विगादिब्राह्मणदेयानि, आतिथ्यानि अतिथिभोजनार्थविसृष्टक्षेत्राणि। दशदण्डेति। अर्थाच्चत्वारिंशद्धस्तप्रमाणा, रज्जुः। द्विरज्जुक इति। विंशतिदण्डप्रमाणः, परिदेशः। त्रिरज्जुकमिति। त्रिंशद्दण्डप्रमाणं, निवर्तनं चतुरश्रनिवर्तनम्।

एकतो द्विदण्डाधिक इति। निवर्तनस्यैवैकपार्श्वे दण्डद्वयाधिकप्रमाणः पार्श्वान्तरेष्वनधिकप्रमाणः अर्थाद् द्वात्रिंशद्दण्डदीर्घस्त्रिंशद्दण्डविस्तारश्च मानविशेषः, बाहुस्तत्संज्ञः। द्विधनुस्सहस्रमिति। धनुस्सहस्रद्वयप्रमाणं, गोरुतम्। स क्रोश इति व्यवह्रियते। चतुर्गोरुतमिति। अर्थात् क्रोशचतुष्टयं योजनसंज्ञम्। इति देशमानमिति। व्याख्यातमिति शेषः।

कालमानमित्यादि। व्याख्यास्यत इति शेषः। कालं सप्तदशधा विभजते — तुट इत्यादि।

तुटादीनि व्याचष्टे — निमेषेत्यादि। निमेषचतुर्भागः कालपरमाणुरिति स्वामी। परमाणुद्वयमिति भाषा। स तुटः तुटसंज्ञः। अयं तुटिस्त्रुटिरिति चोच्यते।

द्वौ तुटावित्यादि चत्वारिंशत्कला नाडिकेत्यन्तमतिरोहितम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुवर्णमाषकाश्चत्वारश्चतुरङ्गुलायामाः कुम्भच्छिद्रमाढकमम्भसो वा नालिका ।

द्विनालिको मुहूर्तः । पञ्चदशमुहूर्तो दिवसो रात्रिश्च चैत्रे मास्याश्वयुजे च मासि भवतः । ततः परं त्रिभिर्मुहूर्तैरन्यतरः षण्मासं वर्धते ह्रसते चेति ।

छायायामष्टपौरुष्यामष्टादशभागश्छेदः, षट्पौरुष्यां चतुर्दशभागः, चतुष्पौरुष्यामष्टभागः, द्विपौरुष्यां षड्भागः, पौरुष्यां चतुर्भागः,

---

नालिकायाः प्रकारान्तरमाह — **सुवर्णे**त्यादि । सुवर्णमाषकाश्चत्वारश्चतुरङ्गुलायामा इति मेयमानयोरभेदोपचारात् सुवर्णमाषकचतुष्टयप्रमाणा चतुरङ्गुलदीर्घा जलनिर्गमनालशलाकोच्यते, कुम्भच्छिद्रं तत्समानं जलधारकघटच्छिद्रम्, आढकमम्भसः तत्कुम्भगतमाढकमितं जलम्, इतिशब्द इहाध्याहार्यः, इति वा नालिका इत्येतत्त्रितययोगेन वा नालिका परिच्छिद्यते । यथोक्तमानशलाकायुक्तच्छिद्रात् कुम्भादाढकपरिमितं जलं छिद्रतो यावता कालेन गलति सा वा नालिकेत्यर्थः ।

द्विनालिक इति । नालिकाद्वयं मुहूर्तः । एतदुत्तरं **पूर्वापरभागयो**र्व्याख्यानं क्रमप्राप्तम् । तत्तु न कृतं सुबोधत्वात् । तौ हि मुहूर्तान्तानामुक्तानां वक्ष्यमाणानां च दिवसादीनां यथासम्भवं पूर्वभागोत्तरभागौ भवतः । तत्र पूर्वाह्णो दिवसपूर्वभागोऽपराह्णो दिवसोत्तरभागः । तथा पूर्वरात्रो रात्रिपूर्वभागोऽपररात्रो रात्र्युत्तरभाग इत्यादि यथाव्यवहारमूह्यम् । **पञ्चदशे**त्यादि । पञ्चदशमुहूर्तो दिवसो रात्रिश्च भवतः, किं सर्वेषु मासेषु, नेत्याह — **चैत्रे** मासि आश्वयुजे मासि च अर्थाद् विषुवयोर्द्वयोः । **ततः पर**मिति । विषुवद्द्वयादुपरि, अन्यतरो दिवसो रात्रिश्च, त्रिभिर्मुहूर्तैः षण्मासं वर्धते ह्रसते च एकशश्चतुर्लवोपचयापचयक्रमेण मुहूर्तत्रयं यावत् षण्मासान् उपचीयते क्षीयते च । तत्र दिवसस्य चैत्रविषुवादुपरि वृद्धिः आश्वयुजविषुवादुपरि ह्रासः, रात्रेराश्वयुजविषुवादुपरि वृद्धिश्चैत्रविषुवादुपरि ह्रासः ।

छायया कालमानमाह—**छायायामि**त्यादि । छायायाम्, अष्टपौरुष्यां षण्णवत्यङ्गुलायां, दिवसस्य, अष्टादशभागः छेदः अष्टादशो भागः गतांशः त्रिंशन्नाडिकासु पादोनं नाडिकाद्वयमतीतं ज्ञेयं सपादाष्टाविंशतिनाडिकास्तु शेषाः । षट्पौरुष्यां द्विसप्तत्यङ्गुलायां छायायां, चतुर्दशभागः छेदः त्रयोदश

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अष्टाङ्गुलायां त्रयो दशभागाः, चतुरङ्गुलायाम् अष्टभागाः, अच्छायो मध्याह्न इति ।

परावृत्ते दिवसे शेषमेवं विद्यात् ।

आषाढे मासि नष्टच्छायो मध्याह्नो भवति । अतः परं श्रावणादीनां षण्मासानां द्व्यङ्गुलोत्तरा माघादीनां द्व्यङ्गुलावरा छाया इति ।

पञ्चदशाहोरात्राः पक्षः । सोमाप्यायनः शुक्लः । सोमावच्छेदनो बहुलः ।

तु शेषाः । चतुष्पौरुष्याम् अष्टाचत्वारिंशदङ्गुलायाम्, अष्टभागः छेदः अर्धयामो गतः सप्त शेषाः । द्विपौरुष्यां चतुर्विंशत्यङ्गुलायां, षड्भागश्छेदः पञ्च नालिका गताः पञ्चविंशतिस्तु शेषाः । पौरुष्यां द्वादशाङ्गुलायां, चतुर्भागश्छेदः यामो गतः यामत्रयमवशिष्टम् । अष्टाङ्गुलायां छायायां, त्रयो दशभागाः दशधा विभक्तस्य दिवसस्य त्रयो दशमांशाः अर्थान्नवनालिकाः, छेदः, एकविंशतिस्तु नालिकाः शिष्टाः । चतुरङ्गुलायाम्, अष्टभागाः अष्टधा विभक्तस्य दिवसस्य त्रयोऽष्टमांशाः गता विज्ञेयाः, पञ्च तु शिष्टाः । अच्छायः शङ्कुप्रविष्टच्छायो, मध्याह्नो भवति ।

मध्याह्नात् परतोऽप्येवमेवच्छायामानं, किन्तु छेदस्थाने शेषकल्पनया विज्ञेयमित्याह—**परावृत्त** इति । परावृत्ते दिवसे मध्याह्नात् परतः, शेषं गतावशिष्टं दिवसभागम्, एवं विद्यात् चतुरङ्गुलायां त्रयोऽष्टभागा इत्यादिना छायायामष्टपौरुष्यामष्टादशभाग इत्यन्तेन प्रकारेणाष्टभागत्रयप्रभृतिमष्टादशभागान्तं जानीयात् ।

आषाढ इति । आषाढे मासि आषाढमासान्ते, नष्टच्छायोऽच्छायः, मध्याह्नः भवति । अतः परं, श्रावणादीनां षण्मासानां पौषान्तानां, द्व्यङ्गुलोत्तरा द्विद्व्यङ्गुलक्रमवृद्धा छाया भवति । तद्यथा—श्रावणस्यान्ते द्व्यङ्गुला भाद्रपदस्य चतुरङ्गुला आश्वयुजस्य षडङ्गुला कार्त्तिकस्याष्टाङ्गुला मार्गशीर्षस्य दशाङ्गुला पौषस्य द्वादशाङ्गुलेति । अतः परं,माघादीनां षण्मासानामाषाढान्तानां, द्व्यङ्गुलावरा द्विद्व्यङ्गुलक्रमक्षीणा, छाया, भवति । यथा—माघस्यान्ते दशाङ्गुला छाया फाल्गुनस्याष्टाङ्गुला चैत्रस्य षडङ्गुला वैशाखस्य चतुरङ्गुला ज्येष्ठस्य द्व्यङ्गुला आषाढस्य तु शङ्कुप्रविष्टेति ।

पञ्चदशेत्यादि । पञ्चदशाहोरात्रसमुदायः पक्षसंज्ञः । तत्र सोमाप्यायनः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्विपक्षो मासः ।

त्रिंशदहोरात्रः प्रकर्ममासः ।

सार्धः सौरः ।

अर्धन्यूनश्चान्द्रमासः ।

सप्तविंशतिर्नाक्षत्रमासः ।

द्वात्रिंशद् मलमासः ।

पञ्चत्रिंशदश्ववाहायाः ।

चत्वारिंशद्धस्तिवाहायाः ।

द्वौ मासावृतुः ।

श्रावणः प्रोष्ठपदश्च वर्षाः ।

आश्वयुजः कार्त्तिकश्च शरत् ।

मार्गशीर्षः पौषश्च हेमन्तः ।

माघः फाल्गुनश्च शिशिरः ।

चन्द्रवृद्धिकरः पक्षः, शुक्लः तत्संज्ञः । सोमावच्छेदनः चन्द्रक्षयकरः, बहुलः तदाख्यः ।

द्विपक्ष इति । उक्तौ शुक्लबहुलपक्षौ समुदितौ, मासः, स एव सावनः ।

त्रिंशदहोरात्र इति । त्रिंशदहोरात्रसमुदायः, प्रकर्ममासः कर्मकरभृतिगणनीयो मासः ।

सार्ध इति । अर्धाहोरात्रसहितस्त्रिंशदहोरात्रः, सौरः सौरमासः ।

अर्धन्यून इति । अर्धाहोरात्रन्यूनस्त्रिंशदहोरात्रः, चान्द्रमासः ।

सप्तविंशतिरिति । सप्तविंशत्यहोरात्रो नाक्षत्रमासः ।

द्वात्रिंशदिति । द्वात्रिंशदहोरात्रो मलमासः ।

पञ्चत्रिंशदिति । पञ्चत्रिंदहोरात्रः तावन्मानो मासः, अश्ववाहायाः अश्वप्रवाहणस्य, अर्थादश्वकर्मभृत्यानाम् । 'अथ प्रवाहणे । वाहा नृस्त्री स्त्रियां वाहौ' इति केशवस्वामी ।

चत्वारिंशदित्यादि । चत्वारिंशदहोरात्रो गजशुश्रूषाकर्मकरवेतनमासः ।

द्वाविति । उभौ द्विपक्षलक्षणौ मासौ मिलितौ ऋतुसंज्ञौ ।

ऋतुं विभज्य व्याचष्टे—श्रावण इत्यादिना ग्रीष्म इत्यन्तेन । वर्षाः वर्षासंज्ञः । ज्येष्ठामूलीयः ज्येष्ठः । शेषं सुगमम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चैत्रो वैशाखश्च वसन्तः ।
ज्येष्ठामूलीय आषाढश्च ग्रीष्मः ।
शिशिराद्युत्तरायणम् । वर्षादि दक्षिणायनम् ।
द्व्ययनः संवत्सरः ।
पञ्चसंवत्सरो युगमिति ।

दिवसस्य हरत्यर्कः षष्टिभागमृतौ ततः ।
करोत्येकमहश्छेदं तथैवैकं च चन्द्रमाः ॥
एवमर्धतृतीयानामब्दानामधिमासकम् ।
ग्रीष्मे जनयतः पूर्वं पञ्चाब्दान्ते च पश्चिमम् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
विंशोऽध्यायः देशकालमानम् ,
आदित एकचत्वारिंशः ॥

शिशिरादीत्यादि । शिशिरप्रभृति ग्रीष्मान्तमृतुत्रयम् , उत्तरायणसंज्ञम् । वर्षादि हेमन्तान्तमृतुत्रयं, दक्षिणायनम् ।

द्व्ययन इति । अयनद्वयात्मा संवत्सरो भवति ।

पञ्चसंवत्सर इति । संवत्सरपञ्चकात्मकः कालो, युगं युगसंज्ञया व्यवह्रियते । इतिशब्दो व्यावहारिककालमानसमाप्तौ ।

अधिमासं श्लोकद्वयेनाह — **दिवसस्येति** । अर्कः सूर्यः, दिवसस्य अहोरात्रस्य, षष्टिभागम् एकघटिकात्मकं, हरति प्रतिदिवसं छिनत्ति । ततः प्रतिदिवसमेकघटिकाहरणात् , ऋतौ षष्टिदिवसात्मकमासद्वयावसाने, एकमहश्छेदम् एकमधिकमहोरात्रं, करोति उत्पादयति । तथैव अर्कवदेव, चन्द्रमाश्च, एकम् अहश्छेदं करोति । एवम् अनेन प्रकारेण, अर्धतृतीयानामब्दानाम् अर्धोनतृतीयानां वर्षाणाम् अर्थान्माघप्रभृतीनां त्रिंशतो मासानां, ग्रीष्मे पूर्वम्, अधिमासकम् अधिकमासं त्रिंशत्तमं द्वितीयम् आषाढं, पञ्चाब्दान्ते अर्थात् पुनरर्धतृतीयवर्षात्मनां श्रावणप्रभृतीनां त्रिंशतो मासानामन्ते, पश्चिममधिमासकं च उत्तरमधिकमासं च अर्थात् त्रिंशत्तमं द्वितीयं पौषं च, जनयतः, अर्के चन्द्रमसौ ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
विंशोऽध्यायः देशकालमानम् ,
आदित एकचत्वारिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३९. प्रक. शुल्काध्यक्षः।

शुल्काध्यक्षः शुल्कशालां ध्वजं च प्राङ्मुखम् उदङ्मुखं वा महाद्वाराभ्याशे निवेशयेत् ।

शुल्कादायिनश्चत्वारः पन्च वा सार्थोपयातान् वणिजो लिखेयुः—के कुतस्त्याः कियत्पण्याः क्व चाभिज्ञानमुद्रा वा कृतेति ।

अमुद्राणामत्ययो देयद्विगुणः ।

कूटमुद्राणां शुल्काष्टगुणो दण्डः ।

भिन्नमुद्राणामत्ययो घटिकाः स्थाने स्थानम् ।

शुल्काध्यक्ष इति सूत्रम् । शुल्कः राज्ञे देयं पञ्चदशभागादि तस्य अध्यक्षः शुल्काध्यक्षः । तद्व्यापारोऽभिधीयते इति सूत्रार्थः । देशविशेषभूतदुर्गसम्बन्धित्वाद् मानपरिच्छेद्यनानाभाण्डविषयत्वाच्च शुल्कस्य देशमानानन्तरमभिधानसङ्गतिः ।

शुल्काध्यक्ष इति । शुल्कशालाध्यक्षः, शुल्कशालां शुल्कग्रहणावस्थानं, ध्वजं च तच्चिह्नं च, प्राङ्मुखमुदङ्मुखं वा, महाद्वाराभ्याशे प्रधानद्वारसमीपे, निवेशयेत् कारयेत् ।

शुल्कादायिन इति । शुल्कग्राहिणः, चत्वारः पञ्च वा पुरुषाः शुल्काध्यक्षनियुक्ताः, सार्थोपयातान् सभाण्डोपगतान्, वणिजो नैगमान्, लिखेयुः । किं कृत्वा, के कुतस्त्या इत्यादि पृष्ट्वेति शेषः । तत्र क इति नामजातिविषयः प्रश्नः, कुतस्त्या इति निवासविषयः, कियत्पण्या इति विक्रेयवस्तुपरिमाणविषयः, क्व चाभिज्ञानमुद्रेति अन्तपालकृतपण्यविशेषज्ञप्तिमुद्राविषयः । शुल्कादायिनां बहुत्वं विसंवादपरिहारार्थम् ।

अमुद्राणामिति । मुद्रारहितानां वणिजाम्, अत्ययः दण्डः, देयद्विगुणः अन्तपालदेयवर्तनीद्विगुणः । वर्तनी त्वनुपदं वक्ष्यते ।

कूटेत्यादि । कूटमुद्राणां कपटकृतमुद्राणां, शुल्काष्टगुणो दण्डः ।

भिन्नेत्यादि । भिन्नमुद्राणामत्ययः गृहीतनष्टमुद्राणां दण्डः, घटिकाः स्थाने स्थानं वणिगन्तरदृश्ये क्वापि शुल्कशालैकदेशे घटिकात्रयकालावस्थानं भवति । घटिका इति स्थानक्रियात्यन्तसंयोगे द्वितीया, कपिञ्जलाधिकरणन्यायेन च तासां त्रित्वम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

राजमुद्रापरिवर्तने नामकृते वा सपादपणिकं वहनं दापयेत् ।

ध्वजमूलोपस्थितस्य प्रमाणमर्घं च वैदेहकाः पण्यस्य ब्रूयुः— एतत्प्रमाणेनार्घेण पण्यमिदं कः क्रेतेति। त्रिरुद्घोषितमर्थिभ्यो दद्यात्। क्रेतृसङ्घर्षे मूल्यवृद्धिः । सशुल्का कोशं गच्छेत् ।

शुल्कभयात् पण्यप्रमाणं मूल्यं वा हीनं ब्रुवतस्तदतिरिक्तं राजा हरेत् । शुल्कमष्टगुणं वा दद्यात् ।

तदेव निविष्टपण्यस्य भाण्डस्य हीनप्रतिवर्णकेनार्घापकर्षणे सारभाण्डस्य फल्गुभाण्डेन प्रतिच्छादने च कुर्यात् ।

प्रतिक्रेतृभयाद् वा पण्यमूल्यादुपरि मूल्यं वर्धयतो मूल्यवृद्धिं राजा हरेद्, द्विगुणं वा शुल्कं कुर्यात् ।

राजेत्यादि । राजमुद्रापरिवर्तने, नामकृते वा परिवर्तन इत्यनुषङ्गात् कार्पासादिद्रव्याणां तूलादिनामनिवेशेन नामव्यत्ययकरणे वा, सपादपणिकं पादाधिकपणदण्डं, वहनं पण्यहारकं, दापयेत् ।

ध्वजेत्यादि । ध्वजमूलोपस्थितस्य शुल्कशालाङ्गणगतस्य पण्यस्य, प्रमाणम् इयत्ताम्, अर्घं च, वैदेहकाः वणिजः, ब्रूयुः, एतत्प्रमाणेनेत्यादिविधया । त्रिरुद्घोषितं यथोक्तप्रकारेण वारत्रयघोषणया श्रावितं, पण्यम्, अर्थिभ्यः क्रेतृभ्यः, दद्यात्, तेनैव वैदेहकनिर्दिष्टेनार्घेण । क्रेतृसंघर्षे क्रेतॄणाम् अर्घवर्धनहेतुभूतपरस्परस्पर्धासम्भवे, मूल्यवृद्धिः वणिङ्निर्दिष्टप्रमाणादधिकं मूल्यस्य प्रमाणम्, इष्यत इति शेषः । किन्तु सशुल्का शुल्कसहिता सा मूल्यवृद्धिः, कोशं गच्छेत् राजभाण्डागारं प्राप्नुयाद् निर्दिष्टमूल्यमात्रमेव तु वैदेहकानित्यर्थः । सशुल्कमित्यपि पाठः ।

शुल्केत्यादि । शुल्कभयात्, पण्यप्रमाणं भाण्डेयत्तां, मूल्यं वा पण्यार्घं वा, हीनम् अवरं, ब्रुवतः, तदतिरिक्तं तदुक्तातिरिक्तं प्रमाणं मूल्यं चोपलभ्यमानं, राजा हरेत् । इति तद्दण्डविधिः । तद्विकल्पमाह — शुल्कमष्टगुणं वा दद्याद्, वणिक् ।

तदेवेति । तदेव तदुक्तातिरिक्तं शुल्काष्टगुणं वा, निविष्टपण्यस्य पण्यपूरितस्य, भाण्डस्य, हीनप्रतिवर्णकेन निकृष्टप्रतिवर्णकप्रदर्शनेन, अर्घापकर्षणे मूल्यपातने, सारभाण्डस्य फल्गुभाण्डेन प्रतिच्छादने च महार्घस्य पण्यस्य मणिमुक्तादेरल्पार्घकार्पासतूलादिनावच्छादने च, कुर्यात् ।

प्रतिक्रेतृभयादिति । प्रतिक्रेतृपुरुषविशेषक्रयणशङ्कया, पण्यमूल्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदेवाष्टगुणमध्यक्षस्यच्छादयतः ।

तस्माद् विक्रयः पण्यानां धृतो मितो गणितो वा कार्यः, तर्कः फल्गुभाण्डानामानुग्रहिकाणां च ।

ध्वजमूलमतिक्रान्तानां चाकृतशुल्कानां शुल्कादष्टगुणो दण्डः। पथिकोत्पथिकास्तद् विद्युः ।

वैवाहिकमन्वायनमौपायनिकं यज्ञकृत्यप्रसवनैमित्तिकं देवेज्याचौलोपनयनगोदानव्रतदीक्षणादिषु क्रियाविशेषेषु भाण्डमुच्छुल्कं गच्छेत् ।

न्याय्याद् , उपरि, मूल्यं वर्धयतः क्रेतुः, तन्मूल्यवृद्धिं राजा हरेत् । द्विगुणं वा शुल्कं कुर्यादिति दण्डविकल्पः ।

तदिति । तदेव वैदेहकानां तत्तदपराधे यद् देयं विहितं तदेव, अष्टगुणम् , अध्यक्षस्य, छादयतः वैदेहकापराधं मैत्रीलञ्चग्रहणादिना गोपयतः, कुर्याद् राजा ।

तस्मादिति । यथोक्तानृतव्यवहारसम्भवात् , विक्रयः, पण्यानां तोलनीयपरिमेयगणनीयानां, धृतः तुलातोलितः, मितः प्रस्थादिपरिमितः, गणितो वा, कार्यः । तर्कः इदमियत् स्यादिति मानार्घसम्भावनात्मा, कार्यः, फल्गुभाण्डानाम् अङ्गाराद्यल्पपण्यानाम् , आनुग्रहिकाणां लवणादीनां च ।

ध्वजमूलमतिक्रान्तानामित्यादि । अकृत एव शुल्के शुल्कशालामतिक्रम्य गतानां विषये, शुल्कादष्टगुणो दण्डः। **पथिकेत्यादि**। पथिकोत्पथिकाः पथिकाः पथि वाणिज्यच्छलचारिणः उत्पथिकाः अनुज्ञातोत्पथगतागतास्तृणेन्धनहारकाः पशुपालकाश्च प्रणिहिताः, तद् अकृतशुल्कवणिगतिक्रमणं, विद्युः, अत एव साक्षिणश्च स्युर्विवादे ।

अशुल्कनेयं भाण्डमाह — **वैवाहिकमिति** । वैवाहिकं विवाहप्रयोजनकम् , अन्वायनं परिणीतायाः पतिगृहं गच्छन्त्याः पितृगृहान्नीयमानम्, औपायनिकम् उपायनमन्त्रसत्राद्यर्थं उपहारः तत्प्रयोजनकं, यज्ञकृत्यप्रसवनैमित्तिकं यज्ञकृत्यनैमित्तिकं पयोदधिघृतादिकं प्रसवनैमित्तिकं जातकर्मसूतिकाभेषजाद्यर्थं च, देवेज्यादिषु क्रियाविशेषेषु देवेज्या देवानां देवालयगतानाम् इज्या नित्यनैमित्तिकपूजोत्सवादिः चौलोपनयनगोदानानि संस्कारविशेषाः प्रसिद्धाः व्रतदीक्षणं दानविशेषादिलक्षणव्रतपरिग्रहः एवम्प्रकारेषु धर्म्यकार्येषु, भाण्डम् , उच्छुल्कम् अशुल्कं, गच्छेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्यथावादिनः स्तेयदण्डः।

कृतशुल्केनाकृतशुल्कं निर्वाहयतो द्वितीयमेकमुद्रया भित्त्वा पुटमपहरतो वैदेहकस्य तच्च तावच्च दण्डः।

शुल्कस्थानाद् गोमयपलालं प्रमाणं कृत्वापहरत उत्तमः साहसदण्डः।

शस्त्रवर्मकवचलोहरथरत्नधान्यपशूनामन्यतमानिर्वाह्यं निर्वाहयतो यथावघुषितो दण्डः पण्यनाशश्च।

तेषामन्यतमस्यानयने बहिरेवोच्छुल्को विक्रयः।

अन्यथावादिन इति। अवैवाहिकादिकमेव भाण्डं वैवाहिकादिकमिति मिथ्या ब्रुवतो वणिजः, स्तेयदण्डः चौर्यस्य यो दण्डो धर्मस्थीयविहितः स कार्यः।

कृतेत्यादि। कृतशुल्केन दत्तशुल्केन पण्यवासनेन सह, अकृतशुल्कम् अदत्तशुल्कं, निर्वाहयतः संकुले निष्क्रामयतः, इत्येकोऽपराधः, **द्वितीयमेकमुद्रये**ति एकस्य पण्यवासनस्य मुद्राप्रदर्शनेन तत्तुल्यरूपमपरं पण्यवासनं निर्वाहयत इत्यपरः, **भित्त्वा पुटमपहरत** इति पुटं पण्यवासनं कृतशुल्कं भित्त्वा तस्मिन् पण्यमकृतशुल्कं निवेश्य नयत इति तृतीयः। एवमेवमपराधिनो वैदेहकस्य, तच्च तावच्च यदेव पण्यं यत्परिमाणमपहृतं तदेव तत्परिमाणमेव, दण्डः।

शुल्कस्थानादिति। ध्वजमूलात्, गोमयपलालं प्रमाणं कृत्वापहरतः गोपुरीषं धान्यस्तम्बं चात्यन्तानिस्सारद्रव्यं विश्वासपदमपदिश्य तन्निगूहितं सारद्रव्यं नयतः, उत्तमः साहसदण्डः पणसाहस्ररूपो दण्डः।

शस्त्रेत्यादि। शस्त्रादीनामष्टानाम्, अन्यतमानिर्वाह्यम् अन्यतमम् अनिर्वाह्यत्वेन कस्मिंश्चिन्निमित्ते राज्ञा प्रख्यापितं, निर्वाहयतः, यथावघुषितः प्रख्यापितप्रकारो, दण्डः, पण्यनाशश्च निर्वाह्यमानशस्त्रादिपण्यहानिश्च। तत्र वर्म आवरणसामान्यं, कवचं बाहुकादियुक्तस्तद्विशेषः। शेषं प्रतीतम्।

तेषामिति। अनिर्वाह्यानाम् अन्यतमस्यानयने, बहिरेव दुर्गबाह्यदेश एव, उच्छुल्को विक्रयः अशुल्कस्तस्य विक्रयः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अन्तपालः सपादपणिकां वर्तनीं गृह्णीयात् पण्यवहनस्य, पणिकामेकखुरस्य, पशूनामर्धपणिकां, क्षुद्रपशूनां पादिकाम्, अंसभारस्य माषिकाम्। नष्टापहृतं च प्रतिविदध्यात्।

वैदेश्यं सार्थं कृतसारफल्गुभाण्डविचयनमभिज्ञानं मुद्रां च दत्त्वा प्रेषयेदध्यक्षस्य।

वैदेहकव्यञ्जनो वा सार्थप्रमाणं राज्ञः प्रेषयेत्। तेन प्रदेशेन राजा शुल्काध्यक्षस्य सार्थप्रमाणमुपदिशेत् सर्वज्ञत्वख्यापनार्थम्। ततः सार्थमध्यक्षोऽभिगम्य ब्रूयात्—इदममुष्यामुष्य च सारभाण्डं फल्गुभाण्डं च न निगूहितव्यम्, एष राज्ञः प्रभावः इति।

विषयान्तरक्षाधिकारिणो भृतिमाह—**अन्तेत्यादि**। अन्तपालः, सपादपणिकां पादाधिकपणरूपां, वर्तनीं तत्संज्ञां मार्गरक्षाभृतिं, गृह्णीयात्, पण्यवहनस्य पण्यवाहिनः शकटादेः। पणिकाम् एकखुरस्य एकपणात्मिकां वर्तनीं खरादेर्गृह्णीयात्। पशूनामर्धपणिकां गवादीनाम् अर्धपणात्मिकां, क्षुद्रपशूनां पादिकां मेषादीनां पादपणरूपाम्, अंसभारस्य माषिकां स्कन्धभारवाहिनस्ताम्रमाषात्मिकां च, वर्तनीं गृह्णीयात्। **नष्टापहृतामिति**। मुष्टनष्टं च, प्रतिविदध्यात् तस्करात् प्रत्यानीय वा तस्करानुपलम्भे स्वहस्ताद् वा दद्याद् अन्तपालः।

वैदेश्यमिति। वैदेश्यं विदेशागतं, सार्थं वणिक्सङ्घं, कृतसारफल्गुभाण्डविचयनम् अमुकस्यैतावन्ति सारभाण्डानि एतावन्ति फल्गुभाण्डानीति स्वेन कृतं सारफल्गुभाण्डानां विचयनमन्वेषणं यस्य तं तथाभूतम्, अध्यक्षस्य शुल्काध्यक्षस्य, प्रेषयेत्। किं कृत्वा, अभिज्ञानं स्वहस्तलेखाङ्कं, मुद्रां च पण्यवासनकरणीयां, दत्त्वा। एष शुल्काध्यक्षहरणस्य निषेधोपायः।

सर्वनियुक्तपुरुषहरणनिषेधोपायमाह—**वैदेहकेत्यादि**। वैदेहकव्यञ्जनो वा वणिक्छद्मचारी वा गूढपुरुषो राजनियुक्तः, सार्थप्रमाणं पण्यवहनादिसंख्यां, राज्ञः प्रेषयेत् रहसि निवेदयेत्। इत्थमवगतसार्थप्रमाणस्य प्रतिपत्तिमाह—**तेनेति**। तेन प्रदेशेन गूढपुरुषोपदेशेन, राजा, शुल्काध्यक्षस्य, सार्थप्रमाणं स्वविदितम्, उपादिशेत् ज्ञापयेत्, सर्वज्ञत्वख्यापनार्थं 'सर्वज्ञो राजा परोक्षमपि सार्थवाहप्रमाणं दिव्यदृष्ट्या जानातीति ख्यापनार्थम्। तत इति। तत उपदेशानन्तरं, सार्थम्, अध्यक्षः अभिगम्य ब्रूयात्, किमिति—इदममुष्यामुष्य च, सारभाण्डं, फल्गुभाण्डं च, न निगूहितव्यम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निगूहतः फल्गुभाण्डं शुल्काष्टगुणो दण्डः, सारभाण्डं सर्वापहारः।

राष्ट्रपीडाकरं भाण्डमुच्छिन्द्यादफलं च यत्।
महोपकारमुच्छुल्कं कुर्याद् बीजं तु दुर्लभम्॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकविंशोऽध्यायः शुल्काध्यक्षः,
आदितो द्विचत्वारिंशः॥

कस्मात्, एष राज्ञः प्रभावः ईदृशो राज्ञो महिमोपलभ्यते— यत् परोक्षस्यापि भवदीयसारफल्गुभाण्डजातस्येयत्तां दिव्यदृष्ट्यावगम्यास्मभ्यमुपदिशति, इति।

निगूहत इति। निगूहतः राजप्रभावकथनेऽप्यवच्छादयतः, फल्गुभाण्डं कार्पासादिकं, शुल्काष्टगुणो दण्डः। सारभाण्डं मणिमुक्ताप्रवालादिकं, निगूहतः, सर्वापहारः गूहितसर्वसारापहरणं दण्डः।

अध्यायान्ते श्लोकमाह— **राष्ट्रेत्यादि**। राष्ट्रपीडाकरं भाण्डं गरलमदिरादिपण्यम्, उच्छिन्द्याद् वारयेद् अत्यन्ताय वा नाशयेत्। अफलमल्पफलं यद् भाण्डं वार्ताकोर्वारुकादि, तच्च उच्छिन्द्यात् देशान्तरान्नानाययेत्। महोपकारं, दुर्लभं स्वविषये, बीजम् अभ्यवहार्यं व्रीह्यादिधान्यं भैषज्यार्थं च मरिचहरीतक्यादि, उच्छुल्कं शुल्करहितं कुर्यात्। तुशब्दो विशेषार्थः। बीजं चेति पाठे चशब्दस्तुशब्दस्यार्थे॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
एकविंशोऽध्यायः शुल्काध्यक्षः,
आदितो द्विचत्वारिंशः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

३९. प्रक. शुल्काध्यक्षः — शुल्कव्यवहारः ।

शुल्कव्यवहारः ।

बाह्यमाभ्यन्तरं चातिथ्यं, निष्क्राम्यं प्रवेश्यं च शुल्कम् ।

प्रवेश्यानां मूल्यपञ्चभागः ।

पुष्पफलशाकमूलकन्दवल्लिक्यबीजशुष्कमत्स्यमांसानां षड्भागं गृह्णीयात् ।

शङ्खवज्रमणिमुक्ताप्रवालहाराणां तज्जातपुरुषैः कारयेत् कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः ।

क्षौमदुकूलक्रिमितानकङ्कटहरितालमनश्शिलाहिङ्गुलुकलोहवर्ण-

शुल्कव्यवहार इति । अमुकपण्यस्यैतावच्छुल्कमिति व्यवस्थाकरणं शुल्कव्यवहारः । स इहोच्यते ।

शुल्कमादौ त्रिधा पुनर्द्विधा च विभजते—**बाह्यमित्यादि** । चः प्रथमो भिन्नक्रमः । शुल्कं, बाह्यमाभ्यन्तरमातिथ्यं च इति त्रिधा भवतीत्यर्थः । तत्र स्वजनपदोत्पन्नपण्यसम्बन्धि बाह्यं, दुर्गस्थानीयाद्यभ्यन्तरभूमिप्रभवपण्यसम्बन्धि आभ्यन्तरं, विदेशागतपण्यसम्बन्धि आतिथ्यम् । त्रिविधमपि तत् नैष्क्राम्यं निष्क्राम्यपण्यनिष्क्रमणनिमित्तं, प्रावेश्यं च प्रवेशनीयपण्यप्रवेशननिमित्तं च इति पुनः प्रत्येकं द्विविधम् । वृद्धपाठोऽयं व्याख्याभाषयोरुपलब्धः । अवृद्धपाठे तु संबन्धि लक्ष्यम् ।

प्रवेश्यानामिति । प्रवेश्यानां परदेशात् स्वदेशं स्वदेशेऽपि स्थानीयं प्रवेशयितव्यानां पण्यानां मूल्यपञ्चभागः, शुल्कं भवति । एष सामान्यविधिः ।

तदपवादं त्वाह — **पुष्पफलेत्यादि** । पुष्पं कुसुम्भादि फलं पनसादि शाकं वास्तुकादि मूलं बालुकादि कन्दः सूरणादिः वल्लिक्यं वल्लिजं कूश्माण्डादि बीजं धान्यादि एतेषां शुष्कमत्स्यमांसयोश्च, षड्भागं मूल्यषड्भागं शुल्कं, गृह्णीयात् ।

शङ्खेत्यादि । शङ्खादीनां पण्णां, तज्जातपुरुषैः तल्लक्षणविचक्षणैः, कारयेत् विधापयेत्, शुल्कम् । कीदृशैः, कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कृताः स्वानुभवावगताः कर्मप्रमाणकालवेतनफलनिष्पत्तयो यैस्तथाविधैः । पदमिदमायुधागाराध्यक्षेऽपि व्याख्यातम् ।

क्षौमेत्यादि । क्षौमादीनां क्षौमं स्थूलवल्कजं दुकूलं सूक्ष्मवल्कजं क्रिमि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धातूनां चन्दनागुरुकटुककिण्वावराणां सुरादन्ताजिनक्षौमदुकूलनिकरास्तरणप्रावरणक्रिमिजातानामजैलकस्य च दशभागः, पञ्चदशभागो वा।

वस्त्रचतुष्पदद्विपदसूत्रकार्पासगन्धभैषज्यकाष्ठवेणुवल्कलचर्ममृद्भाण्डानां धान्यस्नेहक्षारलवणमद्यपक्वान्नादीनां च विंशतिभागः पञ्चविंशतिभागो वा।

द्वारादेयं शुल्कपञ्चभागः। आनुग्राहिकं वा यथादेशोपकारं स्थापयेत्।

जातिभूमिषु च पण्यानामविक्रयः।

खनिभ्यो धातुपण्यादाने षट्छतमत्ययः।

तानश्चीनपट्टः कङ्कटः सूत्रसन्नाहः हरितालमनःशिलाहिङ्गुलुका व्याख्याताः अञ्जनं सौवीरकादि, इदं व्याख्यायामेव पठ्यते, लोहवर्णो लोहजातिः धातुर्गैरिकादिः इत्येतेषां, चन्दनादीनां चन्दनागुरुणी प्रसिद्धे कटुकं पिप्पल्यादि किण्वावरं किण्वं मद्यबीजं तदन्तं तैलजातीयं द्रवजातम् इत्येतेषां, सुरादीनां सुरा मद्यभेदः दन्तो गजदन्तः अजिनं कृष्णचर्म क्षौमदुकूलनिकरः क्षौमनिष्पादनार्था दुकूलनिष्पादनार्थाश्च तन्तुनिकराः आस्तरणं शयनोपवेशनसाधनं प्रावरणं प्रावारः क्रिमिजातं कौशेयम् इत्येतेषाम्, अजैलकस्य च अजैलकालोमजस्य च, दशभागः पञ्चदशभागो वा शुल्कं भवति।

वस्त्रचतुष्पदेत्यादि। वस्त्रादयो धान्यादयश्च प्रसिद्धाः तेषां, विंशतिभागः पञ्चविंशतिभागो वा शुल्कम्। अयं पूर्वोक्तश्च विकल्पो यथादेशकालं द्रष्टव्यः।

द्वारादेयमिति। द्वाराध्यक्षग्राह्यं, शुल्कपञ्चभागः यस्य यच्छुल्कमुपदिष्टं तस्य तच्छुल्कपञ्चभागः भवति। आनुग्राहिकम् अनुग्रहानीतपण्यविषयं शुल्कं द्वारादेयं वा, यथादेशोपकारं स्वदेशानुग्रहानुगुण्येन, स्थापयेत् कल्पयेत्।

जातीत्यादि। जातिभूमिषु च उत्पत्तिदेशेषु च, पण्यानाम्, अविक्रयः विक्रयो न कर्तव्य इत्यर्थः।

निषेधातिक्रमे दण्डमाह—खनिभ्य इति। लोहलवणाद्याकरेभ्यः, धातुपण्यादाने धातुपण्यस्य कारणरूपस्य कार्यरूपस्य वा ग्रहणे, षट्छतम् अत्ययः षट्पणशतानि दण्डो भवति, अर्थाद् आदातुर्विक्रेतुश्च।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुष्पफलवाटेभ्यः पुष्पफलादाने चतुष्पञ्चाशत्पणो दण्डः ।

षण्डेभ्यः शाकमूलकन्दादाने पादोनं द्विपञ्चाशत्पणो दण्डः ।

क्षेत्रेभ्यः सर्वसस्यादाने त्रिपञ्चाशत्पणः, पणोऽध्यर्धपणश्च सीतात्ययः ।

अतो नवपुराणानां देशजातिचरित्रतः ।
पण्यानां स्थापयेच्छुल्कमत्ययं चापकारतः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वाविंशोऽध्यायः शुल्कव्यवहारः,
आदितस्त्रिचत्वारिंशः ॥

पुष्पफलवाटेभ्य इत्यादि । सुगमम् ।

षण्डेभ्य इत्यादि । षण्डेभ्यः शाकाद्युद्भिजक्षेत्रेभ्यः । स्पष्टमन्यत् ।

क्षेत्रेभ्य इति । क्षेत्रेभ्यः धान्यकेदारेभ्यः, सर्वसस्यादाने, त्रिपञ्चाशत्पणो, दण्डः । पणः अध्यर्धपणश्च क्रेतृविक्रेत्रोर्यथाक्रमं, सीतात्ययः धान्यदण्डः । अयं च दण्डस्त्रिपञ्चाशत्पणेन समुच्चीयते ।

अध्यायान्ते श्लोकमाह — अत इति । अत उक्तशुल्कदण्डप्रकारातिरेकेण, नवपुराणानां, पण्यानां, देशजातिचरित्रतः देशाचारजात्याचारानुसारात्, शुल्कं, स्थापयेत् । अपकारतः अपकारानुसाराद् , अत्ययं च दण्डं च, स्थापयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वाविंशोऽध्यायः शुल्काध्यक्षे शुल्कव्यवहारः,
आदितस्त्रिचत्वारिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४०. प्रक. सूत्राध्यक्षः ।

सूत्राध्यक्षः सूत्रवर्मवस्त्ररज्जुव्यवहारं तज्जातपुरुषैः कारयेत् ।

ऊर्णावल्ककार्पासतूलशणक्षौमाणि च विधवान्यङ्गाकन्याप्रव्रजितादण्डप्रतिकारिणीभी रूपाजीवामातृकाभिर्वृद्धराजदासीभिर्व्युपरतोपस्थानदेवदासीभिश्च कर्तयेत् ।

श्लक्ष्णस्थूलमध्यतां च सूत्रस्य विदित्वा वेतनं कल्पयेत् । बहल्पतां च । सूत्रप्रमाणं ज्ञात्वा तैलामलकोद्वर्तनैरेता अनुगृह्णीयात् ।

तिथिषु प्रतिपादनमानैश्च कर्म कारयितव्याः। सूत्रह्रासे वेतनह्रासो द्रव्यसारात् ।

सूत्राध्यक्ष इति सूत्रम् । सूत्रम् ऊर्णादिजो गुणः तस्य अध्यक्षः कर्तनवानादिकारयिता। तद्व्यापारोऽभिधीयत इति सूत्रार्थः । 'कार्पासक्षौमाणां पञ्चपले पलसूत्रम्' इत्युक्तं कोष्ठागाराध्यक्षे । तदध्यक्षस्तद्व्यापारश्चानुक्त इहोच्यते।

सूत्राध्यक्ष इति । सूत्राध्यक्षः, सूत्रवर्मवस्त्ररज्जुव्यवहारं सूत्रादीनां कर्तनवानादिकं, तज्जातपुरुषैः तच्छिल्पिकुलजैस्तत्कर्मकुशलैश्च पुरुषैः, कारयेत् । **ऊर्णेत्यादि** । ऊर्णा मेषादिलोम वल्को मूर्वादित्रसरः कार्पासः प्रसिद्धः तूलं शाल्मल्यादि शणः क्षुपभेदजं क्षौममतसीजम् एतानि च, विधवादिभिः पञ्चभिः तत्र न्यङ्गा अङ्गविकला दण्डप्रतिकारिणी कर्मणा दण्डनिष्क्रयकारिणी शेषाः प्रसिद्धाः, रूपाजीवामातृकाभिः गणिकाधात्रीभिः, वृद्धराजदासीभिः वृद्धाभिर्नृपतिपरिचारिकाभिः, व्युपरतोपस्थानदेवदासीभिश्च उपस्थानं देवालयेषु नृत्तगीतादिना देवसभाजनकर्म तद् व्युपरतम् अनर्हतया निवृत्तं यासां ताभिस्तथाभूताभिर्देवदासीभिर्देवालयपरिचारिकाभिश्च, कर्तयेत् सूत्रयेत् ।

श्लक्ष्णेत्यादि । श्लक्ष्णतां स्थूलतां मध्यतां च सूत्रस्य विदित्वा भृतिं कल्पयेत् । **बहल्पतां चेति** । तुल्ये काले कर्तनस्य बहुत्वमल्पत्वं च, विदित्वा वेतनं कल्पयेदित्यनुषज्यते । **सूत्रप्रमाणमिति** । सूत्रस्य श्लक्ष्णतातिशयं बहुत्वं च, ज्ञात्वा, तैलामलकोद्वर्तनैः तैलाभ्यञ्जनस्नपनैरूष्मशमनार्थैः, एताः दृष्टगुणाः, अनुगृह्णीयात् उपकुर्यात् तत्प्रीतये तदन्यप्रोत्साहनाय च ।

तिथिष्विति । तिथिषु कर्मदिवसेषु, प्रतिपादनमानैश्च प्रतिपादनं वेतनदानं दीयमानवेतनं वा तस्य मानैः एतावतः कर्मण एतावद् वेतनमित्येवं-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कारुभिश्च कर्म कारयेत्, प्रतिसंसर्गं च गच्छेत् ।

क्षौमदुकूलक्रिमितानराङ्कवकार्पाससूत्रवानकर्मान्तांश्च प्रयुञ्जानो गन्धमाल्यदानैरन्यैश्चौपग्राहिकैराराधयेत् । वस्त्रास्तरणप्रावरणविकल्पानुत्थापयेत् ।

कङ्कटकर्मान्तांश्च तज्जातकारुशिल्पिभिः कारयेत् ।

याश्चानिष्कासिन्यः प्रोषितविधवा न्यङ्गाः कन्यका वात्मानं बिभृयुस्ताः स्वदासीभिरनुसार्य सोपग्रहं कर्म कारयितव्याः ।

स्वयमागच्छन्तीनां वा सूत्रशालां प्रत्युषसि भाण्डवेतनाविनिमयं कारयेत् । सूत्रपरीक्षार्थमात्रः प्रदीपः ।

रूपैः परिच्छेदैश्च, कर्म कारयितव्याः । अथवा तिथिषु दिवसविशेषेषु पर्वादिषु अशनदानसत्कारैश्च कर्म कारयितव्याः । सूत्रह्रासे सूत्रस्य न्याय्यप्रमाणतो न्यूनत्वे, वेतनह्रासः, द्रव्यसारात् द्रव्यार्घमपेक्ष्य, कर्तव्य इति शेषः ।

कृतकर्मेत्यादि । इदं पदमन्यत्र व्याख्यातम् । एवम्भूतैः कारुभिश्च तन्तुवायादिभिश्च, कर्म कारयेत् । प्रतिसंसर्गं सख्यं च, गच्छेत् तत्कर्मसम्भावितच्छलप्रयोगज्ञानार्थम् ।

क्षौमेत्यादि । राङ्कवं रङ्कुलोमजं क्षौमादिचतुष्कमन्यत्र व्याख्यातम् । क्षौमादीनां पञ्चानां सूत्रवानकर्मान्तान्, प्रयुञ्जानः कारयन् अध्यक्षः, गन्धमाल्यदानैः, अन्यैश्च, औपग्राहिकैः आनुकूल्यसम्पत्तिफलैः, आराधयेत् उपचरेत् तत्कारून् । तदाराधनफलमाह — **वस्त्रे**त्यादि । वस्त्रास्तरणप्रावरणानां विकल्पान् प्रकारभेदान्, उत्थापयेत् अपूर्वानुल्लेख्य निर्मापयेत् ।

कङ्कटेत्यादि । कङ्कटकर्मान्तांश्च सूत्रसन्नाहकर्माणि, तज्जातकारुशिल्पिभिः तत्कर्मनिपुणैः कारुभिः शिल्पिभिश्च, कारयेत् ।

याश्चेति । याश्च, अनिष्कासिन्यः प्रोषितविधवाः भर्तृप्रवासनिमित्तवियुक्तभर्तृकाः परित्यक्तबहिर्निष्क्रमणाः, न्यङ्गाः अङ्गविकलाः, कन्यका वा, आत्मानं बिभृयुः स्वपरिश्रमार्जितग्रासादिना देहयात्रां कुर्युः, ताः, स्वदासीभिः, अनुसार्य अनुवर्त्य, सोपग्रहं सप्रीतिबहुमानं यथा भवति तथा, कर्म सूत्रकर्तनादि, कारयितव्याः ।

स्वयमिति । स्वयमागच्छन्तीनां, वाशब्दात् स्वदासीसमानीतानां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्त्रिया मुखसन्दर्शनेऽन्यकार्यसंभाषायां वा पूर्वः साहसदण्डः। वेतनकालातिपातने मध्यमः, अकृतकर्मवेतनप्रदाने च।

गृहीत्वा वेतनं कर्माकुर्वत्याः अङ्गुष्ठसन्दंशं दापयेत्। भक्षितापहृतावस्कन्दितानां च। वेतनेषु च कर्मकराणामपराधतो दण्डः।

रज्जुवर्तकैश्चर्मकारैश्च स्वयं संसृज्येत। भाण्डानि च वरत्रादीनि वर्तयेत्।

वा, सूत्रशालां, प्रत्युषसि ईषत्तमासि दिनमुखे, भाण्डवेतनविनिमयं तद्गृहकर्तितभाण्डग्रहणपूर्वकवेतनार्पणं, कारयेत्। **सूत्रपरीक्षार्थमात्रः प्रदीप** इति, सूत्रगुणपरीक्षणप्रयोजना तदन्यप्रयोजनाक्षमा मात्रा प्रकाशपरिमाणं यस्य स तथाभूतः दीपः कार्यस्तत्काल इति शेषः।

स्त्रिया इत्यादि। स्त्रियाः, मुखसन्दर्शने मुखनिर्वर्णने, अन्यकार्यसम्भाषायां प्रकृतकार्यातिरिक्तकार्यप्रश्नादौ वा, पूर्वः साहसदण्डः। वेतनकालातिपातने भृतिदानकालातिक्रमे, मध्यमः साहसदण्डः। अकृतकर्मवेतनप्रदाने च अकृतकर्मणामुत्कोचग्रहणेन वेतनस्य दाने च, मध्यम इत्यनुषज्यते।

गृहीत्वेति। गृहीत्वा पूर्वमादाय, वेतनं, कर्माकुर्वत्याः, अङ्गुष्ठसन्दंशं दक्षिणाङ्गुष्ठतन्मध्यमाङ्गुल्यग्रयोश्छेदोऽङ्गुष्ठसन्दंशः तं, दापयेत्। भक्षितापहृतावस्कन्दितानां भक्षणापहरणपलायनानां च अर्थाद् भक्षयित्वापहृत्य वा पलायितानां च, अङ्गुष्ठसन्दंशं दापयेदित्येव। उक्त एव विषये दण्डविकल्पमाह — **वेतनेष्वि**ति। कर्मकराणां तन्तुवायादीनाम्, अपराधतः अपराधानुसारेण, वेतनेषु च दण्डः नावश्यं देहदण्डो यथोक्तः किन्तु तत्स्थाने यथापराधं वेतनदण्डोऽपि केवल इष्यत इत्यभिप्रायः। एवञ्च विकल्पपर्यवसित इह चकारो द्रष्टव्यः।

रज्ज्वित्यादि। रज्जुवर्तकैः रज्जुकल्पनजीविभिः, चर्मकारैश्च चर्ममयाश्वोपकरणादिकारिभिश्च, वर्मकारैरिति पाठे सूत्रकङ्कटादिकारिभिः, स्वयं संसृज्येत सख्यं कुर्यात् रज्ज्वादिपालनार्थं तत्कर्मानुष्ठापनार्थं च। भाण्डानि च उपकरणानि च, वरत्रादीनि गवादिबन्धनीप्रभृतीनि, वर्तयेत् कारयेत्। भाण्डादीनीति तु पाठो न सुष्ठु।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सूत्रवल्कमयी रज्जूर्वरत्रा वैत्रवैणवीः ।
सान्नाह्या बन्धनीयाश्च यानयुग्यस्य कारयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोविंशोऽध्यायः सूत्राध्यक्षः,
आदितश्चतुश्चत्वारिंशः ॥

अध्यायान्ते श्लोकमाह — **सूत्रे**त्यादि । सूत्रवल्कमयीः कार्पासादितन्तुमयीः शणादिवल्कमयीश्च, रज्जूः, वैत्रवैणवीर्वरत्राः वेत्रमयीर्वेणुमयीश्च वरत्राः, कीदृशीः, सान्नाह्याः सन्नाहोपयोगिनीः, यानयुग्यस्य बन्धनीयाश्च रथादेरश्वादेश्च बन्धनयोग्याश्च, कारयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोविंशोऽध्यायः सूत्राध्यक्षः,
आदितश्चतुश्चत्वारिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४१. प्रक. सीताध्यक्षः ।

सीताध्यक्षः कृषितन्त्रशुल्बवृक्षायुर्वेदज्ञस्तज्ज्ञसखो वा सर्वधान्यपुष्पफलशाककन्दमूलवाल्लिक्यक्षौमकार्पासबीजानि यथाकालं गृह्णीयात् ।

बहुहलपरिकृष्टायां स्वभूमौ दासकर्मकरदण्डप्रतिकर्तृभिर्वापयेत् ।

कर्षणयन्त्रोपकरणबलीवर्दैश्चैषामसङ्गं कारयेत् । कारुभिश्च कर्मारकुट्टाकमेदकरज्जुवर्तकसर्पग्राहादिभिश्च ।

तेषां कर्मफलविनिपाते तत्फलहानं दण्डः ।

षोडशद्रोणं जाङ्गलानां वर्षप्रमाणमध्यर्धमानूपानाम् । देशवा-

सीताध्यक्ष इति सूत्रम् । कृषिकर्माध्यक्ष इति सूत्रार्थः । 'सीताध्यक्षोपनीतः सस्यवर्णः सीता' इत्युक्तं कोष्ठागाराध्यक्षे । तदध्यक्षस्तद्व्यापारश्चाधुनोच्यते ।

सीताध्यक्ष इति । सीताध्यक्षः, कृषितन्त्रशुल्बवृक्षायुर्वेदज्ञः कृषितन्त्रं वृद्धपराशरादिप्रणीतं शुल्बशास्त्रं भूमिसिराज्ञानशास्त्रं वृक्षायुर्वेद आग्निवेश्यादिप्रणीतः तज्ज्ञः, तज्ज्ञसखो वा, सर्वधान्यादीनि धान्यादीनि सर्वविधस्वस्वावान्तरभेदयुक्तानि, यथाकालं संगृह्णीयात् । तत्र वाल्लिक्यं कूश्माण्डादिवल्लीफलम् । शेषं प्रसिद्धम् ।

बहुहलपरिकृष्टायामिति । बहुसीरविलिखितायां, स्वभूमौ तत्तद्धान्याद्यनुगुणायां भूमौ, दासादिभिः वापयेत्, दास उदरदासक्रीतदासादिः कर्मकरः वेतनार्थकर्मकारी दण्डप्रतिकर्ता कर्मणा दण्डनिष्क्रेता ।

कर्षणेत्यादि । कर्षणयन्त्राणि हलदण्डयुगादीनि उपकरणानि रज्जुदात्रादीनि परिकर्मकरा जनाश्च बलीवर्दाः प्रसिद्धाः एतैर्निर्दिष्टैः, एषां दासादीनाम्, असङ्गं क्रियानुपरोधं, कारयेत् । कारुभिश्च, कर्मारादिभिः, असङ्गं कारयेत्, तत्र कर्मारोऽयस्कारः कुट्टाकस्तक्षा मेदकः खनकः हिंसकत्वात्, भेदकपाठो वा, रज्जुवर्तकः रज्जुकल्पकः सर्पग्राहः व्यालग्राही ।

तेषामिति । कारूणां, कर्मफलविनिपाते तद्दोषजनिते कृषिफलविनाशे, तत्फलहानं दण्डः हापितफलपरिमाणो दण्डः ।

भूमिविशेषेषु सस्यनिष्पत्तिनिमित्तं वृष्टिप्रमाणमाह — **षोडशद्रोणं जाङ्गलानां वर्षप्रमाणमिति** । हस्तप्रमाणमुखयुक्ते वृष्टिमानार्थनिर्मिते कुण्डे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पानाम् । अर्धत्रयोदशाश्मकानां, त्रयोविंशतिरवन्तीनाम् , अमितमपरान्तानां, हैमन्यानां च कुल्यावापानां च कालतः ।

वर्षत्रिभागः पूर्वपश्चिममासयोः, द्वौ त्रिभागौ मध्यमयोः सुषमारूपम् ।

तस्योपलब्धिर्बृहस्पतेः स्थानगमनगर्भाधानेभ्यः शुक्रोदयास्तमयचारेभ्यः सूर्यस्य प्रकृतिवैकृताच्च ।

मेघाभिवृष्टोदकासारपरिपूरिते यदि तद्गतं जलं षोडशद्रोणात्मकमुपलभ्येत, तदा तावद् वर्षप्रमाणं मरुप्रायाणां भूभागानां सस्यनिष्पादनपर्याप्तं भवतीत्यर्थः । अध्यर्धं चतुर्विंशतिद्रोणम् , आनूपानां जलप्रायाणाम् । इदं जाङ्गलानूपभेदेन वर्षप्रमाणमुक्तम् । देशभेदेन तदाह — देशवापानामिति । वर्षप्रमाणं वक्ष्यत इति शेषः । अर्धत्रयोदश अर्धाधिकास्त्रयोदश वर्षप्रमाणद्रोणानि, अश्मकानाम् आरट्टानाम् । त्रयोविंशतिः द्रोणानि, अवन्तीनां मालवानाम् । अमितम् असंख्यातं वर्षप्रमाणम्, अपरान्तानां पाश्चात्यदेशस्य । हैमन्यानां च हिमाम्बुनिष्पाद्यसस्यानां हिमवत्प्रदेशानां च, हैम्यानामिति पाठेऽप्ययमेवार्थः, कुल्यावापानां च कुल्योपनेयजलमातृकप्रदेशानां च, कालतः स्वस्वकालानुसारेण सस्यसम्पत्तिः, न तु वर्षप्रमाणापेक्षेत्यर्थः ।

शोभनसंवत्सरस्य रूपमाह — वर्षत्रिभाग इत्यादि । वर्षत्रिभागः वर्षस्य तत्तद्देशोक्तवृष्टिप्रमाणस्य त्रिधा विभक्तस्य एकस्त्रिभागः, पूर्वपश्चिममासयोः श्रावणप्रोष्ठपदाश्वयुजकार्त्तिकाख्यमासचतुष्टये प्रथमचरमयोः श्रावणकार्त्तिकयोः भवति । शेषौ द्वौ त्रिभागौ, मध्यमयोः प्रोष्ठपदाश्वयुजयोः, भवतः । सुषमारूपं सुषमायाः शोभनस्य संवत्सरस्य रूपं भवति, अर्थाद् यथोक्तं भागशो वर्षणम् ।

भविष्यतः सुषमारूपस्य ज्ञापकमाह — तस्येत्यादि । तस्य सुषमारूपस्य, उपलब्धिरनुमितिः, बृहस्पतेः स्थानादित्रिकात् शुक्रोदयादित्रिकात् सूर्यस्य प्रकृतिवैकृताच्च भवति । तत्र स्थानं मेषादिराशिस्थितिः । गमनं मेषादेर्वृषभादिसंक्रमः । तयोर्वृष्ट्यादिफलहेतुत्वं ज्योतिश्शास्त्रप्रसिद्धम् । गर्भाधानं मार्गशीर्षादिषु षट्सु मासेषु तुषारादिदर्शनम् । तदुक्तं —

"मार्गशिराः सतुषारः सहिमः पौषः समारुतो माघः ।
साभ्रः फाल्गुनमासः सपवनवृष्टिश्च यदि चैत्रः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सूर्याद् बीजसिद्धिः । बृहस्पतेः सस्यानां स्तम्बकरिता । शुक्राद् वृष्टिरिति ।

त्रयः सप्ताहिका मेघा अशीतिः कणशीकराः ।
षष्टिरातपमेघानामेषा वृष्टिः समा हिता ॥
वातमातपयोगं च विभजन् यत्र वर्षति ।
त्रीन् कर्षकांश्च जनयंस्तत्र सस्यागमो ध्रुवः ॥

ततः प्रभूतोदकमल्पोदकं वा सस्यं वापयेत् ।

तडिदभ्रानिलविद्युज्जलवृषितो भवति यदि च वैशाखः ।
सम्यग् वर्षति मघवान् धारणदिवसेषु वर्षति चेत् ॥"

धारणदिवसा वैशाखकृष्णप्रतिपदादयश्चत्वार इति व्याख्यातारः । शुक्रस्योदयास्तमयौ प्रसिद्धौ । चारः आषाढमासपञ्चम्यादिषु नवसु तिथिषु संचारः । सूर्यस्य प्रकृतिवैकृतं स्वभावान्यथाभावः सपरिवेषत्वादि । इत्थं सुषमारूपोपलब्धिकरणं ग्रहत्रयचरितमुक्तम् ।

तत्र विशेषमाह — **सूर्यादिति** । सूर्यात् प्रकृतिस्थाद् विकृताद् वा, बीजसिद्धिः बीजस्य सस्यफलस्य सिद्धिर्निष्पत्तिः, अनुमीयते भवति नवेति । बृहस्पतेः स्थानादियुक्तात्, सस्यानां स्तम्बकरिता स्तम्बपरिबृंहणम्, अनुमीयते भवति नवेति । शुक्राद् उदयादियुक्ताद्, वृष्टिः अनुमीयते भवति नवेति ।

शोभनवृष्टिक्रमं श्लोकाभ्यामाह— **त्रय इत्यादि** । त्रयो मेघाः, सप्ताहिकाः सप्ताहोरात्राविच्छिन्नवृष्टिकारिणः । अशीतिर्मेघाः, कणशीकराः सान्द्रबिन्दुवर्षिणः । आतपमेघानाम् आतपयुक्तानां मेघानां, षष्टिः । एषा इत्थं परिसंख्यातमेघा, वृष्टिः, समा अन्यूनानतिरिक्ता, अत एव हिता लोकश्रेयस्करी च ॥

वातमिति । वातम् आतपयोगं च विभजन् तदुभयासंकरेण तिष्ठन्, त्रीन् कर्षकान् जनयन् तिसृभिर्वृष्टिभिर्ज्यैष्ठादिवापकालेषु तिस्रः कृषीः प्रवर्तयंश्च, त्रीन् करीषान् जनयन्निति पाठे दोहलार्थानां शुष्कगोमयानां त्रीन् संग्रहावसरान् विच्छिन्नवर्षणेनोत्पादयन्नित्यर्थः, अर्थात् पर्जन्यः, यत्र देशे, वर्षति, तत्र सस्यागमो ध्रुवः सस्यनिष्पत्तौ सन्देहो नास्ति ॥

तत इति । ततः यथोक्तवृष्टिप्रमाणादिपरिज्ञानानन्तरं, प्रभूतोदकं प्रचुरजलनिष्पाद्यम्, अल्पोदकं वा अल्पजलनिष्पाद्यं वा, सस्यं वापयेत्, अर्थात् प्रभूतवृष्टावल्पवृष्टौ वा देशे यथाक्रमम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शालिव्रीहिकोद्रवतिलप्रियङ्गुदारकवरकाः पूर्ववापाः। मुद्गमाषशैम्ब्या मध्यवापाः। कुसुम्भमसूरकुलुत्थयवगोधूमकलायातसीसर्षपाः पश्चाद्वापाः।

यथर्तुवशेन वा बीजवापाः।

वापातिरिक्तमर्धसीतिकाः कुर्युः। स्ववीर्योपजीविनो वा चतुर्थपञ्चभागिकाः। यथेष्टमनवसितभागं दद्युरन्यत्र कृच्छ्रेभ्यः।

स्वसेतुभ्यः हस्तप्रावर्तिममुदकभागं पञ्चमं दद्युः। स्कन्धप्रावर्तिमं चतुर्थम्। स्रोतोयन्त्रप्रावर्तिमं च तृतीयम्।

सस्येषु विशेषमाह — **शाली**त्यादि। शाल्यादयः सप्त, पूर्ववापाः पूर्वमेव वपनीयाः। मुद्गमाषशैम्ब्याः मध्यवापाः। कुसुम्भादयोऽष्टौ, पश्चाद्वापाः पश्चिमकालवपनीयाः।

यथर्तुवशेन वा बीजवापा इति! य एते शाल्यादिबीजवापा उक्ताः अनुक्ताश्चान्ये, ते सर्वे तत्तद्बीजसम्यङ्निष्पत्तियोग्यकालानुरोधेन कर्तव्याः।

वापातिरिक्तमिति। कृतवापक्षेत्रातिरिक्तं क्षेत्रम्, अर्धसीतिकाः कृषिफलार्धभागस्वीकरणसंविदा कृषन्तः बीजबलीवर्दादिसम्पन्ना ग्राम्यकुटुम्बिनः, कुर्युः साधयेयुः कर्षणबीजवपनादिना। **स्ववीर्ये**त्यादि। स्ववीर्योपजीविनो वा बीजादिषु स्वामिसम्बन्धिषु सत्सु स्वकायायासमात्रं क्षेत्रे कुर्वाणा वा कर्मकराः, चतुर्थपञ्चभागिकाः निष्पन्नस्य फलस्य चतुर्थभागं पञ्चमभागं वा लभन्ते। **यथेष्ट**मिति। अनवसितभागम् अनवसितस्य अभ्युपेत्याकृष्टस्य क्षेत्रस्य सस्यभागं, यथेष्टं स्वामीच्छानतिक्रमेण, दद्युः, अर्थादर्धसीतिकादयः। तत्रापवादः — **अन्यत्र कृच्छ्रेभ्य** इति। कर्षणविघातकविपदुपनिपातव्यतिरेके।

स्वसेतुभ्य इति। स्वसेतुभ्यः स्वदेहायासस्वद्रव्यव्ययनिष्पादितेभ्यस्तटाकादिभ्यः, हस्तप्रावर्तिमं कुम्भादिजलपायनरूपहस्तप्रवृत्तिसाधितम्, उदकभागम् उदकार्थं फलभागं, पञ्चमं, दद्युः राज्ञेऽर्पयेयुः, कृषीवलाः। स्कन्धप्रावर्तिमं स्कन्धवहप्रवर्तितयन्त्रपायितजलनिष्पन्नम् उदकभागं, चतुर्थं दद्युः। स्रोतोयन्त्रप्रावर्तिमं सारणीपायितजलनिष्पन्नं च उदकभागं, तृतीयं दद्युः। उदककरश्चायं भूमिकरवद् द्रष्टव्यः, यतो राजा भूम्युदकयोरविशेषात् स्वामी। तदुक्तं —

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चतुर्थं नदीसरस्तटाककूपोद्घाटम्।

कर्मोदकप्रमाणेन कैदारं हैमनं ग्रैष्मिकं वा सस्यं स्थापयेत्।

शाल्यादि ज्येष्ठम्। षण्डो मध्यमः। इक्षुः प्रत्यवरः। इक्षवो हि बह्वाबाधा व्ययग्राहिणश्च।

फेनाघातो वल्लीफलानां, परीवाहान्ताः पिप्पलीमृद्वीकेक्षूणां, कूपपर्यन्ताः शाकमूलानां, हरणिपर्यन्ता हरितकानां, पाल्यो लवानां गन्धभैषज्योशीरह्रीबेरपिण्डालुकादीनाम्। यथास्वं भूमिषु च स्थल्याश्चानूप्याश्चौषधीः स्थापयेत्।

"राजा भूमेः पतिर्दृष्टः शास्त्रज्ञैरुदकस्य च।
ताभ्यामन्यत्तु यद् द्रव्यं तत्र स्वाम्यं कुटुम्बिनाम्॥" इति।

स्वसेतुभ्योऽन्यत्र देयमाह—**चतुर्थमिति**। नदीसरस्तटाककूपोद्घाटम् उद्घाट्यते निस्सार्यते जलमनेनेत्युद्घाटोऽरघट्टकादियन्त्रं लक्षणया त्विह तज्जनितग्रहणम्। नद्यादिचतुष्टयाद् यन्त्रविशेषपायितजलनिष्पन्नं, चतुर्थं भागं, दद्युः।

कर्मोदकप्रमाणेनेति। कृष्यपेक्षितजलप्राचुर्याल्पत्वानुरोधेन, कैदारं शाल्यादिक्षेत्रवाप्यं, हैमनं हेमन्तकालवाप्यं, ग्रैष्मिकं ग्रीष्मकालवाप्यं वा, सस्यं, स्थापयेत् वापयेत्।

शाल्यादीत्यादि। शाल्यादिधान्यं, ज्येष्ठं श्रेष्ठं प्रधानाहारद्रव्यत्वादल्पव्ययायाससाध्यानल्पफलत्वाच्च। षण्डः कदल्यादिः, मध्यमः अल्पव्ययायाससाध्यफलत्वात्। इक्षुः प्रत्यवरः शाल्याद्यपेक्षया निकृष्टः। कुतः, हि यतः, इक्षवः, बह्वाबाधाः मनुष्यमूषिकाद्युपद्रवबहुलाः, व्ययग्राहिणश्च छेदनपीडनपचनादिबहुकर्मकरसापेक्षत्वात्।

अथ वापयोग्यभूमीराह—**फेनाघात इति**। फेनेनाहन्यत इति फेनाघातो जलपर्यन्तदेशः, वल्लीफलानां कूश्माण्डादीनाम्। परीवाहान्ताः जलोच्छ्वासपरिसरदेशाः, पिप्पलीमृद्वीकेक्षूणाम्। कूपपर्यन्ताः कूपपरिसरदेशाः, शाकमूलानाम्। हरणिपर्यन्ताः हरणिः कुल्या, सरस्तटाकादेः रिक्तीभूत आर्द्रप्रदेश इति स्वामी, तस्याः पर्यन्ताः, हरितकानां यवसादीनाम्। पाल्यः क्षेत्रमध्यकृताः सेतवः, लवानां छिन्नानां गन्धादिपञ्चकप्रभृतीनां गन्धो मांसीग्रन्थिपर्णकादिः भैषज्यं लशुनशतपुष्पादि उशीरं लामज्जं ह्रीबेरं बालाख्यं पिण्डालुकः रोमकन्दः इत्येतदादीनाम्। वापदेश इति सर्वत्र शेषः। **यथास्वमिति**। यथास्वं भूमिषु च स्वस्वयोग्यभूमिषु जलभूमिष्वनूपभूमिषु चेत्यर्थः,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तुषारपायनमुष्णशोषणं चा सप्तरात्रादिति धान्यबीजानां, त्रिरात्रं पञ्चरात्रं वा कोशीधान्यानां, मधुघृतसूकरवसाभिः शकृद्युक्ताभिः काण्डबीजानां छेदलेपो, मधुघृतेन कन्दानाम् । अस्थिबीजानां शकृदालेपः । शाखिनां गर्तदाहो गोस्थिशकृद्भिः काले दौहृदं च ।

प्ररूढांश्चाशुष्ककटुमत्स्यांश्च स्नुहिक्षीरेण पाययेत् ।
कार्पाससारं निर्मोकं सर्पस्य च समाहरेत् ।
न सर्पास्तत्र तिष्ठन्ति धूमो यत्रैष तिष्ठति ॥

सर्वबीजानां तु प्रथमवापे सुवर्णोदकसंप्लुतां पूर्वमुष्टिं वापयेत् अमुं च मन्त्रं ब्रूयात् —

स्थल्याश्च स्थलप्ररोहिणीश्च, अनूप्याश्च जलप्रायदेशप्ररोहिणीश्च, ओषधीः, स्थापयेत् ।

बीजसंस्कारमाह—**तुषारेत्यादि** । तुषारपायनं रात्रौ तुषारे निवेशनम्, उष्णशोषणम् आतपे दिवा निवेशनं च, आ सप्तरात्रात् सप्तरात्रमभिव्याप्य, कर्तव्यमिति शेषः । इति एष प्रकारो, धान्यबीजानाम् । त्रिरात्रं पञ्चरात्रं वा, कोशीधान्यानां मुद्गमाषादीनां तुषारपायनमुष्णशोषणं च । मधुघृतसूकरवसाभिः शकृद्युक्ताभिः माध्वीकसर्पिर्वराहकायस्नेहैर्गोमययुक्तैः, काण्डबीजानाम् इक्षुप्रभृतीनां, छेदलेपः छिन्नप्रदेशलेपनम् । मधुघृतेन, कन्दानां सूरणादीनां, छेदलेपः । अस्थिबीजानां कार्पासादिबीजानां, शकृदालेपः । शाखिनाम् आम्रपनसादिवृक्षाणां, गर्तदाहः तन्निवेशगर्ते तृणादिदहनं, गोस्थिशकृद्भिः गवास्थिपुरीषैः, काले दौहृदं च पुष्पफलप्रसवार्हवयःप्राप्तौ दोहलं च, कर्तव्यमिति शेषः ।

कृमिकीटाद्युपघातप्रतीकारमाह —**प्ररूढांश्चेति** । प्ररूढांश्च अङ्कुरितत्रिपत्रितमात्रांश्च पूर्वोक्तान् शाखिपर्यन्तान्, अशुष्ककटुमत्स्यान् स्नुहिक्षीरेण पाययेत् आर्द्रक्षुद्रमत्स्यैः समन्तदुग्धाख्यौषधिक्षीरयुक्तैः सेचयेत् । चः समुच्चये ।

सर्पप्रतीकारं श्लोकेनाह—**कार्पासेत्यादि** । कार्पाससारं कार्पासबीजस्य सारं, सर्पस्य, निर्मोकं च कञ्चुकं च, समाहरेत् संमेल्य धूपयेत् । एष धूमः मिलितोभयधूपनजनितो धूमः, यत्र तिष्ठति, तत्र सर्पाः न तिष्ठन्ति ॥

प्रथमवापे विशेषमाह — **सर्वबीजानामिति** । तुशब्दो विशेषे । सर्वबीजानां प्रथमवापे, सुवर्णोदकसंप्लुतां स्वर्णयुक्तजलकृतसंप्लवां पूर्वमुष्टिं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रजापतये काश्यपाय देवाय नमः सदा ।
सीता मे ऋध्यतां देवी बीजेषु च धनेषु च ॥

षण्डवाटगोपालकदासकर्मकरेभ्यो यथापुरुषपरिवापं भक्तं कुर्यात् । सपादपणिकं मासं दद्यात् । कर्मानुरूपं कारुभ्यो भक्तवेतनम् ।

प्रशीर्णं च पुष्पफलं देवकार्यार्थं व्रीहियवमाग्रयणार्थं श्रोत्रियास्तपस्विनश्चाहरेयुः । राशिमूलमुञ्छवृत्तयः ।

यथाकालं च सस्यादि जातं जातं प्रवेशयेत् ।
न क्षेत्रे स्थापयेत् किञ्चित् पलालमपि पण्डितः ॥

प्रथमां बीजमुष्टिं, वापयेत् । अमुं वक्ष्यमाणं च, मन्त्रं मन्त्रश्लोकं, ब्रूयात् वापयन्नुच्चारयेत् ।

प्रजापतय इत्यादि । देवाय पर्जन्याय । ऋध्यतां वर्धताम् । ऋध्यतेरात्मनेपदमार्षम् । आद्ययोः श्लोकपादयोर्विसन्धानमपि मन्त्रत्वकृतम् । 'प्रजापतेः काश्यपाय देवलाय नमः सदा' इति भाषापाठः । तत्र तु नम इत्येतदनव्ययं परिकल्प्य प्रजापतेरिति षष्ठी सम्बन्धे समर्थनीया, 'नमःस्वस्ती'ति सूत्रे स्वस्त्यादिसाहचर्येणाव्ययस्यैव नमःशब्दस्य ग्रहणात् ।

षण्डवाटेत्यादि । षण्डवाटपालकेभ्यो गोपालकेभ्यो दासेभ्यः कर्मकरेभ्यश्च, यथापुरुषपरिवापं पुरुषपरिश्रमानुरूप्येण, भक्तं भोजनं, कुर्यात् कल्पयेत् । सपादपणिकं मासं पादाधिकपणयुक्तं मासजीवितं, दद्यात् । कर्मानुरूपं, कारुभ्यस्तक्षादिभ्यः, भक्तवेतनं भोजनं वेतनं च, दद्यादित्यनुकर्षः ।

प्रशीर्णं चेति । प्रशीर्णं वृक्षादेः स्वयं पतितं, पुष्पफलं पुष्पाणि फलानि च, देवकार्यार्थं देवपूजार्थं, व्रीहियवं स्वयं पतितान् व्रीहीन् यवांश्च, आग्रयणार्थं नवसस्यार्थं, श्रोत्रियाः छन्दोध्यायिनः, तपस्विनः तापसाश्च, आहरेयुः गृह्णीयुः । राशिमूलं खलनिवेशितधान्यराश्यन्तिकगतं कणिशादि, उञ्छवृत्तयः धान्यकणादानजीविनः, आहरेयुरित्यनुषङ्गः ।

अध्यायान्ते श्लोकानाह — **यथाकाल**मिति । यथाकालं प्रवेशनार्हकालानतिक्रमेण, सस्यादि, जातं जातं निष्पन्नमखिलं, प्रवेशयेत् । क्षेत्रे किञ्चित् पलालमपि, न स्थापयेत्, पण्डितः अर्थसञ्चयविधानाभिज्ञः । यदाहुः —

"यस्य विघ्नान् न कुर्वन्ति शीतमुष्णं रतिर्भयम् ।
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ॥" इति ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकराणां समुच्छ्रायान् वलभीर्वा तथाविधाः ।
न संहतानि कुर्वीत न तुच्छानि शिरांसि च ॥
खलस्य प्रकरान् कुर्यान्मण्डलान्ते समाश्रितान् ।
अनग्निकाः सोदकाश्च खले स्युः परिकर्मिणः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्विंशोऽध्यायः सीताध्यक्षः,
आदितः पञ्चचत्वारिंशः ॥

प्रकराणामिति । प्रकराणां धान्यनिवेशस्थानानां, समुच्छ्रायान् उन्नतसन्निवेशान्, कुर्वीत । वलभीर्वा तथाविधाः उच्छ्रितानि कूटागाराणि वा कुर्वीत । शिरांसि च तेषां, न संहतानि कुर्वीत अन्योन्योपश्लिष्टानि न कुर्वीत, न तुच्छानि रिक्तकानि न कुर्वीत किन्तु चण्डवाताद्यपहारनिषेधार्थं लोहपाषाणादिगुरुद्रव्यगर्भाणि कुर्वीत ॥

खलस्येति । प्रकरान्, खलस्य, मण्डलान्ते स्तम्बधान्यविश्लेषणाय यत्र बलीवर्दपङ्क्तिर्मण्डलभ्रमणं कार्यते स प्रदेशो मण्डलं तस्यान्ते समीपे, समाश्रितान् कुर्यात् । खले, परिकर्मिणः परिकर्मकारिणः, अनग्निकाः धान्यदाहभयादग्निरहिताः, सोदकाश्च यादृच्छिकाग्निदीपनप्रशमार्थं सन्निहितजलाश्च, स्युः ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्विंशोऽध्यायः सीताध्यक्षः,
आदितः पञ्चचत्वारिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४२. प्रक. सुराध्यक्षः ।

सुराध्यक्षः सुराकिण्वव्यवहारान् दुर्गे जनपदे स्कन्धावारे वा तज्जातसुराकिण्वव्यवहारिभिः कारयेदेकमुखमनेकमुखं वा विक्रयक्रयवशेन वा। षट्छतमत्ययमन्यत्र कर्तृक्रेतृविक्रेतॄणां स्थापयेत्। ग्रामादनिर्णयनमसम्पातं च सुरायाः, प्रमादभयात् कर्मसु निर्दिष्टानां, मर्यादातिक्रमभयादार्याणाम्, उत्साहभयाच्च तीक्ष्णानाम् ।

लक्षितमल्पं वा चतुर्भागमर्धकुडुबं कुडुबमर्धप्रस्थं प्रस्थं वेति ज्ञातशौचा निर्हरेयुः ।

सुराध्यक्ष इति सूत्रम् । सुरा गौडी माध्वी पैष्टीत्येवं त्रिविधा तस्या अध्यक्षस्तत्सन्धानाद्यधिकृतः । स इहोच्यत इति सूत्रार्थः ।

समाहर्तृप्रत्यवेक्षणीये दुर्गे सुरा निर्दिष्टा। तदध्यक्षस्तद्व्यापारो वानाभिहित इदानीमभिधीयते ।

सुराध्यक्ष इत्यादि । सः, सुराकिण्वव्यवहारान् सुरातद्बीजसम्बद्धान् तत्सन्धानविक्रयादिव्यवहारान्, तज्जातसुराकिण्वव्यवहारिभिः तत्कर्मकुलोत्पन्ननिपुणतद्व्यवहारिभिः, कारयेत्। कथमित्याह—एकमुखम् एकस्थानकम्, अनेकमुखं वा अनेकस्थानकं वा, विक्रयक्रयवशेन वा क्रयविक्रयप्रियाप्रियत्वानुरोधेन वा । षट्छतमत्ययं षट्छतपणात्मकं दण्डम्, अन्यत्र कर्तृक्रेतृविक्रेतॄणां व्यवस्थितस्थानेतरस्थानेषु सन्धानक्रयविक्रयकारिणां, स्थापयेत्। **ग्रामा**दिति । सुराया मद्यस्य उपलक्षणया तत्पानमदवतां च, ग्रामाद्, अनिर्णयनं बहिरनिस्सरणम्, असम्पातम् अगमनं च गृहाद् गृहान्तरे जनाकीर्णे वा, स्थापयेदित्यनुषङ्गः। तत्र कारणमाह —प्रमादभयात् कर्मसु निर्दिष्टानां तत्तत्कमनियुक्तानामध्यक्षादीनां स्वकर्मस्ववधानभङ्गभयात्, मर्यादातिक्रमभयाद् आर्याणां साधूनां स्वधर्मातिलङ्घनभयात्, उत्साहभयाच्च तीक्ष्णानां शूराणाम् अस्थानशस्त्रप्रयोगभयाच्च ।

निर्णयनाभ्यनुज्ञानपक्षमाह — **लक्षितमि**ति । वाशब्दः पक्षान्तरे । लक्षितम् अभिज्ञानमुद्राचिह्नितम्, अल्पम् अल्पपरिमाणम् । अल्पत्वस्यैव व्याख्यानं **चतुर्भागमि**त्यादिना। चतुर्भागं पादकुडुबम्, अर्धकुडुबं, कुडुबम्, अर्धप्रस्थं, प्रस्थं वा परमावधिपरिमाणम्, इति एवम्प्रकारं सुरापरिमाणं, ज्ञातशौचाः प्रतीतवृत्ताव्यभिचाराः, निर्हरेयुः निर्णयेयुः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पानागारेषु वा पिबेयुरसञ्चारिणः ।

निक्षेपोपनिधिप्रयोगापहृतादीनामनिष्टोपगतानां च द्रव्याणां ज्ञानार्थमस्वामिकं कुप्यं हिरण्यं चोपलभ्य निक्षेप्तारमन्यत्र व्यपदेशेन ग्राहयेत् । अतिव्ययकर्तारमनायतिव्ययं च ।

न चानर्घेण कालिकां वा सुरां दद्यादन्यत्र दुष्टसुरायाः । तामन्यत्र विक्रापयेत् । दासकर्मकरेभ्यो वा वेतनं दद्यात् । वाहनप्रतिपानं सूकरपोषणं वा दद्यात् ।

सामान्यविधिमाह— **पानागारेष्वित्यादि** । वेति वाक्यपूरणे । असञ्चारिणः मदकालवर्जितसम्पाताः ।

एवं गर्ह्योऽपि सुराव्यवहारश्चोरसाहसिकाद्युपलम्भसाधनत्वान्महाफल इत्यभिप्रायेणाह— **निक्षेपेत्यादि** । निक्षेपो भाण्डघटनाय दत्तम्, उपनिधिः न्यासः, प्रयोगः आधिः, अपहृतं चोरितम्, आदिशब्दाद् याचितकादि गृह्यते, एषां निक्षेपादीनाम्, अनिष्टोपगतानां साहसहृतानां च, द्रव्याणां, ज्ञानार्थं तत्त्वावगमार्थम्, अस्वामिकम् अविदितस्वामिकं, कुप्यं खड्गादिकं, हिरण्यं च मद्यपायिना पानायाहितम्, उपलभ्य, निक्षेप्तारं कुप्यहिरण्याधातारं पुरुषम्, अन्यत्र पानागारादन्यस्मिन् प्रदेशे, व्यपदेशेन वाक्पारुष्यादिच्छलेन, ग्राहयेत् नगराध्यक्षेण । पानागार एव तद्ग्रहणे व्यपदेशाकरणे चान्ये चोरादयः पानशौण्डा यथोक्तकुप्यादिकमविश्वासात् तत्र नानयेयुरित्यत उक्तम् 'अन्यत्रे'ति 'व्यपदेशेने'ति च । अतिव्ययकर्तारम् आयाधिकव्ययकारिणम्, अनायतिव्ययम् आयतिं विना व्ययकारिणं च, ग्राहयेदित्यनुषङ्गः ।

न चानर्घेणेति । अनर्घेण अल्पेन मूल्येन, कालिकां वा सवृद्धिकमूल्यदानकालावधिमतीं वा कालान्तरदेयमूल्येन वेति यावत्, सुरां, न च दद्यात् क्रेतृभ्यः, अन्यत्र दुष्टसुरायाः दुष्टसुराव्यतिरेकेण । दुष्टसुरामपि प्रशस्तसुराविक्रयस्थानादन्यत्र नीत्वा धारणकक्रेतृभ्यो दापयेदित्याह **—तामन्यत्र विक्रापयेदिति** । **दासेत्यादि** । दासकर्मकरेभ्यो वा, वेतनं दद्यात् वेतनस्थाने दुष्टसुरां दद्यात् । तच्च वेतनं क्षुद्रकर्मविषयमित्यभिप्रायेणाह— **वाहनेत्यादि** । वाहनप्रतिपानम् उष्ट्रबलीवर्दादिप्रतिपालनविषयं, सूकरपोषणं वा वराहपोषणविषयं वा, दद्याद् अर्थाद् वेतनम् । वाहनप्रतिपानमित्यस्य उष्ट्रादिव्यापारणभृतिनिष्क्रयार्थां सुरामिति वार्थः सुवचः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पानागाराण्यनेककक्ष्याणि विभक्तशयनासनवन्ति पानोद्देशानि गन्धमाल्योदकवन्ति ऋतुसुखानि कारयेत् ।

तत्रस्थाः प्रकृत्यौत्पत्तिकौ व्ययौ गूढा विद्युरागन्तूंश्च ।

क्रेतॄणां मत्तसुप्तानामलङ्काराच्छादनहिरण्यानि च विद्युः । तन्नाशे वणिजस्तच्च तावच्च दण्डं दद्युः ।

वणिजस्तु संवृतेषु कक्ष्याविभागेषु स्वदासीभिः पेशलरूपाभिरागन्तूनां वास्तव्यानां च आर्यरूपाणां मत्तसुप्तानां भावं विद्युः ।

मेदकप्रसन्नासवारिष्टमैरेयमधूनाम् ।

उदकद्रोणं तण्डुलानामर्धाढकं त्रयः प्रस्थाः किण्वस्येति मेदकयोगः ।

पानागाराणीत्यादि । पानोद्देशानि पानयोग्योत्कृष्टप्रदेशोपेतानि । ऋतुसुखानि ऋतुषु सर्वेषु सुखानि तत्तदुचितभोग्यवस्तुसमृद्धतया सुखकराणि । शेषं सुगमम् ।

तत्रस्था इति । तत्रस्थाः पानागारस्थाः, प्रकृत्यौत्पत्तिकौ प्रकृतिसिद्धः प्रकृतिर्नित्यः अपूर्वोपजन उत्पत्तिस्तत्सिद्ध औत्पत्तिकः तथाविधौ, व्ययौ मद्यपायिनां, गूढाः पानागारकर्मकरादिव्यञ्जनाः, विद्युः । आगन्तून् विदेशागतांश्च पातॄन् विद्युः ।

क्रेतॄणामिति । मद्यपायिनां, मत्तसुप्तानाम्, अलङ्काराच्छादनहिरण्यानि च देहगतानि, विद्युः, गूढा इत्येव । तन्नाशे तेषामलङ्कारादीनां चोरादिनापहारे, वणिजः मद्यविक्रयिणः, तच्च तावच्च दण्डं नष्टसदृशरूपपरिमाणं दण्डं, दद्युः।

वणिग्विषयं प्रस्तावान्तरमाह— **वणिजस्त्वि**ति । मद्यविक्रयिणः, संवृतेषु विविक्तेषु, कक्ष्याविभागेषु, स्वदासीभिः आप्तप्रेष्याभिः, पेशलरूपाभिः रुचिराकृतिभिः, आगन्तूनां विदेशागतानां, वास्तव्यानां च स्वदेशगतानां च, आर्यरूपाणाम् आर्यवत् प्रतिभासमानानां, मत्तसुप्तानां, भावं विद्युः अभिप्रायं गृह्णीयुः । चोरत्वपरप्रयुक्तत्वादिपरीक्षार्थम् ।

मेदकादियोगविधिं प्रतिजानीते — **मेदके**त्यादि । मेदकादीनां षण्णां, योगविधिरुच्यत इति शेषः ।

मेदकयोगमाह — **उदकद्रोण**मित्यादि । द्रोणपरिमितं जलम् अर्धाढकपरिमितास्तण्डुलाः त्रिप्रस्थपरिमितं मद्यबीजमित्यनेन मिश्रणप्रकारेण मेदकयोगो भवति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वादशाढकं पिष्टस्य पञ्च प्रस्थाः किण्वस्य पुत्रकत्वक्फलयुक्तो वा जातिसम्भारः प्रसन्नायोगः।

कपित्थतुला फाणितं पञ्चतौलिकं प्रस्थो मधुन इत्यासवयोगः। पादाधिको ज्येष्ठः पादहीनः कनिष्ठः।

चिकित्सकप्रमाणाः प्रत्येकशो विकाराणामरिष्टाः।

मेषशृङ्गीत्वक्काथाभिषुतो गुलप्रतीवापः पिप्पलीमरिचसम्भारस्त्रिफलायुक्तो वा मैरेयः। गुलयुक्तानां वा सर्वेषां त्रिफलासम्भारः।

मृद्वीकारसो मधु। तस्य स्वदेशो व्याख्यानं कापिशायनं हारहूरकमिति।

प्रसन्नायोगमाह — **द्वादशाढकमित्यादि** । पुत्रकत्वक्फलयुक्तः कामरूपजनपदप्रसिद्धपुत्रकाख्यवृक्षविशेषत्वक्फलसहितः। जातिसम्भारः 'पाठालोध्रे'त्यादिनानुपदं वक्ष्यमाणः पाठादिप्रयोगः। शेषं सुगमम्। पूर्वत्र तण्डुलोक्तदिशा जलप्रमाणमप्यत्र पिष्टाष्टगुणमूहनीयम्।

आसवयोगमाह — **कपित्थेत्यादि**। कपित्थतुला शतपलः कपित्थफलसारः, फाणितं, पञ्चतौलिकं तुलापञ्चकपरिमाणं, मधुनः प्रस्थः प्रस्थपरिमाणं माध्वीकम्, इत्येवम्प्रकार आसवयोगः। एष एव कपित्थादिप्रमाणचतुर्भागाधिको ज्येष्ठः, तच्चतुर्भागन्यूनस्तु कनिष्ठ इत्युच्यत इत्याह — **पादाधिक इत्यादि**। अर्थात् पूर्वोक्तो मध्यमः।

तत्तद्रोगाणां यथास्वं चिकित्सोपयोगिनोऽत एव भिषगुपदिष्टयोज्यद्रव्यप्रमाणाः अरिष्टयोगा इत्याह— **चिकित्सकप्रमाणा इत्यादि**। विकाराणां वातादिविकाररूपाणां रोगाणाम्। अरिष्टा अभयारिष्टादयो वैद्यप्रसिद्धाः।

मैरेयमाह — **मेषशृङ्गीत्यादि**। मेषशृङ्गीत्वक्काथाभिषुतः मेषशृङ्गीसंज्ञकवृक्षत्वक्कषायसंहितः, गुलप्रतीवापः गुलोपचारयुक्तः, पिप्पलीमरिचसम्भारः पिप्पलीमरिचचूर्णमिश्रः, त्रिफलायुक्तो वा त्रिफलाचूर्णयुक्तो वा, मैरेयः। वाशब्दः सम्भारविकल्पने। गुलप्रतिवापिनां मद्यानां सर्वेषामपि त्रिफलासम्भारः साधारण इति कञ्चित् पक्षमाह — **गुलयुक्तानामित्यादि**।

मधुविधिमाह — **मृद्वीकारस इति**। द्राक्षारसः पक्वद्राक्षाफलरसः, मधु भवति। तस्य मधुनः, स्वदेशो व्याख्यानं स्वोत्पत्तिदेशसम्बन्धनिमित्तकं विविधमर्थाद् द्विविधमाख्यानं संज्ञा, कापिशायनमिति हारहूरकमिति च। कपि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

माषकलनीद्रोणमामं सिद्धं वा त्रिभागाधिकतण्डुलं मोरटादीनां कार्षिकभागयुक्तं किण्वाबन्धः ।

पाठालोध्रतेजोवत्येलावालुकमधुकमधुरसाप्रियङ्गुदारुहरिद्रामरिचपिप्पलीनां च पञ्चकर्षिकः सम्भारयोगो मेदकस्य प्रसन्नायाश्च । मधुकानिर्यूहयुक्ता कटशर्करा वर्णप्रसादनी च ।

चोचचित्रकविलङ्गगजपिप्पलीनां च कार्षिकः क्रमुकमधुकमुस्तालोध्राणां द्विकार्षिकश्चासवसम्भारः । दशभागश्चैषां बीजबन्धः ।

प्रसन्नायोगः श्वेतसुरायाः ।

शेति नदी तत्तीरगतं नगरं च तत्र भवं कापिशायनम् । हरहूरं तदेव नगरं तत्र भवं हारहूरकम् । व्याख्यानमिति टीकाभाषयोः स्वरसप्रतीते पाठे आख्यानद्वयमित्यर्थः, क्लीबत्वं त्रिभुवनवत् ।

किण्वविधिमाह — माषकलनीत्यादि । माषकलनीद्रोणं माषकल्कभावितमुदकद्रोणम्, आमं सिद्धं वा अक्वथितं क्वथितं वा, त्रिभागाधिकतण्डुलं त्रिभागाधिकद्रोणपरिमाणतण्डुलपिष्टयुक्तं, मोरटादीनां वक्ष्यमाणानां, कार्षिकभागयुक्तं प्रत्येकपादपलभागयुक्तं, किण्वाबन्धः किण्वयोगः ।

मेदकप्रसन्नयोः सम्भारयोगमाह—पाठालोध्रेत्यादि । पाठा अम्बष्ठाख्या, लोध्रः तिरीटकल्कः, तेजोवती इभपिप्पली, एला प्रसिद्धा, वालुकं हरिवालुकं, मधुकं मधुयष्टिः, मधुरसा दूर्वा, प्रियङ्गु कुङ्कुमं, दारुहरिद्रा दार्वीसंज्ञा, दार्विति भिन्नं वा पदं तच्च पीतदारुसंज्ञं, हरिद्रा तु प्रसिद्धा, मरिचं कोलं, पिप्पली प्रसिद्धा । पाठादीनां पञ्चकर्षिकः प्रत्येकं चूर्णपञ्चकर्षप्रमाणः, सम्भारयोगः, मेदकस्य प्रसन्नायाश्च । मधुकनिर्यूहयुक्ता यष्टिमधुककषाययुक्ता, कटशर्करा गङ्गेष्टिः, वर्णप्रसादनी च मेदकप्रसन्नयोर्वर्णप्रसादहेतुश्च ।

आसवसम्भारमाह—चोचेत्यादि । चोचं त्वचसंज्ञं चित्रकोऽग्निसंज्ञः विलङ्गम् अमोघा गजपिप्पली प्रसिद्धा एतासां चतसृणां च, कार्षिकः प्रत्येकं कर्षप्रमाणः, टीकाभाषयोरनुमिते 'षट्कार्षिक' इति पाठे सार्धपलप्रमाण इत्यर्थः, क्रमुकमधुकमुस्तालोध्राणां क्रमुको घोण्टा मधुकं श्यामकङ्गुः मुस्ता कुरुविन्दः लोध्रस्तिरीटः एतेषां, द्विकार्षिकश्च कर्षद्वयप्रमाणश्च, आसवसम्भारः । दशभागश्चैषां चोचादीनां दशभागः, बीजबन्धः आसवकरणद्रव्येषु योज्यः ।

प्रसन्नायोगः श्वेतसुराया इति । प्रसन्नाया योगो य उक्तः स एव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सहकारसुरा, रसोत्तरा, बीजोत्तरा वा महासुरा, सम्भारिकी वा।

तासां मोरटापलाशपत्तूरमेषशृङ्गीकरञ्जक्षीरवृक्षकषायभावितं दग्धकटशर्कराचूर्णं लोध्रचित्रकविलङ्गपाठामुस्ताकलिङ्गयवदारुहरिद्रेन्दीवरशतपुष्पापामार्गसप्तपर्णनिम्बास्फोतकल्कार्धयुक्तमन्तर्नखो मुष्टिः कुम्भीं राजपेयां प्रसादयति। फाणितः पञ्चपलिकश्चात्र रसवृद्धिर्देयः।

कुटुम्बिनः कृत्येषु श्वेतसुरामौषधार्थं वारिष्टमन्यद् वा कर्तुं लभेरन्।

उत्सवसमाजयात्रासु चतुरहः सौरिको देयः। तेष्वननुज्ञातानां प्रहवणान्तं दैवसिकमत्ययं गृह्णीयात्।

श्वेतसुराया अपि योगो भवति। किन्तु स सम्भाररहितः समकिण्वाबन्धश्चेत्याह स्वामी। सम्भारबीजबन्धावुभावपि नेत्याह भाषा।

अथ सुराभेदाः—**सहकारसुरेति**। सुरैव सहकारतैलयुक्ता सहकारसुरा। गुडप्रतिवापयुक्ता सुरा रसोत्तराख्या या शीधु इत्युच्यते। बीजोत्तरा बीजद्रव्यमात्राधिका महासुरा। सम्भारमात्राधिका सुरा सम्भारिकी।

सुराप्रसादनविधिमाह—**तासामिति**। तासां सर्वासां सुराणां, मोरटादिषट्ककषायभावितं मोरटा मूलपुष्पिकाख्यो वल्लीभेदः पलाशः किंशुकः पत्तूरो लोहमारकः मेषशृङ्गी विषाणी करञ्जो नक्तमालः क्षीरवृक्षो वटादिः एतेषां निर्यूहेन भावितं, दग्धकटशर्कराचूर्णं, लोध्रादिकल्कार्धयुक्तं कलिङ्गयवः देशविशेषभवो यवः शतपुष्पा सितच्छत्राख्या अपामार्गः खरमञ्जरी आस्फोतः ब्रह्मवृक्षः शेषं प्रसिद्धम् एषां लोध्रादीनां कल्कस्य अर्धेन कटशर्कराचूर्णार्धप्रमाणेन युक्तम्, अन्तर्नखो मुष्टिः अदृश्यनखमुष्टिमेयं, प्रक्षिप्तमिति शेषः, कुम्भीं खारीमितां सुरां, राजपेयां प्रसादयति राजपानयोग्या यथा भवेत् तथा स्वच्छां करोति। फाणितः, पञ्चपलिकश्च पलपञ्चकप्रमाणश्च, अत्र प्रसादितसुरायां, रसवृद्धिर्देयः रसवृद्धिप्रयोजनः क्षेप्तव्यः।

कुटुम्बिन इति। कुटुम्बिनः पौरजानपदाः, कृत्येषु विवाहादिकार्येषु, श्वेतसुराम्, औषधार्थं वारिष्टम् औषधार्थं भिषगुपदिष्टमरिष्टं वा, अन्यद्वा मेदकादि वा, कर्तुं सन्धातुं, लभेरन्।

उत्सवेत्यादि। उत्सवसमाजयात्रासु वसन्ताद्युत्सवेषु बन्धुजनमेलनेषु इष्टदेवतापूजासु च, चतुरहः सौरिको देयः चत्वारो दिवसाः सुरापानार्था अनुज्ञातव्याः, सुराध्यक्षेण। तेषु उत्सवादिषु, अननुज्ञातानाम् अनुज्ञां विनैव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुराकिण्वविचयं स्त्रियो बालाश्च कुर्युः ।

अराजपण्याः पञ्चकं शतं शुल्कं दद्युः सुरकामेदकारिष्टमधुफलाम्लाम्लशीधूनां च ।

अह्नश्च विक्रयं व्याजीं ज्ञात्वा मानहिरण्ययोः ।
तथा वैधरणं कुर्यादुचितं चानुवर्तयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चविंशोऽध्यायः सुराध्यक्षः,
आदितः षट्चत्वारिंशः ॥

पिबतां, प्रहवणान्तं प्रहवणं तुष्टिभोजनं तेनोत्सवादिसमाप्तिकालो लक्ष्यते, तदवधिकमित्यर्थः, दैवसिकमत्ययं गृह्णीयात् प्रात्यहिकं दण्डं गृह्णीयात् सुराध्यक्षः । अननुज्ञातपानजनितमददिवसेषु कर्महानिनिमित्तं दण्डं कर्मकरेभ्यो गृह्णीयादिति केचिद् व्याचक्षते ।

सुरेत्यादि । सुराकिण्वविचयं सुराया विचयं श्रपणादिरूपं कर्म किण्वस्य विचयं शोषणादिरूपं च, स्त्रियो बालाश्च कुर्युः, तद्रसानभिज्ञाः ।

अराजपण्या इति । स्वोत्पादितमद्यविक्रयिणः, शुल्कं राजभागं, दद्युः । कथं दद्युः, पञ्चकं शतम् इतिशब्द इहाध्याहर्तव्यः पञ्चकं शतमिति पञ्च शुल्कोऽस्मिञ्छते दीयत इत्यनेन क्रमेण दद्युरित्यर्थः । केषां पण्यानामित्याकाङ्क्षायामाह — सुरकेत्यादि । तत्र सुरैव सुरका, मेदकारिष्टमधूनि प्रतीतानि, फलाम्ला तालनालिकेरादिमद्यम्, अम्लशीधु उदक्षु प्रतीतमिति स्वामी । चकारः किण्वादिग्रहणार्थः ।

उक्तशुल्कातिरेकेण व्याज्या अपि करणमध्यायान्तश्लोकेनाह—अह्नश्चेति । अह्नश्च विक्रयं दिनकृतं विक्रयं, तथा वैधरणं मानावश्यम्भाविनं पण्यच्छेदं च, ज्ञात्वा इयत्तया निर्धार्य, मानहिरण्ययोर्व्याजीं षोडशभागरूपां मानव्याजीं विंशतिभागरूपां हिरण्यव्याजीं च, कुर्यात् कल्पयेत्, सुराध्यक्षः । करणं च न यथाकामं भवति, किन्तु समुदाचारसिद्धमेवानुसर्तव्यमित्याह— उचितं चानुवर्तयेदिति ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चविंशोऽध्यायः सुराध्यक्षः,
आदितः षट्चत्वारिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४३. प्रक॰ सूनाध्यक्षः ।

सूनाध्यक्षः प्रदिष्टाभयानामभयवनवासिनां च मृगपशुपक्षिमत्स्यानां बन्धवधहिंसायामुत्तमं दण्डं कारयेत् । कुटुम्बिनामभयवनपरिग्रहेषु मध्यमम् ।

अप्रवृत्तवधानां मत्स्यपक्षिणां बन्धवधहिंसायां पादोनसप्तविंशतिपणमत्ययं कुर्यात्, मृगपशूनां द्विगुणम् ।

प्रवृत्तहिंसानामपरिगृहीतानां षड्भागं गृह्णीयात् । मत्स्यपक्षिणां दशभागं वाधिकं, मृगपशूनां शुल्कं वाधिकम् ।

पक्षिमृगाणां जीवत्षड्भागमभयवनेषु प्रमुञ्चेत् ।

सूनाध्यक्ष इति सूत्रम् । सूना भक्ष्यप्राणिवधस्थानं तदध्यक्षव्यापारोऽभिधीयत इति सूत्रार्थः । उत्तममध्यमाधमेषु कर्मसु तदनुरूपा अध्यक्षाः कार्या इत्युक्तमधस्तात् । तत्र समाहर्तृसन्निधातृप्रभृतय उत्तमाः पौतवाध्यक्षादयो मध्यमाश्चाभिहिताः । इदानीमधमकर्माध्यक्षा अभिधीयन्त इति सम्बन्धः ।

तदाह — सूनाध्यक्ष इति सूनाध्यक्षः, प्रदिष्टाभयानां प्रख्यापिताहिंसानाम्, अभयवनवासिनां च ब्रह्मसोमारण्यसर्वातिथिमृगवनादिवासिनां च, मृगपशुपक्षिमत्स्यानां मृगाणां कुरङ्गादीनां पशूनां खड्गमहिषादीनां पक्षिणां मयूरादीनां मत्स्यानां च, बन्धवधहिंसायां बन्धनप्रहारमारणेषु, उत्तमम् उत्तमसाहसं, दण्डं कारयेत् । कुटुम्बिनाम्, अभयवनपरिग्रहेषु अभयवनवासिमृगादिविषये वधादौ, मध्यमं साहसं, कारयेत् ।

अप्रवृत्तेत्यादि । अप्रवृत्तवधानां चिरानुष्ठीयमानवधाः प्रवृत्तवधाः तथा न भवन्तीत्यप्रवृत्तवधाः तेषां, मत्स्यपक्षिणां बन्धवधहिंसायां, पादोनसप्तविंशतिपणम्, अत्ययं दण्डं, कुर्यात् । मृगपशूनां तथाविधानां, द्विगुणम् अर्धोनचतुष्पञ्चाशत्पणं दण्डं कुर्यात् ।

प्रवृत्तेत्यादि । प्रवृत्तहिंसानाम्, अपरिगृहीतानाम् अस्वामिकारक्षितवनगतानां वधादौ, षड्भागं गृह्णीयात् । मत्स्यपक्षिणां, दशभागं वाधिकं दशमांशं ततोऽधिकं वा, गृह्णीयात् । मृगपशूनां, शुल्कं वाधिकं राजादेयं मृगपशुमूल्यस्य दशभागं ततोऽधिकं वा, गृह्णीयात् ।

पक्षीत्यादि । पक्षिमृगाणां वनगृहीतानां, जीवत्षड्भागं जीवतां षड्भागम्, अभयवनेषु, प्रमुञ्चेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सामुद्रहस्त्यश्वपुरुषवृषगर्दभाकृतयो मत्स्याः सारसा नादेयास्तटाककुल्योद्भवा वा, क्रौञ्चोत्क्रोशकदात्यूहहंसचक्रवाकजीवञ्जीवकभृङ्गराजचकोरमत्तकोकिलमयूरशुकमदनशारिका विहारपक्षिणो मङ्गल्याश्चान्येऽपि प्राणिनः पक्षिमृगा हिंसाबाधेभ्यो रक्ष्याः । रक्षातिक्रमे पूर्वः साहसदण्डः ।

मृगपशूनामनस्थि मांसं सद्योहतं विक्रीणीरन् । अस्थिमतः प्रतिपातं दद्युः । तुलाहीने हीनाष्टगुणम् ।

वत्सो वृषो धेनुश्चैषामवध्याः । घ्नतः पञ्चाशत्को दण्डः । क्लिष्टघातं घातयतश्च ।

रक्ष्यप्राणिन आह—सामुद्रेत्यादि । सामुद्राः समुद्रभवाः हस्त्यश्वाद्याकृतयश्चेति विग्रहः तथाभूताः, मत्स्याः जलचरविशेषाः, तथा सारसाः सरश्चराः, नादेयाः नदीचराः, तटाककुल्योद्भवा वा तटाकभवाः कुल्याभवाश्च मत्स्याः, तथा क्रौञ्चोत्क्रोशकादयस्त्रयोदश पक्षिणः, तत्र क्रौञ्चः क्रुङ्नामा उत्क्रोशकः कुररः दात्यूहः कालकण्ठकः जीवञ्जीवकः पक्षिभेदः भृङ्गराजो धूम्याटः चकोरश्चन्द्रिकाप्रियः मदनशारिके पक्षिजातिभेदौ शेषाः प्रसिद्धाः, विहारपक्षिणः क्रीडार्थाः कुक्कुटादयः, मङ्गल्याश्चान्येऽपि प्राणिनः पक्षिमृगाः मङ्गलार्थाश्च गरुडभरद्वाजादय इतरेऽपि प्राणिनः पक्षिणो मृगाश्च, हिंसाबाधेभ्यः मारणपीडनेभ्यो, रक्ष्याः । रक्षातिक्रमे तद्रक्षणानास्थायां, पूर्वः साहसदण्डः, सूनाध्यक्षस्य ।

मांसविक्रयविधिमाह—मृगेत्यादि । मृगपशूनाम्, अनस्थि अस्थिविनाकृतं, मांसं, सद्योहतम् अयातयामम् अभिनवं, विक्रीणीरन् । अस्थिमतः अस्थियुक्तस्य मांसस्य, प्रतिपातं दद्युः पातो हानिः तत्प्रतिनिधिः प्रतिपातः हीनप्रतीकारः तं दद्युः अस्थियोगहापितमांसमात्राप्रतिपूरणार्थमधिकमांसमात्रां दद्युरित्यर्थः । तुलाहीने हीनाष्टगुणं तुलोन्मानच्छद्मनिमित्तहानियोगिनि मांसे हीनमांसादष्टगुणं मांसं, दद्युः । तत्र चाष्टगुणेऽष्टभाग एव हापितपूरणार्थः क्रेतुः, अवशिष्टास्तु अष्टभागाः सप्त सूनाध्यक्षस्येत्याह स्वामी ।

वत्स इति । वत्सः स्तनन्धयः, वृषः रेतस्सेचनक्षमः, धेनुश्च प्रसवधर्मिणी गौश्च, एषां मृगपशूनाम् अनुज्ञातवधानामपि मध्ये, अवध्याः । घ्नतः वत्सादिमारयितुः, पञ्चाशत्कः पञ्चाशत्पणिकः, दण्डः । क्लिष्टघातं घातयतश्च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिसूनमशिरःपादास्थि विगन्धं स्वयंमृतं च न विक्रीणीरन्। अन्यथा द्वादशपणो दण्डः।

दुष्टाः पशुमृगव्याला मत्स्याश्चाभयचारिणः।
अन्यत्र गुप्तिस्थानेभ्यो वधबन्धमवाप्नुयुः॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
षड्विंशोऽध्यायः सूनाध्यक्षः,
आदितः सप्तचत्वारिंशः॥

विचित्रव्यथोत्पादनदारुणो वधो यथा भवेत् तथा वधं कारयतश्च उक्त एव दण्डः।

अविक्रेयमांसान्याह — परिसूनमिति। परिसूनं सूना मांसपरिनिष्पादनस्थानं तत् परिवर्जितं यस्य तत् तथाभूतम् अर्थात् सूनातिरिक्तस्थलनिहतप्राणिदेहोद्धृतं मांसं, तथा अशिरःपादास्थि शिरःपादास्थिशून्यं वनहतखादितावशिष्टमृगाङ्गसम्बन्धि मांसं, तथा विगन्धं दुर्गन्धि मांसं, स्वयंमृतं च रोगमृतमांसं च, न विक्रीणीरन्। अन्यथा परिसूनादिविक्रये, द्वादशपणो दण्डः।

अध्यायप्रान्ते श्लोकमाह — दुष्टा इति। अभयचारिणः अभयवनेषु रक्ष्यमाणाः, दुष्टाः हिंस्राः, पशुमृगव्यालाः पशवो गवयादयः मृगाः शुनकादयः व्याला व्याघ्रादयश्च, मत्स्याश्च शिंशुमारादयः, गुप्तिस्थानेभ्योऽन्यत्र अभयवनेभ्योऽन्यस्मिन् स्थाने, समागता इति शेषः, वधबन्धम् अवाप्नुयुः। स एषोऽभयवनस्थपशुमृगादिवधस्य प्राक्प्रतिषिद्धस्य प्रतिप्रसवः॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
षड्विंशोऽध्यायः सूनाध्यक्षः,
आदितः सप्तचत्वारिंशः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४४. प्रक. गणिकाध्यक्षः ।

गणिकाध्यक्षो गणिकान्वयामगणिकान्वयां वा रूपयौवनशिल्पसम्पन्नां सहस्रेण गणिकां कारयेत् । कुटुम्बार्धेन प्रतिगणिकाम् ।

निष्पतिताप्रेतयोर्दुहिता भगिनी वा कुटुम्बं भरेत । तन्माता वा प्रतिगणिकां स्थापयेत् । तासामभावे राजा हरेत् ।

सौभाग्यालङ्कारवृद्ध्या सहस्रेण वारं कनिष्ठं मध्यममुत्तमं वारो-

---

गणिकाध्यक्ष इति सूत्रम् । गणिका रूपाजीवाः तासामध्यक्षः, अर्थात् तद्व्यापार उच्यत इति सूत्रार्थः । 'रूपाजीवाः स्नानशुद्धशरीराः परिवर्तितवस्त्रालङ्काराः पश्येदि'त्युक्तम् । तदध्यक्षस्त्वनुक्त इदानीमभिधीयते ।

गणिकाध्यक्ष इति । सः, गणिकान्वयां गणिकावंशभवाम्, अगणिकान्वयां वा, वाशब्देन गणिकात्वं प्रति वंशस्याप्रयोजकत्वे सूचिते गणिकात्वप्रयोजकं धर्ममाह—रूपयौवनशिल्पसम्पन्नां सौन्दर्यतरुणिमकलाकौशलशालिनीं स्त्रियं, सहस्रेण गणिकां कारयेत् नवकुटुम्बस्थापनार्थरूप्यसहस्रदानेन गणिकास्थाने स्थापयेत्, वक्ष्यमाणनियोगानुष्ठानाय । अयमेकगणिकास्थापनपक्षः । अनेकगणिकास्थापनपक्षमाह — **कुटुम्बार्धेने**ति । कुटुम्बं गणिकाकुटुम्बकर्म राजपरिचर्यालक्षणं तस्यार्धेन अर्धमेकमनयानुष्ठेयमपरमन्ययेत्यर्धशो विभजनेन, अथवा कुटुम्बस्थापनार्थदेयद्रव्यं कुटुम्बं तस्यार्धेन अर्धशो दानेन, प्रतिगणिकां द्वितीयामपि कारयेत् । कुटुम्बार्धोक्त्या पूर्वोक्तस्य सहस्रस्याप्यर्धशो विभज्य दानं गणिकाप्रतिगणिकयोरुक्तप्रायम् ।

निष्पतितेत्यादि । निष्पतिताप्रेतयोः प्रोषिताप्रमीतयोर्गणिकयोः, दुहिता, भगिनी वा, कुटुम्बं गणिकातन्त्रं, भरेत वहेत । अर्थात् तद्धनं च हरेत । तन्माता वा प्रतिगणिकां स्थापयेत् दुहितृभगिन्योरभावे तन्मातैव तत्स्थानेऽन्यामादिश्य तत्कार्यं कारयेत् । तासां दुहितृभगिनीप्रतिगणिकामातॄणाम्, अभावे, राजा, हरेद् गणिकाधनम् ।

सौभाग्यालङ्कारवृद्ध्येति । सौभाग्यालङ्कारवृद्ध्यानुगुण्येन, सहस्रेण उपदापणसहस्रग्रहणेन, वारं नियोगं, कनिष्ठम् अधमम् , मध्यमम्, उत्तमं वा, आरोपयेद् दद्यात् । तत्र कनिष्ठस्य सहस्रग्रहणे मध्यमस्य द्विसहस्रग्रहणम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पयेत् । छत्रभृङ्गारव्यजनशिबिकापीठिकारथेषु च विशेषार्थम् ।

सौभाग्यभङ्गे मातृकां कुर्यात् ।

निष्क्रयश्चतुर्विंशतिसाहस्रो गणिकायाः । द्वादशसाहस्रो गणिकापुत्रस्य । अष्टवर्षात् प्रभृति राज्ञः कुशीलवकर्म कुर्यात् ।

गणिकादासी भग्नभोगा कोष्ठागारे महानसे वा कर्म कुर्यात् । अविशन्ती सपादपणमवरुद्धा मासवेतनं दद्यात् ।

भोगं दायमायं व्ययमायतिं च गणिकाया निबन्धयेत् । अतिव्ययकर्म च वारयेत् ।

उत्तमस्य त्रिसहस्रग्रहणमिति बोद्धव्यम् । किमर्थं कनिष्ठादिमारोपयेदित्यत्राह— **छत्रभृङ्गारव्यजनशिबिकापीठिकारथेषु च विशेषार्थमिति** । छत्रादिग्रहणादिकर्मसु अनुष्ठानप्रतिनियमार्थं, यद्वा तेषु यथायोगमनुष्ठीयमानेषु शोभोत्कर्षार्थम् । तत्रच्छत्रादिषु षट्सु मध्ये प्रथमद्विकं नियोगस्य कनिष्ठस्य द्वितीयद्विकं मध्यमस्य तृतीयद्विकमुत्तमस्येति क्रम औचित्यादवसेयः ।

सौभाग्यभङ्ग इति । रूपयौवनापगमे वार्धकनिमित्ते, मातृकां कुर्यात् तावत्कालमुक्तां मातृस्थानीयां कुर्यात्, अर्थाद् भोग्यगणिकायाः ।

गणिकात्वनिर्मोक्षविधिमाह— **निष्क्रय इति** । निष्क्रयः राजदास्यनिर्मोक्षमूल्यं, चतुर्विंशतिसाहस्रः चतुर्विंशतिसहस्रपणः, गणिकायाः । द्वादशसाहस्रो द्वादशसहस्रपणो निष्क्रयः, गणिकापुत्रस्य । निष्क्रयाभावे त्वाह— **अष्टवर्षादिति** । अष्टवर्षात् प्रभृति, राज्ञः, कुशीलवकर्म चारणकर्म, कुर्याद् गणिकापुत्रः ।

गणिकादासीति । गणिकायाः परिचारिका, भग्नभोगा भोगार्हवयोऽतिक्रान्ता, कोष्ठागारे, महानसे वा, कर्म व्रीह्यवघातादिकं पाकपात्रमार्जनादिकं वा, कुर्यात् । अविशन्ती कर्माकुर्वती, सपादपणं, मासवेतनं दद्याद् गणिकायै । का दद्यात्, अवरुद्धा पुरुषेण केनचिद् गृहेऽवरुध्यात्मैकभोग्यतां नीता गणिकादासी ।

भोगमिति । भोगं भोक्तृपुरुषदत्तं धनं, दायं मातृक्रमागतं धनम्, आयं भोगातिरिक्तलाभम्, व्ययम्, आयतिं च प्रभावं च, गणिकायाः, निबन्धयेत् पुस्तके लेखयेद्, गणिकाध्यक्षः । अतिव्ययकर्म च, वारयेत् प्रतिषेधयेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मातृहस्तादन्यत्राभरणन्यासे सपादचतुष्पणो दण्डः । स्वापतेयं विक्रयमाधानं नयन्त्याः सपादपञ्चाशत्पणो दण्डः ।

चतुर्विंशतिपणो वाक्पारुष्ये । द्विगुणो दण्डपारुष्ये । सपादपञ्चाशत्पणः पणोऽर्धपणश्च कर्णच्छेदने ।

अकामायाः कुमार्या वा साहसे उत्तमो दण्डः । सकामायाः पूर्वः साहसदण्डः ।

गणिकामकामां रुन्धतो निष्पातयतो वा व्रणविदारणेन वा रूपमुपघ्नतः सहस्रदण्डः । स्थानविशेषेण वा दण्डवृद्धिरा निष्क्रयद्विगुणात् । पणसहस्रं वा दण्डः ।

मातृहस्तादिति । मातृहस्तादन्यत्र प्रियविटादिहस्ते, आभरणन्यासे आभरणानां रक्षार्थेऽर्पणे, सपादचतुष्पणो दण्डः, गणिकायाः । स्वापतेयं स्वं वस्त्रभाजनादि, विक्रयम्, आधानं वा, नयन्त्याः, सपादपञ्चाशत्पणो दण्डः ।

चतुरित्यादि । चतुर्विंशतिपणः तावन्मानो दण्डः, वाक्पारुष्ये वाचा पराक्रोशे । द्विगुणः अष्टचत्वारिंशत्पणः, दण्डपारुष्ये करपादलगुडताडनादौ । सपादपञ्चाशत्पणः, पणोऽर्धपणश्च सार्धपण इत्यर्थः, कर्णच्छेदने दण्डः । तत्राद्यो राज्ञे देयः, द्वितीयस्तु गणिकाध्यक्षाय । त एते गणिकादण्डाः ।

अथ तत्कामुकपुरुषदण्डमाह— **अकामाया** इति । अकामाया इच्छारहितायाः, कुमार्याः, वाशब्दः प्रस्तावान्तरद्योतनार्थः, साहसे बलात्करणे, उत्तमो दण्डः उत्तमसाहसः । सकामायाः इच्छन्त्याः कुमार्याः, साहसे, पूर्वः साहसदण्डः ।

गणिकामिति । गणिकाम्, अकामां, रुन्धतः स्वगृहे अवरुध्य वासयतः, निष्पातयतो वा निष्पतनं निर्मोक्षणं कारयतो वा, व्रणविदारणेन वा रूपम् उपघ्नतः व्रणहेतुना दन्तनखादिक्षतेन रूपं विकारयतो वा, सहस्रदण्डः । **स्थानेत्यादि** । स्थानविशेषेण वा शरीरगततत्तत्स्थानविशेषानुरूप्येण वा, दण्डवृद्धिः उक्तस्य सहस्रदण्डस्य वृद्धिः गुणनिका कल्पनीया । आ कुत एषा वृद्धिकल्पनेत्याह — आ निष्क्रयद्विगुणात् निष्क्रयश्चतुर्विंशतिसाहस्रो य उक्तस्तस्य द्विगुणम् अष्टाचत्वारिंशत्साहस्रमभिव्याप्य । तदुपरि शरीरावयवोपघातनिमित्ता दण्डवृद्धिर्नास्तीत्यर्थः । स्वामी तु स्थानविशेषेण वेति प्रतीकमुपादाय व्याचष्टे — "उत्तमादिवारप्राधान्येन दण्डवृद्धिः कल्पनीया । आ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्राप्ताधिकारां गणिकां घातयतो निष्क्रयत्रिगुणो दण्डः। मातृकादुहितृकारूपदासीनां घात उत्तमः साहसदण्डः।

सर्वत्र प्रथमेऽपराधे प्रथमः, द्वितीये द्विगुणः, तृतीये त्रिगुणः, चतुर्थे यथाकामी स्यात्।

राजाज्ञया पुरुषमनभिगच्छन्ती गणिका शिफासहस्रं लभेत। पञ्चसहस्रं वा दण्डः।

भोगं गृहीत्वा द्विषत्या भोगद्विगुणो दण्डः। वसतिभोगापहारे भोगमष्टगुणं दद्याद् अन्यत्र व्याधिपुरुषदोषेभ्यः।

कुत इत्याह — आ निष्क्रयद्विगुणादिति। निष्क्रयश्चतुर्विंशतिसाहस्रः तद्द्विगुणोऽष्टाचत्वारिंशत्साहस्रः" इति। आ निष्क्रयद्विगुणादित्येतदनन्तरं 'पणसहस्रं वा दण्डः' इति वाक्यम् अर्थशास्त्रादर्शेषु पठ्यते। तत्तु स्वामिटीकाभाषयोरननुसंहितत्वात् पूर्वोत्तरग्रन्थानाकाङ्क्षितत्वाच्च प्रक्षिप्तं मन्यमानेन व्याख्यातमस्माभिः।

प्राप्ताधिकारामिति। लब्धच्छत्रभृङ्गारादिनियोगां, गणिकां, घातयतः, निष्क्रयत्रिगुणः द्वासप्ततिसाहस्रपणो, दण्डः। मातृकादुहितृकारूपदासीनां घाते कुट्टन्याः कुमार्याः प्रतिकर्मदास्या वा ताडने, उत्तमः साहसदण्डः।

सर्वत्रेति। सर्वस्मिन्, प्रथमेऽपराधे यो य उक्तस्तस्मिंस्तस्मिन्निदम्प्रथमकृतेऽपराधे, प्रथमः यो य उक्तो दण्डः स स प्रथम इत्यर्थः। द्वितीये तस्मिंस्तस्मिन्नपराधे पुनरारब्धे, द्विगुणः स स दण्डः कार्य इति शेषः। तृतीये, त्रिगुणः। चतुर्थेऽपराधे, यथाकामी स्यात् चतुर्गुण-सर्वस्वहरण-प्रवासनादिरूपं दण्डं स्वेच्छानुरोधेन विदध्यादित्यर्थः।

राजाज्ञयेति। राजाज्ञानुरोधेन, पुरुषमनभिगच्छन्ती, गणिका, शिफासहस्रं कशाघातसहस्रं, दण्डं लभेत। पञ्चसहस्रं वा दण्डः शिफासहस्राभावपक्षे पञ्चसहस्रपणात्मको दण्डः।

भोगमिति। भोगं सम्भोगवेतनं, गृहीत्वा, द्विषत्याः भोगदं पुरुषमरोचयमानायाः, भोगद्विगुणो दण्डः। **वसतीत्यादि**। वसतिभोगापहारे वसतिभोगस्य रात्रिसम्भोगस्य अपहारे कथादिव्याजेन कालयापने, भोगं सम्भोगवेतनं गृहीतम्, अष्टगुणं दद्यात्। तत्रापवादः — **अन्यत्र व्याधिपुरुषदोषेभ्य इति**। व्याधयः कुष्ठादयः पुरुषदोषा अरागत्वादयः तद्व्यतिरेकेण।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पुरुषं घ्नत्याश्चिताप्रतापोऽप्सु प्रवेशनं वा ।

गणिकाभरणमर्थं भोगं वापहरतोऽष्टगुणो दण्डः । गणिका भोगमायतिं पुरुषं च निवेदयेत् ।

एतेन नटनर्तकगायकवादकवाग्जीवनकुशीलवप्लवकसौभिकचारणस्त्रीव्यवहारिणां स्त्रियो गूढाजीवाश्च व्याख्याताः ।

तेषां तूर्यमागन्तुकं पञ्चपणं प्रेक्षावेतनं दद्यात् ।

रूपाजीवा भोगद्वयगुणं मासं दद्युः ।

गीतवाद्यपाठ्यनृत्तनाट्याक्षरचित्रवीणावेणुमृदङ्गपरचित्तज्ञानगन्धमाल्यसंयूहनसम्पादनसंवाहनवैशिककलाज्ञानानि गणिका दासीरङ्गोपजीविनीश्च ग्राहयतो राजमण्डलादाजीवं कुर्यात् ।

पुरुषमिति । पुरुषं घ्नत्याः मारयन्त्याः, चिताप्रतापः तेनैव सह चितायामारोप्य दहनम्, अप्सु प्रवेशनं वा गलमहाशिलाबन्धेन जलनिमज्जनं वा कर्तव्यम् ।

गणिकाभरणमिति । गणिकाया आभरणम्, अर्थं तदन्यद् वा वस्तु, भोगं वा सम्भोगवेतनं वा, अपहरतः, अष्टगुणः अपहृतद्रव्याष्टगुणः, दण्डः । **गणिकेति** । सा, भोगम् आयतिं तन्मूलमायं, पुरुषं च कृतवासं, निवेदयेत् ।

एतेनेति । उक्तेन गणिकाकल्पेन, नटादीनां दशानां, स्त्रियः, गूढाजीवाश्च प्रच्छन्नव्यभिचारजीविन्यश्च, व्याख्याताः उक्ताः, त एते गणिकाविधय एव यथासम्भवमासु योजनीया इत्यर्थः । तत्र नटा अर्थाभिनयजीविनः, नर्तकाः गात्रविक्षेपमात्रकारिणः, गायकाः कण्ठगायिनः, वादकाः वैणिकादयः, वाग्जीवनाः कथकाः, कुशीलवाः नर्तकीप्रधानाः, प्लवका रज्ज्वारोहकाः, सौभिका 'ऐन्द्रजालिकाः छायाग्राहका इत्यपरे' इति स्वामी, चारणाः विटमल्लादयः, स्त्रीव्यवहारिणो बन्धकीकुटुम्बिनः । चारणानां स्त्रीव्यवहारिणामिति व्यस्तपाठोऽपि ।

तेषामिति । तेषां, तूर्यं नटनर्तकादिमेलकम्, आगन्तुकं विदेशादागतं, पञ्चपणं प्रेक्षावेतनं स्वकलाप्रकाशनार्थं वेतनं, दद्याद् राज्ञे ।

रूपाजीवा इति । गणिकाः, भोगद्वयगुणं दिवसद्वयलाभं, मासं मासदेयं, दद्युः ।

गीतवाद्येत्यादि । गीतादीनां कलान्तानां षोडशानां ज्ञानानि, गणिकाः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गणिकापुत्रान् रङ्गोपजीविनश्च मुख्यान् निष्पादयेयुः सर्वतालावचराणां च ।

संज्ञाभाषान्तरज्ञाश्च स्त्रियस्तेषामनात्मसु ।
चारघातप्रमादार्थं प्रयोज्या बन्धुवाहनाः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तविंशोऽध्यायः गणिकाध्यक्षः,
आदितोऽष्टाचत्वारिंशः ॥

पूर्वोक्ताः, दासीरङ्गोपजीविनीश्च दासीर्गणिकातिरिक्तवेश्याः रङ्गोपजीविनीर्नटादिस्त्रियश्च, ग्राहयतः शिक्षयत आचार्यस्य, राजमण्डलाद् राज्ञो यन्मण्डलं नगरग्रामादिसमूहोत्थमायजातं तत्सकाशाद्, आजीवं वृत्तिं, कुर्यात् कल्पयेद् राजा । तत्र गीतवाद्ये प्रसिद्धे, पाठ्यमाख्यायिकादि, नृत्तं पदार्थाभिनयः, नाट्यं वाक्यार्थाभिनयः, अक्षरं लिपिः, चित्रम् आलेख्यकर्म, वीणा वेणुमृदङ्गश्च प्रसिद्धाः, परचित्तज्ञानं परेङ्गिताकारवेदनं, गन्धमाल्यसंयूहनसम्पादने गन्धसंयूहनं गन्धयुक्तिः माल्यसम्पादनं माल्यगुम्फनं, संवाहनमङ्गमर्दनं, वैशिकं दत्तकाचार्यादितन्त्रं, कलाः उक्तातिरिक्ताश्चतुष्षष्ट्यन्तर्गताः कलाविद्याः ।

गणिकेत्यादि । गणिकापुत्रान्, रङ्गोपजीविनश्च, मुख्यान् निष्पादयेयुः प्रधानान् आचार्यादिस्थानीयान् कुर्युः । केषां, सर्वतालावचराणां च सर्वेषामपि रङ्गोपजीविनाम् ।

प्रान्ते श्लोकमाह—**संज्ञे**त्यादि । संज्ञाभाषान्तरज्ञाः सङ्केतविशेषज्ञाः भाषाविशेषज्ञाश्च, तेषां तालावचराणां, स्त्रियः, अनात्मसु अजितेन्द्रियेषु दूष्येषु, चारघातप्रमादार्थं चाराणां परप्रयुक्तगूढपुरुषाणां घातार्थं रहोविस्रम्भवधार्थं प्रमादार्थं च विषयासक्तिजननेन स्वकर्तव्योपेक्षोत्पादनार्थं च, प्रयोज्याः विधेयीकृत्य प्रयोक्तव्याः राज्ञा । विधेयत्वार्थमाह — **बन्धुवाहना** इति । बन्धुभिरर्थदानवशीकृतैर्वाह्यमाना यथाराजादेशं नीयमानाः ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तविंशोऽध्यायः गणिकाध्यक्षः,
आदितोऽष्टाचत्वारिंशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४५. प्रक. नावध्यक्षः ।

नावध्यक्षः समुद्रसंयाननदीमुखतरप्रचारान् देवसरोविसरोनदीतरांश्च स्थानीयादिष्ववेक्षेत ।

तद्वेलाकूलग्रामाः क्लृप्तं दद्युः ।

मत्स्यबन्धका नौकाभाटकं षड्भागं दद्युः । पत्तनानुवृत्तं शुल्कभागं वणिजो दद्युः । यात्रावेतनं राजनौभिः सम्पतन्तः । शङ्खमुक्ताग्राहिणो नौभाटकं दद्युः, स्वनौभिर्वा तरेयुः ।

अध्यक्षश्चैषां खन्यध्यक्षेण व्याख्यातः ।

नावध्यक्ष इति सूत्रम् । नावां यानपात्राणाम् अध्यक्ष आदेयभागाधिकृत इत्यर्थः । समाहर्तृकर्मण्यात्मरक्षितके च नावोऽभिहिताः । तदध्यक्षस्त्वनुक्त इहाभिधीयते ।

नावध्यक्ष इति । सः, समुद्रसंयाननदीमुखतरप्रचारान् समुद्रकूलसमीपयानस्य नदीसमुद्रसङ्गमतरणस्य च मार्गान्, देवसरोविसरोनदीतरांश्च देवसरः सदाजलसमृद्धं महासरः विसरः शोष्यसरः नदी प्रसिद्धा एषां तरणमार्गांश्च, स्थानीयादिषु स्थानीयद्रोणमुखखार्वटिकसंग्रहग्रामेषु, अवेक्षेत ।

तद्वेलेत्यादि । तद्वेलाकूलग्रामाः समुद्रतटमहासरःप्रभृतितीरवर्तिग्रामवासिनः, क्लृप्तं कल्पितं किमपि तरणार्थं राजादेयं, दद्युः नौव्यापारसततोपयोगात् । तदभावान्नान्ये जानपदास्तद् दद्युः ।

मत्स्येत्यादि । मत्स्यबन्धका दाशाः, नौकाभाटकं राजकीयाया नौकाया अवक्रयं, षड्भागं मत्स्यषष्ठभागं, दद्युः । पत्तनानुवृत्तं पण्यपत्तनसिद्धं, शुल्कभागं शुल्कार्थं भागं पण्यमूल्यस्य पञ्चमभागं षष्ठभागं वा, वणिजः, दद्युः । शुल्काध्यक्षग्राह्य एवायं शुल्कभाग इहोक्तः तदतिरिक्तप्रार्थना नावध्यक्षेण मा कारीत्येतदर्थम् । यात्रावेतनं, राजनौभिः, संपतन्तः गतागतं कुर्वन्तः, दद्युर्यथाप्रसिद्धम् । शङ्खमुक्ताग्राहिणः नौभाटकं दद्युः, विशेषाकथनाद् उक्तमत्स्यबन्धकवत् षड्भागम् । स्वनौभिर्वा तरेयुः । एषां स्वनौतरणाभ्यनुज्ञानान्मत्स्यबन्धानां स्वनौतरणप्रतिषेधो गम्यते । नौहाटकमित्यपपाठः । नौविभागकमिति तु व्याख्यापाठः ।

अध्यक्षश्चेति । नावध्यक्षश्च, एषां शङ्खादीनां विषये, खन्यध्यक्षेण व्याख्यातः खन्यध्यक्षवद् भाटकलब्धशङ्खादीनां कर्मान्तान् पण्यव्यवहारं च नावध्यक्षः कारयेदित्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पत्तनाध्यक्षनिबन्धं पण्यपत्तनचारित्रं नावध्यक्षः पालयेत् ।

मूढवाताहतां तां पितेवानुगृह्णीयात् । उदकप्राप्तं पण्यमशुल्कमर्धशुल्कं वा कुर्यात् ।

यथानिर्दिष्टाश्चैताः पण्यपत्तनयात्राकालेषु प्रेषयेत् । संयान्तीर्नावः क्षेत्रानुगताः शुल्कं याचेत । हिंस्रिका निर्घातयेद्, अमित्रविषयातिगाः पण्यपत्तनचारित्रोपघातिकाश्च ।

शासकनियामकदात्ररश्मिग्राहकोत्सेचकाधिष्ठिताश्च महानावो हेमन्तग्रीष्मतार्यासु महानदीषु प्रयोजयेत् । क्षुद्रिकाः क्षुद्रिकासु वर्षास्राविणीषु ।

बद्धतीर्थाश्चैताः कार्याः राजद्विष्टकारिणां तरणभयात् ।

पत्तनेत्यादि । पत्तनाध्यक्षनिबन्धं पत्तनाध्यक्षप्रतिष्ठापितं, पण्यपत्तनचारित्रं पण्यपत्तनाचारं, नावध्यक्षः, पालयेत् नातिवर्तेत ।

मूढवाताहतामिति । मूढां दिङ्मोहापयातां वाताहतां विपरीतवाताकुलितां च, तां नावं, पितेव, अनुगृह्णीयात् तारयेत् । उदकप्राप्तं जलदूषितं, पण्यम्, अशुल्कम्, अर्धशुल्कं वा, कुर्यात् तच्छेदानुरूप्येण ।

यथानिर्दिष्टाश्चेति । अशुल्का अर्धशुल्का वा, एताः नावः, पण्यपत्तनयात्राकालेषु, प्रेषयेद् असङ्गं विसृजेत् । संयान्तीर्गच्छन्तीः, नावः, क्षेत्रानुगताः शुल्कस्थानगताः, शुल्कं याचेत । इह शुल्कस्य याचनं न वक्तव्यं सिद्धत्वात्, तदिहोच्यते शुल्कतोऽधिकं मा याचीत्युपदेशार्थम् । हिंस्रिकाः हिंस्राश्चोरादयः तद्वतीः, नावः, निर्घातयेत् । अमित्रविषयातिगाः शत्रुदेशयायिनीः, पण्यपत्तनचारित्रोपघातिकाश्च नावः, निर्घातयेत् ।

शासकेत्यादि । शासकादिपञ्चकाधिष्ठिताश्च शासको निदेष्टा नियामकः पोतवाहः दात्रग्राहको लवित्रग्राही रश्मिग्राहकः प्रग्रहग्राही उत्सेचकः प्रविशज्जलापनेता एतैरपायप्रतिविधायिभिरध्यासिताश्च, महानावः, हेमन्तग्रीष्मतार्यासु अवर्षाकालेऽपि नौतरणीयासु, महानदीषु सिन्धुसरयूप्रभृतिषु, प्रयोजयेत् । क्षुद्रिकाः क्षुद्रनावः, क्षुद्रिकासु वर्षास्राविणीषु वर्षाकालमात्रतरणीयजलासु कुनदीषु, प्रयोजयेदिति वर्तते ।

बद्धेत्यादि । बद्धतीर्थाश्च बद्धाः संयताः सनियन्त्रणाः कृतारक्षा इति यावत् तीर्था अवतारा यासां तास्तथाभूताः, एताः नावः, कार्याः । कुतः, राजद्विष्टकारिणां शत्रुप्रयुक्ततीक्ष्णरसदादीनां, तरणभयात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अकालेऽतीर्थे च तरतः पूर्वः साहसदण्डः । काले तीर्थे चानिसृष्टतारिणः पादोनसप्तविंशतिपणस्तरात्ययः ।

कैवर्तकाष्ठतृणभारपुष्पफलवाटषण्डगोपालकानामनत्ययः सम्भाव्यदूतानुपातिनां च सेनाभाण्डचारप्रयोगाणां च । स्वतरणैस्तरतां, बीजभक्तद्रव्योपस्करांश्चानूपग्रामाणां तारयताम् ।

ब्राह्मणप्रव्रजितबालवृद्धव्याधितशासनहरगर्भिण्यो नावध्यक्षमुद्राभिस्तरेयुः ।

कृतप्रवेशाः पारविषयिकाः सार्थप्रमाणा वा विशेयुः ।

परस्य भार्यां कन्यां वित्तं वापहरन्तं शङ्कितमाविग्नमुद्भाण्डीकृतं

नियन्त्रणविधिमाह — अकाल इति । अकाले निशीथादौ, अतीर्थे अघट्टे च, तरतः पूर्वः साहसदण्डः । काले, तीर्थे च, अनिसृष्टतारिणः अननुज्ञातस्य तरतः, पादोनसप्तविंशतिपणः, तरात्ययः तरणदण्डः ।

तरणदण्डापवादमाह—कैवर्तेत्यादि । कैवर्तादीनां कैवर्तानां धीवराणां काष्ठवाहिनां तृणवाहिनां पुष्पवाटपालकानां फलवाटपालकानां षण्डपालकानां गोपालकानां च, अनत्ययः अदण्डः । सम्भाव्यदूतानुपातिनां च सम्भाव्यम् अनुपतनीयतया शङ्कितं चोरादिमनुपततां दूतं राजदूतं कार्यशेषार्थमनुपततां च, अनत्यय इत्यनुवज्यते । सेनाभाण्डचारप्रयोगाणां च सेनोपकरणगूढपुरुषप्रयोगाणां च, अनत्ययः । स्वतरणैः स्वकीयैस्तरणसाधनैः बाहुलाबूभस्त्रादिभिः, तरतां, बीजभक्तद्रव्योपस्करांश्च बीजं वापार्थं भक्तं कर्मकराशनं द्रव्यं पुष्पफलशाकादि उपस्करः वेशवारः इत्येतांश्च, आनूपग्रामाणां जलप्रचुरदेशसन्निविष्टग्रामवासिनां, तारयताम्, अनत्ययः ।

आतराप्रदानेन नावध्यक्षमुद्रामात्रं गृहीत्वा ये तरणार्हा जनास्तानाह — ब्राह्मणेत्यादि । सुगमम् ।

कृतप्रवेशा इति । कृतप्रवेशा अभ्यनुज्ञातप्रवेशाः, पारविषयिकाः परदेशागताः, सार्थप्रमाणा वा अननुज्ञातप्रवेशत्वेऽपि अनुज्ञातसार्थाधिष्ठातृका वा, विशेयुः, नृपस्य देशम् ।

परस्येति । परस्य भार्यां कन्यां वित्तं वा अपहरन्तम्, उपग्राहयेत् शङ्कितत्वादिलिङ्गैर्वक्ष्यमाणैरनुगाय बन्धयेत् । तत्र शङ्कितं चकितचारिणम्,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महाभाण्डेन मूर्ध्नि भारेणावच्छादयन्तं सद्योगृहीतलिङ्गिनम् अलिङ्गिनं वा प्रव्रजितमलक्ष्यव्याधितं भयविकारिणं गूढसारभाण्डशासनशस्त्राग्नियोगं विषहस्तं दीर्घपथिकममुद्रं चोपग्राहयेत् ।

क्षुद्रपशुर्मनुष्यश्च सभारो माषकं दद्यात् । शिरोभारः कायभारो गवाश्वं च द्वौ । उष्ट्रमहिषं चतुरः । पञ्च लघुयानम् । षड् गोलिङ्गम् । सप्त शकटम् । पण्यभारः पादम् ।

तेन भाण्डभारो व्याख्यातः । द्विगुणो महानदीषु तरः ।

क्लृप्तमानूपग्रामा भक्तवेतनं दद्युः ।

आविग्नं सम्भ्रान्तम्, उद्भाण्डीकृतं समधिकभाण्डभारवाहिनं, महाभाण्डेन मूर्ध्नि भारेणावच्छादयन्तं बृहदाकृतिना पलालादिभारेण शिरसि कृतेनावृतप्रायमुखं, सद्योगृहीतलिङ्गिनं प्रव्रजितं तत्कालकलितपरिव्राजकचिह्नम्, अलिङ्गिनं वा प्रव्रजितं सद्यःपरित्यक्तपरिव्राजकचिह्नं वा, अलक्ष्यव्याधितं व्याधितव्यपदेशिनमदृष्टव्याधिचिह्नं, भयविकारिणं वदनश्वेतीभावादिभयचिह्नयुक्तं, गूढसारभाण्डशासनशस्त्राग्नियोगं गूढसारभाण्डं गूढरत्नादिद्रव्यं गूढशासनं गूढलेखं गूढशस्त्रं गूढायुधं गूढाग्नियोगं गूढोऽग्नियोगः औपनिषदवक्ष्यमाणनिष्प्रतीकाराद्यग्नियोगद्रव्यं यस्य तं तथाभूतं च, विषहस्तं, दीर्घपथिकं दूराध्वगमनश्रान्तम्, अमुद्रम् अन्तपालमुद्रारहितं च, उपग्राहयेत् ।

तरवेतनविधिमाह— **क्षुद्रेत्यादि** । क्षुद्रपशुः अजादिः, मनुष्यश्च सभारः करगृहीतभारः, माषकं दद्यात् । शिरोभारः शिरोधार्यो भारः, कायभारः स्कन्धधार्यः, गवाश्वं च गौश्चाश्वश्च, द्वौ माषौ, दद्यादिति सम्बध्यते । **उष्ट्रमहिषम्** उष्ट्रश्च महिषश्च, चतुरः माषकान्, दद्यात् । पञ्च लघुयानं लघुगन्त्री पञ्च माषकान् दद्यात् । षड् गोलिङ्गं मध्यमगन्त्री षट् माषान्, दद्यात् । सप्त शकटं दद्यात् । पण्यभारः पण्यानां तुलाविंशतिः, पादं पणचतुर्भागं, दद्यात् ।

तेनेति । तेन पण्यभारवेतनकथनेन, भाण्डभारो महिषोष्ट्रादिवाह्यो, व्याख्यातः उक्तः, एकैकस्य भारस्यैकं माषकं दद्यादिति । त एत आतरा लघुनदीविषयाः । अत एवाह— **द्विगुणो महानदीषु तर इति** । तरः तरणवेतनम् ।

क्लृप्तमिति । क्लृप्तं यत्किञ्चिद्, आनूपग्रामाः, भक्तवेतनं राजभाग्यातिरिक्तं, दद्युः नाविकस्य ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रत्यन्तेषु तराः शुल्कमातिवाहिकं वर्तनीं च गृह्णीयुः। निर्गच्छतश्चामुद्रस्य भाण्डं हरेयुः। अतिभारेणावेलायामतीर्थे तरतश्च।

पुरुषोपकरणहीनायामसंस्कृतायां वा नावि विपन्नायां नावध्यक्षो नष्टं विनष्टं वाभ्यावहेत्।

सप्ताहवृत्तामाषाढीं कार्त्तिकीं चान्तरा तरः।
कार्मिकप्रत्ययं दद्यान्नित्यं चाह्निकमावहेत्॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टाविंशोऽध्यायः नावध्यक्षः,
आदित एकोनपञ्चाशः॥

प्रत्यन्तेष्विति। विषयसीमसु, तराः तारकाः, शुल्कम्, आतिवाहिकम् अतिवाहननिमित्तं राजभाव्यं, वर्तनीं च अन्तपालदेयं च, गृह्णीयुः सार्थात्। निर्गच्छतश्चामुद्रस्य सार्थस्य, भाण्डं हरेयुः। अतिभारेणेति। अतिभारेण पुरुषद्वयवहनीयेन भारेण युक्तस्य, अवेलायाम् अकाले, अतीर्थे अघट्टे, तरतश्च, भाण्डं हरेयुरिति वर्तते।

पुरुषेत्यादि। पुरुषैः शासकनियामकादिभिः उपकरणैश्चारित्रसेचनादिभिर्हीनायाम्, असंस्कृतायाम् वा सीवनादिसंस्काररहितायां वा, नावि, विपन्नायां सत्यां, नावध्यक्षः, नष्टं जलप्रलीनं लवणजातीयं, विनष्टं जलयोगदूषितरूपादिकं वा, पण्यद्रव्यम्, अभ्यावहेद् दद्यात्।

तरवेतनकालं श्लोकेनाह — सप्ताहेत्यादि। सप्ताहो वृत्तो यस्या ऊर्ध्वं सा सप्ताहवृत्ता तादृशीम्, आषाढीम् आषाढपौर्णमासीं, कार्त्तिकीं कार्त्तिकपौर्णमासीं तथाविधाम्, अन्तरा आषाढबहुलसप्तम्याः कार्त्तिकबहुलसप्तम्याश्च मध्ये इत्यर्थः, तरः आतरः, ग्राह्य इति शेषः, निर्दिष्टस्य कालस्य वर्षात्वाद् वर्षातार्यासु नदीषु। सर्वर्तुतार्यासु तु नित्यं ग्राह्य इत्यर्थात् सिद्धम्। कार्मिकप्रत्ययम् अयमयं कर्मदिवस इति कर्मदिवसज्ञानं, दद्याद् नावध्यक्षाय। नित्यं च, आह्निकं दिने दिनेऽधिगतमातरम्, आवहेत् दद्यात्॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टाविंशोऽध्यायः नावध्यक्षः,
आदित एकोनपञ्चाशः॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४६. प्रक. गोध्यक्षः ।

गोध्यक्षो वेतनोपग्राहिकं करप्रतिकरं भग्नोत्सृष्टकं भागानुप्रविष्टकं व्रजपर्यग्रं नष्टं विनष्टं क्षीरघृतसञ्जातं चोपलभेत ।

गोपालकपिण्डारकदोहकमन्थकलुब्धकाः शतं शतं धेनूनां हिरण्यभृताः पालयेयुः । क्षीरघृतभृता हि वत्सानुपहन्युरिति वेतनोपग्राहिकम् ।

जरद्गुधेनुगर्भिणीपष्ठौहीवत्सतरीणां समविभागं रूपशतमेकः पालयेत् । घृतस्याष्टौ वारकान् पणिकं पुच्छम् अङ्कचर्म च वार्षिकं दद्यादिति करप्रतिकरः ।

गोध्यक्ष इति सूत्रम् । गवाम् उपलक्षणया महिषादीनां गोमहिषाद्याजीवानां चाध्यक्षो गोध्यक्षः तत्कर्माभिधीयत इत्यर्थः । स्वपक्षपरपक्षवशीकरणसाधनभूतासु वार्तापदार्थेषु कृषिपाशुपाल्यवणिज्यासु कृषिवणिज्ये सीताध्यक्षपण्याध्यक्षयोरुपपादिते । पाशुपाल्यं त्वनुक्तमिहाभिधीयत इति सङ्गतिः ।

गोध्यक्ष इति । गोध्यक्षः, वेतनोपग्राहिकादीन्यष्टौ, उपलभेत अध्यक्षयेत् ।

तानि क्रमशो व्याचष्टे — गोपालकेत्यादि । गोपालकादयः पञ्च गोपालकः प्रसिद्धः पिण्डारको महिषपालः दोहकः क्षीरदोग्धा मन्थको दधिमथनकर्मा लुब्धको व्यालभयपरिहर्ता इत्येते, शतं शतं धेनूनां गवां, पालयेयुः । किंवेतनास्ते, हिरण्यभृताः हिरण्येन धनधान्यरूपेण वेतनेन भृताः पुष्टाः, न तु तदन्येन क्षीरेण घृतेन वेत्यर्थः । कुतः क्षीरघृतभृता न कर्तव्यास्तत्राह — क्षीरघृतभृता हीति । तद्वेतना हि, वत्सान् स्तनन्धयान् , उपहन्युः क्षीरलोभनिमित्तादतिदोहनात् कर्शयेयुः । इति एतद्, वेतनोपग्राहिकं वेतनोपग्राहनिमित्तत्वात् तत्संज्ञम् ।

जरदित्यादि । जरद्गुर्जरद्गवी गोर्ह्रस्वत्वमार्षम् । धेनुर्दोग्ध्री गर्भिणी प्रसिद्धा पष्ठौही वृषगवेषिणी वत्सतरी अतीतस्तनन्धयभावा इत्येतासां पञ्चानां, समविभागं प्रत्येकं विंशतिक्रमेण तुल्यविभागयुक्तं, रूपशतं शतात्मकं जरद्गव्यादिभेदमेलकम् , एकः पालनवृत्तिः, पालयेत् । घृतस्येति । घृतस्य, अष्टौ वारकान् चतुरशीतिकुडुबान् , पणिकं पुच्छं पुच्छगणनया देयः करः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याधितान्यङ्गानन्यदोहीदुर्दोहापुत्रघ्नीनां च समविभागं रूपशतं पालयन्तस्तज्जातिकं भागं दद्युरिति भग्नोत्सृष्टकम् ।

परचक्राटवीभयादनुप्रविष्टानां पशूनां पालनधर्मेण दशभागं दद्युरिति भागानुप्रविष्टकम् ।

वत्सा वत्सतरा दम्या वहिनो वृषा उक्षाणश्च पुङ्गवाः । युगवाहनशकटवहा वृषभाः सूनामहिषाः पृष्ठस्कन्धवाहिनश्च महिषाः । वत्सिका वत्सतरी पष्ठौही गर्भिणी धेनुश्चाप्रजाता वन्ध्याश्च गावो महिष्यश्च । मासद्विमासजातास्तासामुपजा वत्सा वत्सिकाश्च । मासद्विमास-

---

पुच्छः तमेकैकस्य पशोरेकैकपणात्मकम्, अङ्कचर्म च राजमुद्रायुक्तं मृतचर्म च, वार्षिकं वर्षदेयं, दद्यात् स्वामिने । इति करप्रतिकरः एष प्रकारः करप्रतिकरसंज्ञः ।

व्याधितेत्यादि । व्याधितादीनां पशूनां व्याधिता रुग्णा न्यङ्गा अङ्गविकला अनन्यदोही एकेनैव दोहनीया न त्वन्येन दोहनीया दुर्दोहा पादबन्धनादिकृच्छ्रदोह्या पुत्रघ्नी स्रवद्गर्भा म्रियमाणवत्सा च इत्येतासां च, समविभागं रूपशतं पूर्वोक्तप्रत्येकविंशतिप्रकारं, पालयन्तः, तज्जातिकं भागं पूर्वोक्तस्यार्धं त्रिभागं वा तदनुरूपं घृतादिराजभागं, दद्युः । इति भग्नोत्सृष्टकं तदाख्यम् ।

भागानुप्रविष्टकमाह — परचक्रेत्यादि । परचक्राटवीभयात् शत्रुच्छलनभयात् वनचरापहारभयाच्च, अनुप्रविष्टानां राजव्रजप्रवेशितानां, पशूनां, पालनधर्मेण पालनस्य सवेतनत्वनियमेन, दशभागं, दद्युः पशुस्वामिनो राज्ञे । इत्येतद्, भागानुप्रविष्टकं तदाख्यम् ।

व्रजपर्यग्रमाह — वत्सा इत्यादि । वत्साः स्तनन्धयाः, वत्सतराः परित्यक्तस्तनपानाः, दम्याः दमनयोग्याः, वहिनः वोढारः, वृषाः सेक्तारः, उक्षाणश्च जरद्गवाश्च, पुङ्गवाः इत्येते षड्विधाः पुमांसो गावः । युगवाहनशकटवहाः, वृषभाः सेक्तारः, सूनामहिषाः मांसमात्रोपयोगिनो महिषाः, पृष्ठस्कन्धवाहिनश्च, महिषाः इत्येते चतुर्विधा महिषाः । स्त्रीगवीनां महिषीणां च साधारणान् भेदानाह — वत्सिकेत्यादि । तत्र धेनुर्दोग्ध्री । अप्रजाता विजननार्हवयोऽनधिरूढा । वन्ध्या वशा । शेषाः प्रसिद्धाः । इत्थं सप्तविधा गावो

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जातानङ्कयेत् । मासद्विमासपर्युषितमङ्कयेत् । अङ्कं चिह्नं वर्णं शृङ्गान्तरं च लक्षणम्, एवमुपजा निबन्धयेदिति व्रजपर्यग्रम् ।

चोरहृतमन्ययूथप्रविष्टमवलीनं वा नष्टम् ।

पङ्कविषमव्याधिजरातोयाहारावसन्नं वृक्षातटकाष्ठशिलाभिहतमीशानव्यालसर्पग्राहदावाग्निविपन्नं विनष्टम् । प्रमादादभ्यावहेयुः ।

एवं रूपाग्रं विद्यात् ।

स्वयं हन्ता घातयिता हर्ता हारयिता च वध्यः ।

महिष्यश्च । मासेत्यादि । मासद्विमासजाताः मासजाताः द्विमासजाताश्च, तासां गोमहिषीणां, वत्साः स्तनन्धयाः, वत्सिकाः स्तनन्धय्यश्च, उपजाः उपजासंज्ञिताः । तासु मासद्विमासजातान्, अङ्कयेत् तप्तमुद्रया योजयेत् । आगानुप्रविष्टकादिविषयमङ्कनमाह — मासद्विमासपर्युषितमङ्कयेदिति । ज्ञातस्वामिकस्याज्ञातस्वामिकस्य वा राजव्रजप्रविष्टस्यैकमासपरिवासे द्विमासपरिवासे वा जाते तमप्यङ्कयेद् गोध्यक्ष इत्यर्थः । चतुर्विधं लक्षणमाह — अङ्कमिति । अङ्कं स्वस्तिकादिसन्निवेशं तप्तमुद्राकृतं कृत्रिमं, चिह्नं पुच्छश्वेतिमकालिमादि सहजं, वर्णं शुक्लकृष्णादिं, शृङ्गान्तरं च शृङ्गगतं विशेषं च, लक्षणं, निबन्धयेत् पुस्तके लेखयेत् । एवम् अनेन प्रकारेण उक्तचतुर्लक्षणीयोगेन, उपजाः, निबन्धयेत् । इति एतत् सप्तदशविधं व्रजपर्यग्रं तदाख्यम् ।

त्रिविधं नष्टमाह — चोरेत्यादि । चोरहृतम्, अन्ययूथप्रविष्टम्, अवलीनं वा वने स्वयूथाद् भ्रष्टं वा, नष्टं नष्टाख्यम् ।

विनष्टमाह — पङ्केत्यादि । पङ्कादिभिः षड्भिः पङ्केन कर्दममज्जनेन विषमेण गर्तादिपतनेन व्याधिना रोगेण जरया वयोवृद्धतया तोयेन महारयजलप्रवाहाकृष्ट्या आहारेण इत्येतैरवसन्नं विपन्नं, वृक्षादिभिश्चतुर्भिः वृक्षपातभृगुभ्रंशमहाकाष्ठपतनमहाशिलापातरूपैरभिहतम्, ईशानादिपञ्चकविपन्नम् ईशानेन विद्युज्ज्योतिषा हिंस्रमृगपन्नगनक्रवनवह्निभिश्च प्रमीतं, विनष्टं तदाख्यं भवति । प्रमादादिति । पालकानवधानदोषाद्, विनष्टमिति वर्तते, अभ्यावहेयुः दद्युः, अर्थात् पालकादयः ।

एवमिति । उक्तेन प्रकारेण, रूपाग्रं गवादिप्रमाणं, विद्यात् ।

स्वयमेव गवादिहननहरणकर्तुस्तत्प्रयोजयितुश्च गोपालकस्य वधो दण्ड इत्याह — स्वयं हन्तेत्यादि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परपशूनां राजाङ्केन परिवर्तयिता रूपस्य पूर्वं साहसदण्डं दद्यात्।

स्वदेशीयानां चोरहृतं प्रत्यानीय पणिकं रूपं हरेत्। परदेशीयानां मोक्षयितार्धं हरेत्।

बालवृद्धव्याधितानां गोपालकाः प्रतिकुर्युः।

लुब्धकश्वगणिभिरपास्तस्तेनव्यालपरबाधभयमृतुविभक्तमरण्यं चारयेयुः।

सर्पव्यालत्रासनार्थं गोचरानुपातज्ञानार्थं च त्रस्नूनां घण्टातूर्यं च बध्नीयुः।

समव्यूढतीर्थमकर्दमग्राहमुदकमवतारयेयुः पालयेयुश्च।

परपशूनामिति। अराजपशूनां, राजाङ्केन रूपस्य परिवर्तयिता राजकीयाङ्कदानेन रूपभेदयिता, पूर्वं साहसदण्डं दद्यात्।

स्वदेशीयानामिति। तेषां, चोरहृतं, प्रत्यानीय प्रत्यर्प्य, पणिकं रूपं हरेत् रूपसंख्यानग्राह्यो दण्ड इह रूपमित्युच्यते एकैकस्य रूपस्यैकपणप्रमाणं रूपदण्डं गृह्णीयात्। परदेशीयानां परदेशपशूनामुपगतानां, मोक्षयिता तत्स्वामी, अर्धं हरेत् तन्मूल्यस्यार्धं गृह्णीयात्, अर्थादर्धं दण्डं दद्यात्।

बालवृद्धेत्यादि। सुगमम्।

लुब्धकश्वगणिभिरित्यादि। व्याधैः श्वगणपोषकैश्च, अपास्तस्तेनव्यालपरबाधभयं परिहृतचोरहिंस्रमृगशत्रूपद्रवभयम्, ऋतुविभक्तम् ऋतुषु विभक्तम् अस्मिन्नस्मिन् ऋताविदमिदं तृणजलादिसमृद्धतया समुचितमिति विभज्य व्यवस्थितम्, अरण्यं, चारयेयुः।

सर्पेत्यादि। सर्पव्यालत्रासनार्थं सर्पव्यालानां भयजननार्थं, गोचरानुपातज्ञानार्थं देशममुकमनुसञ्चरन्ति गाव इति घण्टातूर्यशब्दतोऽनुमानार्थं च, त्रस्नूनां शब्दत्रासिनां पशूनामत्रासार्थपरिचितव्यशब्दानां, घण्टातूर्यं लोहघण्टारूपं तूर्यं, बध्नीयुः, कण्ठे।

समेत्यादि। समव्यूढतीर्थम् अविषमविस्तीर्णावतारम्, अकर्दमग्राहम् अपङ्कनक्रम्, उदकम्, अवतारयेयुः स्नानपानार्थं, पालयेयुश्च यावत्स्नानपानकालमप्रमत्ता जलजन्यभयाद् रक्षेयुश्च पशुयूथम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्तेनव्यालसर्पग्राहगृहीतं व्याधिजरावसन्नं च आवेदयेयुरन्यथा रूपमूल्यं भजेरन् ।

कारणमृतस्याङ्कचर्म गोमहिषस्य, कर्णलक्षणमजाविकानां, पुच्छमङ्कचर्म चाश्वखरोष्ट्राणां, बालचर्मबस्तिपित्तस्नायुदन्तखुरशृङ्गास्थीनि चाहरेयुः ।

मांसमाममार्द्रं शुष्कं वा विक्रीणीयुः ।

उदश्वित् श्ववराहेभ्यो दद्युः ।

कूर्चिकां सेनाभक्तार्थमाहरेयुः ।

किलाटो घाणपिण्याकक्लेदार्थः ।

पशुविक्रेता पादिकं रूपं दद्यात् ।

वर्षाशरद्धेमन्तानुभयतः कालं दुह्युः । शिशिरवसन्तग्रीष्मानेककालम् ।

चोराद्यपहृतं रोगवार्धकप्रमीतं पशुमध्यक्षाय काले निवेदयेयुरनिवेदने मूल्यमेकैकस्य रूपस्य दद्युरित्याह—स्तेनेत्यादि ।

कारणेत्यादि । कारणमृतस्य व्याधिजरादिमृतस्य, अङ्कचर्म अङ्कयुक्तं चर्म, गोमहिषस्य, आहरेयुः आहृत्य दर्शयेयुः प्रत्ययार्थम् । कर्णलक्षणं कर्णकृतं चिह्नम्, अजाविकानां बस्तोरभ्राणाम्, आहरेयुः । पुच्छम् अङ्कचर्म च अश्वखरोष्ट्राणाम्, आहरेयुः । वालादीनि च नव, आहरेयुः कुप्यार्थम् । तत्र वस्तिर्मूत्राशयः, पित्तं मायुः, स्नायुः स्नावः । शेषं प्रसिद्धम् ।

मांसमिति । मांसम्, आमम् अपक्वम्, आर्द्रं, शुष्कं वा, विक्रीणीयुः ।

उदश्विदिति । उदश्वित् तक्रं, श्ववराहेभ्यो, दद्युः पोषणार्थम् ।

कूर्चिकामिति । तक्रयुक्तक्षीरविकृतिं, शुष्कघनीकृततक्रविकारमिति स्वामी । सेनाभक्तार्थम्, आहरेयुः ।

किलाट इति । किलाटः क्षीरविकृतिः, घाणपिण्याकक्लेदार्थः किञ्चित्सावशेषतैलः पिण्याको घाणपिण्याकः तस्य गोमहिषादिभक्ष्यस्य क्लेदार्थः क्लेदनरूपे संस्कारे विनियोक्तव्यः ।

पशुविक्रेतेति । सः, पादिकं रूपम् एकैकस्य रूपस्य विक्रीयमाणस्य पादपणं, दद्यात्, अध्यक्षाय ।

वर्षेत्यादि । वर्षाशरद्धेमन्तान् ऋतून्, उभयतःकालं सायं प्रातश्च, दुह्युः, गोमहिषीः । शिशिरवसन्तग्रीष्मान्, एककालं रात्रावेव, दुह्युः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वितीयकालदोग्धुरङ्गुष्ठच्छेदो दण्डः । दोहकालमतिक्रामतस्तत्फलहानं दण्डः ।

एतेन नस्यदम्ययुगपिङ्गनवर्तनकाला व्याख्याताः ।

क्षीरद्रोणे गवां घृतप्रस्थः । पञ्चभागाधिको महिषीणाम् । द्विभागाधिकोऽजावीनाम् । मन्थो वा सर्वेषां प्रमाणं, भूमितृणोदकविशेषाद्धि क्षीरघृतवृद्धिर्भवति ।

यूथवृषं वृषेणावपातयतः पूर्वः साहसदण्डः, घातयत उत्तमः ।

वर्णावरोधेन दशतीरक्षा ।

द्वितीयेत्यादि । द्वितीयकालदोग्धुरङ्गुष्ठच्छेदो दण्ड इति अयं च कालनियमो देशव्यवस्थया द्रष्टव्यः, क्वचिद् देशे ग्रीष्मेऽपि त्रिकालदोहदर्शनादित्याह स्वामी । दोहकालमिति । तं प्रातः सायं च यथोक्तम्, अतिक्रामतः, तत्फलहानं तद्दिवसवेतनहानिः, दण्डः ।

एतेनेति । दोहकालातिपातनेन, नस्यदम्ययुगपिङ्गनवर्तनकालाः नस्यकालो नासावेधनकालः दम्यकालो दमनार्हकालः युगपिङ्गनकालः अदान्तस्य दान्तेन सह युगे योजनकालः वर्तनकालो मेथिबन्धनप्रचारणकालः इत्येते, व्याख्याताः तानप्यतिक्रामतस्तत्फलहानं दण्ड इत्यर्थः ।

क्षीरेत्यादि । क्षीरद्रोणे, गवां घृतप्रस्थः प्रस्थमितं घृतं जायते । पञ्चभागाधिकः प्रस्थपञ्चमभागयुक्तो घृतप्रस्थः, महिषीणां, क्षीरद्रोणे भवति । द्विभागाधिकः अर्धकुडुबाधिको घृतप्रस्थः, अजावीनां, क्षीरद्रोणे भवति । इदं च घृतप्रमाणं प्रायिकम् । अत एवाह —मन्थो वेति । मथनमेव, सर्वेषां घृतपरिमाणानां, प्रमाणं निश्चायकम् । तत्र हेतुकथनं—भूमितृणोदकविशेषाद्धीत्यादिना । क्षीरघृतवृद्धिः क्षीरघृतयोर्वृद्धिः क्षीरे घृतस्य वृद्धिर्वा ।

यूथेत्यादि । यूथवृषं सेक्तारं, वृषेण तथाविधेन सह, अवपातयतः योधयतः, पूर्वः साहसदण्डः । घातयतः उत्तमः साहसदण्डः ।

वर्णेत्यादि । वर्णावरोधेन दशतीरक्षा वर्णनियमेन दशकवर्गाणां रक्षा शुक्लवर्ण एको दशकवर्गः लोहितवर्णोऽन्य इत्येवं नियतैकैकवर्णयोगिनां दशानां दशतां रक्षणं, कर्तव्यम् । दशतीशब्दस्य स्त्रीत्वमत एव पाठात् कल्प्यं, दशतामिति वा पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उपनिवेशदिग्विभागो गोप्रचाराद् बलान्वयतो वा गवां रक्षा-सामर्थ्याच्च ।

अजादीनां षाण्मासिकीमूर्णां ग्राहयेत् ।

तेनाश्वखरोष्ट्रवराहव्रजा व्याख्याताः ।

बलीवर्दानां नस्याश्वभद्रगतिवाहिनां यवसस्यार्धभारः, तृणस्य द्विगुणं, तुला घाणपिण्याकस्य, दशाढकं कणकुण्डकस्य, पञ्चपलिकं मुखलवणं, तैलकुडुबो नस्यं, प्रस्थः पानम् । मांसतुला, दध्नश्चाढकं, यवद्रोणं, माषाणां वा पुलाकः । क्षीरद्रोणमर्धाढकं वा सुरायाः, स्नेहप्रस्थः, क्षारदशपलं शृङ्गिबेरपलं च प्रतिपानम् ।

उपनिवेशेत्यादि । उपनिवेशदिग्विभागः गवाद्युपनिवेशदिग्व्यवस्था, गोप्रचाराद् गोप्रचारदिशमनुसृत्य, बलान्वयतो वा गवां गोबलयोगमनुसृत्य च, रक्षासामर्थ्याच्च चोरादिभयरहितत्वनिमित्तकं रक्षणसौकर्यमनुसृत्य च, भवति ।

अजादीनामिति । अजाविप्रभृतीनां, षाण्मासिकीं षण्मासप्रवृद्धाम्, ऊर्णां, ग्राहयेत् ।

तेनेति । उक्तेन गवादिकल्पेन, अश्वखरोष्ट्रवराहव्रजाः, व्याख्याताः वेतनोपग्राहिकादन्यिश्वादियूथेष्वपि यथासम्भवं योज्यानीत्यर्थः ।

अशनादिकमाह—**बलीवर्दानामिति** । तेषां मध्ये, नस्याश्वभद्रगतिवाहिनां नस्यानां कृतनासावेधानाम् अश्वभद्रगतिवाहिनां च अश्वास्तेजस्सत्त्वयुक्ता अश्वभद्राः तद्गतिवाहिनां रथ्यायोगार्हाणां गवां, यवसस्य घासस्य, अर्धभारः दश तुलाः, अशनं भवतीति शेषः । तृणस्य सामान्यस्य, द्विगुणं विंशतितुलाः । तुला घाणपिण्याकस्य । दशाढकं चत्वारिंशत् प्रस्थाः कणकुण्डकस्य सूक्ष्मतण्डुलांशयुक्तस्य तण्डुलमलस्य । पञ्चपलिकं, मुखलवणं सिन्धूद्भवं लवणम् । तैलकुडुबो नस्यं कुडुबमितं तैलं नासापुटनिषेच्यमौषधम् । प्रस्थः प्रस्थपरिमाणं तैलं घृतं वा, पानम् । मांसतुला शतपलप्रमाणं मांसम् । दध्नश्चाढकम् । यवद्रोणं यवानां द्रोणं, माषाणां वा पुलाकः अर्धपक्वः सिक्थो वा, द्रोणपरिमाणः । यवमाषपुलाकयोश्चायं विकल्पः । क्षीरद्रोणमिति । द्रोणमितं क्षीरम्, अर्धाढकं वा सुरायाः क्षीराभावे अर्धाढकमिता सुरा । स्नेहप्रस्थः तैलघृतान्यतरस्य प्रस्थः, क्षारदशपलं गुडपलदशकं, शृङ्गिबेरपलं शुण्ठ्याः पलं च, इत्येतच्चतुष्टयं मिलितं, प्रतिपानम् अग्निदीपनार्थं पानं, भवति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पादोनमश्वतरगोखराणां, द्विगुणं महिषोष्ट्राणां कर्मकरबलीवर्दानाम् । पायनार्थं च धेनूनाम् । कर्मकालतः फलतश्च विधानम् । सर्वेषां तृणोदकप्राकाम्यम् । इति गोमण्डलं व्याख्यातम् ।

पञ्चर्षभं खराश्वानामजावीनां दशर्षभम् ।
शत्यं गोमहिषोष्ट्राणां यूथं कुर्याच्चतुर्वृषम् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनत्रिंशोऽध्यायः गोध्यक्षः,
आदितः पञ्चाशः ॥

पादोनमिति । पादन्यूनं पूर्वोक्तं भद्रगतिबलीवर्दविधानमेव, अश्वतरगोखराणां वेसरपुङ्गवान्तरगर्दभानां, भवति । **द्विगुण**मिति । द्विगुणं भद्रगत्युक्तद्विगुणं महिषोष्ट्राणां, कर्मकरबलीवर्दानां शकटाद्युपयोगिनां पुङ्गवानां च । **पायनार्थं च धेनूना**मिति । पायनप्रयोजनकं यद् विधानमुक्तं तच्च चकाराद् भक्षणार्थं च, द्विगुणमिति वर्तते । कर्मकरबलीवर्दविषये धेनुविषये च विधानद्वैगुण्यवचनेनाप्यपरितुष्यन् विधानसारमुपदिशति — **कर्मकालतः फलतश्च विधान**मिति । कर्मकालपरिमाणाद्यनुसारेण कर्मकरबलीवर्दानां दुग्धबाहुल्यादिफलप्राप्त्यनुसारेण च धेनूनामशनपानविधानं द्विगुणं ततोऽप्यधिकं वा निश्चेतव्यमित्यभिप्रायः । **सर्वेषा**मिति । सर्वपशूनां, तृणोदकप्राकाम्यं तृणस्य उदकस्य च प्राकाम्यं पर्याप्तत्वं, कार्यम् । तृणोदकं प्रकाम्यमिति पाठे तृणं च उदकं च प्रकर्षेण काम्यं दुग्धवृद्ध्यनुरूपमपेक्षणीयं, यद्वा कामः पश्वभिलाषस्तत्पूरणानुरूपमित्यर्थः । इति गोमण्डलं तत्सम्बद्धं विधाजातं, व्याख्यातं वितत्य प्रतिपादितम् ।

यूथकल्पनां श्लोकेनाह — पञ्चर्षभमिति । शत्यं व्यक्तिशतप्रमाणं, यूथं, खराश्वानां, पञ्चर्षभं पञ्च ऋषभाः सेक्तारो यस्मिंस्तत् तथाभूतं, कुर्यात् । अजावीनां, यूथं, दशर्षभं दशसेक्त्रधिष्ठितं, कुर्यात् । गोमहिषोष्ट्राणां, यूथं, चतुर्वृषं सेक्तृचतुष्टयाधिष्ठितं, कुर्यात् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनत्रिंशोऽध्यायः गोध्यक्षः,
आदितः पञ्चाशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४७. प्रक. अश्वाध्यक्षः।

अश्वाध्यक्षः पण्यागारिकं क्रयोपागतमाहवलब्धमाजातं साहाय्यागतकं पणस्थितं यावत्कालिकं वाश्वपर्यग्रं कुलवयोवर्णचिह्नकर्मवर्गागमैर्लेखयेत् ।

अप्रशस्तन्यङ्गव्याधितांश्चावेदयेत् ।

कोशकोष्ठागाराभ्यां च गृहीत्वा मासलाभमश्ववाहश्चिन्तयेत् ।

अश्वविभवेनायतामश्वायामद्विगुणविस्तारां चतुर्द्वारोपावर्तनमध्यां

अश्वाध्यक्ष इति सूत्रम् । अश्वाध्यक्षः सर्वाश्वनायकः अर्थात् तद्व्यापारोऽभिधीयत इति सूत्रार्थः । स्वाम्यादिप्रकृत्यभिधानानन्तरं दण्डप्रकृतिं प्राप्तावसरां वक्तुमुपक्रमः । तत्राश्वानां प्राधान्यात् प्रथमं तदध्यक्षाभिधानम् ।

अश्वाध्यक्ष इत्यादि । अश्वपतिः, पण्यागारिकं प्राभृतोपनीतं पण्यागारगतं, क्रयोपागतं क्रीतम्, आहवलब्धं युद्धाहृतम्, आजातं निजाश्वोत्पन्नं, साहाय्यागतकं साहाय्यदानेन लब्धं, पणस्थितम् आधित्वेन स्थितं, यावत्कालिकं यावान् प्रयोजनकालस्तावते कालायान्यस्मादानीतं, वाशब्दश्चार्थे, इत्थं सप्तप्रकारम्, अश्वपर्यग्रम् अश्वानां प्रमाणं, कुलवयोवर्णचिह्नकर्मवर्गागमैः कुलेन पारसीककाम्बोजारट्टवनायुप्रभृतिना वयसा द्विवर्षत्रिवर्षचतुर्वर्षादिना वर्णेन शुक्लकृष्णादिना चिह्नेन धवलवालफालप्रोथादिना कर्मणा सान्नाह्यादिना वर्गेण पारसीकादिभिरियद्भिरियानयं वर्ग इति वर्गीकरणेन आगमेन प्राप्तिस्थानेन च, इत्येवं सप्तभिर्विशेषैर्युक्तं, लेखयेत् ।

अप्रशस्तेत्यादि । अप्रशस्तान् शृङ्गस्थानमांसबुद्बुदत्वान्यप्रमैकाङ्घ्रित्वादिदोषयुक्तान् न्यङ्गान् अङ्गविकलान् व्याधितांश्च, आवेदयेत्, यथाकालं परिवर्तनार्थं चिकित्सार्थं च ।

कोशकोष्ठागाराभ्यां चेति । कोशात् कोष्ठागाराच्च, गृहीत्वा मासलाभं मासपरिव्ययक्लृप्तं हिरण्यमश्वभोज्यं चादाय, अश्ववाहः, चिन्तयेत् तत्कार्यम् ।

शालाविधिमाह — अश्वविभवेनेति । अश्वविभवेनायताम् अश्वपर्यग्रानुरूप्येण दीर्घाम्, अश्वायामद्विगुणविस्ताराम् अश्वायाममनुपदं वक्ष्यति, तद्द्विगुणविस्तारां, चतुर्द्वारोपावर्तनमध्यां चतुर्द्वारं सुखप्रवेशनिर्गमार्थमग्न्यादि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सप्रग्रीवां प्रद्वारासनफलकयुक्तां वानरमयूरपृषतनकुलचकोरशुकशारिकाभिराकीर्णां शालां निवेशयेत् ।

अश्वायामचतुरश्रश्लक्ष्णफलकास्तारं सखादनकोष्ठकं समूत्रपुरीषोत्सर्गमेकैकशः प्राङ्मुखमुदङ्मुखं वा स्थानं निवेशयेत् । शालावशेन वा दिग्विभागं कल्पयेत् । बडबावृषकिशोराणाम् एकान्तेषु ।

बडबायाः प्रजातायास्त्रिरात्रं घृतप्रस्थपानम्, अत ऊर्ध्वं सक्तुप्रस्थः स्नेहभैषज्यप्रतिपानं दशरात्रं, ततः पुलाको यवसमार्तवश्चाहारः ।

भये निष्क्रमणद्वाराणां सर्वतः सौलभ्यार्थं च परिकल्पितद्वारचतुष्टयम् उपावर्तनं प्रलुठनस्थानं मध्ये यस्यास्तां तथाभूतां, सप्रग्रीवां प्रग्रीवेण मुखप्रासादेन सहितां, प्रद्वारासनफलकयुक्तां प्रद्वाराभ्यां द्वारोभयपार्श्वगताभ्याम् आसनफलकाभ्यां युक्तां, वानरमयूरादिभिः सप्तभिर्विषप्रतीकारप्रयोजनाभिराकीर्णां, शालां मन्दुरां, निवेशयेत् निर्मापयेत् ।

अश्वायामेत्यादि । अश्वायामचतुरश्रश्लक्ष्णफलकास्तारम् अश्वदैर्घ्यानुगुण्येन चतुरश्रानिर्मितं श्लक्ष्णं च फलकम् आस्तार आस्तरणं यस्मिंस्तत तथाभूतं, सखादनकोष्ठकं खादनकोष्ठैर्यवसादिविकिरणाधारभूतैस्तद्भक्षणकोष्ठैः सहितं, समूत्रपुरीषोत्सर्गं मूत्रपुरीषानवरोधसंविधानसहितम् अर्थात् किञ्चिदग्रतः समुन्नतम् , एकैकशः प्रत्यश्वं, प्राङ्मुखम् उदङ्मुखं वा स्थानं निवेशयेत् । **शालावशेन वा दिग्विभागं कल्पयेदिति** । राजभवनस्य य उत्तरपूर्वो दिग्विभागोऽश्वशालार्थ उक्तः 'उत्तरपूर्वं भागं कोशो गवाश्वं च' इति, स चेदश्वानां बाहुल्यादपर्याप्तः, तदा निर्मातव्यशालामहत्त्वानुगुण्येन दिग्विभागोऽन्यः स्वीकरणीय इत्यर्थः । **बडबेत्यादि** । बडबानां प्रसविनीनां वृषाणां सेक्तॄणां किशोराणां षण्मासादूर्ध्वम् आ त्रिवर्षात् किशोराः तेषां च, एकान्तेषु तदन्याश्वानां तेषां चान्योन्यदृष्ट्यगोचरेषु स्थलेषु, स्थानं कल्पयेदिति वर्तते ।

बडबाया इति । तस्याः, प्रजातायाः प्रसूतायाः, त्रिरात्रं, घृतप्रस्थपानं प्रथमदिवसादूर्ध्वं प्रातः प्रातरिति स्वामी । अत ऊर्ध्वं, सक्तुप्रस्थः अपराह्णभोजनं, तदनन्तरं स्नेहभैषज्यप्रतिपानं स्नेहयुक्तमूलकाथादिप्रतिपानं, दशरात्रम् । **तत इति** । तदनन्तरं, पुलाकः अर्धसिद्धयवादिः, यवसं घासः, आर्तवश्चाहारः ऋतुयोग्यश्चाहारः सस्यलक्षणः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दशरात्रादूर्ध्वं किशोरस्य घृतचतुर्भागः सक्तुकुडुवः, क्षीरप्रस्थश्चाहार आ षण्मासादिति। ततः परं मासोत्तरमर्धवृद्धिर्यवप्रस्थ आ त्रिवर्षाद्, द्रोण आ चतुर्वर्षादिति। अत ऊर्ध्वं चतुर्वर्षः पञ्चवर्षो वा कर्मण्यः पूर्णप्रमाणः।

द्वात्रिंशदङ्गुलं मुखमुत्तमाश्वस्य, पञ्च मुखान्यायामः, विंशत्यङ्गुला जङ्घा, चतुर्जङ्घ उत्सेधः। त्र्यङ्गुलावरं मध्यमावरयोः। शताङ्गुलः परिणाहः। पञ्चभागावरं मध्यमावरयोः।

उत्तमाश्वस्य द्विद्रोणं शालिव्रीहियवप्रियङ्गूणामर्धशुष्कमर्धसिद्धं वा, मुद्गमाषाणां वा पुलाकः। स्नेहप्रस्थश्च। पञ्चपलं लवणस्य। मांसं

दशरात्रादिति। दशरात्रादूर्ध्वं, किशोरस्य, घृतचतुर्भागः पादकुडुवघृतयुक्तः सक्तुकुडुवः, क्षीरप्रस्थश्च, आहारः। आ षण्मासादिति। आमासषट्कम् एवं कर्तव्यम्। ततः परमिति। षण्मासादूर्ध्वं, मासोत्तरमर्धवृद्धिः प्रतिमासं वर्धमानार्धप्रस्थः, यवप्रस्थः। आ कुतोऽयं यवप्रस्थो वर्धत इत्याह — आ त्रिवर्षादिति। द्रोण इति। यवद्रोणः त्रिवर्षादूर्ध्वम्, आ चतुर्वर्षाद्, आहारः। अत ऊर्ध्वं, चतुर्वर्षः, पञ्चवर्षो वा अश्वः, कर्मण्यः सान्नाह्यादिकर्मार्हः, पूर्णप्रमाणः पूर्णं प्रमाणं वक्ष्यमाणं यस्य स तथाभूतो भवति।

तदेव प्रमाणं व्याचष्टे—द्वात्रिंशदित्यादि। उत्तमाश्वस्य, द्वात्रिंशदङ्गुलं मुखं; पञ्च मुखानि आयामः षष्ट्यधिकशताङ्गुलं दैर्घ्यं, विंशत्यङ्गुला जङ्घा, चतुर्जङ्घ उत्सेधः अशीत्यङ्गुलमौन्नत्यम्। त्र्यङ्गुलावरं मध्यमावरयोः यदुक्तमुत्तमस्य मुखादिप्रमाणं तद् मध्यमस्य त्र्यङ्गुलावरं त्र्यङ्गुलन्यूनम् अवरस्य अधमस्य ततोऽपि त्र्यङ्गुलन्यूनम्। टीकाभाषयोः द्व्यङ्गुलावरमिति पाठ उपात्तः। अथ परिणाहस्य प्रमाणमाह—शताङ्गुल इति। अङ्गुलशतप्रमाणः, परिणाहः परिक्षेपः, अर्थादुत्तमाश्वस्य। पञ्चभागावरं मध्यमावरयोः उत्तमाश्वपरिणाहप्रमाणात् पञ्चभागन्यूनम् अर्थादशीत्यङ्गुलं मध्यमाश्वस्य षष्ट्यङ्गुलमवराश्वस्य परिणाहप्रमाणम्।

आहारविधानमाह — उत्तमाश्वस्येति। तस्य, द्विद्रोणं शालिव्रीहियवप्रियङ्गूणां शाल्याद्यन्यतमस्य द्रोणद्वयम्, अर्धशुष्कम् अर्धसिद्धं वा, भोजनमिति शेषः। मुद्गमाषाणां वा, पुलाकः भक्तसिक्थकः, उक्तपरिमाणः। स्नेहप्रस्थश्च घृतस्य तैलस्य वा प्रस्थश्च पानार्थः। पञ्चपलं लवणस्य। मांसं,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पञ्चाशत्पलिकम् । रसस्याढकं द्विगुणं वा दध्नः पिण्डक्लेदनार्थम् । क्षारपञ्चपलिकः सुरायाः प्रस्थः पयसो वा द्विगुणः प्रतिपानम् । दीर्घपथभारक्लान्तानां च खादनार्थं स्नेहप्रस्थोऽनुवासनम् । कुडुबो नस्यकर्मणः । यवसस्यार्धभारः, तृणस्य द्विगुणः, षडरत्निपरिक्षेपः पुञ्जीलग्रहो वा ।

पादावरमेतन्मध्यमावरयोः । उत्तमसमो रथ्यो वृषश्च मध्यमः । मध्यमसमश्चावरः । पादहीनं बडबानां पारशमानां च । अतोऽर्धं किशोराणां च । इति विधायोगः ।

पञ्चाशत्पलिकं पञ्चाशत्पलप्रमाणम् । रसस्य मांससंस्कृतस्य, आढकं, द्विगुणं वा दध्नः दध्याढकद्वयं वा, पिण्डक्लेदनार्थं भुक्तपुलाकक्लेदनार्थम् । क्षारपञ्चपलिकः गुलादिपञ्चपलयुक्तः सुरायाः प्रस्थः, पयसो वा, द्विगुणः प्रस्थद्वयं, प्रतिपानम् अपराह्णदेयम् । दीर्घपथभारक्लान्तानां च दीर्घाध्वलङ्घनभारवहनपरिश्रान्तानां च, खादनार्थम् अग्निदीपनद्वारेण सम्यगाहारग्रहणार्थं, स्नेहप्रस्थः, अनुवासनम् अनुवासनाख्यवस्तिचिकित्सादानं, भवति । यदुक्तं —

"वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परः ।
यः स्नेहैर्दीयते स स्यादनुवासननामकः ॥
कषायक्षीरतैलैर्यो निरूहः स निगद्यते ।"

इति । कुडुबः स्नेहस्य प्रस्थचतुर्भागः, नस्यकर्मणः नासिकासेचनस्य । यवसस्य हरितसस्यादेः, अर्धभारः दश तुलाः । तृणस्य शुष्कस्य, द्विगुणः विंशतितुलाः, यवसाभावे । षडरत्निपरिक्षेपः पुञ्जीलग्रहो वा हस्तषट्कपरिणाहः पुञ्जीलानां तृणस्तम्बानां ग्रहो वा अर्थाद् भुजद्वयालिङ्गनग्राह्यस्तृणस्तम्बसङ्घातो वा ।

पादावरमेतन्मध्यमावरयोरिति । उत्तमस्याश्वस्योक्तं द्विद्रोणादिकं सर्वं चतुर्भागन्यूनं मध्यमस्य ततोऽपि चतुर्भागन्यूनमधमस्य । **उत्तमसम** इति । उत्तमाश्वविधासमानविधः, रथ्यो वृषश्च मध्यमः रथवाही मध्यमाश्वः सेक्ता च मध्यमाश्वः । मध्यमसमश्चावरः अधमाश्वो रथवाही अधमाश्वः सेक्ता च मध्यमाश्वविधासमानविधः । पादहीनं चतुर्भागहीनम् अर्थात् त्रिविधमपि विधाविधानं, बडबानां, पारशमानां च अश्वतराणां च । इह पारशमानामिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विधापाचकसूत्रग्राहकचिकित्सकाः प्रतिस्वादभाजः ।

युद्धव्याधिजराकर्मक्षीणाः पिण्डगोचरिकाः स्युः । **असमरप्रयोग्याः** पौरजानपदानामर्थेन वृषा बडवास्वायोज्याः ।

प्रयोग्यानामुत्तमाः काम्बोजकसैन्धवारट्टजवानायुजाः। **मध्यमा** बाह्लीकपापेयकसौवीरकतैतलाः । शेषाः प्रत्यवराः ।

तेषां तीक्ष्णभद्रमन्दवशेन सान्नाह्यमौपवाह्यकं वा कर्म प्रयोजयेत् ।

चतुरश्रं कर्माश्वस्य सान्नाह्यम् ।

साकारयुक्तपाठलेखनं कोशेषु चिन्त्यम् । पारशवानामिति तु वाकारयुक्तं पठितव्यं, तदा हि पारशवशब्दः सङ्करजातिमनुष्यवचनः सङ्करजेऽश्वे वेगसराख्ये भक्त्या प्रयुक्त इति शक्यते वक्तुम् । अतोऽर्धं बडबाविधाया अर्धं, किशोराणां च । इति एवं, विधायोगः उक्तः ।

विधापाचकसूत्रग्राहकचिकित्सका इति । अश्वाहारपक्तारोऽश्वपरिचारका अश्ववैद्याश्च, प्रतिस्वादभाजः विधाभागिनः, अतो विधायास्तद्भजनीया मात्रापि अश्वभोज्यमात्राभिः सह संविधेयेत्यभिप्रायः ।

युद्धव्याधिजराकर्मक्षीणा इति । युद्धादित्रयक्षीणाः सान्नाह्यादिकर्मक्षीणाश्च, पिण्डगोचरिकाः अप्रशस्तः पिण्डः कुक्षिपूरणमात्रार्थं आहारो गोचर एषामिति तथाभूताः, स्युः । **असमरप्रयोग्या** इति । युद्धानर्हाः, पौरजानपदानाम्, अर्थेन प्रसूतिरूपप्रयोजनेन, वृषाः सेक्तारो भवन्तः, बडवासु आयोज्याः ।

प्रयोग्यानामिति । प्रगतचर्याशिक्षाणां युद्धयोग्यानामश्वानां मध्ये, उत्तमाः, काम्बोजकादयः कम्बोजादिदेशचतुष्टयोत्पन्नाः । मध्यमा बाह्लीकादिदेशचतुष्टयोत्पन्नाः शेषाः उक्तेतरसौराष्ट्रादिदेशभवाः, प्रत्यवराः अधमाः।

अश्वानां द्विविधं कर्माह—तेषामिति । उत्तमादीनां, तीक्ष्णभद्रमन्दवशेन तीक्ष्णोऽतिमात्रतेजस्सत्त्वः आघातलेशस्याप्यसोढा भद्रस्तेजस्सत्त्वयुक्तः आघातसत्त्वानुरूपचेष्टो मन्दो निस्तेजस्सत्त्वो महाघातोत्पादनीयकर्मप्रतिपत्तिः त्रिविधैतत्स्वभावानुगुण्येन, सान्नाह्यं साङ्ग्रामिकम्, औपवाह्यकं वा क्रीडायानाध्वयानादिप्रयोजनकं वा, कर्म, प्रयोजयेत् ।

चतुरश्रमिति । चतुरश्रं सौष्ठवयुक्तं, कर्म शालिहोत्रादिप्रपञ्चितविशेषं साङ्ग्रामिककर्म, सान्नाह्यं, भवति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वल्गनो नीचैर्गतो लङ्घनो धोरणो नारोष्ट्रश्चौपवाह्याः ।

तत्रौपवेणुको वर्धमानको यमक आलीढप्लुतः (पृथ? पूर्व)गस्त्रिकचाली च वल्गनः ।

स एव शिरःकर्णविशुद्धो नीचैर्गतः, षोडशमार्गो वा । प्रकीर्णकः प्रकीर्णोत्तरो निषण्णः पार्श्वानुवृत्त ऊर्मिमार्गः शरभक्रीडितः शरभप्लुतः त्रितालो बाह्यानुवृत्तः पञ्चपाणिः सिंहायतः स्वाधूतः क्लिष्टः श्लिङ्गितो बृंहितः पुष्पाभिकीर्णश्चेति नीचैर्गतमार्गाः ।

कपिप्लुतो भेकप्लुत एणप्लुत एकपादप्लुतः कोकिलसंचार्युरस्यो बकचारी च लङ्घनः ।

औपवाह्यं पञ्चधा विभजते—**वल्गन** इत्यादिना । औपवाह्याः औपवाह्याश्वमार्गाः ।

वल्गनमार्गं विवृणोति—**तत्रे**त्यादि । तत्र वल्गनादिषु पञ्चसु मार्गेषु मध्ये, औपवेणुकः हस्तमात्रमण्डल इति स्वामी, वर्धमानकस्तावन्मात्रमण्डलपङ्क्तिपरिपाटीवल्गनः, यमको युगपदुभयमण्डलवल्गनः, आलीढप्लुतः एकपादसङ्कोचापरपादप्रसारणपूर्वप्लुतियुक्तः, पूर्वगः पूर्वार्धवल्गनः, त्रिकचाली त्रिकं पृष्ठवंशाधरः तेन पश्चार्धलक्षणात् पश्चार्धवल्गनः ।

स एवेति । वल्गनमार्ग एव, शिरःकर्णविशुद्धः शिरसा कर्णाभ्यां चाविकृतः, नीचैर्गतः तदाख्यः । षोडशमार्गो वा वक्ष्यमाणषोडशविधश्च सः । के ते प्रकारा इत्याह — **प्रकीर्णक** इत्यादि । प्रकीर्णकः सर्वगतिसङ्करयुक्तः, प्रकीर्णोत्तरः प्रकीर्ण एवैकगतिप्रधानः, निषण्णो निष्कम्पपृष्ठगतिः, पार्श्वानुवृत्तस्तिर्यग्गतिः, ऊर्मिमार्गः उन्नतानतगतिः, शरभक्रीडितः शरभगतिः, शरभप्लुतः शरभतुल्योत्पतनः, त्रितालः त्रिपदगामी, बाह्यानुवृत्तः सव्यापसव्यवल्गनगतिः, पञ्चपाणिः चरणत्रयं सकृदवस्थाप्य एकं द्विरवस्थापयति, सिंहायतः सिंहतुल्यगतिः, स्वाधूतः अतिदीर्घगतिः, क्लिष्टो विवहनविसन्धगतिः, श्लिङ्गितोऽवनताग्रयायी, बृंहित उन्नताग्रयायी, पुष्पाभिकीर्णो गोमूत्रिकागतिः । इति एते, नीचैर्गतमार्गाः ।

लङ्घनमाह—**कपिप्लुत** इत्यादि । वानरमण्डूकहरिणप्लुतैः सदृशप्लुतत्वात् कपिप्लुतो भेकप्लुत एणप्लुतश्च, एकपादप्लुतः संकोच्य पादत्रयमेकेन पादेन प्लुतं यस्य सः, कोकिलसञ्चारी पिकवत्सञ्चारः, उरस्यः संकोच्य सर्वान् पादान् उरसैव प्लवमानः, बकचारी च बकवत्सञ्चारश्च, लङ्घनः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

काङ्को वारिकाङ्को मायूरोऽर्धमायूरो नाकुलोऽर्धनाकुलो वाराहोऽर्धवाराहश्चेति धोरणः ।

संज्ञाप्रतिकारो नारोष्ट्र इति ।

षण्णव द्वादशेति योजनान्यध्वा रथ्यानाम् । पञ्च योजनान्यर्धाष्टमानि दशेति पृष्ठवाह्यानामश्वानामध्वा ।

विक्रमो भद्राश्वासो भारवाह्य इति मार्गाः ।

विक्रमो वल्गितमुपकण्ठमुपजवो जवश्च धाराः ।

तेषां बन्धनोपकरणं योग्याचार्याः प्रतिदिशेयुः । साङ्ग्रामिकं रथाश्वालङ्कारं च सूताः । अश्वानां चिकित्सकाः शरीरह्रासवृद्धिप्रतीकारमृतुविभक्तं चाहारम् ।

धोरणमाह — काङ्क इत्यादि । कङ्कसमानगतिः काङ्कः, वारिकाङ्कः हंसादिसमानगतिः ; एवं मायूरादिर्व्याख्येयः । इति एवमष्टविधो धोरणः ।

नारोष्ट्रमाह — संज्ञाप्रतिकार इति । शिक्षितसङ्केतानुरूपचेष्टितः, नारोष्ट्राख्यः । इतिशब्द औपवाह्यनिरूपणसमाप्तौ ।

गन्तव्याध्वमानमाह — षण्णवद्वादशेत्यादि । रथ्यानां रथवाहिनामुत्तममध्यमाधमानाम् अश्वानाम्, अध्वा, षट् नव द्वादशेति क्रमात् षड्योजनो नवयोजनो द्वादशयोजनश्च भवति । तथा पञ्च योजनानि, अर्धाष्टमानि सार्धानि सप्त योजनानि, दश योजनानि, इति क्रमेण पृष्ठभारवाहिनाम् अश्वानां त्रिविधानाम् अध्वा ।

त्रिविधं गतिभेदमाह — विक्रम इति । विक्रमः शनैर्गमनं, भद्राश्वासो मध्यमः, भारवाह्यो द्रुतगमनम्, इति मार्गाः ।

धारा आह — विक्रमो वल्गितमिति । विक्रमः शनैर्गमनं, वल्गितं प्रेङ्खितम्, उपकण्ठमुत्प्लुत्योत्प्लुत्य गमनम्, उपजवः प्रथमवेगः, जवश्चरमवेगः, इति धाराः ।

तेषामिति । रथ्यानां पृष्ठवाह्यानां चाश्वानां, बन्धनोपकरणं बन्धनान्युपकरणानि च मुखकण्ठपृष्ठपादादियोजनीयानि कवियपर्याणादीनि, योग्याचार्याः प्रतिदिशेयुः अश्वशिक्षाचार्याः उपदिशेयुः । सांग्रामिकं रथाश्वालङ्कारं च, सूताः सारथयः प्रतिदिशेयुः । अश्वानां चिकित्सकाः अश्ववैद्याः, शरीरह्रासवृद्धिप्रतीकारं देहबलहानिप्रतिक्रियां मेदोवृद्धिप्रतिक्रियां च, ऋतुविभक्तं चाहारं तत्तदृतुयोग्यतया व्यवस्थितम् आहारं च, प्रतिदिशेयुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सूत्रग्राहकाश्वबन्धकयावसिकविधापाचकस्थानपालकेशकारजाङ्गलीविदश्च स्वकर्मभिरश्वानाराधयेयुः ।

कर्मातिक्रमे चैषां दिवसवेतनच्छेदनं कुर्यात् । नीराजनोपरुद्धं वाहयतश्चिकित्सकोपरुद्धं वा द्वादशपणो दण्डः । क्रियाभैषज्यसङ्गेन व्याधिवृद्धौ प्रतीकारद्विगुणो दण्डः । तदपराधेन वैलोम्ये पत्रमूल्यं दण्डः ।

तेन गोमण्डलं खरोष्ट्रमहिषमजाविकं च व्याख्यातम् ।
द्विरह्नः स्नानमश्वानां गन्धमाल्यं च दापयेत् ।
कृष्णसन्धिषु भूतेज्याः शुक्लेषु स्वस्तिवाचनम् ॥

सूत्रेत्यादि । सूत्रग्राहकादयः सप्त, स्वकर्मभिः, अश्वान्, आराधयेयुरुपचरेयुः । तत्र सूत्रग्राहकः सूत्रग्रहणाधिकृतः वेल्लनपायनोद्वर्तनादिकर्ता, अश्वबन्धकः खलीनपर्याणाद्युपकरणबन्धनाधिकृतः, यावसिकः ऋत्वनुगुणयवसप्राशयिता, विधापाचकः शालिमुद्गमाषादिपक्ता, स्थानपालः अश्वावस्थानदेशशोधकः, केशकारः कालिककेशकल्पकः, जाङ्गलीविद् विषविद्याकोविदः ।

कर्मातिक्रमे चेति । स्वस्वकर्मणामननुष्ठानेऽन्यथानुष्ठाने वा, एषां सूत्रग्राहकादीनां, दिवसवेतनच्छेदनं कुर्यात् । नीराजनोपरुद्धं नीराजना शान्त्युदकपुष्पदीपादिना सत्कारो दुरितशान्तये बलवृद्धये च क्रियमाणः तदर्थमुपरुद्धं, चिकित्सकोपरुद्धं वा चिकित्सार्थं, वाहयतः, द्वादशपणो दण्डः। क्रियाभैषज्यसङ्गेन क्रियायाश्चिकित्सनस्य भैषज्यस्य औषधस्य च यथाकालाकरणेन, व्याधिवृद्धौ, प्रतीकारद्विगुणः प्रतिक्रियार्थव्ययद्विगुणः, दण्डः, अश्वाध्यक्षस्य । तदपराधेन क्रियाभैषज्यदोषेण, वैलोम्ये अश्वस्य विपत्तौ, पत्रमूल्यं विपन्नवाहमूल्यं, दण्डः ।

तेनेति । तेन अश्वाराधनादिविधिनोक्तेन, गोमण्डलं खरोष्ट्रमहिषम् अजाविकं च व्याख्यातं गोमण्डलादिविधिरप्युक्तप्रायः । अश्ववदेव गोमण्डलादेरप्याराधनादिकं कर्तव्यं, तदकरणे गवाध्यक्षस्य दण्डश्च भवतीत्यर्थः ।

अथायान्ते श्लोकावाह — **द्विरह्नः स्नानमश्वानामित्यादि** । दिनेदिने वारद्वयम् अश्वानां स्नानं, शरद्ग्रीष्मयोः, दापयेत् । गन्धमाल्यं च दापयेत्, नित्यम् । कृष्णसन्धिषु भूतेज्याः कृष्णपर्वसु अमावास्यासु भूतबलीन्, दापयेत् । शुक्लेषु शुक्लसन्धिषु स्वस्तिवाचनं ब्राह्मणाशीर्वादनं, दापयेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नीराजनामाश्वयुजे कारयेन्नवमेऽहनि ।
यात्रादाववसाने वा व्याधौ वा शान्तिके रतः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रिंशोऽध्यायः अश्वाध्यक्षः,
आदित एकपञ्चाशः ॥

नीराजनाम् आरात्रिकाम्, आश्वयुजे मासि, कारयेत्, नवमेऽहनि नवम्याम्, यात्रादौ अवसाने वा उद्योगस्यारम्भे समाप्तौ च, व्याधौ वा अश्वमारके च, शान्तिके रतः शान्तिप्रयोजनके कर्मण्यासक्तः ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रिंशोऽध्यायः अश्वाध्यक्षः,
आदित एकपञ्चाशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४८. प्रक. हस्त्यध्यक्षः।

हस्त्यध्यक्षो हस्तिवनरक्षां दम्यकर्मक्षान्तानां हस्तिहस्तिनीकलभानां शालास्थानशय्याकर्मविधायवसप्रमाणं कर्मस्वायोगं बन्धनोपकरणं साङ्ग्रामिकमलङ्कारं चिकित्सकानीकस्थोपस्थायुक्तवर्गं चानुतिष्ठेत्।

हस्त्यायामद्विगुणोत्सेधविष्कम्भायामां हस्तिनीस्थानाधिकां सप्रग्रीवां कुमारीसङ्ग्रहां प्राङ्मुखीमुदङ्मुखीं वा शालां निवेशयेत्।

हस्त्यायामचतुरश्रश्लक्ष्णालानस्तम्भफलकान्तरकं मूत्रपुरीषोत्सर्गस्थानं निवेशयेत्। स्थानसमशय्यामर्धोपाश्रयां दुर्गे सान्नाह्यौपवाह्यानां बहिर्दम्यव्यालानाम्।

हस्त्यध्यक्ष इति सूत्रम्। हस्त्यध्यक्षव्यापारोऽभिधीयत इति सूत्रार्थः। सङ्गतिस्त्वश्वाध्यक्षवद् द्रष्टव्या। इदं च प्रकरणमध्यायद्वयेन वितन्यते।

हस्त्यध्यक्ष इति। सः, हस्तिवनरक्षां गजवनप्रवेशनिषेधादिरूपां, दम्यकर्मक्षान्तानां शिक्षाग्रहणदान्तानां, हस्तिहस्तिनीकलभानां, शालादिषट्कप्रमाणं शाला कुटी स्थानम् आलानप्रदेशः शय्या संवेशस्थानं कर्म सान्नाह्यादिकं विधा आहारः यवसं हरितसस्यादि एतेषां प्रमाणं, कर्मसु आयोगं दम्यादिकर्मसु वक्ष्यमाणेषु आसक्तिं, बन्धनोपकरणं बन्धनमालानग्रैवेयकादि उपकरणम् अङ्कुशवेणुयन्त्रादि च, साङ्ग्रामिकं वर्मतोमरादिकम्, अलङ्कारं वैजयन्तीक्षुरप्रमालादिकं, चिकित्सकादिवर्गं च चिकित्सका गजवैद्याः अनीकस्थाः गजशिक्षाविचक्षणाः उपस्थायुक्ताः कर्मकराः तेषां वर्गं च, अनुतिष्ठेत् अवेक्षेत।

शालानिवेशमाह — **हस्त्यायामेत्यादि।** नवहस्तो हस्त्यायामः तद्द्विगुणः अष्टादशहस्त उत्सेध उच्छ्रयः विष्कम्भो विस्तारः आयामो दैर्घ्यं च यस्यास्तां तथाभूतां, हस्तिनीस्थानाधिकां हस्तिनीस्थानं षडरत्नि तेनाधिकाम् अर्थाच्चतुर्विंशतिहस्तदीर्घां, सप्रग्रीवां प्रग्रीवेण मुखशालयोपेतां, कुमारीसंग्रहां कुमारी आलानस्तम्भोपरिनिवेशिता तुला सुखबन्धनार्था तत्सङ्ग्रहवतीं, प्राङ्मुखीम् उदङ्मुखीं वा शालां, निवेशयेत् निर्मापयेत्।

स्थाननिवेशमाह — **हस्त्यायामेत्यादि।** हस्त्यायामो नवहस्तः तच्चतुरश्रं तदनुरूपमवृत्ताद्याकारं श्लक्ष्णो मसृण आलानस्तम्भः फलकान्तरं फलकरूपं स्थलच्छादकं च यस्य तत् तथाभूतं च, मूत्रपुरीषोत्सर्गस्थानं तदुत्स-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रथमसप्तमावष्टमभागावह्नः स्नानकालौ, तदनन्तरं विधायाः । पूर्वाह्णे व्यायामकालः, पश्चाह्नः प्रतिपानकालः । रात्रिभागौ द्वौ स्वप्नकालौ, त्रिभागः संवेशनोत्थानिकः ।

ग्रीष्मे ग्रहणकालः । विंशतिवर्षो ग्राह्यः ।

विक्को मूढो मत्कुणो व्याधितो गर्भिणी धेनुका हस्तिनी चाग्राह्याः ।

सप्तारत्निरुत्सेधो नवायामो दशपरिणाहः प्रमाणतश्चत्वारिंशद्वर्षो भवत्युत्तमः । त्रिंशद्वर्षो मध्यमः । पञ्चविंशतिवर्षोऽवरः ।

र्गानुगुणं किञ्चिदग्रोन्नतं स्थानं, निवेशयेत । स्थानसमशय्यां स्थानसमां शय्याम्, अर्धापाश्रयाम् अर्धम् अर्धपञ्चमहस्तः तावन्मानोऽपाश्रय उन्नतस्थानं यस्यां तादृशीं, दुर्गे दुर्गान्तः, सान्नाह्यौपवाह्यानां, बहिर्दम्यव्यालानां दुर्गबहिर्देशे दमनीयानां हिंस्राणां च, निवेशयेत् ।

कालविनियोगमाह — प्रथमेत्यादि । अह्नः, प्रथमसप्तमौ, अष्टमभागौ, स्नानकालौ । एतेन द्विः स्नानमुक्तम् । तदनन्तरं विधायाः द्वितीयोऽष्टभागो भोजनस्य कालः । पूर्वाह्णे, व्यायामस्य कर्माभ्यासस्य कालः । पश्चाह्नः अपराह्णः, प्रतिपानकालः । इहापरशब्दस्याह्नशब्दपरकस्य पश्चभावकरणमार्षम् । रात्रिभागाविति । रात्रेर्द्वौ त्रिभागौ, स्वप्नकालौ । त्रिभागः संवेशनोत्थानिकः अवशिष्टस्तृतीयभागो दशघटिकात्मकः संवेशनोत्थानविनियोज्यः । तत्र पञ्च घटिकाः संवेशनस्य, परा उत्थानस्येति द्रष्टव्यम् ।

गजग्रहणकालमाह — ग्रीष्मे ग्रहणकाल इति । तदा हि गजास्तापातिरेकात् प्रक्षीणबला भूत्वा सुग्रहा भवन्तीति । विंशतिवर्षोऽतिक्रान्तविंशतिवयस्कः तदधिकवयस्को वा, ग्राह्यः ग्रहणार्हः ।

अग्राह्यानाह — विक्क इति । विक्कः स्तनन्धयः, मूढः हस्तिनीसमानदन्तः, मत्कुणो दन्तरहितः, व्याधितः रोगी, गर्भिणी प्रसिद्धा, धेनुका स्तनपानदायिनी, हस्तिनी च, अग्राह्याः ।

प्रमाणमाह — सप्तारत्निरुत्सेध इति । सप्तहस्तोच्छ्रायवान्, नवायामो नवहस्तदैर्घ्यः, दशपरिणाहः दशहस्तपरिक्षेपः, प्रमाणतः प्रमाणेन यथोक्तेन युक्तः, चत्वारिंशद्वर्षः, उत्तमो भवति । त्रिंशद्वर्षः तावद्वयस्को वक्ष्यमाणषडरत्निप्रमाणो, मध्यमः । पञ्चविंशतिवर्षोऽवरः तावद्वयस्को वक्ष्यमाणप्रमाणोऽधमः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तयोः पादावरो विधाविधिः ।

अरत्नौ तण्डुलद्रोणः । अर्धाढकं तैलस्य । सर्पिषस्त्रयः प्रस्थाः । दशपलं लवणस्य । मांसं पञ्चाशत्पलिकम् । रसस्याढकं द्विगुणं वा दध्नः पिण्डक्लेदनार्थम् । क्षारं दशपलिकम् । मद्यस्य आढकं द्विगुणं वा पयसः प्रतिपानम् । गात्रावसेकस्तैलप्रस्थः शिरसोऽष्टभागः प्रादीपिकश्च । यवसस्य द्वौ भारौ सपादौ शष्पस्य शुष्कस्यार्धतृतीयो भारः । कडङ्गरस्यानियमः ।

सप्तारत्निना तुल्यभोजनोऽष्टारत्निरत्यरालः ।

यथाहस्तमवशेषः षडरत्निः पञ्चारत्निश्च ।

विधाविधिमाह — **तयोः पादावरो विधाविधिरिति** । वक्ष्यमाणोत्तमविधाविध्यपेक्षया चतुर्भागन्यूनो विधाविधिर्मध्यमस्य, मध्यमविधापेक्षया चतुर्भागन्यूनश्चाधमस्य ।

उत्तमस्य विधाप्रमाणमाह — **अरत्नौ तण्डुलद्रोण** इति । एकस्योत्सेधारत्नेः प्रमाणस्य एकस्तण्डुलद्रोणः । **अर्धाढकं तैलस्येत्यादि** सुगमम् । रसस्य मांससंस्कृतस्य आढकं, द्विगुणं वा दध्नः रसाभावे दध्याढकद्वयं वा, पिण्डक्लेदनार्थं भुक्तपिण्डसेचनार्थम् । क्षारं दशपलिकं गुडादि दशपलप्रमाणम् । मद्यस्याढकं, द्विगुणम् आढकद्वयं वा, पयसः क्षीरस्य, प्रतिपानम् अपराह्णदेयम् । गात्रावसेकः शरीराभ्यङ्गः, तैलप्रस्थः । शिरसः, अष्टभागः तैलार्धकुडुबः । प्रादीपिकश्च प्रदीपार्थश्च, अष्टभागः । यवसस्य हरितसस्यादेः, द्वौ भारौ चत्वारिंशत् तुलाः । शष्पस्य बालतृणस्य हरितस्य, सपादौ द्वौ भारौ । शुष्कस्य यवसस्य शष्पस्य च, अर्धतृतीयो भारः सार्धं भारद्वयम् । कडङ्गरस्य शाखाबुसस्य सल्लकीपल्लवादेः, अनियमः यावत्तृप्ति दानमित्यर्थः । अनया चैकारत्न्युत्सेधोक्तया प्रक्रियया सप्तारत्न्युत्सेधस्योत्तमहस्तिनस्तण्डुलादिकडङ्गरान्तं विधाजातं सप्तगुणितं द्रष्टव्यम् ।

अष्टारत्न्युत्सेधस्यात्यरालाख्यस्यानेन प्रकारेण विधाविकल्पप्रसङ्गादपवादमाह — **सप्तारत्निना तुल्यभोजन** इत्यादि ।

यथाहस्तमिति । षडरत्नेस्तण्डुलद्रोणषट्कं पञ्चारत्नेस्तण्डुलद्रोणपञ्चकमित्येवम् उत्सेधहस्तमानानुरोधेन, अवशेषः सप्तारत्न्यष्टारत्न्यतिरिक्तः, षड-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

क्षीरयावसिको विक्कः क्रीडार्थं ग्राह्यः ।

सञ्जातलोहिता प्रतिच्छन्ना संलिप्तपक्षा समकक्ष्या व्यतिकीर्णमांसा समतल्पतला जातद्रोणिकेति शोभाः ।

शोभावशेन व्यायामं भद्रं मन्दं च कारयेत् ।
मृगसङ्कीर्णलिङ्गं च कर्मस्वृतुवशेन वा ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकत्रिंशोऽध्यायः हस्त्यध्यक्षः,
आदितो द्विपञ्चाशः ॥

रत्निः सप्तारत्न्युत्सेधापेक्षयैकारत्निन्यूनोत्सेधो मध्यमगणनीयः, पञ्चारत्निश्च मध्यमापेक्षयैकारत्निन्यूनोत्सेधोऽधमगणनीयश्च, विधापरिमाणयोगीति शेषः। तत्र मध्यमाधमयोरुत्सेधवदायामे परिणाहे चैकैकारत्निह्रासो द्रष्टव्यः ।

क्षीरयावसिक इत्यादि। क्रीडार्थं न तु कर्मार्थं ग्राह्यो विक्को यदि कौतुकाद् गृहीतः, तदा स क्षीरयवसाभ्यां यथाभृतिदत्ताभ्यां पोषणीय इत्यर्थः ।

सप्तविधाः शोभा आह — **सञ्जातलोहितेति** । त्वगस्थिमात्रयुक्तस्य हस्तिन उपजातरुधिरा प्रथमावस्था तत्कृता शोभा सञ्जातलोहिता नाम, प्रतिच्छन्ना किञ्चिन्मांसोपजनच्छन्नास्थिका, संलिप्तपक्षा मांसलेपमसृणपार्श्वा, समकक्ष्या अन्यूनानतिरिक्तमांसावयवा, व्यतिकीर्णमांसा क्वचिदुन्नतं क्वचिदवनतमित्येवं व्यामिश्रं मांसं यस्यां सा तथाभूता, समतल्पतला समं पृष्ठवंशसमोत्पन्नमांसं तल्पतलं पृष्ठवंशपार्श्वे यस्यां सा तथा, जातद्रोणिका द्रोणीव द्रोणिका द्रोणीसमाना पृष्ठस्याकृतिः सा वंशस्य निम्नीभावात् तत्पार्श्वोन्नतिकृताज्जाता यस्यां सा तथा । इति शोभाः, सप्त सप्तावस्थाकृताः ।

अध्यायान्ते श्लोकमाह — **शोभावशेनेत्यादि** । उक्तावस्थानुगुण्येन, व्यायामं शिक्षां, कारयेत् । कं, भद्रम् उत्तमं, मन्दं मध्यमं, चकारात् मृगमवरं च हस्तिनम् । मृगसङ्कीर्णलिङ्गं च मृगं भद्रादिसङ्करजं च भद्रमन्दभद्रमृगादिनवप्रकारं हस्तिनम् । कर्मसु सान्नाह्यौपवाह्येषु, व्यायामं परिश्रमं कारयेत् । ऋतुवशेन वा शरदाद्यनुष्णकालानुसारेण च, कर्मसु व्यायामं कारयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
एकत्रिंशोऽध्यायः हस्त्यध्यक्षः,
आदितः द्विपञ्चाशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४८. प्रक. हस्त्यध्यक्षः—हस्तिप्रचारः ।

कर्मस्कन्धाः चत्वारः दम्यः सान्नाह्य औपवाह्यो व्यालश्च ।

तत्र दम्यः पञ्चविधः—स्कन्धगतः स्तम्भगतो वारिगतोऽवपातगतो यूथगतश्चेति । तस्योपविचारो विक्ककर्म ।

सान्नाह्यः सप्तक्रियापथः—उपस्थानं संवर्तनं संयानं वधावधो हस्तियुद्धं नागरायणं साङ्ग्रामिकं च । तस्योपविचारः कक्ष्याकर्म ग्रैवेयकर्म यूथकर्म च ।

औपवाह्योऽष्टविधः—आचरणः, कुञ्जरौपवाह्यः, धोरणः,

कर्मस्कन्धा इत्यादि । कर्मस्कन्धाः क्रियासमूहाः, चत्वारः चतूरूपाः । रूपाण्याह—दम्य इत्यादि ।

तत्रेति । तेषु चतुर्षु मध्ये, दम्यः पञ्चविधः । ता एव विधा आह—स्कन्धगतः स्कन्धारोहप्रवणः, स्तम्भगतः आलानबन्धनसहः, वारिगतः वारिर्गजग्रहणभूमिस्तत्प्रविष्टः, अवपातगतः अवपातनार्थं कल्पितं तृणादिच्छन्नं गर्तं गतः, यूथगतो दान्तहस्तिनीसहविहारव्यसनी, चः समुच्चये । तस्य दम्यस्य, उपविचारः उपचरणं, विक्ककर्म विक्कस्योपचरणमिव भवति । तच्च क्षीरयवसेक्षुकाण्डादिदानम् ।

सान्नाह्यमाह—सान्नाह्य इत्यादि । सः, सप्तक्रियापथः उपस्थानादिसप्तविधक्रियामार्गः । तत्र उपस्थानं पूर्वापरावयवानां नमनोन्नमनादिकं ध्वजोल्काावेणुरज्ज्वादिलङ्घनं च,संवर्तनं शयनोपवेशनरेखागर्तविषमलङ्घनादिकं भूमिकर्म, संयानम् ऋजुवक्रगोमूत्रिकामण्डललाघवादिगतिविशेषः, वधावधः हस्तदन्तगात्रैरश्वनररथादेस्तत्प्रतिनिधेर्वा घातो ग्रहणं वा, हस्तियुद्धं हस्तिभिर्हीनतुल्यसमैः सह वरण्डकाद्यामिषमन्तरतः कृत्वा युद्धं 'प्रसिद्धलालापिण्डिकाख्यमि'ति स्वामी । नागरायणं गोपुराट्टालकपरिघादिभञ्जनं, साङ्ग्रामिकं प्रकाशयुद्धसौप्तिकादिकम् । तस्योपविचार इति । सान्नाह्यस्योपचरणं, कक्ष्याकर्म वरत्राबन्धनशिल्पं, ग्रैवेयकर्म कलापकादिकण्ठबन्धनकौशलं, यूथकर्म च पूर्वकायोन्नतत्वापरकायोन्नतत्वसमकायत्वादिचिह्नैर्हस्तिशास्त्रोक्तैर्गिरिचरादियूथान्तर्गतत्वं विज्ञाय तत्तद्यूथानुगुणकर्मसु नियोजनं च ।

औपवाह्यमाह—औपवाह्योऽष्टविध इत्यादि । तत्र आचरणः पूर्वकायोन्नतावनतापरकायोन्नतावनतादिसर्वविधगजगत्यनुसारी, कुञ्जरौपवाह्यः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आधानगतिकः, यष्ट्युपवाह्यः तोत्रोपवाह्यः, शुद्धोपवाह्यः, मार्गायुकश्चेति। तस्योपविचारः—शारदकर्म हीनकर्म नारोष्ट्रकर्म च।

व्याल एकक्रियापथः। तस्योपविचार आयम्यैकरक्षः कर्मशङ्कितोऽवरुद्धो विषमः प्रभिन्नः प्रभिन्नविनिश्चयो मदहेतुविनिश्चयश्च।

क्रियाविपन्नो व्यालः। शुद्धः सुव्रतो विषमः सर्वदोषप्रदुष्टश्च।

तेषां बन्धनोपकरणमनीकस्थप्रमाणम्। आलानग्रैवेयकक्ष्या-

कुञ्जरान्तरेण सहौपवाह्यादिकर्ता, धोरण एकेनैव पक्षेण सर्वकर्मकरः, आधानगतिकः द्वित्रविधगतियायी सर्वगतिकुशलश्च, यष्ट्युपवाह्यः यष्ट्यैव केवलया क्रियाकारी, तोत्रोपवाह्यः सकण्टकयष्ट्या क्रियाकारी, शुद्धोपवाह्यः यष्टितोत्रनैरपेक्ष्येण पदाघातादिसंज्ञयैव केवलया सर्वकर्मकरः, मार्गायुकश्च मृगयुकर्मशिक्षितश्च, इति। मार्गयुक इति ह्रस्वद्वितीयाच्कपाठो युक्तः। तस्य औपवाह्यस्य, उपविचारः उपचरणम्। तदेवाह — शारदकर्म शारदस्याप्रतिभस्य अनुरूपं कर्म। शारदश्च चतुर्विधः स्थूलकृशलोहितप्राकृतभेदात्। तेन स्थूलस्य कृशीकरणं कृशस्य स्थूलीकरणं लोहितस्य मन्दाग्नेरग्निदीपनं प्राकृतस्य प्रकृतिस्थस्य स्वास्थ्यरक्षणमिति चतुष्प्रकारं शारदकर्म। हीनो निर्व्यायामस्तस्य व्यायामयोजनं हीनकर्म, नारोष्ट्रकर्म च संज्ञाशिक्षणं च।

व्याल इति। सः, एकक्रियापथः एककर्ममार्गः। तस्योपविचारः उच्यत इति शेषः। आयम्यैकरक्षः नियम्यैकेन रक्षणीयः अथवा आयम्यो दण्डहस्तेनैवैकेन रक्षणीयः सः। तस्य विशेषानाह — कर्मशङ्कितः शिक्षाकाले विसंवादी, अवरुद्धः कर्मानुपयोगोपेक्षितः, विषमः यदृच्छानुष्ठायी, प्रभिन्नो मददोषदुष्टः, प्रभिन्नविनिश्चयः मदाद् विषादिदोषाच्च व्याकुलीभूतः, मदहेतुविनिश्चयश्च सदामदत्वादविज्ञातमदहेतुश्च।

व्यालसामान्यलक्षणमाह — क्रियाविपन्न इति। दुष्टकर्मदूषितः, व्यालः। शुद्ध इत्यादि तद्विशेषकथनम्। तत्र शुद्धः केवलघातुकोऽष्टादशदोषयुक्तः, सुव्रतः केवलचालकः पञ्चदशदोषयुक्तः, विषमः घातनचालनोभयकारी शुद्धसुव्रतोभयदोषैर्युक्तः, सर्वदोषप्रदुष्टः उक्तैस्त्रयस्त्रिंशद्दोषैः स्वकीयैश्चैकोनविंशतिदोषैर्युक्तः। शुद्धादीनां तद्दोषाणां च लक्षणं हस्तिशास्त्रतोऽवगन्तव्यम्।

तेषामिति। गजानां, बन्धनोपकरणं बन्धनमुपकरणं च, अनीकस्थप्रमाणम् अनीकस्थो हस्तिशिक्षाविचक्षणस्तत्प्रमाणकं तदुपदिष्टं, करणीयम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परायणपरिक्षेपोत्तरादिकं बन्धनम् । अङ्कुशवेणुयन्त्रादिकमुपकरणम् । वैजयन्तीक्षुरप्रमालास्तरणकुथादिकं भूषणम् । वर्मतोमरशरावापयन्त्रादिकः साङ्ग्रामिकालङ्कारः ।

चिकित्सकानीकस्थारोहकाधोरणहस्तिपकौपचारिकविधापाचकयावसिकपादपाशिककुटीरक्षकौपशायिकादिरौपस्थायिकवर्गः ।

चिकित्सककुटीरक्षविधापाचकाः प्रस्थौदनं स्नेहप्रसृतिं क्षारलवणयोश्च द्विपलिकं हरेयुः । दशपलं मांसस्यान्यत्र चिकित्सकेभ्यः ।

पथिव्याधिकर्ममदजराभितप्तानां चिकित्सकाः प्रतिकुर्युः ।

आलानेत्यादि । आलानादिकं बन्धनं तत्र आलानं स्तम्भः ग्रैवेयं कलापकः कण्ठबन्धः कक्ष्या वरत्रा परायणम् आरोहणालम्बरज्जुः परिक्षेपः पादपाशादिः उत्तरं द्वितीयं कलापादिकम्, आदिशब्दात् त्रिपद्यादिग्रहणम् । अङ्कुशेत्यादि । अङ्कुशादिकम् उपकरणम् । तत्र अङ्कुशः सृणिः वेणुर्दण्डः यन्त्रम् आयुधागाराध्यक्षोक्तं पाञ्चालिकादि । भूषणमाह — वैजयन्तीत्यादि । वैजयन्ती गजपताका क्षुरप्रमाला नक्षत्रमाला आस्तरणं नमतं कुथः वर्णकम्बलः आदिपदाच्छङ्खादिग्रहणम् । साङ्ग्रामिकालङ्कारमाह — वर्मेत्यादि । वर्म कवचं तोमरश्चतुर्हस्तादिरायुधागाराध्यक्षोक्तः शरावापस्तूणी यन्त्रं नानारूपमायुधाध्यक्षोक्तम् एतदादिकः, साङ्ग्रामिकः युद्धार्थः अलङ्कारः ।

हस्तिकर्मकरवर्गमाह — चिकित्सकेत्यादि । चिकित्सको गजवैद्यः अनीकस्थः प्रतीतः आरोहकः शास्त्रज्ञो गजारोहः आधोरणः शास्त्राभिज्ञः कर्मकुशलः हस्तिपको हस्तिरक्षी औपचारिकश्चारणोद्वर्तनाभ्यञ्जनादिकर्ता विधापाचकः आहारपक्ता यावसिकः यवसप्रवेशकः पादपाशिकः पादबन्धकः कुटीरक्षकः शालापालनशुचीकरणाद्यधिकृतः औपशायिकः शयनशालाधिकृतः एतदादिः, औपस्थायिकवर्गः कर्मकरवर्गः ।

चिकित्सककुटीत्यादि । चिकित्सकादयस्त्रयः, प्रस्थौदनं प्रस्थप्रमाणमन्नं, स्नेहप्रसृतिं तैलघृतादेरर्धाञ्जलिं, क्षारलवणयोश्च, द्विपलिकं पलद्वयप्रमाणं, हरेयुः हस्त्याहारात् लभेरन्, प्रत्येकमात्मार्थे । दशपलं मांसस्य, अन्यत्र चिकित्सकेभ्यः चिकित्सकान् वर्जयित्वा, हरेयुः कुटीरक्षा विधापाचकाश्च ।

पथीत्यादि । पथ्यादिपञ्चकाभितप्तानां हस्तिनां, चिकित्सकाः, प्रतिकुर्युः पथिगमनादिजन्याभितापप्रतीकारं कुर्युः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्थानस्याशुद्धिर्यवसस्याग्रहणं स्थले शायनमभागे घातः परारोहणमकाले यानमभूमावतीर्थेऽवतारणं तरुषण्ड इत्यत्ययस्थानानि । तम् एषां भक्तवेतनाददीत ।

तिस्रो नीराजनाः कार्याश्चातुर्मास्यृतुसन्धिषु ।
भूतानां कृष्णसन्धीज्याः सेनान्यः शुक्लसन्धिषु ॥
दन्तमूलपरीणाहद्विगुणं प्रोज्झ्य कल्पयेत् ।
अब्दे द्व्यर्धे नदीजानां पञ्चाब्दे पर्वतौकसाम् ॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
द्वात्रिंशोऽध्यायः हस्तिप्रचारः,
आदितः त्रिपञ्चाशः ॥

दण्डहेतूनाह — **स्थानस्येत्यादि**। स्थानस्य अशुद्धिः अमार्जनं, यवसस्य अग्रहणम् आशनाभावः, स्थले स्थण्डिले शायनम्, अभागे घातः ताडनानर्हे मर्मादौ ताडनं, परारोहणम् आरोहणानधिकृतस्यारोहणम्, अकाले यानम् अनियते काले चारणम्, अभूमौ विषमदेशे यानम्, अतीर्थे नद्यादेरघट्टे अवतारणं, तरुषण्डे तरुगहने अवतारणम्, इति एवञ्जातीयानि, अत्ययस्थानानि दण्डस्य कारणानि, अर्थाद् औपस्थायिकवर्गस्याध्यक्षस्य च । तं दण्डम्, एषां, भक्तवेतनाद्, आददीत गृह्णीयात् ।

विधिशेषं श्लोकद्वयेनाह — **तिस्र इति**। तिस्रो नीराजनाः बलवृद्धिदुरितशान्तिप्रयोजना आरात्रिकाः, कार्याः। कदा कदा, चातुर्मास्यृतुसन्धिषु चातुर्मास्यश्चर्तुषु मासेषु भवाः पौर्णमास्यः तासु, ऋतुसन्धिषु पूर्वापरऋतुसन्धिस्थासु अर्थात् कार्त्तिकीफाल्गुन्याषाढीषु, भूतानां, कृष्णसन्धीज्याः अमावास्यासु बलयः, कार्याः। सेनान्यः स्कन्दस्य, शुक्लसन्धिषु पूर्णिमासु, इज्याः कार्या इति शेषः ॥

दन्तेत्यादि । दन्तमूलपरीणाहद्विगुणं विषाणमूलपरिक्षेपमानाद्द्विगुणमानं भागं, प्रोज्झ्य परिहाय, कल्पयेत् छित्त्वा गृह्णीयात्, प्रोज्झितातिरिक्तं दन्तभागमित्यार्थम्। छेदकालमाह — अब्दे द्व्यर्धे सार्धे वर्षद्वये अतीते, नदीजानां नदीचारिणां हस्तिनां, पञ्चाब्दे अतीते, पर्वतौकसां गिरिचराणाम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
द्वात्रिंशोऽध्यायः हस्त्यध्यक्षे हस्तिप्रचारः,
आदितस्त्रिपञ्चाशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

४९—५१. प्रक. रथाध्यक्षः, पत्त्यध्यक्षः, सेनापतिप्रचारः।

अश्वाध्यक्षेण रथाध्यक्षो व्याख्यातः।

स रथकर्मान्तान् कारयेत्।

दशपुरुषो द्वादशान्तरो रथः। तस्मादेकान्तरावरा आ षडन्तरादिति सप्त रथाः।

देवरथपुष्यरथसाङ्ग्रामिकपारियाणिकपरपुराभियानिकवैनयिकांश्च रथान् कारयेत्।

रथाध्यक्ष इति सूत्रम्। रथानाम् अध्यक्षः घटनसंस्करणाद्यधिकृतो रथाध्यक्षः अर्थात् तत्कर्माभिधीयत इति सूत्रार्थः।

अश्वाध्यक्षेणेति। अश्वाध्यक्षविधानेन, रथाध्यक्षः व्याख्यातः रथाध्यक्षविधानं व्याख्यातं रथ्यानां शालानिवेशनं विधादानं कर्मायोजनं गन्तव्याध्वपरिकल्पनं बन्धनोपकरणघटनं कर्मकरनियोजनं नीराजनमित्येवञ्जातीयमश्वाध्यक्षोक्तं कर्म रथाध्यक्षेणाप्यनुष्ठेयमित्यर्थः।

अधिकं त्वाह—स इत्यादि। रथाध्यक्षः, रथकर्मान्तान् घटनसंस्करणरूपान्, कारयेत्।

रथस्य प्रमाणमाह—दशपुरुष इति। 'द्वादशाङ्गुलो वितस्तिश्छायापौरुषं चे'ति द्वादशाङ्गुलो यः पुरुष उक्तः तेन पुरुषप्रमाणेन दशपुरुषः दशवितस्तिः अर्थादुत्सेधे पञ्चहस्तः, द्वादशान्तरः हस्तषट्कविस्तारः, रथः। अयमुत्तमः। इतो न्यूनप्रमाणान् रथानाह—तस्मादिति। दशपुरुषरथाद्, एकान्तरावराः आ षडन्तरात् आ षड्वितस्तिविस्तारादेकैकवितस्तिविस्तारन्यूनाः, अर्थाद् विस्तारन्यूनतानुगुणोत्सेधन्यूनतायुक्ताश्च, रथा भवन्तीति शेषः। इति अनेन प्रकारेण, सप्त रथाः दशपुरुषेणादिमेन सह।

विनियोगभेदनिबन्धनांस्तत्संज्ञाभेदानाह—देवरथेत्यादि। देवरथो यात्रोत्सवेषु देवप्रतिमासञ्चारणार्थो रथः, पुष्यरथः विवाहादिमङ्गलावसरारोहणार्थः, साङ्ग्रामिकः युद्धार्थः, पारियाणिकः अध्वसञ्चारार्थः, परपुराभियानिकः शत्रुदुर्गभञ्जनावसरोपयोज्यः, वैनयिकः विनयश्चर्याशिक्षणं तदर्थः, एवंसंज्ञान् रथान् कारयेत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इष्वस्त्रप्रहरणावरणोपकरणकल्पनाः सारथिरथिकरथ्यानां च कर्मस्वायोगं विद्यात्। आ कर्मभ्यश्च भक्तवेतनं भृतानामभृतानां च योग्यारक्षानुष्ठानमर्थमानकर्म च।

एतेन पत्त्यध्यक्षो व्याख्यातः। स मौलभृतश्रेणिमित्रामित्राटवीबलानां सारफल्गुतां विद्यात्। निम्नस्थलप्रकाशकूटखनकाकाशदिवारात्रियुद्धव्यायामं च विद्यात्। आयोगमयोगं च कर्मसु।

इष्वस्त्रेत्यादि। इष्वादिकल्पनाः इषूणां बाणानां सतूणीराणाम् अस्त्राणां धनुषां प्रहरणानां तोमरादीनाम् आवरणानां पल्याणादीनाम् उपकरणानां वल्गादीनां च कल्पना रचनाः, सारथिरथिकरथ्यानां कर्मसु आयोगं च यन्तॄणां रथयोक्तॄणां रथवाहानां च स्वस्वकर्मसु अभियोगातिशयं च, विद्यात्। आ कर्मभ्यश्चेति। आ कर्मणां परिसमाप्तेः, भक्तवेतनं, भृतानां नित्यनियुक्तशिल्पिनाम्, अभृतानाम् आगन्तुशिल्पिनां च सपरिकर्मिणां, योग्यारक्षानुष्ठानं योग्यानां स्वकर्मण्यतिनिपुणानां शिल्पिनां यद्वा अश्वहृदयरथचर्यादिशिक्षारूपयोग्योपदेशाचार्याणाम् आरक्षा परोपजापाद् रक्षणम् अनुष्ठानं व्यापारसौष्ठवासौष्ठवमात्रां च, अर्थमानकर्म च अर्थकर्म प्रभूतधनदानं मानकर्म पारितोषिकवलयवस्त्रादिदानसत्कारं च, विद्याद् आकलयेत्।

इति रथाध्यक्षप्रकरणं समाप्तम्।

पत्त्यध्यक्ष इति सूत्रम्। पदात्यधिकृतव्यापारोऽभिधीयत इति सूत्रार्थः।

एतेनेति। उक्तेन रथाध्यक्षव्यापारेण, पत्त्यध्यक्षो व्याख्यातः पदात्यध्यक्ष इष्वस्त्रप्रहरणादिकल्पनाः कर्मस्वायोगं भक्तवेतनं योग्यारक्षानुष्ठानमर्थमानकर्म चेत्येतत् सर्वं पदातिविषयं चिन्तयेदित्यर्थः। अधिकविधिमाह—स इत्यादि। पत्त्यध्यक्षः, मौलभृतश्रेणिमित्रामित्राटवीबलानां मौलं मूले स्थानीये भवं सैन्यं भृतं वेतनपरिगृहीतं बलं श्रेणिर्जनपदवर्त्यायुधीयगणः मित्रबलममित्रबलमटवीपालबलम् इति षड्विधानां बलानां, सारफल्गुतां, विद्यात् स्थानविनियोगाय जानीयात्। निम्नादियुद्धव्यायामं च निम्नयुद्धाद्यष्टविधयुद्धशिक्षां च, विद्यात्। तत्र निम्नयुद्धं सतृणजलमध्यदेशयुद्धं स्थलयुद्धं निरुदकस्तम्बदेशयुद्धं प्रकाशयुद्धं प्रतीतं कूटयुद्धं साङ्ग्रामिकाधिकरणविकल्पितं कपटयुद्धं खनकयुद्धं भूमिं खात्वा तत्र स्थित्वा क्रियमाणं युद्धम् आका-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदेव सेनापतिः सर्वयुद्धप्रहरणविद्याविनीतो हस्त्यश्वरथचर्यासंघुष्टश्चतुरङ्गस्य बलस्यानुष्ठानाधिष्ठानं विद्यात् ।

स्वभूमिं युद्धकालं प्रत्यनीकमभिन्नभेदनं भिन्नसन्धानं संहतभेदनं भिन्नवधं दुर्गवधं यात्राकालं च पश्येत् ।

शयुद्धं प्राकारादिकमारुह्य क्रियमाणं युद्धं दिवायुद्धरात्रियुद्धे प्रतीते । **आयोगमयोगं च कर्मस्विति** । पत्तीनां स्वकर्मसु 'सर्वदेशकालशस्त्रवहनं व्यायामश्चेति पदातिकर्माणि' इति साङ्ग्रामिकाधिकरणे वक्ष्यमाणेषु तत्परत्वमव्यापारं च विद्यात् ।

इति पत्त्यध्यक्षप्रकरणं समाप्तम् ।

सेनापतिप्रचार इति सूत्रम् । हस्त्यश्वरथपदातिरूपचतुरङ्गसमुदायात्मकं मौलभृतादिषट्प्रकारोपेतं बलं सेना तस्य पतिर्नायकः सेनापतिः तस्य प्रचारो व्यापारोऽभिधीयत इति सूत्रार्थः । एकैकाङ्गाध्यक्षकथनानन्तरं सर्वाङ्गसमुदायाध्यक्षस्य क्रमप्राप्तत्वाद् वचनम् ।

तदेवेत्यादि । अश्वाध्यक्षादीनां पत्त्यध्यक्षान्तानां चतुर्णामङ्गाध्यक्षाणां यत् कर्मजातमभिहितं तदेव, सेनापतिः, विद्यात् । स कथम्भूतः, सर्वयुद्धप्रहरणविद्याविनीतः सर्वेषु युद्धेषु निम्नयुद्धादिषु सर्वेषु प्रहरणेषु धनुर्वर्गादिषु विद्यासु आन्वीक्षिकीप्रभृतिषु च कृतशिक्षः, हस्त्यश्वरथचर्यासङ्घुष्टः गजाद्यारोहणयोधनादिकर्मसु प्रख्यातः । तदेवेत्येतद् विशिनष्टि—**चतुरङ्गस्य बलस्यानुष्ठानाधिष्ठानमिति** । हस्त्यश्वरथपदात्यात्मिकायाः सेनायाः यान्यनुष्ठानानि 'हस्त्यश्वरथपत्तिकर्माणी'ति साङ्ग्रामिकाधिकरणे वक्ष्यमाणानि कर्माणि तदधिष्ठानं तदाश्रयम् अश्वाध्यक्षादिकर्मणामश्वादिकर्मानुरूपकरणीयत्वात् ।

अतिदिष्टकर्मातिरिक्तं कर्माह — **स्वभूमिमित्यादि** । स्वभूमिं सेनाव्यायामार्हं देशं, युद्धकालं प्रकाशादियुद्धयोग्यं कालं, प्रत्यनीकं शत्रुबलम्, अभिन्नभेदनम् अभिन्नस्य परव्यूहस्य भेदनं विश्लेषणं, भिन्नसन्धानं भिन्नस्य विश्लिष्टस्य स्वबलस्य संश्लेषणं, संहतभेदनं परस्परक्षार्थसङ्घटितानां विघटनं, भिन्नवधं विघटितानां वधं, दुर्गवधं परपुरस्थानीयादिविध्वंसनं, यात्राकालं च अभिषेणनकालं च, पश्येत् विद्यात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तूर्यध्वजपताकाभिर्व्यूहसंज्ञाः प्रकल्पयेत् ।
स्थाने याने प्रहरणे सैन्यानां विनये रतः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे त्रयस्त्रिंशोऽध्यायः
रथाध्यक्षः पत्त्यध्यक्षः सेनापतिप्रचारश्च,
आदितः चतुष्पञ्चाशः ॥

विधिविशेषं श्लोकेनाह— तूर्येत्यादि । स्थाने गमननिवृत्तौ, याने गमने, प्रहरणे पराभिहनने च विषये, तूर्यध्वजपताकाभिः वाद्यैः शङ्खचक्रादिचिह्नैः वैजयन्तीभिश्च, व्यूहसंज्ञाः युद्धव्यूहितस्वसैन्यस्य सङ्केतान् पराविज्ञेयान्, प्रकल्पयेद् उल्लिखेत् । उल्लिखितसङ्केताविसंवादेन स्वसैन्या वाद्यविशेषश्रवणध्वजपताकाविशेषदर्शनैः स्थानयानाद्यनुष्ठानं यथा कुर्युस्तथा तान् शिक्षयेच्चेत्यभिप्रायकमध्यक्षविशेषणमाह— सैन्यानां विनये रत इति ॥

इति कौटलीयार्थशास्त्रव्याख्याने अध्यक्षप्रचारे द्वितीयाधिकरणे त्रयस्त्रिंशोऽध्यायः
रथाध्यक्षः पत्त्यध्यक्षः सेनापतिप्रचारश्च,
आदितश्चतुष्पञ्चाशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५२, ५३. प्रक. मुद्राध्यक्षः, विवीताध्यक्षः ।

मुद्राध्यक्षो मुद्रां माषकेण दद्यात् ।

समुद्रो जनपदं प्रवेष्टुं निष्क्रमितुं वा लभेत ।

द्वादशपणममुद्रो जानपदो दद्यात् । कूटमुद्रायां पूर्वः साहसदण्डः । तिरोजनपदस्योत्तमः ।

विवीताध्यक्षो मुद्रां पश्येत् ।

मुद्राध्यक्ष इति सूत्रम् । मुद्रा नाम पण्यलेख्यादिषु करणीयो राजकीयश्चिह्नविशेषः शुल्काध्यक्षे प्रस्तुतः तस्या अध्यक्षो मुद्राध्यक्षः । स तद्व्यापारश्च तत्रानुक्त इहाभिधीयत इत्यर्थः ।

मुद्राध्यक्ष इति । सः, मुद्रां नायं चोरः शत्रुचारो वेति प्रत्ययजननार्थां, माषकेण दद्यात् माषकं राजकोशवृद्ध्यर्थं गृहीत्वा दद्यात्, प्रवेष्टे निष्क्रमित्रे च ।

मुद्राग्रहणस्य फलमाह — **समुद्र** इति । गृहीतमुद्र एव जनः, जनपदं विजिगीषुदेशं, प्रवेष्टुं, निष्क्रमितुं तस्मान्निर्गन्तुं च, लभेत अधिकारं प्राप्नुयादित्यर्थः ।

अगृहीतमुद्रस्य प्रविशतो निर्गच्छतश्च दण्डमाह — **द्वादशपणमि**त्यादि । द्वादशपणं दण्डम्, अमुद्रः अगृहीतमुद्रः, जानपदः विजिगीषुजनपदभवः, दद्यात् । अन्यजनपदभवस्य तु अमुद्रस्य कूटमुद्राकरणवक्ष्यमाणदण्डवृद्धिन्यायेन दण्डवृद्धिः काचित् स्थापनीया । कूटमुद्रायां कृत्रिममुद्रायां प्रदर्श्यमानायां, पूर्वः साहसदण्डः, अर्थाद् विजिगीषुजनपदभवस्यैव । तिरोजनपदस्य अन्यजनपदभवस्य कूटमुद्राप्रदर्शयितुः, उत्तमः साहसः ।

इति मुद्राध्यक्षप्रकरणं समाप्तम् ।

विवीताध्यक्ष इति सूत्रम् । विवीतं गोप्रचरणार्हस्तृणादिमान् प्रदेशः तस्याध्यक्षस्तद्व्यापारोऽभिधीयत इति सूत्रार्थः । य एते मुद्राध्यक्षदण्डनीया उक्ता अमुद्रकूटमुद्राः, ते महापथमृजुमपहाय विमार्गेणैव विवीतगतेन प्रायश्चरन्तो विवीताध्यक्षेणैव स्वयं स्वपुरुषद्वारेण वा गृहीत्वा मुद्राध्यक्षायार्पणीया इत्यतो मुद्राध्यक्षानन्तरं विवीताध्यक्षकथनसङ्गतिः ।

विवीताध्यक्ष इति । सः, मुद्रां पश्येत् प्रतिविवीतपथिकं मुद्रास्ति नवेति परीक्षेत ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भयान्तरेषु च विवीतं स्थापयेत् । चोरव्यालभयान्निम्नारण्यानि शोधयेत् ।

अनुदके कूपसेतुबन्धोत्सान् स्थापयेत्, पुष्पफलवाटांश्च ।

लुब्धकश्वगणिनः परिव्रजेयुररण्यानि । तस्करामित्राभ्यागमे शङ्खदुन्दुभिशब्दमग्राह्याः कुर्युः शैलवृक्षाधिरूढा वा शीघ्रवाहना वा ।

अमित्राटवीसञ्चारं च राज्ञो गृहकपोतैर्मुद्रायुक्तैर्हारयेयुः धूमाग्निपरम्परया वा ।

मुद्राविचयस्य व्याप्त्यर्थमाह — **भयान्तरेषु चेति** । भयं चोरपरापसर्पचारशङ्का तद्गोचरेषु भूप्रदेशेषु कृष्येष्वकृष्येषु वा सर्वविधेषु, विवीतं स्थापयेत् । एतेन 'अकृष्यायां भूमौ पशुभ्यो विवीतानि प्रयच्छेद्' इति भूमिच्छिद्रविधानप्रकरणोक्त्या कृष्यभूमौ विवीताभावात् तत्पथचारिषु मुद्राविचयाभावप्रसङ्ग इति शङ्का निरस्ता । चोरव्यालभयात्, निम्नारण्यानि निम्नानि गभीराणि भूच्छिद्राणि अरण्यानि च, शोधयेत् तस्करा हिंस्रमृगाश्च तत्र निलीय वसन्ति नवेति मुहुः परीक्षेत ।

अनुदक इति । निर्जले प्रदेशे, कूपसेतुबन्धोत्सान् कूपान् उदपानान् सेतुबन्धान् जलावरोधबन्धान् उत्सान् तात्कालिकान् क्षुद्रकूपांश्च, स्थापयेत् । पुष्पफलवाटान्, चकारात् प्रपादिकं च, स्थापयेत् ।

लुब्धकश्वगणिन इति । लुब्धकाश्च श्वगणिनश्च, परिव्रजेयुररण्यानि वनानि परितश्चरेयुः, अर्थाच्चोरामित्रादीनां प्रवेशपरिहाराय प्रविष्टपरिज्ञानाय च । चोराद्यागमस्यान्तपालादीन् प्रति निवेदनार्थमाह — **तस्करेत्यादि** । तस्करामित्राभ्यागमे शङ्खदुन्दुभिशब्दम्, अग्राह्याः तस्करामित्राणां ग्रहणागोचराः सन्तः, कुर्युः । अग्राह्यत्वप्रकारमाह—**शैलवृक्षाधिरूढा** वेत्यादि । स्पष्टार्थम् ।

अमित्रेत्यादि । अमित्राटवीसञ्चारं च अमित्राणां शत्रूणाम् अटवीसञ्चारं मृगयाद्यर्थं वनसञ्चारवृत्तान्तं, राज्ञः स्थानीयस्थितस्य, गृहकपोतैर्मुद्रायुक्तैः लेखयुक्तैर्गृह्यकपारावतैः, हारयेयुः नयेयुः । धूमाग्निपरम्परया वा हारयेयुः दिवा धूमपरम्परया नक्तमग्निपरम्परया वा नयेयुः । परम्परा तु— आ वनाद् आ स्थानीयं विवीताध्यक्षपुरुषाः कृतसङ्केताः क्रोशान्तरेषु स्थिताः वनगतपुरुषप्रथमप्रदर्शितधूमाग्निदर्शनात् तदुत्तरक्रोशान्तरस्थितेन स्वोत्तरं क्रोशान्तरस्थितं प्रति धूमाग्निप्रदर्शनं, तेन स्वोत्तरं प्रति तेन स्वोत्तरं प्रतीत्येवंरूपा द्रष्टव्या ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्रव्यहस्तिवनाजीवं वर्तनीं चोररक्षणम् ।
सार्थातिवाह्यं गोरक्ष्यं व्यवहारं च कारयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
चतुस्त्रिंशोऽध्यायः मुद्राध्यक्षो विवीताध्यक्षः,
आदितः पञ्चपञ्चाशः ॥

व्यापारशेषं श्लोकेनाह — द्रव्येत्यादि । द्रव्यहस्तिवनाजीवं द्रव्यवने हस्तिवने च विद्यमानो य आजीवः उपजीव्यपदार्थः कुप्याध्यक्षहस्त्यध्यक्षोपादेयव्यतिरिक्तः यवसेन्धनाङ्गारादिः तं, वर्तनीं दुर्गमार्गसन्तारणभृतिं, चोररक्षणं तद्भृतिं, सार्थातिवाह्यं भयस्थानेषु वणिक्सङ्घस्यातिवाहनवेतनं, गोरक्ष्यं गोरक्षानिमित्तमादेयं, व्यवहारं यथोक्तपदार्थक्रयविक्रयव्यवहारं च, कारयेत् अनुष्ठापयेत ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
चतुस्त्रिंशोऽध्यायः मुद्राध्यक्षो विवीताध्यक्षश्च,
आदितः पञ्चपञ्चाशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५४, ५५. प्रक. समाहर्तृप्रचारः गृहपतिवैदेहकतापसव्यञ्जनाः प्रणिधयः।

समाहर्ता चतुर्धा जनपदं विभज्य ज्येष्ठमध्यमकनिष्ठविभागेन ग्रामाग्रं परिहारकमायुधीयं धान्यपशुहिरण्यकुप्यविष्टिप्रतिकरमिदमेतावदिति निबन्धयेत्।

समाहर्तृप्रचार इति सूत्रम्। सर्वेभ्य आयस्थानेभ्यो दुर्गराष्ट्रखनिसेतुवनव्रजवणिक्पथलक्षणेभ्यो राजार्थानां सम्यगाहर्ता समाहर्ता तस्य प्रचारो व्यापारः सर्वजनपदचिन्तनरूपोऽभिधीयत इति सूत्रार्थः। एकैकार्थाध्यक्षाणां प्रतिपादनानन्तरं सर्वार्थाध्यक्षस्य प्राप्तावसरत्वात् कथनम्।

समाहर्तेत्यादि। समाहर्ता, चतुर्धा जनपदं विभज्य चतुर्भिरंशैः जनपदं पृथक्कृत्य, ज्येष्ठमध्यमकनिष्ठविभागेन चतुर्ष्वप्यंशेषु प्रत्येकं ज्येष्ठो मध्यमः कनिष्ठ इति विभागं कुलसंख्याप्रयुक्तं ग्रामाणां सारफल्गुत्वप्रयुक्तं च विभागं कृत्वा, ग्रामाग्रं निबन्धयेत् ग्रामाणां प्रातिस्विकं सामूहिकं च परिमाणं लेखयेत्। कथं निबन्धयेदित्याह — **इदमेतावदितीति**। एतच्च ग्रामाग्रादौ सर्वत्र सम्बध्यते। अमुकग्राम ईदृग्रूप एतत्परिमाणः अमुकग्रामसमुदाय ईदृग्रूप एतत्परिमाणश्चेत्यनेन प्रकारेण। तथा परिहारकं परिहारः महादानादिनिमित्तः करमोक्षस्तद्युक्तं ग्रामाग्रम्, इदमेतावदिति निबन्धयेत् एत एतावन्तो ग्रामाः करमोक्षिता इति लेखयेत्। आयुधीयं दण्डकरदायकं ग्रामाग्रम्, इदमेतावदिति निबन्धयेत् एत एतावन्तो ग्रामाः एतावत आयुधीयान् प्रयच्छन्तीति लेखयेत्। धान्यादिपञ्चकप्रतिकरम् इदमेतावदिति निबन्धयेत्। प्रतिनियतः करः प्रतिकरः, स धान्यादिषु प्रत्येकं सम्बध्यते, धान्यप्रतिकरं पशुप्रतिकरं हिरण्यप्रतिकरं कुप्यप्रतिकरं विष्टिप्रतिकरं च, इदमेतावदिति निबन्धयेत् एष्वेषु ग्रामेषु अमुकामुकधान्येभ्य एतावद्भ्य एतावांस्तत्तद्धान्यप्रतिकरः प्रतिवत्सरम् उपसम्पद्यत इति लेखयेत्। एतावान् पशुप्रतिकरोऽमुकामुकजातीयान् वाहदोहलोमाद्युपकर्तॄन् एतावतः पशून् उपनयतीति लेखयेत्। एष एतावान् हिरण्यप्रतिकरः कोशप्रवेश्यं हेमरूप्यं रूप्यरूपं ताम्ररूपं चैतावत् प्रयच्छतीति लेखयेत्। कुप्यप्रतिकर एष एतावान् एतान्येतावन्ति कुप्यद्रव्याणि वितरतीति लेखयेत्। विष्टिप्रतिकर एष एतावानेतावतां कर्मकरपुरुषाणामर्पणेनोपकरोतीति लेखयेत्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्प्रदिष्टः पञ्चग्रामीं दशग्रामीं वा गोपश्चिन्तयेत् ।

सीमावरोधेन ग्रामाग्रं कृष्टाकृष्टस्थलकेदारारामषण्डवाटवनवास्तुचैत्यदेवगृहसेतुबन्धश्मशानसत्रप्रपापुण्यस्थानविवीतपथिसङ्ख्यानेन क्षेत्राग्रं, तेन सीम्नां क्षेत्राणां च मर्यादारण्यपथिप्रमाणसम्प्रदानविक्रयानुग्रहपरिहारनिबन्धान् कारयेत् । गृहाणां च करदाकरदसङ्ख्यानेन ।

इत्थं कृतनिबन्धस्य जनपदस्य चतुर्भागमेकैकमेकैकः स्थानिकश्चिन्तयेदिति वक्ष्यति । चतुर्भागेऽपि ग्रामान् पञ्चशो दशशो वा विभज्य एकैकस्मिन् ग्रामविभागे स्थानिकनियम्यमवान्तरचिन्तकं गोपसंज्ञमेकैकं कुर्यादित्याह — तत्प्रदिष्ट इति । तेन समाहर्त्रा प्रदिष्टो नियुक्तः पुरुषः, पञ्चग्रामीं दशग्रामीं वा ग्रामाणामुत्तमत्वे तत्पञ्चकम् अधमत्वे तद्दशकम् अर्थान्मध्यमत्वे तत्षट्कादिकं च यथोचितं, गोपश्चिन्तयेत् गोपसंज्ञः सन् चिन्तयेत्, यश्चिन्तयति स गोपसंज्ञयोच्यत इत्यर्थः ।

कथं चिन्तयेदित्याह — सीमावरोधेनेति । नदीशैलादिसीमपरिच्छेदेन, ग्रामाग्रं ग्रामपरिमाणं, कारयेत् निबन्धयेत् । कृष्टाकृष्टाद्यष्टादशसंख्यानेन, क्षेत्राग्रं क्षेत्रपरिमाणं, कारयेत् एतावत् कृष्टमेतावदकृष्टमित्येवं कृष्टादिक्षेत्रं परिच्छिद्य निबन्धयेत् । तत्र कृष्टं कृष्टपच्यव्रीह्याद्युत्पत्तिक्षेत्रम्, अकृष्टम् अकृष्टपच्यनीवाराद्युत्पत्तिक्षेत्रं, स्थलम् उज्जटदेशः, केदारः शालेयादिक्षेत्रम्, आरामः उपवनं, षण्डः कदल्यादिक्षेत्रं, वाटः इक्ष्वादिभूमिः, वनं ग्रामवास्तुपजीव्यवृक्षबृन्दस्थानं, वास्तु ग्रामभूमिः, चैत्यः उद्देशवृक्षः, देवगृहादित्रयं प्रसिद्धं, सत्रम् अन्नदानशाला, प्रपा पानीयशाला, पुण्यस्थानं तीर्थादि, विवीतं गोप्रचारप्रदेशः, पन्थाः रथशकटपद्गतागतमार्गः । तेनेति । तेन संख्यानेन, सीम्नां नदीशैलादीनां, क्षेत्राणां च, मर्यादादिनिबन्धान् कारयेत् मर्यादादिपुस्तकानि लेखयेत् । तत्र मर्यादा परस्परावधिः, अरण्यमनुपजीव्यवनं, पन्थाः कृष्टादिपरस्परप्रवेशनिर्गममार्गः, प्रमाणं स्वस्वपरिमाणं, संप्रदानम् अनुकेनामुकस्य दत्तमितीदृशं, विक्रयः प्रसिद्धः, अनुग्रहः धान्याद्यृणदानेन कर्षकाणामुपकारः, परिहारः करमोक्षः । गृहाणां च करदाकरदसंख्यानेन, निबन्धान् कारयेदिति वर्तते एतावन्ति गृहाणि करदायकैर्जनैरध्युषितानि एतावन्ति चाकरदायकैरित्येवं संख्याय पुस्तकेषु लेखयेत् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेषु चैतावच्चातुर्वर्ण्यमेतावन्तः कर्षकगोरक्षकवैदेहककारुकर्मकरदासाश्चैतावच्च द्विपदचतुष्पदमिदं च हिरण्यविष्टिशुल्कदण्डं समुत्तिष्ठतीति ।

कुलानां च स्त्रीपुरुषाणां बालवृद्धकर्मचरित्राजीवव्ययपरिमाणं विद्यात् ।

एवञ्च जनपदचतुर्भागं स्थानिकः चिन्तयेत् ।

गोपस्थानिकस्थानेषु प्रदेष्टारः कार्यकरणं बलिप्रग्रहं च कुर्युः ।

तेषु चेति । तेषु च गृहेषु, एतावत् चातुर्वर्ण्यम् एतावन्तोऽमुकामुकवर्णभवा जनाः, एतावन्तः कर्षकादयः षड्वर्गाश्च, एतावच्च द्विपदचतुष्पदमिदं च पिण्डेनैतावन्तो मनुष्याश्च पशवश्चैते, वसन्तीति सर्वत्र शेषः । इदं च हिरण्यविष्टिशुल्कदण्डं हिरण्यं स्वर्णरूप्यादि विष्टिः कर्मकरः शुल्कः घट्टदेयं दण्डः सैन्यः इत्येतच्चतुष्टयं वार्षिकं, समुत्तिष्ठति उत्पद्यते राजार्थम्, इति अनेन प्रकारेण, निबन्धान् कारयेदिति वर्तते ।

कुलानामिति । कुलानां च स्त्रीपुरुषाणां कुटुम्बसम्बन्धिनां च स्त्रीणां पुरुषाणां च, बालादिपरिमाणं बालवृद्धपरिमाणम् एतावद्वयस्काः स्त्रियः पुरुषाश्चेत्येवं वयःपरिच्छेदं कर्माणि वर्णजातिप्रसिद्धानि तत्परिमाणं चरित्रं देशजात्याद्याचारस्तत्परिमाणम् आजीवो वृत्तिः अर्थात् तन्निमित्त आयस्तत्परिमाणं व्ययः कुटुम्बभरणार्थधनविनियोगस्तत्परिमाणं च, विद्यात्, गोपः ।

एवञ्चेति । अनेन प्रकारेण, जनपदचतुर्भागं, स्थानिकः स्थानिकपदव्यपदेश्यश्चतुर्भागनायकः, चिन्तयेत् ।

गोपेत्यादि । गोपस्थानिकस्थानेषु गोपानां स्थानिकानां च स्वव्यापारानुष्ठानप्रदेशेषु, प्रदेष्टारः कण्टकशोधनाधिकारिणः, कार्यकरणं कण्टकोद्धरणलक्षणकार्यानुष्ठानं, बलिप्रग्रहं च बलीनां गोपस्थानिकनिबन्धारूढानां राजार्थानां प्रसभग्रहणं च अर्थात् स्वयमदायकेभ्यः, अथवा बलिप्रग्रहं बलिनां राष्ट्रमुख्यानां राजार्थोत्थापनविघ्नकारिणां प्रग्रहं गोपस्थानिकविधेयास्ते यथा स्युस्तथा दमनं, कुर्युः ।

इति समाहर्तृप्रचारः समाप्तः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाहर्तृप्रदिष्टाश्च गृहपतिकव्यञ्जना येषु ग्रामेषु प्रणिहितास्तेषां ग्रामाणां क्षेत्रगृहकुलाग्रं विद्युः । मानसञ्जाताभ्यां क्षेत्राणि भोगपरिहाराभ्यां गृहाणि वर्णकर्मभ्यां कुलानि च । तेषां जङ्घाग्रमायव्ययौ च विद्युः । प्रस्थितागतानां च प्रवासावासकारणमनर्थ्यानां च स्त्रीपुरुषाणां चारप्रचारं च विद्युः ।

गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधय इति सूत्रम् । गृहपतिकव्यञ्जना वैदेहकव्यञ्जनास्तापसव्यञ्जनाश्च संस्थाविशेषा गूढपुरुषोत्पत्तिप्रकरणोक्ताः, प्रणिधयः गूढपुरुषाः लक्षणया तेषां प्रणिधानानि ग्रामेषु जनपदेषु च नियोजनानि अभिधीयन्त इति सूत्रार्थः । गृहपतिकवैदेहकतापसव्यञ्जनप्रणिधय इति समस्तपाठे गृहपतिव्यञ्जनादीनां त्रयाणां संस्थाविशेषाणां प्रणिधयः प्रणिधानानि नियोजनानीति स्पष्ट एवार्थः । संस्थापञ्चके तिसृणां प्राधान्याद् ग्रहणमन्ययोरप्यभ्युपायत्वाविशेषादुपलक्षणम् । तेन कापटिकोदास्थितसंस्थयोरपि प्रणिधानं संगृहीतं द्रष्टव्यम् । संस्थाप्रणिधानं च ग्रामजनपदवृत्तान्तज्ञानस्य गोपस्थानिकप्रचारपरीक्षणस्य च समाहर्त्रवश्यापेक्षणीयस्याभ्युपायभूतं समाहर्तृप्रचारस्यैवाङ्गमिति तस्येहाभिधानसङ्गतिः ।

तत्र गृहपतिव्यञ्जनप्रणिधानं तावदाह — **समाहर्तृप्रदिष्टाश्चेति** । समाहर्त्रा नियुक्ताः, गृहपतिकव्यञ्जनाः, येषु ग्रामेषु, प्रणिहिताः नियोजिताः, तेषां ग्रामाणां, क्षेत्रगृहकुलाग्रं क्षेत्रसंख्यां गृहसंख्यां कुलसंख्यां च, विद्युः । कानि कानि कथं विद्युरित्याह — **मानसञ्जाताभ्यां क्षेत्राणीति** । मानेनायामविस्तारादिपरिच्छेदेन उत्पन्नसस्यपिण्डेन च क्षेत्राग्रं विद्युः । भोगपरिहाराभ्यां गृहाणि करकरमोक्षाभ्यां गृहवास्तव्यान्, विद्युः । वर्णकर्मभ्यां कुलानि च ब्राह्मणादिजात्या तथा यजनकृष्यादिकर्मणा कुटुम्बानि च, विद्युः । तेषामिति । कुलानां, जङ्घाग्रं जङ्घाशब्देन पादचारिणो लक्ष्यन्ते कुलसम्बन्धिनां पादचारिणां द्विपदचतुष्पदानामग्रम् इयत्ताम्, आयव्ययौ च धनोत्पत्तिविनियोगौ च, विद्युः । **प्रस्थितेत्यादि** । प्रस्थितागतानामिति व्यस्तसमस्तविपर्यस्तग्रहणं प्रस्थितानां निजाधिवासस्थलादन्यत्र वस्तुं गच्छताम्, आगतानां वस्तुमन्यप्रदेशादागतानां, प्रस्थितागतानां वस्तुमन्यत्र गत्वा पुनः प्रत्यागतानाम्, आगतप्रस्थितानां क्वचिद् वस्तुमागत्य ततोऽन्यत्र वस्तुं प्रस्थितानां चेत्यर्थः । प्रवासावासकारणं प्रवासे अध्युष्यमाणस्थलवासपरित्यागे आवासे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एवं वैदेहकव्यञ्जनाः स्वभूमिजानां राजपण्यानां खनिसेतुवनकर्मान्तक्षेत्रजानां परिमाणमर्घं च विद्युः। परभूमिजातानां वारिस्थलपथोपयातानां सारफल्गुपण्यानां कर्मसु च । शुल्कवर्तन्यातिवाहिकगुल्मतरदेयभागभक्तपण्यागारप्रमाणं विद्युः ।

एवं समाहर्तृप्रदिष्टास्तापसव्यञ्जनाः कर्षकगोरक्षकवैदेहकानामध्यक्षाणां च शौचाशौचं विद्युः। पुराणचोरव्यञ्जनाश्चान्तेवासिनश्चैत्यचतुष्पथशून्यपदोदपाननदीनिपानतीर्थायतनाश्रमारण्यशैलवनगहनेषु स्तेनामित्रप्रवीरपुरुषाणां च प्रवेशनस्थानगमनप्रयोजनान्युपलभेरन् ।

तदन्यस्थलवासपरिग्रहे च कारणं, विद्युः। अनर्थ्यानां च स्त्रीपुरुषाणाम् अनाशंसनीयानां नर्तकीबन्धक्यादीनां स्त्रीणां विटकितवादीनां पुरुषाणां च, प्रवासावासकारणं विद्युः । चारप्रचारं च परप्रयुक्तापसर्पप्रवृत्तिं च, विद्युः ।

वैदेहकव्यञ्जनप्रणिधानमाह — **एवमिति** । एवं यथा गृहपतिव्यञ्जनास्तथा वैदेहकव्यञ्जनाः, स्वभूमिजानां राजपण्यानां पण्याध्यक्षप्रतिपादितानां, खनिसेतुवनकर्मान्तक्षेत्रजानां खनिजानां खन्यध्यक्षोक्तानां शङ्खवज्रादीनां सेतुजानां मत्स्यप्लवादीनां वनजानां कुप्याध्यक्षोक्तानां द्रव्यवनभवानां कर्मान्तजानां खातवप्रादिकर्मान्तभूम्युत्पन्नानां क्षेत्रजानां व्रीह्यादीनां सीताध्यक्षोक्तानां च, परिमाणम् इयत्ताम्, अर्घं मूल्यं च, विद्युः। परभूमिजातानां देशान्तरजातानां, वारिस्थलपथोपयातानां जलमार्गेण स्थलमार्गेण च स्वदेशमुपगतानां, सारफल्गुपण्यानां साराणां रत्नादीनां फल्गूनां शाकादीनां च पण्यानां, कर्मसु च क्रयविक्रयादिषु च, परिमाणमर्घं च विद्युरिति वर्तते । तथा शुल्काद्यष्टकप्रमाणं शुल्कस्य शुल्काध्यक्षोक्तस्य वर्तन्या अन्तपालादेयस्य आतिवाहिकस्य सार्थातिवाहनार्थस्य विवीताध्यक्षग्राह्यस्य गुल्मदेयस्य रक्षिसङ्घदेयस्य तरदेयस्य नावध्यक्षदेयस्य भागस्य सहव्यवहारिविभाज्यांशस्य भक्तस्य व्यवहर्तृपुरुषबलीवर्दादिभोजनव्ययस्य पण्यागारस्य पण्यगृहभाटकादेश्च प्रमाणम् इयत्तां, विद्युः ।

तापसव्यञ्जनप्रणिधानमाह — **एवमिति** । अनेन प्रकारेण , समाहर्तृप्रदिष्टाः समाहर्तृनियुक्ताः, तापसव्यञ्जनाः, कर्षकगोरक्षकवैदेहकानाम् , अध्यक्षाणां च गोपादीनां च, शौचाशौचं विद्युः । **पुराणचोरव्यञ्जनाश्चेति** ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समाहर्ता जनपदं चिन्तयेदेवमुत्थितः ।
चिन्तयेयुश्च संस्थास्ताः संस्थाश्चान्याः स्वयोनयः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे पञ्चत्रिंशोऽध्यायः
समाहर्तृप्रचारः गृहपतिवैदेहकतापसव्यञ्जनप्रणिधयश्च,
आदितः षट्पञ्चाशः ॥

सन्धिच्छेदादिना परद्रव्यापहारिणश्चोराः ते चिराभ्यस्ततत्कर्माणः पुराणचोराः तद्व्यञ्जनास्तद्वेषाः, अन्तेवासिनः तापसव्यञ्जनशिष्याः, चैत्यादिष्वेकादशसु स्थानेषु, तत्र चैत्यं देवालयः चतुष्पथं शृङ्गाटकं शून्यपदं निर्जनस्थानम् उदपानः स्रोतःप्रापितावरुद्धजलो जलाधारः नदी प्रसिद्धा निपानम् उपकूपजलाशयः तीर्थायतनं पुण्योदकप्रदेशः आश्रमो मुनिगृहम् अरण्यं ब्रह्मसोमारण्यं शैलगहनवनगहने प्रसिद्धे एतेषु । स्थित्वेति शेषः । स्तेनामित्रप्रवीरपुरुषाणां च स्तेनानां चोराणाम् अमित्रपुरुषाणां शत्रुप्रयुक्तानां तीक्ष्णरसदादीनां प्रवीरपुरुषाणाम् अल्पनिमित्तपरमारणसाहसिकानां च, चकारादनर्थ्यस्त्रीपुरुषाणां च प्रवेशनस्थानगमनप्रयोजनानि अमुष्मिन् देशे अमुष्मिन् काले प्रवेशः स्थितिर्निर्गमनमित्येतानि प्रयोजनं च, उपलभेरन् जानीयुः ।

अध्यायान्ते श्लोकमाह—**समाहर्तेति**। एवम् उक्तेन प्रकारेण, उत्थित उद्युक्तः, समाहर्ता जनपदं चिन्तयेत्, अर्थाद् गोपस्थानिकसहायः । ताश्च संस्थाः समाहर्तृप्रदिष्टाः पूर्वोक्ताः गृहपतिकव्यञ्जनादयः संस्थाविशेषाः, जनपदं चिन्तयेयुः, चकाराद् गोपस्थानिकौ च । संस्थाश्च तांश्च तत्तद्व्यञ्जनयोनीन् संस्थाविशेषान्, अन्याः स्वयोनयः तत्तद्योनिसमानयोनयः संस्थाः, चिन्तयेयुः परीक्षेरन् । संस्थापरीक्षार्थस्य चेदं संस्थान्तरप्रणिधानस्य वचनं न तात्पर्यतो विध्यर्थं, किन्तु कर्मकराः प्रायोऽर्थलोभाद् राजार्थं वा हापयन्ति प्रजा वा परिपीडयन्तीत्यवश्यं तत्कर्मशोधने समाहर्त्रा नित्यं प्रतिजागरितव्यमित्युपदेशार्थम् । तेन संस्थाचिन्तनाय संस्थान्तरकल्पने संस्थानवस्थाप्रसङ्ग इति न चोदनीयम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे पञ्चत्रिंशोऽध्यायः
समाहर्तृप्रचारः गृहपतिवैदेहकतापसव्यञ्जनाः प्रणिधयश्च,
आदितः षट्पञ्चाशः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

५६. प्रक. नागरिकप्रणिधिः ।

समाहर्तृवन्नागरिको नगरं चिन्तयेत् । दशकुलीं गोपो, विंशतिकुलीं चत्वारिंशत्कुलीं वा । स तस्यां स्त्रीपुरुषाणां जातिगोत्रनामकर्मभिः जङ्घाग्रमायव्ययौ च विद्यात् ।

एवं दुर्गचतुर्भागं स्थानिकश्चिन्तयेत् ।

धर्मावसथिनः पाषण्डिपथिकानावेद्य वासयेयुः । स्वप्रत्ययाश्च तपस्विनः श्रोत्रियांश्च ।

नागरिकप्रणिधिरिति सूत्रम् । नगरे स्थानीये नियुक्तो नागरिकः तस्य प्रणिधिः प्रणिधानं व्यापारे नियोजनम् अभिधीयत इति सूत्रार्थः । सर्वसमुदयानां यथोक्तरूपाणां रक्षणीयत्वाद् तद्रक्षणस्य तदाश्रयस्थानरक्षणाधीनत्वात् स्थानीयस्य तदाश्रयस्थानत्वात् तद्रक्षणस्येहाभिधानसङ्गतिः ।

समाहर्तृवदिति । नागरिकः, नगरं स्थानीयं, समाहर्तृवत् चिन्तयेत् यथा समाहर्ता जनपदं चतुर्धा विभज्य गोपस्थानिकसहायश्चिन्तयेत् तथा स्थानीयं चतुर्धा विभज्य गोपस्थानिकसहायश्चिन्तयेत् । तत्र गोपस्य चिन्तनीयं विषयमाह—**दशकुलीमिति** । दशकुलीं दशकुलानि उत्तमानि, गोपः, चिन्तयेदिति सम्बध्यते । तथा विंशतिकुलीं विंशतिं कुलानि मध्यमानि, चत्वारिंशत्कुलीं वा चत्वारिंशतं कुलानि वाधमानि, चिन्तयेत् । स गोपः, तस्यां दशकुल्यां विंशतिकुल्यां चत्वारिंशत्कुल्यां वा स्वचिन्ताविषयभूतायां, स्त्रीपुरुषाणां स्त्रीणां पुरुषाणां च, जातिगोत्रनामकर्मभिः, जङ्घाग्रं जङ्घाशब्देन पादचारिजनो लक्ष्यते तेन जनसंख्यामित्यर्थः, आयव्ययौ च, विद्यात् ।

स्थानिकस्य चिन्तनीयमाह—**एवमिति** । एवं यथा गोपो दशकुलीप्रभृतिं तद्गतस्त्रीपुरुषजङ्घाग्रायव्ययज्ञानपूर्वं चिन्तयेत् तद्वत, दुर्गचतुर्भागं स्थानिकः चिन्तयेद् दुर्गचतुर्भागगतस्त्रीपुरुषजङ्घाग्रायव्ययज्ञानपूर्वं तन्त्रयेत, दुर्गचतुर्भागचिन्तकश्चायं स्थानिकाख्यः ।

धर्मावसथिन इति । धर्मावसथाः धर्मशालाः तदधिकारिणो धर्मावसथिनः, पाषण्डिपथिकान् पाशुपतशाक्यभिक्षुकादीन् अध्वगान्, आवेद्य गोपाय निवेद्य, वासयेयुः धर्मावसथेषु । स्वप्रत्ययाश्च स्वकृतः स्वयं विचार्य कृतः प्रत्ययः तपस्विश्रोत्रियविश्वासो येषां ते तथाभूताः सन्तः, तपस्विनस्तापसान्, श्रोत्रियान्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कारुशिल्पिनः स्वकर्मस्थानेषु स्वजनं वासयेयुः। वैदेहकाश्चान्योन्यं स्वकर्मस्थानेषु। पण्यानामदेशकालविक्रेतारमस्वकरणं च निवेदयेयुः।

शौण्डिकपाक्वमांसिकौदनिकरूपाजीवाः परिज्ञातमावासयेयुः। अतिव्ययकर्तारमत्याहितकर्माणं च निवेदयेयुः।

चिकित्सकः प्रच्छन्नव्रणप्रतीकारकारयितारमपथ्यकारिणं च गृहस्वामी च निवेद्य गोपस्थानिकयोर्मुच्यते। अन्यथा तुल्यदोषः स्यात्।

छान्दसांश्च, वासयेयुरिति वर्तते। स्वप्रत्ययत्ववचनं तद्वासननिमित्तस्य दोषस्य स्वगामित्वद्योतनार्थम्।

कारुशिल्पिन इति। कारवः शिल्पिनश्च, स्वकर्मस्थानेषु स्वजनं वासयेयुः, स्वप्रत्ययाः। वैदेहकाश्च वणिजश्च, स्वप्रत्ययाः, अन्योन्यं स्वकर्मस्थानेषु तत्पण्यवणिक् तत्पण्यवणिजमिति न्यायमनपहाय पण्यव्यवहारस्थानेषु, वासयेयुः। पण्यानाम्, अदेशकालविक्रेतारम् अदेशे अकाले च विक्रयकर्तारम् आगन्तुकं, निवेदयेयुः, नागरिकाय। अस्वकरणं च अस्वीयस्य पण्यस्य व्यवहरणं च, निवेदयेयुः।

शौण्डिकेत्यादि। शौण्डिकाः मद्यविक्रयिणः पाक्वमांसिकाः पक्वमांसविक्रयिणः औदनिका अन्नविक्रयिणः रूपाजीवाः वेश्याश्च, परिज्ञातं समानशीलादिद्वारेण विदितं, आवासयेयुः। पुनः किं कुर्युः, अतिव्ययकर्तारम्, अतिव्ययस्य विज्ञातायत्यभ्यधिकस्याविज्ञातायतिकस्य वा व्ययस्य कर्तारम्, अत्याहितकर्माणं च अतिमात्रारब्धमद्यपानादिकर्माणं च निवेदयेयुः, गोपस्थानिकेभ्यः।

चिकित्सक इति। भिषक्, प्रच्छन्नव्रणप्रतीकारकारयितारं प्रच्छन्नं स्वकृतापराधोद्भेदभयादन्याविदितं यथा भवति तथा व्रणानां शस्त्राद्युत्पादितानां प्रतीकारस्य चिकित्सायाः कारयितारम्, अपथ्यकारिणं च अपथ्यानि रोगमरणोत्पादकानि द्रव्याणि करोति सम्पादयत्यन्विष्यति वेत्यपथ्यकारी तं च, निवेद्य गोपस्थानिकयोः, मुच्येत शुध्येत्। अन्यथा अनिवेदने, तुल्यदोषः स्याद् अपराधिभ्यां समानदोषो गण्येतेत्यर्थः। तथा गृहस्वामी च यस्मिन् गृहे व्रणप्रतीकारयित्रपथ्यकारिणोरनुष्ठानं तद्गृहपतिश्च, निवेद्य गोपस्थानिकयोर्मुच्येतान्यथा तुल्यदोषः स्यात्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रस्थितागतौ च निवेदयेत् । अन्यथा रात्रिदोषं भजेत । क्षेमरात्रिषु त्रिपणं दद्यात् ।

पथिकोत्पथिकाश्च बहिरन्तश्च नगरस्य देवगृहपुण्यस्थानवनश्मशानेषु सव्रणमनिष्टोपकरणमुद्भाण्डीकृतमाविग्नमतिस्वप्नमध्वक्लान्तमपूर्वं वा गृह्णीयुः ।

एवमभ्यन्तरे शून्यनिवेशावेशनशौण्डिकौदनिकपाकमांसिकद्यूतपाषण्डावासेषु विचयं कुर्युः ।

अग्निप्रतीकारं च ग्रीष्मे मध्यमयोरह्नश्चतुर्भागयोः । अष्टभागोऽग्निदण्डः । बहिरधिश्रयणं वा कुर्युः ।

प्रस्थितागतौ चेति । प्रस्थितः स्वगृहात् कार्यान्तरेण देशान्तरं प्रस्थितः आगतः देशान्तरात् कार्यान्तरेण स्वगृहं प्राप्तः तौ च; निवेदयेत् प्रस्थानागमनकालप्रयोजनाद्याख्यानपूर्वमावेदयेत्, अर्थाद् गृहस्वामी । अन्यथा निवेदनाभावे, रात्रिदोषं भजेत रात्रौ ताभ्यां कृतस्य चौर्यादिलक्षणस्य दोषस्य भागी भवेत् । क्षेमरात्रिषु क्षेमयुक्तासु अनुपजातचौर्यासु अनिवेदनरात्रिषु, त्रिपणं पणत्रयात्मकमनिवेदनापराधदण्डं, दद्यात् । क्षेमेऽपि दण्डविधानं निवेदनानुष्ठानस्य कदाप्यव्यभिचारार्थम् ।

पथिकेत्यादि । पथिकोत्पथिकाश्च पथिका महामार्गचारिणो वैदेहकादिव्यञ्जनाः उत्पथिका विवीतपथचारिणः काष्ठतृणादिहारकगोपालकादिव्यञ्जनाः त उभये सञ्चाराः, बहिरन्तश्च नगरस्य विद्यमानेषु, देवगृहादिषु चतुर्षु स्थानेषु, सव्रणं शस्त्राद्युत्पादितव्रणम्, अनिष्टोपकरणम् अनिष्टानि वर्जनीयान्युपकरणानि काकल्यादीनि चोरादिसाधनानि यस्य तम्, उद्भाण्डीकृतं समधिकभाण्डभारवाहिनम्, आविग्नं भीतम्, अतिस्वप्नं रात्रिव्यायामजागरवैशादतिमात्रनिद्रापन्नम्, अध्वक्लान्तं दीर्घाध्वसञ्चारश्रान्तम्, अपूर्वं वा अज्ञातपूर्वं वा, गृह्णीयुः, अर्थान्नागरिकाय चार्पयेयुः ।

एवमिति । अनेन प्रकारेण, अभ्यन्तरे स्थानीयान्तराले, शून्यनिवेशादिषु शून्यनिवेशे शून्यालये आवेशने शिल्पशालायां शौण्डिकावासे औदनिकावासे पाकमांसिकावासे द्यूतावासे पाषण्डावासे चेत्येवं सप्तसु, विचयं सव्रणाद्यन्वेषणं कुर्युः, अर्थाद् गूढपुरुषा नागरिकादिसम्बन्धिनः ।

अग्नीत्यादि । कुर्युरित्यनुवर्तते । अग्निप्रतिषेधं च अग्निकार्याणां महताम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पादः पञ्चघटीनाम् । कुम्भद्रोणीनिःश्रेणीपरशुशूर्पाङ्कुशकचग्रहणीदृतीनां चाकरणे ।

तृणकटच्छन्नान्यपनयेत् । अग्निजीविन एकस्थान् वासयेत् । स्वगृहप्रद्वारेषु गृहस्वामिनो वसेयुरसम्पातिनो रात्रौ । रथ्यासु कुटव्रजाः सहस्रं तिष्ठेयुः, चतुष्पथद्वारराजपरिग्रहेषु च ।

अग्न्यतिप्रज्वलनबहुलस्फुलिङ्गोद्गतिहेतूनां वारणं च कुर्युः । कदा, ग्रीष्मे ग्रीष्मर्तौ, तत्रापि न सर्वदा किन्तु मध्यमयोरह्नश्चतुर्भागयोः दिवससम्बन्धिनोः द्वितीयतृतीययामयोः । तृणपर्णादिमयपटलावृतगृहविषयश्चायं प्रतिषेधः । निषिद्धकारिणां दण्डमाह—**अष्टभाग** इति । पणाष्टभागः, अग्निदण्डः निषिद्धकालाग्निकार्यकरणनिमित्तो दण्डः । अग्निकार्यस्य पाकार्थस्थाल्यधिश्रयणस्य तदानीमवर्जनीयत्वे त्वाह — **बहिरिति** । बहिरधिश्रयणं वा पटलानावृतावकाशाधिश्रयणं वा, कुर्युः ।

अग्निकार्यकरणस्य घटिकाविशेषसम्बन्धे दण्डविशेषमाह — **पाद** इति । पादः पणचतुर्भागदण्डः, पञ्चघटीनां द्वितीयतृतीययाममध्यमपञ्चघटिकानां सार्धद्वादशघटिकात ऊर्ध्वम् आ सार्धसप्तदशघटिकात इत्यर्थः । कुम्भद्रोण्यादीनां चाकरणे कुम्भो घटो जलपूर्णः द्रोणी दारुमयो जलाधारो जलपूर्णः निःश्रेणी अधिरोहणी उच्चदेशारोहणार्था परशुः कुठारो दार्वादिच्छेदनार्थः शूर्पं प्रस्फोटनं प्रतिमुखधूमप्रसरवारणार्थम् अङ्कुशं सृणिर्दह्यमानवस्त्वाकर्षणार्थः कचग्रहणी शालापटलतृणहरणसाधनं दृतिश्चर्ममयमुदकपात्रम् इत्येतेषामग्निनिर्वापणसाधनानां ग्रीष्मकाले गृहद्वारेष्वनिवेशने, पाद इत्यनुवर्तते पणचतुर्भागो दण्डः ।

तृणकटच्छन्नान्यपनयेदिति । तृणकटमयच्छदींषि गृहाणि, अपनयेद् निरस्येद् ग्रीष्मे । अग्निजीविनः अयस्कारताम्रतक्षादीन्, एकस्थान् वासयेत् एकस्मिन् महति चतुश्शाले कृताग्निभयप्रतिविधाने वासयित्वा कर्म कारयेत् । **स्वगृहेत्यादि** । स्वगृहप्रद्वारेषु स्वगृहमुखद्वारेषु, गृहस्वामिनो वसेयुः । कथम्भूताः, असम्पातिनो रात्रौ निशायामन्यत्र सञ्चारं वर्जयन्तः । रथ्यासु विशिखासु, कुटव्रजाः सजलाः कुम्भपङ्क्तयः, सहस्रं तिष्ठेयुः । चतुष्पथद्वारराजपरिग्रहेषु च चतुष्पथेषु शृङ्गाटकेषु द्वारेषु नगरादिद्वारेषु राजपरिग्रहेषु कोशगृहकुप्यगृहकोष्ठागारपण्यगृहगजाश्वशालादिषु च, कुटव्रजास्तिष्ठेयुः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रदीप्तमनभिधावतो गृहस्वामिनो द्वादशपणो दण्डः । षट्पणोऽवक्रयिणः । प्रमादाद् दीप्तेषु चतुष्पञ्चाशत्पणो दण्डः ।

प्रादीपिकोऽग्निना वध्यः ।

पांसुन्यासे रथ्यायामष्टभागो दण्डः । पङ्कोदकसन्निरोधे पादः । राजमार्गे द्विगुणः ।

पुण्यस्थानोदकस्थानदेवगृहराजपरिग्रहेषु पणोत्तरा विष्ठादण्डाः । मूत्रेष्वर्धदण्डाः ।

भैषज्यव्याधिभयनिमित्तमदण्ड्याः ।

प्रदीप्तमिति । प्रदीप्तम् अनभिधावतः प्रज्वलिताग्निकं किमपि गृहं दृष्ट्वाप्यनभिद्रवतः, गृहस्वामिनः, द्वादशपणो दण्डः भवति । षट्पणोऽवक्रयिणः भाटकेन गृहे वसतोऽनभिधावतो गृहस्वाम्युक्तदण्डार्धदण्डः । **प्रमादादिति** । प्रमादाद् अनवधानाद्, दीप्तेषु सत्सु अर्थात् स्वगृहेष्वपि, चतुष्पञ्चाशत्पणो दण्डः । स गृहारक्षकस्येत्येके ।

प्रादीपिक इति । प्रदीपिका वह्निना गृहसन्दीपनं तत्कर्ता, अग्निना तद्दीपितेनैव, वध्यः तदैव गृहीतश्चेत् । कालान्तरगृहीतस्याप्यग्निदाहः कण्टकशोधने वक्ष्यते — 'विवीतक्षेत्रखलवेश्मद्रव्यहस्तिवनादीपकमग्निना दाहयेदि'ति ।

पांस्वित्यादि । रथ्यायां रथशकटादिसञ्चारमार्गे, पांसुन्यासे पांसूनां धूलीनां तज्जातीयानामवकराणां च निक्षेपे, अष्टभागः पणाष्टमांशः, दण्डः । तत्रैव पङ्कोदकसन्निरोधे पङ्कमिश्रजलावरोधने, पादः पादपणदण्डः । राजमार्गे महामार्गे, द्विगुणः पांसुन्यासे पङ्कोदकसन्निरोधे च रथ्योक्तद्विगुणः पादपणात्मकोऽर्धपणात्मकश्च क्रमेण दण्डः ।

पुण्येत्यादि । राजमार्ग इत्यनुवर्तते तत्र, पुण्यस्थानादिषु चतुर्षु च, पणोत्तरा उत्तरोत्तरैकैकपणाधिकाः राजमार्गे एकपणः पुण्यस्थाने द्विपणः उदकस्थाने तटाकादौ त्रिपणः देवगृहे चतुष्पणः राजपरिग्रहे राजगृहकोशागारादौ पञ्चपण इत्येवमात्मकाः, विष्ठादण्डाः । मूत्रेषु उक्तेष्वेव प्रदेशेषु मूत्रविसर्जने, अर्धदण्डाः क्रमाद् अर्धपणैकपणसार्धपणद्विपणार्धतृतीयपणात्मका दण्डाः ।

भैषज्यव्याधिभयनिमित्तमदण्ड्या इति । भैषज्यं विरेचनद्रव्यसेवनं व्याधिरतिसारप्रमेहादि भयं प्रसिद्धम् एतन्निमित्तकं चेद् विष्ठामूत्रकरणं राजमार्गादौ, तर्हि दण्ड्या न भवन्ति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मार्जारश्वनकुलसर्पप्रेतानां नगरस्यान्तरुत्सर्गे त्रिपणो दण्डः। खरोष्ट्राश्वतराश्वपशुप्रेतानां षट्पणः। मनुष्यप्रेतानां पञ्चाशत्पणः।

मार्गविपर्यासे शवद्वारादन्यतः शवनिर्णयने पूर्वः साहसदण्डः। द्वाःस्थानां द्विशतम्। श्मशानादन्यत्र न्यासे दहने च द्वादशपणो दण्डः।

विषण्नालिकमुभयतोरात्रं यामतूर्यम्। तूर्यशब्दे राज्ञो गृहाभ्याशे सपादपणमक्षणताडनम् प्रथमपश्चिमयामिकम्। मध्यमयामिकं द्विगुणम्। बहिश्चतुर्गुणम्।

मार्जारेत्यादिवाक्यत्रयमतिरोहितार्थम्।

मार्गेत्यादि। मार्गविपर्यासे प्रसिद्धमार्गादन्येन मार्गेण शवानां नयने, शवद्वारादन्यतः शवनिर्णयने व्यवस्थितप्रेतनिर्हरणद्वारातिरिक्तद्वारेण प्रेतनिर्हरणे, पूर्वः साहसदण्डः। द्वाःस्थानां द्वाररक्षिणां द्वारान्तरनिर्णयनमप्रतिषेधतां, द्विशतं पणद्विशतदण्डः। **श्मशानादि**त्यादि। न्यासे स्थापने, स च बालानाथादीनाम्। शेषं स्पष्टम्।

विषण्नालिकमिति। यामतूर्यं यामे यन्त्रणीयजनसञ्चारे प्रहरे भवं तूर्यं तत्सञ्चारनिरोधसूचकं वाद्यघोषणं यामतूर्यं, तत्, उभयतोरात्रं रात्रेरुभयोः पार्श्वयोः, अर्थात् प्रथमपश्चिमयामयोः कर्तव्यमिति शेषः। तत्रापि घटिकानियमार्थमाह — विषण्नालिकं विवर्जिताः षट् नालिकाः रात्रिपूर्वपश्चिमभागसंबन्धिन्यो यस्मिंस्तद् यथा भवति तथा, रात्रेरादितः षट्सु घटिकास्वतीतासु अन्ततश्च षट्सु घटिकास्ववशिष्टास्वित्यर्थः। इह उभयतोरात्रमिति रात्रिमुभयत इत्यर्थेऽव्ययीभावः समासान्तश्चार्षः। **तूर्यशब्द** इति। श्रूयमाणे, राज्ञो, गृहाभ्याशे गृहसमीपे सञ्चरतामिति शेषः, सपादपणम् अक्षणताडनं पादाधिकपणोऽकालसञ्चारदण्डः भवति। तच्चाक्षणसञ्चारदण्डनं किं सर्वरात्रियामविषयं, नेत्याह—प्रथमपश्चिमयामिकं प्रथमयामशेषसञ्चारविषयं पश्चिमयामशेषसञ्चारविषयं चेत्यर्थः। द्वितीयतृतीययामसञ्चारविषयमाह—मध्यमेत्यादि। मध्यमयामिकम् अक्षणताडनं, द्विगुणम् अर्धतृतीयपणम्। इदं सर्वं नगरान्तःसञ्चारविषयं, नगरबहिर्देशसञ्चारविषयमाह — बहिरिति। बहिर्नगराद् बहिर्नगरपरिसरदेशे, चतुर्गुणं राजगृहाभ्याशसञ्चारोक्तदण्डचतुर्गुणम् अर्थात् पञ्चपणात्मकम् अक्षणताडनं भवति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शङ्कनीये देशे लिङ्गे पूर्वापदाने च गृहीतमनुयुञ्जीत ।

राजपरिग्रहोपगमने नगररक्षारोहणे च मध्यमः साहसदण्डः ।

सूतिकाचिकित्सकप्रेतप्रदीपयाननागरिकतूर्यप्रेक्षाग्निनिमित्तं मुद्राभिश्चाग्राह्याः ।

चाररात्रिषु प्रच्छन्नविपरीतवेषाः प्रव्रजिता दण्डशस्त्रहस्ताश्च मनुष्या दोषतो दण्ड्याः ।

शङ्कनीय इति । शङ्क्यतेऽस्मिन् स्थितं पुरुषं चोरजारादित्वेनेति शङ्कनीयः तथाभूते सति, देशे निष्कुटादौ, शङ्कनीये लिङ्गे अवगुण्ठनकुड्यच्छायानिलयनादिके सति, पूर्वापदाने च पूर्वकृते चौर्यादिवृत्ते च प्रतीते सति, गृहीतम् अनुयुञ्जीत तद्देशस्थं तल्लिङ्गिनं तदपदानकं च जनं दृष्टं गृहीत्वा पृच्छेत् — कस्त्वं कुतः कस्य किमर्थमिहागतोऽसीति ।

राजपरिग्रहोपगमन इति । राजकीयावसथोद्यानादिष्वननुमतस्य प्रवेशने, नगररक्षारोहणे च नगररक्षाणां प्राकाराट्टालकादीनामारोहणे च, मध्यमः साहसदण्डः ।

सूतिकेत्यादि । सूतिकादिसप्तकनिमित्तं सूतिका प्रसूता तत्पदेन तच्छुश्रूषणं लक्ष्यते । सूतिकानिमित्तं सूतिकाशुश्रूषणे निमित्ते चिकित्सकनिमित्तं चिकित्सकपरिचरणे निमित्ते प्रेतनिमित्तं शवनिर्हरणे निमित्ते प्रदीपयाननिमित्तं दीपेनात्मानं प्रकाश्य गमने निमित्ते नागरिकतूर्यनिमित्तं नागरजनसमूहनाचिह्नतूर्यवादने निमित्ते प्रेक्षानिमित्तं राजानुज्ञातनाटकादिप्रयोगदर्शने निमित्ते अग्निनिमित्तं च स्वपरगृहाद्यग्निदीपने निमित्ते च अग्निग्रहणस्योपलक्षणार्थत्वादन्यस्मिन्नपि भयहेतौ निमित्ते, अग्राह्याः अक्षणसञ्चारिणो न ग्राह्याः किन्तु निमित्तं परीक्ष्य मोक्तव्या इत्यर्थः । तथा मुद्राभिश्चाग्राह्याः मन्त्रिनागरिकादिमुद्रोपेताश्चाक्षणचारिणो न ग्राह्याः ।

चाररात्रिष्विति । चारः सर्वसञ्चारः तत्सम्बन्धिनीषु रात्रिषु अनुमतसर्वसञ्चारासु महोत्सवादिरात्रिष्वित्यर्थः, प्रच्छन्नविपरीतवेषाः प्रच्छन्ना अवगुण्ठनादिसंवृतस्वरूपाः विपरीतवेषाः पुंवेषाः स्त्रियः स्त्रीवेषाः पुरुषाश्च राजाज्ञानिष्कासिताः, प्रव्रजिताः परिव्राजकाः, दण्डशस्त्रहस्ताश्च दण्डपाणयः शस्त्रपाणयश्च, मनुष्याः, दोषतो दण्ड्याः परीक्ष्य यथादोषोपलम्भं दण्डनीयाः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रक्षिणामवार्यं वारयतां वार्यं चावारयतामक्षणद्विगुणो दण्डः । स्त्रियं दासीमधिमेहयतां पूर्वः साहसदण्डः, अदासीं मध्यमः, कृतावरोधामुत्तमः, कुलस्त्रियं वधः ।

चेतनाचेतनिकं रात्रिदोषमशंसतो नागरिकस्य दोषानुरूपो दण्डः, प्रमादस्थाने च ।

नित्यमुदकस्थानमार्गभूमिच्छन्नपथवप्रप्राकाररक्षावेक्षणं, नष्टप्रस्मृतापसृतानां च रक्षणम् ।

बन्धनागारे च बालवृद्धव्याधितानाथानां जातनक्षत्रपौर्णमासीषु विसर्गः । पुण्यशीलाः समयानुबद्धा वा दोषनिष्क्रयं दद्युः ।

रक्षिणामिति । अवार्यम् अभ्यनुज्ञाताक्षणसञ्चारं सूतिकाशुश्रूषुप्रभृतिं, वारयतां, वार्यं च सामान्यजनम्, अवारयतां, रक्षिणां नागरिकपुरुषाणाम्, अक्षणद्विगुणः अक्षणसञ्चारविहितदण्डद्विगुणः सार्धपणद्वयात्मकः, दण्डः । स्त्रियं दासीम् अन्यदीयाम्, अधिमेहयतां बलाद् गच्छतां रक्षिणां, पूर्वः साहसदण्डः । अदासीं गणिकाम् अधिमेहयतां, मध्यमः साहसदण्डः । कृतावरोधां दासीमदासीं वा केनचिद् भार्यात्वेन परिगृहीताम्, अधिमेहयताम्, उत्तमः साहसदण्डः । कुलस्त्रियम्, अधिमेहयतां, वधः प्राणवियोजनं दण्डः ।

चेतनाचेतनिकमिति । चेतनभवमचेतनभवं च, रात्रिदोषं रात्रिदृष्टममङ्गलम्, अशंसतः अनिवेदयतः, नागरिकस्य पौरस्य, दोषानुरूपो दण्डः कल्प्यः । प्रमादस्थाने च प्रमादो रक्षिपुरुषाणां रक्षाव्यापारशैथिल्यं तस्य स्थाने, हेतुभूते मद्यपानादौ च, दोषानुरूपो दण्डः ।

नित्यमिति । उदकस्थानानि नदीकूपतटाकादीनि, मार्गाः प्रवेशनिर्गमद्वाराणि, भूमयः स्थलानि, छन्नपथाः सुरुङ्गादिमार्गाः, वप्राः प्राकाराधाराः, प्राकारा वरणाः, रक्षाः अट्टालकपरिखादयः, एषामुदकस्थानादीनां सप्तपदार्थानामवेक्षणं परीक्षणं, नित्यं प्रतिदिवसानुष्ठेयं कर्म भवति नागरिकस्य । नष्टप्रस्मृतापसृतानां च नष्टानां स्वामिप्रमादगलितानां भूषणादीनां प्रस्मृतानां स्वामिविस्मृतानाम् अपसृतानां स्वयमपगतानां द्विपदचतुष्पदानां च, रक्षणं, नित्यं नियतानुष्ठेयम् आ स्वामिदर्शनात् ।

बन्धनागारे चेति । कारागृहे च स्थितानां, बालादीनां चतुर्णां, जातनक्षत्रपौर्णमासीषु राज्ञो वार्षिकजन्मर्क्षोत्सवेषु पूर्णिमासु च, विसर्गः बन्धनगृहाद् मोक्षणं, कर्तव्यमिति शेषः । पुण्येत्यादि । पुण्यशीलाः धर्माचरणस्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दिवसे पञ्चरात्रे वा बन्धनस्थान् विशोधयेत् ।
कर्मणा कायदण्डेन हिरण्यानुग्रहेण वा ॥
अपूर्वदेशाधिगमे युवराजाभिषेचने ।
पुत्रजन्मनि वा मोक्षो बन्धनस्य विधीयते ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे षट्त्रिंशोऽध्यायः
नागरिकप्रणिधिः । आदितः सप्तपञ्चाशः ॥
एतावता कौटलीयस्यार्थशास्त्रस्याध्यक्षप्रचारो
द्वितीयमधिकरणं समाप्तम् ॥

भावाः कुतोऽपि यादृच्छिकाद् वृत्तव्यतिक्रमात् प्रसक्तकारागृहप्रवेशा इत्यर्थः, समयानुबद्धा दोषनिष्क्रयं दद्युः समयेन आयतिविशुद्धिप्रातिभाव्यसंविदा प्रतिबद्धाः कृतदोषानुरूपं हिरण्यदण्डं दद्युः, बन्धनगृहे प्रवेशाभावाय । तदिदं बन्धनगृहप्रवेशनपक्षप्रतिक्षेपकं पक्षान्तरं वाशब्दो द्योतयति ।

अध्यायान्ते श्लोकावाह—**दिवस** इति । दिवसे प्रतिदिवसं, पञ्चरात्रे वा प्रतिपञ्चरात्रं वा, बन्धनस्थान्, विशोधयेत् विशोधनं दण्डग्रहणेन दोषनिष्क्रयं कारयेत् । कथं, कर्मणा भारवहनशकटाकर्षणादिना दण्डदानासामर्थ्ये, कायदण्डेन शरीरताडनादिना कर्मकरणासौकर्ये, हिरण्यानुग्रहेण वा हिरण्यग्रहणरूपेणानुग्रहेण वा बन्धनस्थगुणित्वे । इह केचिद् 'विशोधयेदि'-त्यस्यावृत्त्या 'बन्धनगतान् विशोधयेत् सुस्था दुःस्था वेति परीक्षेते'त्यर्थान्तरमपि संगृह्णन्ति ॥

बद्धमोक्षनिमित्तान्याह — **अपूर्वे**त्यादि । अपूर्वदेशाधिगमे शत्रुजयनिमित्ते नूतनदेशलाभे । शेषं सुगमम् ॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने ।
आध्यक्ष्याख्याधिकरणं द्वैतीयीकमपूर्यत ॥

इति श्री**वञ्चिमण्डलमहाराजा**श्रितस्य ताम्रपर्णीतीरवर्ति**तरुवाग्रहारा**भिजनस्य श्री**सीताम्बाश्रीरामसुब्रह्मण्यार्य**सूनोर्महामहोपाध्याय**गणपतिशास्त्रिणः** कृतिषु कौटलीयार्थशास्त्रव्याख्यायां **श्रीमूला**ख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे षट्त्रिंशोऽध्यायः नागरिकप्रणिधिः ।
अध्यक्षप्रचारो द्वितीयमधिकरणं समाप्तम् ॥

प्रथमसम्पुटः समाप्तः ।

शुभं भूयात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शुद्धिपत्रम् ।

पृष्ठम्.	पङ्क्तिः.	अशुद्धम्.	शुद्धम्.
१७	२४	च	वा
५६	२०	वन्तिभ	भवन्ति
६६	१८	ण	णे
,,	१९	या	यो
३१३	२७	त्र धे	त्र पष्ठौहीं भारवहनसमर्था धे
३३०	२५	नी, ह	नी ह
३५८	८	मप्ताम्	माप्तम्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

READY FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah.	1	0	0
स्यानन्दूरपुरवर्णनप्रबन्धः (Kavya) Syânandûrapuravarnanaprabandha by H. H. Svâti Sri Râma Varma Mahârâjah, with the commentary Sundarī of Râjarâja Varma Koil Tampurân.	2	0	0

Trivandrum Sanskrit Series.

	RS.	AS.	P.
No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni.	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni.	0	2	0
No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna (Second Edition).	0	4	0
No. 4—शिवलीलार्णवः (Kâvya) by Nîlakantha Dîkshita.	2	0	0
No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary	2	12	0
No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva.	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa.	1	0	0
No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin.	0	8	0
No. 10—मातङ्गलीला (Gajalakshana) by Nîlakantha.	0	8	0
No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma	2	4	0
No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda.	0	8	0
No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma.	2	0	0

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

	RS.	AS.	P.
No. 14—नीतिसारः (Niti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition).	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I. 1st & 2nd Kândas).	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakra kavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I. 1st & 2nd Sargas).	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II. 3rd Kânda).	2	4	0
No. 30—वास्तुविद्या (Silpa).	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III. 4th, 5th & 6th Kândas).	1	0	0

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

	RS.	AS.	P.
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana.	0	8	9
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râja chûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III. 6th, 7th & 8th Sargas).	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tikâsarvasva of Vandyaghatîya Sarvânanda (Part I. 1st Kânda).	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Srî Sankara Bhagavat Pâda.	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshiraswamin and Tikâsarvaswa of Vandyaghatiya Sarvânanda (Part II. 2nd Kânda 1—6 Vargas).	2	8	0

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

	RS.	AS.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya).	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nilakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Sarasvatî. (Part I.)	1	12	0
No. 48— Do. Do. (Part II.)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankâra) by Singa Bhûpâla.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part III. 2nd Kânda 7—10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part IV. 3rd Kânda)	1	8	0
No. 53—शब्दनिर्णयः (Vedânta) by Prakâsâtmayatîndra	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः (Vyâkarana)	0	4	0
No. 55—मत्तविलासप्रहसनम् (Nâtaka) by Srî Mahendravikramavarman.	0	8	0
No. 56—मनुष्यालयचन्द्रिका (Silpa).	0	8	0
No. 57—रघुवीरचरितम् (Kâvya).	1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Saraswatî (Part III.)	2	0	0
No. 59—नागानन्दम् (Nâtaka) by Sriharshadeva with the commentary Nâgânandavimarsini of Sivarâma.	3	4	0
No. 60—लघुस्तुतिः (Stuti) by Srî Laghubhattâraka with the commentary of Srî Râghavânanda	0	8	0

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

	RS.	AS.	P.
No. 61—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Sri Krishnânanda Sarasvati (Part IV.)	1	8	0
No. 62—सर्वमतसंग्रहः (Sarvamatasangraha).	0	8	0
No. 63—किरातार्जुनीयम् (Kâvya) by Bharavi with the commentary Sabdârthadîpika of Chitrabhanu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः (Kâvya) by Kâlidasa with the commentary Pradîpa of Dakshinâvartanatha.	1	0	0
No. 65—मयमतम् (Silpa) by Mayamuni.	3	8	0
No. 66— महार्थमञ्जरी (Darsana) with the commentary Parimala of Maheswarânanda.	2	8	0
No 67—तन्त्रसमुच्चयः (Tantra) by Nârâyana with the commentary Vimarsini of Sankara. (Part I. 1–6 Patalas)	3	4	0
No. 68—तत्त्वप्रकाशः (Agama) by Srî Bhojadeva with the commentary Tâtparyadîpikâ of Srî Kumara.	2	0	0
No. 69—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isânasivagurudevamisra (Part I. Sâmānyapâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्पः (Part I).	2	8	0
No. 71— तन्त्रसमुच्चयः (Tantra) by Nârâyana with the commentary Vimarsini of Sankara (Part II. 7—12 Patalas).	3	8	0
No. 72— ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isanasivagurudevamisra (Part II. Mantrapada)	4	0	0
No. 73 — ईश्वरप्रतिपत्तिप्रकाशः (Vedanta) by Sri Madhusudanasarasvati	0	4	0

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

	RS.	AS.	P.
No. 74— श्रीयाज्ञवल्क्यस्मृतिः (Dharmasâstra) with the commentary Bâlakrîdâ of Visvarûpâchârya. (Part I—Âchâra and Vyavahâra Adhyâyas)	4	0	0
No. 75—शिल्परत्नम् (Silpa) by Srîkumâra (Part I).	3	4	0
No. 76—आर्यमञ्जुश्रीमूलकल्पः (Part II).	3	4	0
No. 77—ईशानशिवगुरुदेवपद्धतिः by Isanasivagurudeva-misra (Part III. Kriyapada 1—30 Patalas).	3	4	0
No. 78—आश्वलायनगृह्यसूत्रम् with the commentary Anavila of Haradattacharya.	5	0	0
No. 79—अर्थशास्त्रम् of Kautalya with the commentary by Mahamahodpahyaya T. Ganapati Sastri (Part I—1 & 2 Adhikaranas).	8	0	0

Apply to:—

The Curator,

for the publication of Sanskrit Manuscripts,

Trivandrum.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

IN THE PRESS.

1. Manjusrímúlakalpa. (Part III).
2. Kâvyaprakâsa (Alankâra) with the commentary Sampradâyaprakâsinî of Sri Vidyâchakravartin and the Sâhityachûḍâmaṇi of Bhaṭṭagopâla.
3. Îsânasivagurudevapaddhati (Part IV).
4. Yâjnavalkyasmriti with the commentary Bâlakridâ of Visvarûpâcharya (Part II).
6. Arthasâstra of Kauṭalya with commentary (Part III).

Undertaken for Publication.

1. Pramâṇalakshaṇa (Mîmâmsa) by Sarvajnatmapada.
2. Sarasvatîkaṇṭhâbharaṇa (Vyâkaraṇa) of Bhoja with Vritti of Nârâyaṇadandanatha.
3. Vishṇusamhitâ (Tantra).
4. Slokavartika (Mîmâmsa) with Kasikâtîkâ of Sucharitamisra.
5. Âsvalâyanagrihyabhâshya of Devasvâmin.
6. Ashtangahridaya (with the commentary Hridayabodhika.
7. Rasavaiseshika of Bhadantanagarjuna with Bhashya.
8. Nyayasarapadapanchika of Vasudeva.
9. Vedantaparibhasha (with commentary of Peddadikshita).

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अलमारी

१६

खाना सं

विभाग

बस्ता सं

फाइल की संख्या

क्रम-संख्या

फाइल का शीर्षक

विभाग	संख्या	सम्बन्धित फाइल विषय

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh